	षष्ठेऽध्याये षष्ठः खण्डः	...	२६६—२७२
१.	पर्यायेष्वस्तुतेषु प्रभाते जाते सर्वेभ्य एकस्य पर्यायस्य संभरणम्	...	२६६

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

सूत्राङ्कः	विषयः		पृष्ठम्
२.	पर्यायसंभरणविधिक्रमनियमः	...	२६६
३.	द्वयोः पर्याययोरस्तुतयोः सत्योः प्रभाते जाते द्वाभ्यामेकपर्यायसंभरणम्	...	२६६
४.	सर्वेषां पर्यायाणां स्तोमेन निर्हसिकरणम्	...	२६७
५-७:	एकस्मिन् पर्यायेऽस्तुते प्रभाते जाते पर्यायसंभरणं तत्र विकल्पविधिकथनञ्च	...	२६७
८.	आश्विनायैकस्तोत्रियशंसनम्	...	२६८
९.	तस्य स्तोत्रियस्यानुदैवतं यथास्तुतं शंसनम्	...	२६८
१०.	आश्विनशस्त्रत्रिभागपरिमाणकथनम्	...	२६८
११.	संसवप्रायश्चित्तोपक्रमः	...	२६९
१२.	नद्या वा पर्वतेन वाऽन्तर्हितेष्वपि वैरिषु संसवप्रायश्चित्तकरणमतान्तरम्	...	२७०
१३.	संसवे कर्तव्ये सति तदहनि प्रातरनुवाकादिदेवताऽऽवाहनपर्यन्तं कर्मणः सत्वरं कर्तव्यत्वम्	...	२७०
१४.	मरुत्वतीये शस्त्रे नित्यसूक्तस्य पुरस्तात् कयाशुभेति सूक्तस्य शंसनम्	...	२७०
१५.	निष्केवल्ये शस्त्रे नित्यसूक्तस्य पुरस्ताद् यो जात एव इति सूक्तस्य शंसनम्	...	२७०
१६.	वैश्वदेवे शस्त्रे वैश्वदेवसूक्तस्य पुरस्तान् ममाग्ने वर्च इति सूक्तस्य शंसनम्	...	२७१
१७.	पूर्वोक्तकयाशुभीयादिसूक्तेषु निविदामाधानविकल्पोऽयेषामुद्धारश्च	...	२७२
१८.	निविदां शंसनस्थानातिक्रमे इतिकर्तव्यताकथनम्	...	२७१
	षष्ठेऽध्याये सप्तमः खण्डः	...	२७३—२७६
१.	सोमहवनातिक्रमे स्तुतशस्त्रवृद्धिविधानम्	...	२७३
२.	प्रातःसवने सोमातिरेके विधानम्	...	२७३
३.	वैष्णव्यर्चा यजनविकल्पः	...	२७४
४.	गाणगारिमतेन ऐन्द्रावैष्णव्यर्चा यजनविधानम्	...	२७४
५.	ऐन्द्रावैष्णव्या ऋचः कथनम्	...	२७४
६.	माध्यन्दिने सवने सोमातिरेके शस्त्रकथनम्	...	२७५

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

सूत्राङ्कः	विषयः		पष्ठम्
७.	तृतीयसवने सोमातिरेके इतिकर्तव्यताविधानम्	...	२७५
८.	अतिरात्रे सोमातिरेके विधिवथनम्	...	२७६
९.	अतिरात्रे सोमातिरेके याज्याकथनम्	...	२७६
	षष्ठेऽध्यायेऽष्टमः खण्डः	...	२७७—२८१
१.	क्रीते सोमे नष्टे दग्धे वा प्रायश्चित्तविधानम्	...	२७७
२.	सदोहविधनिषु दग्धेषु प्रायश्चित्तविधानम्	...	२७७
३.	पूर्वोक्तनिमित्तेषु समन्त्रं वा कर्मविधानम्	...	२७७
४.	नष्टे दग्धे वा सोमेऽन्यस्य सोमस्याभिषवणविधानम्	...	२७८
५.	पुनः सोमालाभे पूतीकस्य तदलाभे च फाल्गुनस्य तृणस्य विकल्पविधानम्	...	२७८
६.	सोमालाभे पूतीकैः सह अन्यासां कासाञ्चिदोषधीनां विकल्पविधानम्	...	२७८
७.	पूर्वोक्तनिमित्तेषु प्रायश्चित्तं वा कृत्वोत्तरकर्मविधानम्	...	२७८
८.	सुत्यासु पूर्वोक्तनिमित्तपाते पूर्वोक्तस्यैव प्रायश्चित्तस्य विधानम्	...	२७९
९.	प्रातःसवने सद्योदुग्धस्य पयसः पूतीकसोमेन मिश्रणम्	...	२७९
१०.	माध्यन्दिने सवनेऽग्नावधिश्रृतस्य पयसः पूतीक-सोमेन मिश्रणम्	...	२७९
११.	तृतीयसवने दध्नः पूतीकसोमेन मिश्रणम्	...	२७९
१२.	पूतीकसोमेन फाल्गुनानां मिश्रणे श्रायन्तीयवारवन्तीय-सामनी ब्रह्मवारवन्तीयसाम्नोः स्थाने प्रयोज्ये	...	२८०
१३.	पूतीकसोमेन फाल्गुनानां मिश्रणे श्रायन्तीयं साम यज्ञायज्ञीयस्य स्थाने प्रयोज्यमिति मतान्तरम्	...	२८०
१४-१५.	एकगोदक्षिणाकयज्ञं कृत्वोदवसानीयामिष्टिञ्च कृत्वा पुनर्यजनं तत्र पूर्वस्य क्रतोर्दक्षिणादानञ्च	...	२८०
१६.	पूतीकैः प्रारब्धेऽपि कर्मणि पुनः सोमलाभे तदाद्येव सोमेन कर्मकरणम्	...	२८१
	षष्ठेऽध्याये नवमः खण्डः	...	२८२—२८५
१.	दीक्षितानां रोगे जाते कर्तव्यताविधानम्	...	२८२

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

सूत्राङ्कः	विषयः		पृष्ठम्
२.	उपतप्तमाप्लाव्य अनुमार्जनम्	...	२८३
३.	अनुमार्जनमन्त्रकथनम्	...	२८३
४.	सर्वेषां स्वस्थानगमनम्	...	२८३
५.	तार्क्ष्यसूक्तात् पूर्वं शंसनीयस्य मन्त्रस्य कथनम्	...	२८४
६.	ऐकाहिकादन्यद् वैश्वदेवसूक्तं शस्त्वा स्वस्त्यात्रेये निविद्धानम्	...	२८४
७.	दीक्षितेषु रोगरहितेषु प्रकृतिवत् कर्मकरणम्	...	२८५
	षष्ठेऽध्याये दशमः खण्डः	...	२८६
१.	दीक्षिते मृते कर्तव्यताविधानम्	...	२८६
२.	केशादिवापनविधानम्	...	२८६
३.	नलदेन सुगन्धिद्रव्येण अनुलेपनविधानम्	...	२८६
४.	प्रेताय नलदमालादानम्	...	२८६
५.	प्रेतशरीरस्य निष्पुरीषकरणे मतान्तरम्	...	२८७
६.	अहतवाससः पादमात्रं खण्डमवच्छिद्य शेषेण प्रेतस्य पादवर्जं छादनम्	...	२८७
७.	अवच्छिन्नवस्त्रखण्डस्य मृतदीक्षितपुत्रैरात्मीकरणम्	...	२८७
८.	अग्निमुत्पाद्य मृतदीक्षितस्य दाहकरणम्	...	२८८
९.	श्रोत्रियागाराद् अग्निमाहृत्य अनाहिताग्नेर्दाहकरणम्	...	२८८
१०.	अनाहिताग्नेः पत्न्याः मरणे आहार्येणाग्निना तस्या दहनम्	...	२८८
११.	दाहकर्म कृत्वा परावृत्य अहःशेषकर्मसम्पादनम्	...	२८९
१२.	परेऽहनि प्रातरभिहिङ्काराभ्यासरहितानि शस्त्रानुवचनादीनि कर्तव्यानि	...	२८९
१३.	ग्रहग्रहणात् पूर्वंस्योपवेशनविधेः कथनम्	...	२९०
१४.	होतुः उपवेशनस्थानकथनम्	...	२९०
१५.	अध्वर्युच्छन्दोगानामुपवेशनस्थाननिर्देशः	...	२९०
१६.	छन्दोगानां स्तोत्रकथनम्	...	२९०

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

सूत्राङ्कः	विषयः		पृष्ठम्
१७.	अनन्तरं होतुः स्तोत्रियवचनम्	...	२९१
१८.	यमदैवत्यानामृचां वचनम्	...	२९१
१९.	अन्यासामनुवचनीयानामृचां कथनम्	...	२९१
२०.	यामीनामृचां वचनम् अस्थिसंचयादि च	...	२९२
२१.	भक्षाणां प्राणभक्षणं सोमस्य निनयनञ्च	...	२९२
२२.	अहःसमापनमग्निष्टोमविधानञ्च	...	२९३
२३.	अस्थिकुम्भस्य अवभृथदेशप्रापणविकल्पः	...	२९३
२४.	अरणिमन्थनोद्गतेन अग्निना वा दग्ध्वा अस्थिकुम्भं निखाय संवत्सरेऽग्निष्टोमेन याजनम्	...	२९३
२५.	मृतस्य नेदिष्ठिनं दीक्षयित्वा सत्रसमापनम्	...	२९४
२६.	नेदिष्ठिनि गृहपतौ वाऽसति उत्थानविकल्पः	...	२९४
२७.	स्तुतशस्त्रयोः उक्तवदभिहिङ्काराभ्यासरहितत्वम्	...	२९५
२८.	एकाहेषु मृतेऽपि यजमानेऽहःसमाप्तिपर्यन्तं तस्य पूर्वासने शयनम्	...	२९५
२९.	यजमानमरणे आलेखनमतेन कर्तव्यताविधानम्	...	२९६
३०.	यजमानमरणे आश्मरथ्यमतेन कर्तव्यताविधानम्	...	२९६
३१.	अत्रास्यैवावभृथस्य नियमो नाऽन्यस्य	...	२९७
	षष्ठेऽध्याये एकादशः खण्डः	...	२९८—३०३
१.	अग्निष्टोमादिसप्तसंस्थानां गणनम्	...	२९८
२.	उक्तसंस्थानां प्रत्येकमन्ते यज्ञपुच्छसंज्ञककर्मकरणम्	...	२९८
३.	अनुयाजादि शंयुवाकान्तं कर्मणः पशुबन्धवत् कर्तव्यत्वम्	...	२९९
४.	द्वयोः सूक्तवाकप्रैषयोरुत्तमस्यात्र कर्तव्यत्वम्	...	२९९
५.	अवीवृधतेत्यत्र देवताध्याहारमीमांसा	...	२९९
६.	सवनीयस्य पशोः पशुपुरोडाशकरणे वचनम्	...	२९९
७.	देवतापुरोडाशयोः सम्बन्धः	...	३००
८.	शंयुवाकादूर्ध्वं हारियोजनग्रहकर्म	...	३०१
९.	तस्यानुवाक्याप्रैषयाज्यानिर्देशः	...	३०१
१०.	अन्त्येष्वहःसु याज्यानुवाक्ययोर्विधानम्	...	३०१

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

सत्राङ्कः	विषयः		पृष्ठम्
११.	अनन्त्येष्वहःसु याज्यानुवाक्योर्निदेशः	...	३०१
१२.	अनन्त्येष्वहःसु अनुवाक्याविकल्पः	...	३०२
१३.	हारियोजनस्यानुवषट्कारेऽक्ते मैत्रावरुणकर्तृकाति-प्रैषस्य विधानम्	...	३०२
१४.	अतिरात्रेऽतिप्रैषे श्वःस्थानेऽद्येत्यूहः	...	३०२
१५.	तत्र अद्य सुत्यामित्यूहः	...	३०३
१६.	अतिप्रैषान्तं श्रुत्वाऽऽग्नीध्रकर्तृकं श्वःसुत्यामिति वचनम्	...	३०३
	षष्ठेऽध्याये द्वादशः खण्डः	...	३०४
१—२.	द्रोणकलशावेक्षणाद्याग्नीध्रीये होमान्तं कर्म	...	३०४
३.	सर्वेषामाहवनीये षण्णां षण्णां शकलानामभ्याधानम्	...	३०५
४-५.	सर्वेषां द्रोणकलशाद्धाना गृहीत्वा समन्त्रमवेक्षणं निवपनञ्च	...	३०५
६.	सर्वेषां प्रत्येत्य जलपूर्णचमसानां प्रदक्षिणीकरणम्	...	३०६
७.	सर्वेषामात्मनः पर्युक्षणविधानम्	—	३०६
८.	वामपाणिना पर्युक्षणविकल्पः	...	३०६
९.	पर्युक्षणमन्त्रकथनम्	...	३०६
१०.	पिण्डपितृयज्ञवज्जीवमृतेभ्यः पर्युक्षणव्यवस्थाकथनम्	...	३०७
११.	पाणींश्चमसेष्ववधाय प्राणभक्षं भक्षयित्वाऽभिमर्शनम्	...	३०७
१२.	आग्नीध्रीये दधिद्रप्सान् प्राश्य सख्यविसर्जनम्	—	३०८
	षष्ठेऽध्याये त्रयोदशः खण्डः	...	३०९—३१३
१.	देवपत्नीसंयाजाचरणमवभृथं प्रति गमनञ्च	...	३०९
२.	व्रजनकाले निधनसाम्नः प्रयोगः	—	३०९
३.	तिष्ठद्भिः सर्वैरवभृथेष्टिचरणम्	—	३०९
४.	अवभृथेष्टयां प्रयाजादिकर्तव्याकर्तव्यताविधानम्	...	३०९
५.	तत्र च्छन्दोविधानम्	—	३१०
६.	तत्र देवताभिधानम्	—	३१०
७.	याज्यानुवाक्ययोः स्विष्टकृद्देवतायाश्च विधानम्	...	३१०
८.	अग्नीवरुणयोर्याज्यानुवाक्याकथनम् इष्टिसमाप्तौ च पादानां समन्त्रमुदकान्तावधानम्	...	३११

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

सूत्राङ्कः	विषयः		पृष्ठम्
९.	तत आचमनमन्त्रकथनम्	...	३११
१०.	पूर्वोक्तमन्त्रत्रयस्य इतिकर्तव्यताविधानम्	...	३११
११.	तत आचम्य समन्त्रं स्नानविधानम्	...	३११
१२.	उक्तमन्त्रैर्दीक्षितादीक्षितानामभिषेकमात्रकरणम्	...	३१२
१३.	एषामभिषिक्तानामुन्नेतृकृतमुन्नयनम्	...	३१२
१४.	उन्नीयमानानां मन्त्रजपः	...	३१२
१५.	उदकादुद्गमनमन्त्रकथनम्	...	३१२
१६.	अत ऊर्ध्वं समाप्तिपर्यन्तं हृदयशूलवत्कर्मकरणम्	...	३१२
१७.	समाप्तकर्मणां संस्थाजपेनोपस्थानम्	—	३१३
	षष्ठेऽध्याये चतुर्दशः खण्डः	...	३१४
१.	गार्हपत्येऽग्नावुदयनीयेष्टिप्रयोगविधानम्	...	३१४
२.	प्रायणीयेष्टिवदुदयनीयेष्टिविधानम्	...	३१४
३.	प्रायणीयायां प्रथमा पथ्या स्वस्तिर्देवता इहोत्तमा भवतीति कथनम्	—	३१४
४.	याज्यानुवाक्ययोर्मिथो वैपरीत्यविधानम्	...	३१४
५.	प्रायणीयोदयनीययोः कर्तृसाधारण्यविधानम्	...	३१४
६.	संयाज्ययोः प्रायणीयेष्टिवत्कर्तव्यत्वम्	...	३१५
७.	उदयनीयेष्टिसमाप्तावनूबन्ध्येष्टिविधानम्	...	३१५
८.	सदसि अनूबन्ध्येष्टिप्रयोगविधानमिति मतप्रदर्शनम्	—	३१५
९.	उत्तरवेद्यामनूबन्ध्येष्टिप्रयोग इति मतान्तरम्	—	३१५
१०.	हुतायां वपायां त्वाष्ट्रेण पशुना चरणम्	...	३१६
११.	यूपस्य अञ्जनाद्युत्सर्गकर्मविधानम्	...	३१६
१२.	अध्वर्युवद्धोतुरपि पशुकर्मविधानम्	...	३१७
१३.	संप्रैषवत् पश्वङ्गदेवतानामादेशकरणम्	—	३१८
१४.	पाशुककर्मवदपाशुकेऽपि कर्मणि प्रैषनिपातानां वचनम्	—	३१८
१५.	अनूबन्ध्ये पशुपुरोळाशमनु देविकाहविषां निर्वपणे देवतानां निर्देशः	—	३१९
१६.	देवतानां याज्यानुवाक्याप्रदर्शनम्	—	३१९
१७.	पशुपुरोडाशमनु देवीनां हविषां निर्वपणे देवतानां		

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

सूत्राङ्कः	विषयः		पृष्ठम्
	निर्देशः	—	३२०
१८.	उक्तदेवतानां याज्यानुवाक्याकथनम्	—	३२०
१९.	पश्वलाभे पयस्यया कर्मकरणम्	—	३२१
२०.	अस्यामिष्टौ आज्यभागादिवाजिनान्तं कर्मकरणम्	—	३२१
२१.	सर्वेषां कर्मिणां वाजिनभक्षणम्	—	३२२
२२.	सर्वेषां दीक्षितानां वाजिनभक्षणम्	—	३२२
२३.	सर्वेषां दीक्षितानामुदवसानीयेष्टिचरणम्	—	३२२
२४.	अविकृतायाः पौनराधेयिक्या इष्टेरुदवसानीयेष्टित्वेन निरूपणम्	—	३२३

—०—

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

शुद्धि-पत्रम्

पृष्ठम्	पङ्क्तिः	अशुद्धम्	शुद्धम्
९	७	(आश्वा ३, १, १६)	(आश्वा ३, १, १७)
१४	२२	वष्टकारः	वषट्कारः
१५	१७	°स्वरयोर्नियम°	°स्वरयोरनियम
२२	२०	यथासुत्योपसदः	यथा सुत्योपसदः
२७	१२	प्राष्णीं	पार्ष्णि
२८	१६	क्षयमित्यर्धं	क्षयमित्यर्धर्चं
३१	२०	°मुपगेषां	°मुपगेषं
३२	१०	°सेञ्चन°	°सेचन°
३५	२७	°तोत्तमाया	°तोत्तमया
४४	१६	वषटकर्ता	वषट्कर्ता
५१	१०	सुष्ठ्यप°	सुष्ठ्वप°
५६	१५	औदुम्बर्याभि°	औदुम्बर्या अभि°
६०	२	प्रषिता°	प्रेषिता°
६९	१०	°श्वमेधा	°श्वमेध
७१	२२	°स्तस्मदानीता	°स्तस्मादानीता°
७५	१९	प्रेंष्ठं	प्रेष्ठं
७६	४	षण्णां	षण्णां
७६	६	त्रिमूंर्धानि°	त्रिमूर्धान°
८४	२१	युवोरू	युवोरु
८४	२४	परि ज्मा	परिज्मा
८७	२४	सप्तेव	सप्तैव
९३	३	°गावानुत्तराः	°गावानमुत्तराः
९३	१८	अर्धर्चं	अर्धर्चं
९८	२	परिधाना	परिधाना-
१०३	२४	त्रिर्ब्रूयात्	त्रिर्ब्रूयात्
१०८	१७	उपरवारादयः	उपरवादयः
११०	२	सर्वानि	सर्वान्
"	२०	निरसनोवेशने	निरसनोपवेशने

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

पृष्ठम्	पङ्क्तिः	अशुद्धम्	शुद्धम्
११४	८	अनुवचन°	अनुसवन°
११५	२०	असौ, यज°	असौ-यज°
११७	१७	°वसान लक्ष°	°वसानलक्ष°
१२२	१२	चोदिता नां	चोदितानां
१२४	१६	(४, ५०, १०)	(ऋ ४, ५०, १०)
१३२	१४	कर्णाभ्याम	कर्णाभ्याम्
१३४	११	दक्षितो°	दीक्षितो°
१३५	२५	चाऽग्नीध्र°	चाऽग्नीध्र°
१३६	२०	षोडशिपात्रं	षोडशिपात्रे
१३९	६	गाणगारितः	गाणगारिरतः
१४४	१४	°मेव धर्मः	°मेष धर्मः
१४४	१५	सवहवींषि	सर्वहवींषि
१४६	१२	अध्वर्येणा	अध्वर्युणा
१४९	२	पृथगध्वर्यः	पृथगध्वर्युः
१५०	१८	पदशस्य न्याये	पदशस्यन्याये
१५२	२३	लघ	लघु
१५३	२३	(१ ओ)	(? ओ)
१५९	१८	°परिधायासु	°परिधानीयासु
१६७	३	षोडशि नः	षोडशिनः
१७८	१२	ग्रावस्तोत्राकर्तृत्वं	ग्रावस्तोत्रकर्तृत्वं
१८०	२०	°भिसवेषु	°भिषवेषु
१९७	६	मज्ञानः	मृजानः
२००	५	°निर्दिशति	°निर्दिशति
,,	११	शसेत्	शंसेत्
२०३	१९	ष्टव्यं	द्रष्टव्यं
२०४	१७	सुरूपकृत्स्नु°	सुरूपकृत्नु°
,,	२६	(ऋ ७, १००, १५)	(ऋ ७, १००, ५)
२१५	४	सावि त्रेण	सावित्रेण
२१७	१३	न वेति	नवेति
२३३	२	षोडशीक्रतोः	षोडशिक्रतोः
,,	१३	षोडशीशस्त्रम्	षोडशिशस्त्रम्
२३७	१५	(कौ ४, ६४-४८)	(कौ ४, ६४-६८)
२३८	१५	पूर्वंचोदितानि	पूर्वंचोदितानि

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

पृष्ठम्	पङ्क्तिः	अशुद्धम्	शुद्धम्
२४६	२२	शस्त्वा	शस्त्वा
२४८	५	॥ ३ ॥	॥२—३ ॥
२६४	१५	आश्विनग्रहे	आश्विनग्रहेण
२७१	६	बर्चः	वर्चः
२७२	११	(७, १, १)	(ऋ ७, १, १)
२७९	२	पञ्चभ्यां प्रसुतः सप्तभ्यां	पञ्चम्यां प्रसुतः सप्तम्यां
२८०	१४	पूतीकानाँ	पूतीकानां
२९०	२०	अध्वर्यः	अध्वर्युः
२९२	९	(आगृ ४, ५, ५-५)	(आगृ ४, ५, ४-५)
३१५	२	कुयुः	कुर्युः
३१७	२७	अध्वर्यूणां	अध्वर्यूणां
३२०	१६	आद्यां	आ द्यां
,,	२०	आद्यां	आ द्यां
३४४	१ स्तम्भे २७	आयं गौः (ऋ १०, १८९, १-३) ६. १०. १६ (२९०)	(नापेक्षितम्)
३४७	१ स्तम्भे २२, २३ मध्ये (अमुद्रितम्)		(योज्यम्) आयं गौः (ऋ १०, १८९, १-३) ६.१०.१६ (२९०)

—०—

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

आश्वलायन-श्रौतसूत्रम्

देवव्रात-भाष्य-संवलितम्

अथ पूर्वषट्कस्य[1] चतुर्थोऽध्यायः

[तत्र प्रथमः खण्डः]

'अग्न्याधेयप्रभृतीन्याह वैतानिकानि' (आश्रौ १, १, २) इति । तानि वैतानिकानि कर्माणि[2] द्विविधानि – हविर्यज्ञा इष्टिपशुसंज्ञाकाः[3], ते व्याख्याताः सप्रायश्चित्तिकाः*। इतो वक्ष्यन्ते सोमाः । ते त्रिविधाः—एकाहाहीनसत्रसंज्ञाः । तेषां ज्योतिष्टोमः प्रकृतिः [4]चतुःसंस्थः । प्रकृतित्वात्[4] स एव पूर्वं वक्ष्यते । तस्याधिकारसूत्रम् इदं भवति—

[आधानानन्तरं दर्शपूर्णमासाभ्यामिष्ट्वेष्टिपशुचातुर्मास्यैश्च सोमेन यजेतेति विधानम्]

दर्शपूर्णमासाभ्यामिष्ट्वेष्टिपशुचातुर्मास्यैरथ सोमेन ॥ १ ॥

सर्वाणि कर्माणि त्रिविधानि भवन्ति, नित्यानि नैमित्तिकानि काम्यानि च । तत्र काम्यानि कामे उत्पन्ने क्रियन्ते आयुष्कामेष्टयादीनि । निमित्ते उत्पन्ने नैमित्तिकानि 'यस्य भार्या गौर्वा यमौ जनयेदिष्टिर्मरुतः' (आश्रौ ३, १३, १२) इत्येवमादीनि । नित्यानि तु नियमेन कर्तव्यानि दर्शपूर्णमासादीनि[5] । यथाकालमनुक्रमेणैवमेके[6] । यथोपपादमपरे[7] । तदुभयमाचार्यो वक्ष्यति । इज्यानुक्रमेण तावद् वसन्ते[8] अग्न्याधेयम् । पौर्णमास्यां[9] दर्शपूर्णमासावारभते[10] । ततो वर्षासु शरदि चाग्रयणेन[11] यजते । तत आधानात् षण्मासे अयनसन्धौ वा ऐन्द्राग्नेन पशुना यजते[12] । ततः फाल्गुन्यां चातुर्मास्यानि प्रारभते । तानि समाप्य सोमेन

---

१. नास्ति मै । २. धर्माणि ब[2] मै पू । ३. °संज्ञकाः मै । *. ? °श्चित्तकाः इति सुपाठः स्यात् । ४-४. °संस्थ (°स्था मै) प्रकृ° मूको । ५. दर्शपौर्ण° ब[2] पू । ६. °लानुक्र° मै । ७. यथोपदेशम° ब[1]; यथोपपद (°दे पू) म° मै पू । ८. तु. आश्रौ २, १, १२ । ९. नास्ति ब[2] मै पू । १०. पौर्णमासावारभते (°न्ते मै) ब[2] मै पू । ११. चाग्राय° मै । १२. यजेत मै ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

यजेतेत्युक्तम् । एवमनुक्रमेण[1] इज्यामाचार्या[2] उपदिशन्ति—दर्शपूर्णमासाभ्यामिष्ट्वा[3], इष्टिपशुचातुर्मास्यैः, [4]अथ सोमेन । अग्नीनाधाय† दर्शपौर्णमासावारभते‡ । ताभ्यामिष्ट्वाऽनन्तरमिष्टिपशुचातुर्मास्यैः[4] । इष्ट्या[5] आग्नेयेष्ट्या[6], पशुना ऐन्द्राग्नेन, चातुर्मास्यैः । अथ सोमेन अथानन्तरं चातुर्मास्यैरिष्ट्वा सोमेन यजेत । एवं कालानुक्रमेणैक इज्यां[7] मन्यन्ते । कर्मानुक्रमेणेत्यपरे[8] । तथाऽऽचार्येण कल्पितम्—अग्नीनाधाय दर्शपौर्णमासाभ्यामिष्ट्वा[9] [10]सोमेन यजेत । एवं कालानुक्रमेणैक इज्यां मन्यन्ते† । तथाचार्येण कल्पितम्—अग्नीनाधाय दर्शपौर्णमासाभ्यामिष्ट्वा‡[10] इष्ट्वा चातुर्मास्यपशुभिरिष्ट्वा अथ सोमेन यजेतेति ॥ १ ॥

यथोपपादमपरे[11] । तदुच्यते—

[दर्शपौर्णमास-सोमयोर्मिथः पौर्वापर्यविषये मतान्तरनिरूपणम्]

ऊर्ध्वं दर्शपौर्णमासाभ्यां यथोपपत्त्येके । प्रागपि सोमेनैके ॥ २ ॥

अग्नीनाधाय दर्शपौर्णमासावारभते[12] । ताभ्यामिष्ट्वा ऊर्ध्वं[13], यद्यदुपपद्यते[14] यथोपपत्ति, यथोपपत्ति इज्यामेके मन्यन्ते । प्रागपि सोमेनैके । दर्शपौर्णमासाभ्यामिति[15] वर्तते । ताभ्यां प्रागपि सोमेन यजेतेत्येके । सोमार्थमाधानं कृत्वा सोमेनेष्ट्वाऽथ दर्शपौर्णमासावारभते[16] । एवमेते त्रय इज्याक्रमा उक्ताः ॥ २ ॥

सोममिदानीं वक्ष्यामः—

[सोमयागोपक्रमः, तत्र ऋत्विङ्निरूपणम्]

तस्य ऋत्विजः ॥ ३ ॥ चत्वारस्त्रिपुरुषाः ॥ ४ ॥

अथ सोमेनेति वर्तते । तस्य सोमस्य ऋत्विजश्चत्वारो भवन्ति त्रिपुरुषाः । [17]त्रयस्त्रयः पुरुषाः[17] एकैकस्य येषां भवन्ति ते त्रिपुरुषाः । ऋत्विजश्च पुरुषाश्च

---

१. एवमेनं क्रमेण ब[1] पू; एवमनं क्रमेण ब[2] । २. माचा° ब[2]; तमाचा° ब[1] पू । ३. दशपौ° ब[2] पू । ४-४. नास्ति ब[1] । †. आधाय ब[2] । ‡. दर्शपूर्णमासावारभेत मै । ५. इष्ट्वा मूको । ६. आग्राय° मै । ७. इज्या ब[2] मै पू । ८. क्रमानु° ब[1] । ९. दर्शपूर्ण° मै । १०-१०. नास्ति मै पू । †. मन्यन्ते । कर्मानुक्रमेणैके इज्यां मन्यन्ते ब[1] । ‡. °मास्यामिष्ट्वा ब[1]; °मास्याभ्यामिष्ट्वा ब[2] । ११. यथपपाद° ब[1]; यथापवाद° ब[2]; यथोपवाद° मै । १२. दर्शपूर्ण° मै । १३. तस्यामिष्ट्वोक्तं ब[2]; °मिष्ट्वोक्तं ब[1] मै पू । १४. यद्युपपद्यते मै; तदुपपद्यते ब[1]; यदुपपद्यते पू । १५. दर्शपूर्ण° मै । १६. दर्शपूर्णमासावारभेत मै; °रभन्ते ब[2] पू । १७-१७. त्रयः पु° ब[1] ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

उत्तरत्र वक्ष्यन्ते । पौर्णमासेनातिदेशात्[1] त एव ऋत्विजः प्राप्तास्तस्मादिमे उच्यन्ते । तस्येति पुनरुच्यते, अधिकारव्यवायात् । ऋत्विज इति कर्तॄणां संज्ञाः । 'ऋत्विजो वृणीते' (आगृ १, २३, १ ; शांश्रौ ५, १, १) इत्युक्ते एते प्रत्येतव्याः । चत्वार इति वचनाच्च[2] चत्वार एव ऋत्विजो[3] भवन्ति, न षोडश । वरणमपि चतुर्णामेव वक्ष्यते—'ब्रह्माणमेव प्रथमं वृणीतेऽथ होतारम्' (आगृ १, २३, ३) इति । [4]एते प्रधानाः[4] । त्रिपुरुषा इति बहुव्रीहिरन्यपदार्थप्रधानः । तस्मात् पुरुषेष्वविद्यमानेषु तेषां कर्माणि प्रधाना[5] ऋत्विज एव कुर्वते । ते कृताकृताः । तेषां वरणमपि कृताकृतम् । 'सर्वान्[6] वा येऽहीनैकाहैर्याजयन्ति' (आगृ १, २३, ४), 'प्राणो वै होताऽङ्गानि होत्रकाः समानो वा अयं प्राणोऽङ्गान्यनु सञ्चरति, तस्मात् तत्कामं होता शंसेत्' (ऐब्रा ६, ८) इति श्रुतिः । कर्माचारोऽप्येवमेव[7] दृश्यते । दर्शपौर्णमासादिष्वपीति[8] तन्नित्येषु कर्मस्वेव भवति विकल्पः । तथा हि वचनम् 'एतेऽहीनैकाहैर्याजयन्ति' (आश्रौ ४, १, ७) इति । तथा वरणेऽपि 'सर्वान् वा' इति ज्योतिष्टोमे[9] विकल्पः । 'येऽहीनैकाहैर्याजयन्ति' इति वचनादहीनैकाहेष्वविकल्पः ॥ ३-४ ॥

[ब्रह्मादीनां चतुर्णामृत्विजां सहायकास्त्रयस्त्रयः पुरुषा नियोज्याः]

तस्य तस्योत्तरे त्रयः ॥ ५ ॥

उक्तम्—'तस्य ऋत्विजश्चत्वारस्त्रिपुरुषाः' (आश्रौ ४, १, ३-४) इति । उत्तरत्र ऋत्विजो वक्ष्यन्ते[10] । तेषु के प्रधानाः के पुरुषा इति न ज्ञायते तत्र[11] तत्रोच्यमाने । उत्तरस्य[12] लाघवार्थमिदमुच्यते[13] । वक्ष्यमाणेषु ऋत्विक्षु यो यः प्रथमः स स[14] प्रधानः, तस्य तस्य उत्तरे [15]त्रयस् त्रयो[15] वक्ष्यन्ते, त्रिपुरुषा[16] एवं[17] ज्ञायन्ते । पुरुषेष्वविद्यमानेषु तेषां कर्माणि प्रधाना एव कुर्वते । 'आत्मादीनां मुख्यानाम्' (आश्रौ ४, १, १७), 'मुख्यान् वा पृथक्' (आश्रौ ५, ६, १७), 'मुख्यचमसादचमसाः' (आश्रौ ५, ६, २०) इत्युक्ते मुख्या ज्ञाता भवन्ति ॥ ५ ॥

---

१. तु. आश्रौ २, १, १ । २. °नात् ब[1,2] पू । ३. नास्ति ब[1] । ४-४. प्रधानाः एते प्रधानाः मूको । ५. °न ब[2] मै । ६. पृथक् मूको । ७. °चारेऽप्येवमेव ब[2]; °चारेष्वेवमेव मै । ८. दर्शपूर्ण° मै; °दिष्वपि ब[2] । ९. °ष्टोमो मै । १०. तु. आश्रौ ४, १, ६ । ११. तव मै ; ते च पू । १२. °रं स्यत् ब[1]; °रस्यत् ब[2] पू ; °रस्यात् मै । १३. °र्थमेतदुच्यते ब[1] । १४. नास्ति मै । १५-१५. यस्य त्रयो मूको । १६. त्रित्रिपुरुषा ब[2] पू ; त्रिस्त्रिः पुरुषा मै । १७. एव ब[1,6] मै ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

[ब्रह्मादीनां चतुर्णामृत्विजां पृथक्सहायकत्रयसंज्ञाभिः सह कथनम्]

चत्वार ऋत्विजस्त्रिपुरुषाः । एते 'पुरुषाः संज्ञाभिर्वक्ष्यन्ते'[1]—

होता मैत्रावरुणोऽच्छावाको ग्रावस्तुदध्वर्युः प्रतिप्रस्थाता नेष्टोन्नेता ब्रह्मा ब्राह्मणाच्छंस्याग्नीध्रः पोतोद्गाता प्रस्तोता प्रतिहर्ता सुब्रह्मण्य इति ॥ ६ ॥

[2]होता नाम प्रधान ऋत्विग् ऋग्वेदेन करोति । 'ऋचैव हौत्रम्' (ऐब्रा ५,३२) इति श्रुतिः[2] । मैत्रावरुणोऽच्छावाको ग्रावस्तुत् इत्येवंसंज्ञास्त्रयः[3] पुरुषा होतुः । अध्वर्युः प्रधान ऋत्विग् यजुर्वेदेन करोति । 'यजुषाऽऽध्वर्यवम्' (ऐब्रा ५, ३२) इति श्रुतिः । प्रतिप्रस्थाता नेष्टोन्नेता इत्येवंसंज्ञास्त्रयः पुरुषा अध्वर्योः । ब्रह्मा नाम प्रधान ऋत्विक् । स त्रिभिर्वेदैः करोति । 'यदेवैतत्[4] त्रय्यै विद्यायै शुक्रं तेन *ब्रह्मत्वम्[5]' (ऐब्रा ५, ३२) इति श्रुतिः । ब्राह्मणाच्छंसी आग्नीध्रः पोता इत्येवंसंज्ञास्त्रयः पुरुषाः ब्रह्मणः । उद्गाता नाम प्रधान ऋत्विक् सामवेदेन करोति । 'साम्नोद्गीथम्' (ऐब्रा ५, ३२) इति श्रुतिः । प्रस्तोता प्रतिहर्ता सुब्रह्मण्य इत्येवंसंज्ञास्त्रयः पुरुषा उद्गातुः । एतेषामारम्भ उत्तरसूत्रार्थम् । वक्ष्यति—'[6]एतेऽहीनैकाहैर्याजयन्ति', 'एत एवाहिताग्नय इष्टप्रथमयज्ञा गृहपतिसप्तदशा दीक्षित्वा समोप्याग्नींस्तन्मुखाः[7] सत्राण्यासते' (आश्रौ ४, १, ७-८) इति । अनारम्भे तु के दीक्षन्त इति न ज्ञायते[8] । 'प्रशास्ता [9]ब्राह्मणाच्छंसी पोता नेष्टाऽऽग्नीध्रः । अच्छावाकश्च[9]' (आश्रौ ५, ५, १७) । '[9]होता मैत्रावरुणो[9] ब्राह्मणाच्छंसी पोता नेष्टेति पूर्वया द्वारा सदः प्रसर्पन्ति' (आश्रौ ५, ३, २१) । 'अध्वर्युमुखाः समन्वारब्धाः[9]' (आश्रौ ५, २, ६) । 'तत्स्तोत्रायोपविशन्त्युद्गातारमभिमुखाः' (आश्रौ ५, २, ७) इत्येवं चोदितेष्वेतेषां ग्रहणम् । एतेषामनुक्रमवचने प्रयोजनमार्षप्रवरणे भक्षेषु । नक्षत्रनामग्रहणे एतदानुपूर्व्यम् ॥ ६ ॥

[एतेषां षोडशानामृत्विजामहीनैकाहज्योतिष्टोमसत्रेषु याजनाधिकारः]

एतेऽहीनैकाहैर्याजयन्ति ॥ ७ ॥

एत एवाहिताग्नय इष्टप्रथमयज्ञा गृहपतिसप्तदशा दीक्षित्वा समोप्याग्नींस्तन्मुखाः सत्राण्यासते ॥ ८ ॥

१-१. पुरुषसं° मूको । २-२. नास्ति मूको । ३. °वंसंज्ञकास्त्रयः ब[2] मै पू । ४. यदेतत् ब[1] मै पू । ५. त्वमकरोत् मूको । *. ? ब्रह्मत्वमकरोत् इति सुपाठः । ६-६. एते याजयन्ति एत एव दीक्षिताः मूको । ७. ज्ञायन्ते मै । ८-८. नास्ति मूको । ९. समाम्नाताः मै ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

एते चत्वारस्त्विपुरुषाः षोडश भवन्ति। एते सर्वे अहीनसंज्ञकैरेकाहैश्च[1] सोमैः यजमानं याजयन्ति, निवृत्स्यर्थमात्मसंस्कारार्थम्। 'तस्मात् प्रतिगृह्णता याज्यमुभये राध्नुवन्ति' (ऐब्रा ४, २५) इति श्रुतिः। एकाहा नवमेऽध्याये वक्ष्यन्ते चातुर्मास्यादयः [2]अतिरात्रपर्यन्ताः। अहीनास्तु दशमे वक्ष्यन्ते द्व्यहप्रभृतयो द्वादशरात्रपर्यन्ताः[2]। समासधर्मत्वादहीनानां पूर्वनिपातः। उद्गातृणामधिकारादेते इति पुनरुच्यते सर्वेषां प्राप्त्यर्थम्। दीक्षित्वा सत्राण्यासते इत्युक्ते सत्रेष्वेव एतेषामधिकारः स्यात्, अहीनैकाहेषु [3]न स्यात्[3], तस्मादुच्यते—अहीनैकाहैर्याजयन्तीति[4]। [5]ज्योतिष्टोमे चत्वारः† ऋत्विजः सर्वे वा इति विकल्पः‡, एतेऽहीनैकाहैर्याजयन्तीति[5] वचनात्। ऋत्विग्वरणेऽप्युक्तम्—'सर्वान् वा येऽहीनैकाहैर्याजयन्ति' (आगृ १, २३, ४) इति[6]। एत एवाहिताग्नयः ये[7] अहीनैकाहैर्याजयन्ति षोडश ऋत्विजः एत एव[8] एवंसंज्ञा होत्रादयः आहिताग्नयो भवन्ति। आहिता अग्नयो येषां ते आहिताग्नयः। इष्टं प्रथमेन यज्ञेन[9] ज्योतिष्टोमेन यैस्ते इष्टप्रथमयज्ञाः। गृहपतिसंज्ञः सप्तदशो भवति[10] येषां ते गृहपतिसप्तदशाः। एते सर्वे एवंसंज्ञाः एवंगुणसम्पन्ना [11]दीक्षणीयायां दीक्षणविधानेन[11] दीक्षितत्वात्[12] दीक्षिताः सन्तः [13]स्वान् स्वान्[13] अग्नीन् गृहपतेरग्निषु अनुक्रमेण समोप्य प्रक्षिप्य। तन्मुखाः गृहपतिमुखाः। एषां गृहपतिर्मुख्यो भवति। दीक्षणीयादिषु सर्वकर्मसु गृहपतिः प्रथमं दीक्षते, अनन्तरमितरे। एवं प्रवरणनामग्रहणभक्षणादिषु। एवमेते सर्वे गृहपतिमुखाः सत्रसंज्ञानि कर्माणि रात्रिसत्राणि[14] संवत्सरसत्राणि[15] च आसते उपासते। विहितानि होत्रादीनि कर्माणि कुर्वन्तः आर्त्विज्यस्याविरोधेन[16] यजमानं च कुर्वन्तः ऋतुफलं काङ्क्षन्तो ममैतदिति उपासते इति सूत्रार्थः। तत्र दीक्षित्वा समोप्याग्नींस्तन्मुखाः सत्राण्यासते इति वचनाद् यजमानस्थाने यजमानं[17] कुर्वन्ति, आर्त्विज्यं न प्राप्नोति। तस्मादिदमुच्यते—एत एव[18]। दीक्षिता [19]अपि सन्तः[19] एत एव ऋत्विज एवं[20] भवन्ति। एवंसंज्ञाश्च भवन्ति। ऋत्विक्त्वात् कर्माणि[21] कुर्वन्ति, आर्त्विज्यस्याविरोधेन[22] यजमानमपि। 'एतेनाऽनिष्ट्वा योऽन्येन यजते स पापीयान् भवति' (?) इति ज्योतिष्टोमे श्रुतिः। तस्मादाह—इष्टप्रथमयज्ञा

---

१. °ज्ञैकैश्च ब[2]; °संज्ञकैरेकाहिकैश्च मै। २-२. आश्रौ ९,२,१; १०,५,११। ३-३. नास्ति ब[1] मै। ४. °जयन्ति मै। ५-५. नास्ति ब[1]। †. चत्वार एव मै। ‡. विकल्पः। अहीनैकाहेषु तु अविकल्पः मै। ६. इति वचनात् मूको। ७. नास्ति ब[2]। ८. नास्ति ब[2] पू। ९. नास्ति मूको। १०. भवन्ति मूको। ११-११. दीक्षणीयादिविधानेन मै। १२. नास्ति मै। १३-१३. स्वान् ब[1] मै पू। १४. नास्ति ब[1] पू। १५. संवत्सराणि ब[2] मै पू। १६. आर्त्विज्य-विरोधेन ब[1]; आर्त्विज्यः सा (स पू) विरोधेन ब[2] पू; आर्त्विज्यस्यावि (व) रोधेन मै। १७. °मानं वा ब[1]। १८. नास्ति ब[2] मै। १९-१९. अपसन्तः ब[1] मै पू। २०. एव ब[1] मै पू। २१. कर्मण्येव ब[1] मै पू; कर्मणे ब[2]। २२. °ज्यस्यावरो° ब[2] मै पू।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

इति। एत एवेति [1]वचनादनिष्ट्वा प्राप्तं[2] सत्राणामासनं यथैव याजमानमनिष्ट्वाऽपि क्रियते। इष्टप्रथमयज्ञा इति वचनादनाहिताग्नीनाम् अनग्नीनां च न प्राप्नोति। तस्मादुच्यते—आहिताग्नय इति। आहिताग्नीनामनिष्टप्रथमयज्ञानामपि दशरात्र-सत्रासनमुपदिशन्ति[3]। तस्मात् तेषां प्रायणीयोऽतिरात्र[3] एव प्रथमयज्ञो भवति। एत एवेति वचनाद् गृहपतिर्न प्राप्नोति। तस्मादाह—गृहपतिसप्तदशा इति। संख्यावचनाद् गृहपतिना सर्वे तुल्यफला भवन्ति। एत एवेति वचनाद् अदीक्षितानामेव सत्रासने प्राप्ते दीक्षित्वा इत्याह[4]। आहिताग्नय इष्टप्रथमयज्ञा एवंगुणसम्पन्ना दीक्षन्ते। अग्नीनां समावापस्तु[5] न प्राप्नोति। तस्मादाह—समोप्याग्नीनिति। समोप्याग्नीन् दीक्षित्वा इत्येवमुच्यमाने आहिताग्नीनामेव दीक्षणं[6] स्यादनाहिताग्नीनां न स्यात्। दीक्षित्वा समोप्येत्युच्यमाने असमोप्यापि दीक्षामपि दर्शयति। गृहपतिसप्तदशा इति वचनात् सर्वेषामग्रे[7] गृहपतेः दीक्षणादीनि[8] कर्माणि[9] प्राप्तानि[10]। तस्मादाह[11]—[12]तन्मुखा इति। अहीनैकाहैरिति वचनात् सत्राणीत्याह। याजयन्तीत्यधिकाराद् उपासत इत्याह[12] ॥ ७-८ ॥

[अधिकृतानामृत्विक्सदस्यानामग्निसमावापकरणं यथार्थं प्रयोगश्च]

तेषां समावापादि यथार्थमभिधानमैष्टिके तन्त्रे ॥ ९ ॥

'समोप्याग्नींस्तन्मुखाः सत्राण्यासते' (आश्रौ ४, १, ८) इति येऽधिकृतास्तेषां प्राग्दीक्षायाः प्राजापत्ये पशौ उखासंभरणीयायां चाग्नीनां समावापः क्रियते। येषां समावापः[13] कृतस्तेषां [14]समावापम् एवमादि कृत्वा[14] आ ऋतुसमाप्तेः यथार्थमभिधानम् प्रयोक्तव्यं यजुःषु निगदेषु [15]यजमानाभिधायी यः[15] शब्दः, येन यजमानोऽभिधीयते, तदभिधानं यथार्थमूह्यम्। एकस्मिन् यजमाने एकवचनम्, द्वयोर्द्विवचनम्, बहुषु बहुवचनम्[16]। ऐष्टिके तन्त्रे [17]इष्टौ भवम्[17] ऐष्टिकं तन्त्रं कर्म। ऐष्टिके कर्मणि ये मन्त्राः, [18]नमः प्रवक्त्रादिसंस्थाजपान्ताः†[18], तेषु यजमानाभिधायिनः शब्दा यथार्थमूह्याः। एकमावाहने 'आवह देवान् यजमानाय' (आश्रौ १, ३, ६) इति। चत्वारि

१-१. एववचना° मै; °मनिष्टप्राप्तं ब[1] पू। २. °रात्रा सत्रा° ब[1/2] पू; तु. आश्रौ ८, ७, १७; १८; १२, १०; १३, ३०। ३. तु. आश्रौ ७, २, १ (नारायणीया वृत्तिः)। ४. इति ब[2]। ५. समवायस्तु मूको। ६. दीक्षणीयं मै। ७. °षामग्नेः ब[1/2]; °षामग्ने मै पू। ८. दीक्षणादि ब[1]; दीक्षणीयादीनि मै। ९. कर्मादि ब[1]। १०. प्राप्नोति ब[1]। ११. °दाहतं मै। १२-१२. नास्ति मै। १३. समवापः ब[2]। १४-१४. समवापानामेवमादीक्षित्वा मै। १५-१५. °नाभिधो व्योपः (°प पू) ब[1] पू; °नाभिधायी यः ब[2] मै। १६. °चनं वा मै। १७-१७. इष्टिभवम् ब[1/2] पू; इष्टाभवम् मै। १८-१८. तु. आश्रौ १, २, १; १. ११, १५। †. आसंस्था° मूको।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

'सुगादापने' (आश्रौ १, ४, ४), 'साधु ते यजमानदेवता यो अग्निम्' (आश्रौ १, ४, १०) इति त्रीणि, 'अवृथाः' (आश्रौ १, ४, १०) इति चतुर्थम्। इळायां 'यज्ञपतिम्, उपहूतोऽयं यजमानः, उपहूतो[1] भूयसि हविष्करणे, इदं मे देवाः, तस्मिन्नुपहूतः' (आश्रौ १, ७, ७)। दीक्षणादिषु[2] 'उदृचमशीय' (आश्रौ ४, २, ८) इति एतेन[3] सह षट्। सौत्येषु सुन्वच्छब्दाधिकं[4] सुन्वन्तो[5] यजमाना इति। सूक्तवाके अष्टादश। 'ओमन्वती ते अस्मिन् यज्ञे यजमानः' (आश्रौ १, ९, १)। 'ऋधेत्, आशास्तेऽयं यजमान' इति, 'आयुराशास्ते' (आश्रौ १, ९, ५) इति। न च कृत्वा आवपने तदश्यात्, 'तृदृध्यात्[6] तदस्मै' (आश्रौ १, ९, ५)। दीक्षणीयादिषु आशीयेति। सौत्येषु[7] सुन्वच्छब्दश्चाधिकः[8]। ऐष्टिके[9] तन्त्रे एतान्यूहस्थानानि[10]। ऋक्षु प्रतिषेधः। 'तस्मादृचं नोहेत्' (आश्रौ ५, ४, ८) इति। तत्र सूत्रे विचार्यते। एत एवेति वचनाद्धोत्रादयो दीक्षिताः अपि सन्तः ऋत्विज एव। यथावचनाद् दीक्षाऽग्न्यावापश्च उक्तः। एवमूहोऽप्यनारभ्यमाणो[11] न प्राप्नोति, तस्मादुच्यते—समावापादि। 'सर्वेषु यजुर्निगदेषु' (आश्रौ ३, २, १६) इति प्राप्ते यथार्थमभिधानमिति न वक्तव्यम्। एत एवेति वचनाद् दीक्षिता अपि सन्तः ऋत्विज एव[12]। तस्मादप्राप्तमारभ्यते[13]। ऋक्षु तु अनारभ्यमाण ऊहो न प्राप्नोति। तस्माद् ऋक्षु 'अग्निर्मुखम्' (आश्रौ ४, १, ११; ४, २, ३) इत्येवमादि वक्ष्यति। ऋक्ष्वारम्भादन्यत्र न प्राप्नोतीति[14] प्रैषादिष्वप्यारभ्यते। प्रैषादिषु च[15] ऋक्षु च आरम्भादन्यत्र न[16] प्राप्नोति। तस्मादाह—ऐष्टिके तन्त्रे इति ॥ ९ ॥

[अनाहिताग्नीनां यजमानानां दीक्षणीयादिकरणं, न समावापादि]

दीक्षणाद्यनग्नीनाम् ॥ १० ॥

दीक्षणमादि[17] कृत्वा अनग्नीनाम् अनाहिताग्नीनां यजमानानां दीक्षणादि यथार्थमभिधानं भवति, न समावापादि। एत एव' (आश्रौ ४, १, ८) इति ऋत्विजामेव सत्रासनमुपदिष्टम्। ऋत्विजः अनाहिताग्नयोऽपि भवन्ति। वक्ष्यति च[17]—'यून[18] ऋत्विजो वृणीत इत्येके' (आगृ १, २३, २) इति। एतस्मात्

---

१. नास्ति मै। २. दीक्षणीयादिषु मै। ३. अनेन मै। ४. °शाब्दिकं मै। ५. सुन्वतो ब[1,2] पू; तु. शांश्रौ ८,१६,१। ६. नास्ति ब[2]। ७. सुन्वेषु ब[1] मै पू; सुत्येषु ब[2]। ८. °च्छब्दाधिकम् (°कः ब[1]) ब[1] मै पू। ९. °कम् मै। १०. एनान्यू (येनानू मै) ह्यस्था° मूको। ११. एवमुक्तोमुहोऽप्यना° ब[1] पू; एवमुक्तमहोऽप्यना° मै। १२. नास्ति मै। १३. एतस्मा° मै। १४. प्राप्नोति ब[1] पू। १५. नास्ति ब[1] मै पू। १६. यजमानानां दीक्ष° मै। १७. नास्ति ब[1]। १८. युवान मूको।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

'तेषां[1] [2]समावापादि[2] (आश्रौ ४, १, ९) इत्यविशेषवचनादनाहिताग्नीनामपि[3] समावापादिप्राप्ते (? °प्तौ) दीक्षणाद्यनग्नीनामित्युच्यते। 'यथा पररथेन गच्छति एवं परागिनभिर्यजन्ति' (?) इति श्रुतिः ॥ १० ॥

[अग्निर्मुखमिति च याज्यानुवाक्ययोरूहकरणम्]

अग्निर्मुखमिति च याज्यानुवाक्ययोः ॥ ११ ॥

अग्निर्मुखमिति[4] एतयोश्च[5] याज्यानुवाक्ययोर्यथार्थमभिधानं भवति। एकमनुवाक्यायां[6] यजमानायेति। त्रीणि याज्यायां दीक्षापालाय[7] अस्मै[8] यजमानायेति। देवतापरमेतदिति[9] ब्रुवन्तः एके [10]ऊहं न[10] कुर्वन्ति 'न प्रत्यक्षमनृषेरस्ति मन्त्रे' (बृदे ८,१२९) इत्युक्तम्। तस्मादुपदेशः प्रमाणम्। च-शब्दोऽधिकारसमुच्चयार्थः[11]। ऐष्टिकं तन्त्रं [12]यथार्थम्, एतयोश्च[12] यथार्थमिति इदम्। प्रदर्शनत्वादन्यास्वपि याज्यानुवाक्यासु [13]ऊहः प्राप्तः[13]। तस्मादाह—[14]याज्यानुवाक्ययोरिति। एतयोरेव[14] याज्यानुवाक्ययोर्नान्यत्रेति। तस्मात् 'साग्निचित्ये त्रीण्यन्यानि' (आश्रौ ४, २, ३) इति वक्ष्यति। तत्र 'दुराधर्षं गृणते शर्म यंसत्' (ऋ ६, ४९, ७) इति नोह्यते, 'उत त्वामदिते मह्यहं देव्युपब्रुवे' (ऋ ८, ६७, १०) इति च। यासु ऋक्षु शाखान्तरेषु आम्नायोऽस्ति, [15]द्विवचने बहुवचने[15] यथार्थमूहो विधीयते, नान्यासु। अध्वर्युशाखायामग्निर्मुखमित्येतयोर्बहुवचने नाम्नायो दृश्यते[16]। ऐष्टिके तन्त्र इति प्राप्ते 'अग्निर्मुखम्' (आश्रौ ४, २, ३) इत्येतयोः ऊहारम्भोऽनर्थकः। एतयोरारम्भाद् ज्ञापयति—[17]ऋग् योच्यते[17]। ऐष्टिके ऊहो भवति। तस्मात् 'तच्छंयोरावृणीमहे' (ऋखि ५, १, ५) इत्येतस्यां यज्ञपतये[18] इति नोह्यते ॥ ११ ॥

[दण्डप्रदाने प्रैषेषु निवित्सु च यथार्थमूहकरणम्]

दण्डप्रदाने ॥ १२ ॥ प्रैषेषु निवित्सु ॥ १३ ॥

'ऐष्टिके तन्त्रे'[19] (आश्रौ ४,१,९) इति वचनात् पाशुके न प्राप्नोति[20]। तस्मादिदमुच्यते—दण्डप्रदाने। दण्डप्रदानमन्त्रे यद् यजमानाभिधानं [21]तद् यथार्थमूह्यम्[21],

---

१. एषां मै। २-२. °वापादित्यवि° मूको। ३. नास्ति ब[2]। ४. तु. आश्रौ ४,२,३; काठ ४,१६; तैब्रा २,४,३,३; ४। ५. एवमनु° मै। ६. °पालायां मै। ७. यस्मै मै। ८. °तापरतैतदिति ब[1?2] पू; °तापरतस्तदिति मै। ९-९. ऊह तेत् ब[1]; ऊहं तत् ब[2] मै पू। १०. चकारोऽधि° मै। ११-११. नास्ति ब[1]। १२-१२. ऊहः वक्ष्यः ब[1?2] पू; अहर्वक्ष्यः मै। १३. नास्ति ब[1] पू। १४-१४. °चनबहुवचनं मूको। १५. तु. तैब्रा २,४,३,३-४। १६-१६. ऋच्युच्यते मै। १७. यजुपतये मूको। १८. त तन्त्रे ब[1]; न तन्त्रे ब[2]; यज्ञतन्त्रे पू। १९. प्राप्नोतीति ब[1] पू। २०-२०. तथार्थमूह्यम् ब[2] पू; त(य)थार्थमूह्यम् मै।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

प्रयच्छामीति प्रयच्छाम इति भवति । सर्वदण्डान् कलापीकृत्य तेनैव मन्त्रेण [1]गृहपतिः दण्डान्[1] मैत्रावरुणाय [2]प्रयच्छति[2] । 'सर्वेषां संस्कारार्थमूहः' (आश्रौ ३, २,१५), 'सर्वेषु[3] यजुर्निगदेषु[3]' (आश्रौ ३,२,१६) इति दण्डाभिधानस्योहो भवत्येव । 'मित्रावरुणयोस्त्वा बाहुभ्याम्' (आश्रौ ३, १, १६) इति प्रयच्छाम इति भवति । यजमानाभिधानादस्माद्धारस्माद् यजमानो दण्डं ददातीति दर्शितं भवति । उक्तं[4] 'प्रशास्तारं तीर्थेन प्रपाद्य दण्डमस्मै प्रयच्छेत्' (आश्रौ ३,१,१६) इति । 'कर्मचोदनायां होतारम्' (आश्रौ १,१,१४) इति होता दण्डं ददातीति सिद्धम् । उभयवचनानुग्रहार्थं[5] विकल्पो भवति होता ददाति यजमानो [6]वा इति । अध्वर्यूणामप्युक्तम् । यजमानो[6] मैत्रावरुणाय दण्डं प्रयच्छति[7] इति । प्रैषेषु[8] पाशुकेषु सौमिकेषु च[8] यानि यजमानाभिधानानि, तानि[8] यथार्थमूह्यानि । अनुयाजेषु [10]एकं 'वसु[10] वार्याणि यजमानाय' (ऋखि ५, ७, ३, ४) इति । त्रयोदश सूक्तवाकप्रैषे[11] 'अवृणीतायं यजमानः, पचन्' (ऋखि ५, ७, २, ११) इति द्विविधम् । 'अवृणीतायं यजमानः, [12]एष मे, तान्यस्मै' (ऋखि ५,७,२,११-१२) इति[12] । एतानि पाशुकेषु[13] प्रैषेषु । इदानीं सौमिकेषु । अष्टौ गृहपतिप्रैषेषु '[14]सुगृहपतिस्त्वयाऽग्नेऽयं[14] सुन्वन् [15]यजमानः स्यात्, अनेन[15] सुन्वता यजमानेन' (ऋखि ५, ७, ५, १२) इति । [16]एवं द्वे सवनीये 'सुन्वतो यजमानस्य[16] वृधम्' (ऋखि ५, ७, ४, १०) । त्रीण्यादित्यग्रहे 'अस्मै सुन्वते यजमानाय' (ऋखि ५,७,४,१३) इति । तान्येव त्रीणि सावित्रग्रहे[17] । हारियोजने[18] पञ्च 'अस्मिन् सुन्वति यजमाने तस्मै०[19] अचीकमत[20]' (ऋखि ५, ७, ४, १६) इति । उत्तमे तु सूक्तवाकप्रैषे उक्तान्येव [21]त्रयोदश । अधिकानि च त्रीणि । द्विःसुन्वच्छब्दः भृज्जन्निति[21] च । श्वःसुत्याप्रैषे[22] श्वःसुत्या विवक्षिता, न ब्राह्मणाः । तस्मादेषामिति नोह्यते, ब्राह्मणपरत्वात् । निवित्सु । मरुत्वतीयाद्या[23] निविदः । तासु निवित्सु यानि यजमानाभिधानानि तानि यथार्थमूह्यानि । 'ऐष्टिके तन्त्रे' (आश्रौ ४, १, ९) इति वचनात् सौमिके तन्त्रे

१-१. °पतिः सर्वेषां संस्कारार्थमूहः दण्डान् मूको । २-२. प्रयच्छति सर्वेषु मूको । ३. °गमेषु मूको । ४. नास्ति ब[1] । ५. °ग्रहणार्थं ब[1] । ६-६. नास्ति ब[1] । ७. तु. बौश्रौ ६, ३१ : २०-२१ । ८. नास्ति मूको । ९. नास्ति ब[1] पू । १०-१०. एकवत्सु ब[1] पू ; एकवसु ब[2]; एकस्तु (स्तु) मै । ११. °प्रैषेषु मै । १२-१२. एवमेतान्यद (°दव पू) स्थेति मूको । १३. पाशुके मूको । १४-१४. गृहपतितया (°तित्वया ब[2] मै ; °तिस्त्वया मै) पं च (यंच मै) मूको । १५-१५. यजमानस्यादाने मै । १६-१६. एकं सवनीये यजमानाय मूको ; तु. शांश्रौ ७, १७, ४ आनर्तीयभाष्यम् । १७. तु. ऋखि ५, ७, ४, १४ । १८. हार्योजने ब[2] पू; हर्योजने मै । १९. तस्मिन् ब[2]; अस्मै मै । २०. अवकतम मूको । २१. तु. ऋखि ५,७,४,१५ । २२. तु. ऋखि ५, ७, ४, १७ । २३. तु ऋखि ५, ५, २-११ ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

ऊहो न प्राप्नोति। तस्मादिदमुच्यते। निवित्सु सर्वासु त्रीण्येव यजमानाभिधानानि, 'प्रेमं सुन्वन्तं यजमानम्' (ऋखि ५, ५, २-११)। जातवेदस्यां तु द्वे अधिके, 'समिद्धारं स्तोतारम्' (ऋखि ५, ५, १०) इति च ॥ १२-१३ ॥

[घृतयाज्यायां यथार्थमूहकरणम्]

घृतयाज्यायाम् ॥ १४ ॥

घृतयाज्यायां[1] यद्[2] यजमानाभिधानं तद् यथार्थमूह्यम्। एकमेव[3] 'प्र प्र यज्ञपतिम्' (आश्रौ ५, १९, ३) इति। याज्याग्रहणमुत्तरसूत्रार्थम् ॥ १४ ॥

[अमावास्यायाञ्च याज्यायां यथार्थमूहकरणम्]

कुह्वां च ॥ १५ ॥

कुहूः अमा[4], तस्यां कुह्वां च याज्यायां यद् यजमानाभिधानं [5]तद् यथार्थमूह्यम्[5]। द्वे अभिधाने 'दाशुषे यजमाने' इति च। ऐष्टिके तन्त्रे कुहूर्भवति[6], देविकाहविःषु[7]। ऐष्टिकं कर्म पत्नीसंयाजेष्वपि कामाद् भवति[8]। ऐष्टिकीष्वपि[9] ऋक्षु वचनमन्तरेण ऊहो न प्राप्नोति, तस्मादुच्यते। च-शब्दो यथाऽधिकार-समुच्चयार्थः[10]। तस्माद् याज्यायामेव ऊहो नानुवाक्यायाम्। 'अहं जोहवीमि, विधेम' (आश्रौ १, १०, ८) इत्येतानि नोह्यन्ते। यासां शाखान्तरे आम्नायोऽस्तीति मन्तव्यम् ॥ १५ ॥

[अच्छावाकनिगदस्योपहवप्रत्युपहवयोर्यथार्थमूहकरणम्]

अच्छावाकनिगदोपहवप्रत्युपहवे च ॥ १६ ॥

अच्छावाकस्य निगदः, अच्छावाकनिगदः[11]। अच्छावाकनिगद एवोपहवः, अच्छावाकनिगदोपहवः[12]। अच्छावाकनिगदोपहवश्च प्रत्युपहवश्च अच्छावाक-निगदोपहवप्रत्युपहवम् इति द्वन्द्वैकवद्भावः। तस्मिन् अच्छावाकनिगदोपहवप्रत्युपहवे च यथार्थं यजमानाभिधानमूह्यम्। समासेनोक्तयोर्द्वयोरपि पदार्थयोः उपहवप्रत्यु-

---

१. तु. आश्रौ ५, १९, ३ उरु विष्णो इति। २. नास्ति मूको। ३. एक एव मूको। ४. नास्ति मूको। ५-५. ज यथार्थमूह्यम् ब[1]; न दृष्ट्वा(तद्य)र्थमूह्यम् मै। ६. तु. आश्रौ १, १०, ७-८ कुहूर्देवानाम् इति। ७. °हवींषि मूको। ८. तु. आश्रौ १, १०, ६। ९. ऐष्टिकेष्वपि मूको। १०. °रसूचनार्थः ब[1] मै पू। ११. अच्छावाकनिगदः इत्यारभ्य निविद्भ्यः इति पर्यन्तं एतत्सूत्रीयं भाष्यं नास्ति ब[2]। १२. °हवः प्रत्युपहवः ब[1] पू; °हवः प्रत्युपरवाहः मै।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

पहवयोरूहो भवति द्वन्द्वस्य[1] उभयपदार्थप्रधानत्वात्[2]। उपहवे एकः (? कम्) 'यजमान होतः' (आश्रौ ५, ७, ३) इति। प्रत्युपहवे त्रीणि[3] 'सुन्वन् यजमानः, अग्रभीत्' (आश्रौ ५, ७, ५) इति। केचिद् उपहवविषये ऊहं[4] न कुर्वन्ति एकं[3] पदार्थमिति मन्यमानाः। निगदोपहवग्रहणं च प्रत्युपहववाक्यविशेषणार्थमिति ब्रुवन्ति[5]। तेषां [6]सूत्रारम्भो निरर्थकः[6]। 'प्रत्येता सुन्वन्' (आश्रौ ५, ७, ५) इत्यत्र चेति[4] लघुना सिद्धम्। अच्छावाकग्रहणादध्वर्योः प्रत्युपहवो न भवति। 'अध्वर्युर्होतर्युपहवं काङ्क्षते' (आश्रौ ५, ७, ४) इति वचनादध्वर्योः प्राप्तः। तथा सति 'उपहूतः प्रत्यस्मै[7] उन्नीयमानायानूच्य' (आश्रौ ५, ७, ६) इत्यध्वर्योः न[8] प्राप्नोति। अच्छावाकग्रहणात् प्रत्युपहूतः अच्छावाकः उन्नीयमानसूक्तमन्वाह[9] निगदग्रहणाद् द्वयोरपि उपहवप्रत्युपहवयोः सवनस्वरो भवति। उपहवप्रत्युपहवयोस्तु पुरुषसंबोधनार्थत्वाद्, यथा पुरुषः प्रतिबुध्यति शृणोति, तेन स्वरेण वक्तव्यः सर्वत्र। च-शब्दोऽच्छावाकाधिकारसमुच्चयार्थः। समुच्चयोऽच्छावाकस्यैवोपहवः प्रत्युपहवश्च भवति, नाध्वर्योरित्युक्तं प्रयोजनम्। निविद्भ्यः[10] प्रागेवेदं[11] वक्तव्यं तथापि[12] [13]कर्मणामनुक्रमणं पुरुषानुक्रमेण[13] उक्तं द्रष्टव्यम्। मुख्यस्य होतुर्यान्यभिधानानि तानि समाप्य अनन्तरं अङ्गकर्तृणामिति ॥ १६ ॥

[पूर्वं यजमानं प्रवरित्वा पश्चाद्ध्वोत्रादीनां मुख्यानां प्रवरणम्]

आर्षेयाणि गृहपतेः प्रवरित्वाऽऽत्मादीनां मुख्यानाम् ॥ १७ ॥

ऋषेः अपत्यानि आर्षेयाणि। उक्तं 'यजमानस्यार्षेयान्'[14] (आश्रौ १,३,१)। तानि गृहपतेः पूर्वं[15] प्रवरित्वा अनन्तरम् आत्मादीनाम्। होता आत्मानमादिं कृत्वा मुख्यानाम् आर्षेयाणि प्रवृणीते—आत्मनः अध्वर्योः ब्रह्मण उद्गातुरिति। दीक्षिता अप्येते ऋत्विज एव। तस्मादृत्विजां प्रवरणं [16]न प्राप्नोति। यथा दीक्षित्वा† समावापः, अभिधानस्य यथार्थम् इत्येतानि वचनाद् भवन्ति‡। एवं प्रवरणं[16] वचनाद् विधीयते। 'तन्मुखाः सत्राण्यासते' (आश्रौ ४, १, ८) इति वचनाद् गृहपतेः पूर्वं प्रवरणं प्राप्तम्। किमर्थमिह गृहपतेः प्रवरित्वा इत्युच्यते इति। होत्रादीनामनुक्रमविधानार्थं होत्रादीन् वक्तुम्। [17]यथाऽऽम्नातक्रमेण[17] प्राप्ते मुख्यानां पूर्वप्रवरणं विधीयते। अनन्तरमङ्गकर्मिणाम् ॥ १७ ॥

---

१. न द्वन्द्वस्य मूको। २. पदार्थप्रधा° मूको। ३. नास्ति मूको। ४. नास्ति मै। ५. ब्रुवन्तः (°न्त ब[1] पू) मूको। ६-६. °रम्भोऽनर्थकः मै। ७. प्रत्यस्मात् मूको। ८. नास्ति मूको। ९. तु. ऋ ६, ४२। १०. निविद्भ्यः इत्यादाय अच्छावाकनिगदः इति पर्यन्तः पूर्वः पाठो नोपलभ्यते ब[2]; तु. आश्रौ ४, १, १३। ११. अच्छावेदम् ब[2]। १२. तथाहि मूको। १३-१३. °नुक्रमपुरु° मूको। १४. °र्षेयाणि मूको। १५. पूर्वं पूर्वं ब[1] पू। १६-१६. नास्ति मै। †. दीक्षाताः ब[1/2] पू। ‡. तु. आश्रौ ४, १, ८-९। १७-१७. यथात्मा तु (त ब[2] पू; तत् मै) क्रमेण मूको।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

[एवं होत्रादीनां चतुर्णां द्वितीयतृतीयचतुर्थसहायकानां प्रवरणम्]

एवं द्वितीयतृतीयचतुर्थानाम् ॥ १८ ॥

यथा मुख्यानाम् आत्मादीनां प्रवरणम् एवं प्रशास्त्रादीनां द्वितीयानां आर्षेयाणि[1] प्रवृणीते मैत्रावरुणप्रतिप्रस्थातृब्राह्मणाच्छंसिप्रस्तोतॄणाम् । एवं तृतीयानाम् अच्छावाकनेष्ट्राग्नीध्रप्रतिहर्तॄणाम् । एवं चतुर्थानां ग्रावस्तुदुन्नेतृपोतृसुब्रह्मण्यानाम् । यथाम्नातक्रमे प्राप्ते अयं क्रमो विधीयते । अस्मादारम्भाद् होतृकर्म विधीयते[2], तदन्यो न कुर्यात् । प्रवरणवाजिनघर्मातिग्राह्यषोडशिपात्रनामग्रहणादीनि[3] दीक्षितानां सतामन्यश्चेत् कुर्यादात्मादीनां मुख्यानाम् एतन्न युज्यते । तस्माद् दीक्षितेषु सत्सु होतैवैतानि[4] कुर्यात् ॥ १८ ॥

[समानगोत्राणामृत्विजां सकृत् प्रवरणविधानम्]

यावन्तोऽनन्तर्हिताः समानगोत्रास्तावतां सकृत् ॥ १९ ॥

[5]अनुक्रमेण प्रवरणे यावन्त ऋत्विजः समानप्रवराः अन्यगोत्रेण अनन्तर्हिताः[5] अव्यवहिताः[6] आनिपतेयुः, तावतां सकृदेव प्रवरणं कुर्यात्, न[7] तावत्कृत्व[8] आवर्तयेत् । यथा प्रयाजादीनि प्रतिदेवतं[9] नावर्तन्ते[9], सकृदेव प्रयुक्तानि सर्वासां देवतानामुपकारं कुर्वन्ति, एवं प्रवरणमपि सकृदेव कृतं सर्वेषां [10]समानगोत्राणां †संस्काराय, न च व्यवहितेषु† प्रवर्तते[10] ॥ १९ ॥

[समानगोत्राणामृत्विजामपि प्रत्येकं प्रवरणविकल्पः]

अथवा—

आवर्तयेद् वा द्रव्यान्वयाः संस्काराः ॥ २० ॥

समानगोत्राणामव्यवहितानां प्रवरणं तावतां सकृद्, आवर्तयेद् वा । कस्माद्धेतोः । द्रव्यान्वयाः संस्काराः । द्रव्यं द्रव्यमनुयन्ति संस्काराः । यथा [11]आक्षं माल्यम्†[11] । एवं प्रवरः प्रतिद्रव्यं संस्कारत्वादावर्तते । अत्र होता संस्कारकः[12], प्रवरः संस्कारः, यजमानः द्रव्यं संस्क्रियते[13] ॥ २० ॥

---

१. नास्ति मूको । २. विधि यत् ब[1,2] पू । ३. °ग्रहणादीनां मूको । ४. होतैतानि मै । ५-५. नास्ति ब[1] । ६. अनुव्यवहिताः मै । ७. यावत्कृत्वा ब[1]; °त्वा मै पू । ८. °वतां ब[1,2] पू; °वता मै । ९. अत्र वर्तन्ते मै । १०-१०. नास्ति मै । †-†. संस्कारो येन वावहितेषु (च व्यवहितेषु ब[2]; व्यवहितेषु पू) ब[1,2] पू । ११-११. आक्षमार्तं मै । †. °मार्तः ब[1] पू; °मातृ ब[2] । १२. संस्कार्यः मूको । १३. संस्तूयते ब[2] ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

[साग्निचित्येषु ऋतुषूखासंभरणीयेष्टिविकल्पः]

साग्निचित्येषु ऋतुषूखासंभरणीयामिष्टिमेके ॥ २१ ॥

[1]साग्निचित्येषु सह अग्निचित्ययाा[1] ऋतवः, तेषु साग्निचित्येषु ऋतुषु अग्निर्वैकल्पिकः, अन्यत्राश्वमेधात् । तस्मादाह—साग्निचित्येषु ऋतुषु[2] । उखा नाम आहवनीयधारणार्था । तस्याः संभरणे[3] कर्म उखासंभरणम् । उखासंभरणार्थे इष्टिः क्रियमाणा उखासंभरणीया । ताम् इष्टिमेके अध्वर्यवः कुर्वते । अन्ये न कुर्वते, उखासंभरणमेव । साग्निचित्येति वचनादनग्निचित्ये न भवति । ऋतुग्रहणं विकृत्यर्थं प्रकृतेरधिकारात्[4] । सा इष्टिर्वक्ष्यते ॥ २१ ॥

[उखासंभरणीयेष्टेर्देवताकथनम्]

अग्निर्ब्रह्मण्वानग्निः क्षत्रवानग्निः क्षत्रभृत् ॥ २२ ॥

अग्निर्ब्रह्मण्वान् अग्निः क्षत्रवान् अग्निः क्षत्रभृद् इत्येतास्तिस्रो देवताः ॥ २२ ॥

[देवतानां याज्यानुवाक्याकथनं स्वराणां शनैस्तरत्वविधानञ्च]

तासां याज्यानुवाक्याः—

एतेनाग्ने ब्रह्मणा वावृधस्व, ब्रह्म च ते जातवेदो नमश्च, पुरूण्यग्ने पुरुधा त्वाया, स चित्र चित्रं चितयन्तमस्मे, अग्निरीशे बृहतः क्षत्रियस्य, अर्चामि ते सुमतिं घोष्यर्वागिति । इदंप्रभृतिकर्मणां शनैस्तरामुत्तरोत्तरम् ॥ २३ ॥

'एतेनाग्ने' (ऋ १, ३१, १८), 'ब्रह्म च ते' (ऋ १०, ४, ७) इत्येते अग्नेर्ब्रह्मण्वतो याज्यानुवाक्ये । 'पुरूण्यग्ने' (ऋ ६, १, १३), 'स चित्र चित्रम्' (ऋ ६, ६, ७) इत्येते अग्नेः क्षत्रवतः । 'अग्निरीशे' (ऋ ४, १२, ३), 'अर्चामि ते' (ऋ ४, ४, ८) इत्येते अग्नेः क्षत्रभृतः । शेषं पौर्णमासेन । [5]इदं-प्रभृतिकर्मणां शनैस्तरामुत्तरोत्तरम्[5]' इमाम्[6] उखासंभरणीयामिष्टिम् आदिं कृत्वा तदनन्तरं यानि कर्माणि, तेषां कर्मणां शनैस्तरां स्वरो भवति उत्तरोत्तरम् उखासंभरणीयास्वरादनन्तरं दीक्षणीयायां ततोऽनन्तरं प्रायणीयायां ततोऽनन्तरमातिथ्यायामिति । इष्टिमधिकृत्य उत्तरो विधिः इष्टिष्वेव भवति, नानुवचनेषु ।

१-१. साग्निचित्येष्वहस्मग्निचित्या ब[1]; साग्निचित्येष्वेह (°ष्वाहा मै; °ष्वह पू) अग्निचित्या (°त्याः मै) ब[2] मै पू । २. नास्ति ब[2] । ३. भरणे मूको । ४. प्रत्यधिका° मै । ५-५. नास्ति मूको । ६. इदं मूको ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

अग्निपूर्वेषु कर्मसु शनैस्तरामिवानुब्रूयाद् इति। तस्मादिष्टेः शनैस्तरां नानुवचनेषु। उत्तरोत्तरमित्यनुच्यमाने[1] उखासंभरणादुत्तरेषु सर्वकर्मस्वेक एव शनैस्तरां स्वरः स्यात् ॥ २३ ॥

[उखासंभरणीयेष्टौ स्वराणां पौर्णमासस्वरेभ्यः शनैस्तरत्वविधानम्]

एतत्त्वपि पौर्णमासात् ॥ २४ ॥

एतत् उखासंभरणमपि [2]पौर्णमासात् स्वरात्[2] शनैस्तरां भवति। तु-शब्दः [3]प्राप्तं पौर्णमासस्वरं[3] व्यावर्तयति। अपिशब्दः[4] शनैस्तरामित्यधिकार-समुच्चयार्थः। तत्र पौर्णमासे मन्द्रमध्यमोत्तमानि त्रीणि[5] स्थानानि विशिष्टेषु देशेषु उपदिष्टानि। 'आऽतो मन्द्रेण। मध्यमेन हवींषि। उत्तमेन शेषः[6]'। तत्रैकैकस्मिन् स्थाने सप्त सप्त स्वरा यमा[7] इति वा। चतुर्थो मध्यमः। तस्मादुत्तरे त्रयः उच्चैरुच्चैस्तरोच्चैस्तमाः[8] पुरुषशक्तिमपेक्ष्य भवन्ति[9]। मध्यादेवार्वाक् त्रयः नीचनीचतरनीचतमाः। यत्रैते मन्द्रमध्यमोत्तमा विधीयन्ते, यथा त्रिषु सवनेषु[10], तत्र मध्यमेनारभ्योत्तरोत्तरं समापयेत्। वचनादितरे। 'स उच्चैस्तरामिवानुरूपः[11] शंस्तव्यः' (ऐब्रा ३, २५) इति। 'सा नीचैस्तरामिव धाय्या शंस्तव्या' (ऐब्रा ३, २५) इति च। 'प्रतिष्ठिततमया वाचा शंस्तव्यम्' (ऐब्रा ३, २४) इति चतुर्थयमया[12] (वाचा) इत्यर्थः। 'एवं शंसेद् यदि वाच ईशीत' (ऐब्रा ३, ४४) इति श्रुतिः। अथवा सुशक्त्या सप्तानां स्वराणां येन केनचित् प्रतिपद्योत्तरोत्तरं समापयेत्। तथा हि श्रुतिः—'यया तु वाचोत्तरोत्तरिण्योत्सहेत समापनाय, तया प्रतिपद्येतैतत् सुशस्ततमामिव भवति' (ऐब्रा ३, ४४) इति च। [13]एष इष्टिषु न भवति[13]। [14]इष्टिषु तु ऐष्टिकेनैवा स्वरेण यमेन वा प्रयोगो भवति,[14] सप्तमेन वषट्कारः पौर्णमासेनातिदेशात्। पौर्णमासे तु षष्ठेन प्रयोगः, सप्तमेन वषट्कारः[15]। पञ्चमेन उखासंभरणम्। चतुर्थेन दीक्षणीया। तृतीयेन प्रायणीया। द्वितीये-नातिथ्या। प्रथमेनोपसत्। प्रथम एव सुमन्द्रः। उपसदि [16]सुमन्द्रः उपांशु वेति[16] विकल्पः। अपरे पुनः 'शनैस्तरामुत्तरोत्तरम्' (आश्रौ ४, १, २३) इति स्थानात्

---

१. °त्यनूच्य° मूको। २-२. °मासा (°स ब[2] पू) स्व° मूको। ३-३. प्राप्तपौर्ण° मै। ४. अपि च शब्दः ब[1,2] पू। ५. नास्ति मै। ६. तु. आश्रौ १, ५, २५-२८। ७. तु. ऋप्रा १३, ४४। ८. उच्चैस्तरोत्तमाः मूको। ९. तावन्ति मूको। १०. तु. आश्रौ ५,१,४; १२,८; १७,१; ऐब्रा ३, ४४। ११. °मिवानुब्रूयात् मूको। १२. चतुर्थयमा य ब[1,2] पू; चतुर्थयमा मै। १३-१३. एव इष्टिषु भवति ब[1] पू; एव इष्टिषु° ब[2]; एष्टिषु भवति मै। १४-१४. नास्ति मै। †. ऐष्टकेनैव ब[1]; ऐष्टेनैव ब[2] पू। १५. प्रयोगः मै। १६-१६. समन्द्रमुपांशु वेति (इति मै) मूको।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

स्थानान्तरमुपदिशन्ति । तथा सति उपदेशो मन्द्रमध्यमयोः उखासंभरणीयायां विपदोपदिष्टमन्द्रा (?) । दीक्षणीयायां ध्यानमदो[1] पितृमन्तः । प्रायणीयायां च उपांशु, ध्वननिनादाः[2] आतिथ्यायाम् । एवं तु सहकारिणो न कुर्वन्ति । तस्मान्मन्द्र-मध्यमोत्तमा एव स्वरा यथोत्तरेण[3] शनैस्तराम्[4] उत्तरोत्तरं भवन्ति । एवं सहकारिभिः सह युज्यते ॥ २४ ॥

[सोमप्रवहणे प्रायणीयावत् स्वरविधानम्]

प्रायणीयावत् सोमप्रवहणम् ॥ २५ ॥

प्रायणीयया इष्ट्या तुल्यं प्रायणीयावत् । प्रायणीयावत् सोमप्रवहणं भवति । सोमाय प्रोह्यमाणाय यदनुवचनं तत् सोमप्रवहणम् । तस्मिन् स्वर-नियमाभावाद् अनियमे प्राप्ते स्वरो नियम्यते । प्रायणीयायाः स्वरो भवतीति प्रायणीयावदित्युच्यते । प्रायणीयायां स्वरविशेषो यः स भवति, तृतीयो यमः मध्यमस्वरो भवति प्रधानत्वात् । प्रधानो हि सोमः हविश्च । तस्मात् प्रधाने हविषि[5] आग्नूःप्रणववषट्काराणां[6] यः स्वरः स भवति । एवं सहकारिणोऽपि कुर्वन्ति । प्रस्तोता सुब्रह्मण्योमिति मध्यमस्वरेणाह । तस्मान्मध्यमस्वरस्य तृतीयेन यमेनेति प्रयोगो भवति ॥ २५ ॥

[अग्निप्रणयने प्रथमाया ऋचोऽनन्तरमौपवसथ्ये च मध्यमोत्तमस्वरयोर्नियमकथनम्]

ऊर्ध्वं प्रथमाया अग्निप्रणयनीयाया औपवसथ्येऽनियमो मध्यमादि ॥ २६ ॥

ऊर्ध्वं प्रथमायाः अग्निप्रणयने या प्रथमा ऋक् तस्या ऊर्ध्वम् औपवसथ्येऽहनि मध्यमं स्वरमादिं कृत्वा स्वराणाम् अनियमो[7] भवति । अनुवचनमधिकृत्योक्तो विधिः अनुवचनेष्वेव भवति, नेष्टिपशुषु । तस्मादविहितस्वरत्वादविहित-स्वरा[8] [9]इष्टयः पशवश्च[9] । एवं हि श्रुतिः—'तस्मादुपवसथे यावत्या वाचा कामयीत तावत्याऽनुब्रूयात्' (ऐब्रा ३, ४५) इत्यनुवचनचोदना[10] श्रूयते । तस्मादनुवचनेष्वेव हविर्धानप्रवर्तने[11] अग्नीषोमप्रणयने[12] च । ऊर्ध्वं प्रथमाया

---

१. ध्यानमदो ब[2] मै पू । २. ध्वाननिनोद मै । ३. यथान्तरेण ब[2] मै पू । ४. °रा ब[1/2] पू । ५. हविषु ब[1/2] पू । ६. तु. आश्रौ २,१५,१२ । ७. नियमो मै । ८. तस्मादविहि (°दि मै) तस्वरत्वाद्विहि (°दि मै) तस्वरा मूको । ९-९. इष्टयश्च मै । १०. °चनबोधना मै । ११. तु. ऐब्रा १, २१ । १२. अग्निप्र° ब[1] पू; अग्नीषोमीयप्र° मै ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

इति कस्मात् ? "'अयमु ष्य प्र देवयुः (ऋ १०, १७६, ३) इत्यनुष्टुभि वाचं विसृजते" (ऐब्रा १, २८) इति श्रुतिः। औपवसथ्य इत्यनुच्यमाने अग्निप्रणयनशेष उपवसथनियमः स्यात्। मध्यमादीति वचनान्मन्द्रो न[1] भवति। आदिग्रहणादुत्तरोऽपि भवति। अनियम इति वचनाद् [2]मध्यम उत्तमो[2] वा भवति ॥ २६ ॥

[घर्मेऽपि मध्यमोत्तमस्वरयोरनियमकथनम्]

घर्मे ॥ २७ ॥

अत्र मध्यमादीत्यनुवर्तते। घर्मे मध्यमादिस्वराणाम् अनियमो भवति मध्यम उत्तमो वा। घर्मे स्वरनियमाभावादनियमेऽप्राप्ते[3] अनियमः क्रियते ॥ २७ ॥

[4]॥ इति चतुर्थस्य प्रथमं खण्डम् ॥[4]

---

१. नास्ति मै। २-२. मध्यमोत्तमो (°मौ मै) मूको। ३. स्वरनियमा-भावादनियमे प्राप्ते (°वादप्राप्ते ब[2]) मूको। ४-४. नास्ति मूको।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

अथ चतुर्थेऽध्याये द्वितीयः खण्डः

[दीक्षणीयायामिष्टौ धाय्ये, विराजौ संयाज्ये च भवत इति निरूपणम्]

दीक्षणीयायां धाय्ये, विराजौ ॥ १ ॥

दीक्षणं नाम कर्म। तत्र भवा इष्टिः दीक्षणीया। तस्यां दीक्षणीयायां विधिरुच्यते। धाय्ये सामिधेनीषु धाय्ये भवतः। 'सप्तदश सामिधेनीरनुब्रूयात्' (ऐब्रा १, १) इति श्रुतिः। विराजौ संयाज्ये भवतः[1]। 'तस्माद् विराजावेव कर्तव्ये' (ऐब्रा १, ६) इति श्रुतिः ॥ १ ॥

[तत्रानग्निचित्ये देवतायाज्यानुवाक्याकथनानन्तरं साग्निचित्ये देवतात्रयकथनम्]

अग्नाविष्णू ॥ २ ॥

अग्निर्मुखं प्रथमो देवतानां संगतानामुत्तमो विष्णुरासीत्। यजमानाय परिगृह्य देवान् दीक्षयेदं हविरागच्छतं नः (काठ ४, १६)। अग्निश्च विष्णो तप उत्तमं महो दीक्षापालाय वनतं हि शक्रा। विश्वैर्देवैर्वयुनियैः संविदानौ दीक्षामस्मै यजमानाय धत्तमिति (तु० तैब्रा २, ४, ३, ४)। साग्निचित्ये त्रीण्यन्यानि ॥ ३ ॥

वैश्वानर आदित्याः सरस्वत्यदितिर्वा ॥ ४ ॥

अग्नाविष्णू देवता। तस्या अग्निर्मुखम् इत्येते यथासमाम्नाते याज्यानुवाक्ये। शेषं पौर्णमासेन। साग्निचित्ये अग्निचित्यया[2] सह क्रतुः साग्निचित्यः, तस्मिन् साग्निचित्ये क्रतौ दीक्षणीयायाम् आग्नावैष्णवं हविः, त्रीणि च अन्यानि हवींषि भवन्तीति[3]। अधिकानीत्यर्थः। तासां देवता अग्निर् वैश्वानर आदित्याः सरस्वती तृतीया। अदितिर्वा तृतीयेति विकल्पः। [4]'साग्निचित्य इति वचनादन्यत्राग्नावैष्णवमेव[4] भवति। त्रीणि इति वचनाच्चत्वारि न[5] भवन्ति। तस्माददितिर्वेति विकल्पो, न समुच्चयः। अन्यानीत्यनुच्यमाने साग्निचित्ये त्रीण्येव भवन्ति। आग्नावैष्णवं न स्यात्। वैश्वानरस्य चातुर्मास्यप्रकरणे (आश्रौ २, १५, २) उक्ते याज्यानुवाक्ये ॥ २-४ ॥

---

१. तु. आश्रौ २, १, ३०। २. °चित्या मूको। ३. भवन्ति ब[2]। ४-४. °चित्यवृत्तिवच° मै। ५. नास्ति मै।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

[भुवद्वतां, भुवनपतीनाम् आदित्यानां च याज्यानुवाक्याकथनम्]

धारयन्त आदित्यासो जगत्स्था इति द्वे एते एव भुवद्वद्भ्यो भुवनपतिभ्यो वा ॥ ५ ॥

'धारयन्त आदित्यासो जगत्स्था' (ऋ २, २७, ४-५) इति द्वे आदित्यानां याज्यानुवाक्ये। एते एव याज्यानुवाक्ये यदि भुवद्वद्भ्यो [1]भुवनपतिभ्यो वा[1] आदित्येभ्यश्चोदयेयुस्तदाप्येते[2] एव। 'व्यक्ते तु दैवते तथैव लक्षणम्' (आश्रौ २, १४, २४) इति आम्नानादसम्पन्नलक्षणयोरेव ग्रहणं प्राप्तम्। तस्मादाह—एते एवेति। [3]भुवद् भुवन[3] इत्येतयोः समानार्थत्वादेते एवेत्युच्यते[4]। अथवा एकस्यामप्यविलक्षणे विद्यमाने तल्लक्षणे ते भवत इति दर्शितं भवति ॥ ५ ॥

[दीक्षणीयेष्टिमारभ्योदयनीयातः पूर्वमिष्टिषु मार्जनप्रतिषेधः]

नेदमादिषु मार्जनमर्वागुदयनीयायाः ॥ ६ ॥

इदमादिषु कर्मसु दीक्षणीयामिष्टिमादिं कृत्वा इत उत्तरा या इष्टयो वक्ष्यन्ते तासु मार्जनं न विद्यते। अर्वागुदयनीयाया इष्टयो यास्तासु[5] प्रतिषेधः। उदयनीयायां[6] न[7] क्रियते। इष्टिमधिकृत्य प्रतिषेधः[8]। तस्मादैष्टिकस्यैव मार्जनस्य प्रतिषेधो न पाशुकस्य। वक्ष्यति च—'मार्जयित्वाऽध्वर्युपथ उपतिष्ठन्ते' (आश्रौ ५, ३, १३) इति। [9]अर्वागुदयनीयाया† इति वचनादुदयनीयायां[9] क्रियते ॥ ६ ॥

[दीक्षणीयेष्टिमारभ्याग्रे कर्मसु इळायां सूक्तवाके चाशिषां स्थान आगुरो विधानम्]

इदमादीळायां सूक्तवाके चागूराशीःस्थाने ॥ ७ ॥

इदमादि दीक्षणीयामादिं कृत्वा इदमुत्तरं यानि कर्माणि वक्ष्यामः, तेषु इळायां सूक्तवाके च या आशिषस्तासां स्थाने आगूर्नाम आशीर्भवति। सा वक्ष्यते। एतदधिकृतं वेदितव्यम् इत उत्तरं यद् वक्ष्यते। इदमादीति इष्टिमधिकृत्य उक्तो विधिः इष्टिषु भवति पशावपि[10]। इळा सूक्तवाकश्च ऐष्टिकावेव[11]। तत्राऽप्याशिषः स्थाने आगूर्भवत्येव[12]। तस्मादाह—'प्रकृत्यान्त्य ऊर्ध्वं पश्विळायाः'

१-१. नास्ति मूको। २. °स्तदप्येते ब[1] पू। ३-३. भुवन मूको। ४. एवेत्युच्यते ब[1/2] पू। ५. तासु मै। ६. °नीयानां मै। ७. नास्ति मै। ८. प्रतिषिद्धं ब[1] मै पू। ९-९. अर्वागुदयनीयायाम् पू। †. °यायाम् मूको। १०. पशवेपि ब[1/2] पू; पशवोपि मै। ११. ऐष्टिकमेव मूको। १२. आगूनं भ° मै।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

(आश्रौ ४, २, ११) इति सवनीयपश्विळायां[1] ऊर्ध्वं प्रकृत्या भवति। पश्विळायां तु आगूर्भवत्येव । इळायां सूक्तवाके चेति वचनादाशिषामेवोद्धारः । शेषं समानम् ॥ ७ ॥

आशीःस्थान[2] इति वचनाद् यत्र यत्र आशीःपदं तस्य तस्य स्थाने आगूरादेशे[3] प्राप्ते दृष्टानामुद्धारार्थं[4] विद्यमानेन संधाय पठति—

[इडायामाशीःपदस्य स्थान आगुरो निगदविधानम्]

उपहूतोऽयं यजमानोऽस्य यज्ञस्याऽऽगुर उदृचमशीयेति तस्मिन्नुपहूतः ॥ ८ ॥

'उपहूतोऽयं यजमानः' (आश्रौ १, ७, ७) इति एतदिळायां विद्यमानम् अनाशीःपदं तेन संधाय आगुरं पठति '[5]अस्य यज्ञस्यागुर उदृचमशीयेति[5] [6]तस्मिन्नुपहूत इत्यागूः[6] । उत्तरस्यां देवयाज्यायामुपहूतो भूयसि हविष्करण इदं मे देवा हविर्जुषन्तामिति[7] तस्मिन्नुपहूतः' (आश्रौ १, ७, ७) इत्येतस्य स्थाने आगूर्भवति । विद्यमानेन पूर्वेण सन्धायाम्नातत्वादन्यत्र आशीःपदस्य[8] स्थाने आशीर्भवति । 'उपास्माँ इळा ह्वयताम्' (आश्रौ १, ७, ७) एतस्य स्थाने भवति[9] इति । उपहूत इत्याशिषः अन्तश्चाम्नातः[10] । आगुरोऽप्यन्तः स एवाम्नातः । सूक्तवाके आशिषां स्थाने आगूर्वक्ष्यते ॥ ८ ॥

[सूक्तवाक आशीःपदस्य स्थान आगुरो निगदविधानम्]

आशास्तेऽयं यजमानोऽस्य यज्ञस्यागुर उदृचमशीयेत्याशास्ते ॥ ९ ॥

[11]"आशास्तेऽयं यजमानः' (आश्रौ १, ९, ५) इत्येतत् सूक्तवाके विद्यमानमाशीःपदम्† । तेन सह संधायागूः पठ्यते । अस्य यज्ञस्यागुर उदृचमशीयेत्याशास्ते इति आशिषां स्थाने भवति आगूः । आशास्ते इत्येवमादि परं समानम्[11] । 'आशास्तेऽयं यजमानः' (आश्रौ १, ९, ५) इत्येतेन विद्यमानेन संधायाम्नातत्वादन्यत्र आशीःपदस्य[12] स्थाने [13]आगूर्न भवति[13] । 'अस्यामृधेद्धोत्रायाम्' (आश्रौ १, ९, ५) इति [14]अस्यान्ते न[14] भवति । आशीःस्थाने[15] इत्युक्तत्वाद् दृष्टानामाशिषां[16] स्थाने

---

१. पश्विळायाम् मूको । २. आशिषः स्थाने मूको । ३. आगूरा° ब[1,2] पू । ४. इष्टानां° मूको । ५-५. यजमानस्यागुरुद्° मूको । ६-६. तस्मिन्नागूः मै । ७. जुषेताम् मूको । ८. आशीःपदं तस्य ब[1] । ९. न भवति ब[2] मै पू । १०. तु. आश्रौ १, ७, ७ । ११-११. नास्ति मै । †. °मानमनाशीःपदम् ब[2] पू । १२. आशीःपदं तस्य ब[1] । १३-१३. आगूर्भवति मै । १४-१४. अस्याते न ब[1] ; त्रुटितम् पू । १५. आशिषः स्थाने मै । १६. °त्वादृष्टाना° ब[1,2] मै ; °त्वादष्टाना° पू ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

आगूर्भवति । 'यदनेन' (आश्रौ १, ९, ५) इत्येवमादि यत्परं तन्नोद्ध्रियते। आशीर्वादो न भवति । हवींषि प्रशस्यन्ते उत्तरैर्वाक्यैः । अनेन हविषा यत्फलमिच्छति, तद् यजमानः प्राप्नोति । सिध्यतीत्यर्थः[1] ॥ ९ ॥

[अत्र सूक्तवाके यजमाननाम्नोर्ग्रहणप्रतिषेधः]

न चात्र नामादेशः ॥ १० ॥

अत्रास्मिन् सूक्तवाके यजमानस्य नाम्नोर् आदेशश्च न कर्तव्यः । पूर्वं[2] संधायाम्नाते सति नाम्नोरादेशः[3] प्राप्नोति नाम्नोरादेश्यत्वात्[4] । तस्मात् प्रतिषेधः क्रियते । च-शब्द इदमादीति[5] अधिकृतसमुच्चयार्थः । तस्माद् दीक्षणीयादिषु सर्वकर्मसु प्रतिषेधः । अत्रेतिवचनात् सूक्तवाके एव[6] प्रतिषेधः । तत्र होत्रीयजपे[7] अविशेषवचनात् सर्वत्र प्रतिषेधः प्राप्तः, तस्मादारम्भाद् विशेष एव[8] क्रियते । [9]अन्यत् समानमिति दर्शयति[9] ॥ १० ॥

[अहीनानामन्त्येऽहनि तृतीयसवने पश्विळाया ऊर्ध्वं च प्रकृत्या इति विधानम्]

प्रकृत्याऽन्त्य ऊर्ध्वं पश्विळायाः ॥ ११ ॥

अहीनानाम् अन्त्येऽहनि[10] इळायां सूक्तवाके च यो विकार उक्तः स प्रकृत्या भवति । ऊर्ध्वं पश्विळायाः । "पशोरिळा† पश्विळा । तृतीयसवने‡ पश्विळाया ऊर्ध्वं प्रकृत्या भवति । सवनीयानां[11] या इळा तदादि प्रकृत्या । एकाहेषु स एवादिः स एवान्तः । तस्मादाद्यन्तोपदिष्टो विधिः एकस्मिन्नप्यहनि भवति । ऊर्ध्वं पश्विळाया इति वचनात् पश्विळायां भवति विकारः । अत ऊर्ध्वं प्रकृत्या ॥ ११ ॥

[दीक्षणीयादिष्वग्निप्रणयनात्पूर्ववर्तिषु कर्मसु दीक्षितानां संचरविधानम्]

दीक्षितानां संचरो गार्हपत्याहवनीयावन्तराग्नेः प्रणयनात् ॥ १२ ॥

'इदमादि'[12] (आश्रौ ४, २, ७) इति वर्तते । [13]दीक्षणीयादिषु कर्मसु[13] कर्मण्यधिकृतानां सञ्चरो[14] वक्ष्यते, येन मार्गेण गत्वा याजमानं कुर्वन्ति ।

---

१. सिध्यति वेत्यर्थः ब[2] मै पू । २. पूर्वे ब[1,2] मै; त्रुटितम् पू । ३. नामादेशः मै । ४. नाम्नोराद्यत्वात् ब[1,2] पू ; नाम्ना लाघवात् मै ; तु. आश्रौ १, ९, ५ । ५. इद (°घ ब[1]) मादीनि (°दिति ब[1]) मूको । ६. एवं ब[1] पू; नास्ति मै । ७. तु. आश्रौ ५, १०, १० । ८. नास्ति मै । ९-९. नास्ति मै । १०. अहर्गणेष्वन्त्येऽहनि मै ; गर्हणा (अहर्गणाना ?) मन्त्येऽहनि पू ; अहनि ब[2] । ११-११. नास्ति ब[1] । †. पश्वोरिळा मै । ‡. °सवे मै । १२. दीक्षितादीनां सवने इदमादीनि मै ; °दीनि ब[1,2] पू । १३-१३. °यादिकर्मसु मै । १४. सञ्चारो मै ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

इदमादीति वचनात् सर्वत्र प्राप्ते आ[1] अग्नेः प्रणयनाद् इत्याह। प्रणीतेऽग्नौ यथा नियुक्तानि कर्माणि कुर्वन्ति अविरोधेन याजमानं च। यथा अहीनैकाहेषु [2]कर्मण्यधिकृताः कर्म[2] न कुर्वन्ति, स्वकर्मकाले एव प्रविशन्ति। एवं प्राप्ते सूत्रारम्भः। यजमानस्य सञ्चरोऽयम्[3] ऋत्विजामप्राप्तो विधीयते। यथा समावापश्च सञ्चरो[4] यजमानार्थः। याजमानं[5] चाप्राप्तं[6] विधीयते ॥ १२ ॥

[दीक्षणादिकर्मसु रात्रिसंख्यानुसारेण दीक्षाया असंख्यातत्वम्]

दीक्षणादिरात्रिसंख्यानेन दीक्षा अपरिमिताः ॥ १३ ॥

दीक्षणादि दीक्षणकर्म आदि[7] कृत्वा दीक्षणादिरात्रिसंख्यानेन दीक्षाः। अपरिमिताः असंख्याता भवन्ति सर्वक्रतुषु अनधिकृत्य विधानात्[8] ॥ १३ ॥

[अनग्नौ दीक्षणे संवत्सरपर्यन्तमपरिमिता रात्रिसंख्या साग्नौ दीक्षणे महाव्रते च संवत्सरमेवेति विधानम्]

एकाहप्रभृत्या संवत्सरात् संवत्सरं त्वेव सव्रते ॥ १४ ॥

एकाहप्रभृति एकमहरादि (? दि) कृत्वा आ संवत्सराद् यावत्[8] संवत्सरः पूर्यते। [9]संवत्सरादधिका न भवन्ति। यावच्चात्मनः शुद्धिं मन्यते तावद्दीक्षणं भवति। 'विज्ञायते[9] च [10]यदा वै दीक्षितः कृशो भवति[10]' (आपश्रौ १०, १४, ९)। 'पीवा दीक्षते कृशो यजते' (आपश्रौ १०, १४, १०) इति अन्येषाम्। रात्रिसंख्याश्च[11] उक्ता अपरिमिता इति। एतस्मात् सर्वक्रतुषु असंख्याताश्च[12] भवन्ति। यथाकामं सर्वक्रतुषु अग्निर्वैकल्पिकोऽन्यत्राश्वमेधात् साद्यस्कात् सारस्वताच्चेति। तस्मात् साग्नौ संवत्सरमुखां धारयन्तीति[13] प्रथमः कल्पः साग्नावेव महाव्रताम्नानादिति[14]। 'संवत्सरं त्वेव सव्रते' इति चोक्तम्। अग्नौ तु[15] तिस्रः षड् द्वादश पञ्चदश चतुर्विंशतिर्मासमित्येते विकल्पाः। अनग्नौ तु अपरिमिताः एकाहप्रभृत्या संवत्सरात्। अविशेषेण च श्रूयते—'तं त्रयोदशान्मासादक्रीणन्' (ऐब्रा १, १२) इति। रात्रिसंख्यानेनेति वचनाद् रात्र्यन्ते दीक्षितो[16] भवति। तस्मात् 'दीक्षान्ते राजक्रयः' (आश्रौ ४, २, १८) इत्युक्ते एता रात्रयो भवन्ति। अन्यथा अहरन्ते स्यात्।

---

१. नास्ति मै। २-२. कर्म (°र्मा ?) ण्यधिकृतानि मै। ३. संचा° मै। ४. यजमानस्य मै; यजमानं ब[1,2] पू। ५. च प्राप्तं ब[1]; प्राप्तं मै। ६. आदि ब[2]; त्रुटितम् पू; आदि अन्यत्र। ७. विधाने मै। ८. आ मै। ९-९. नास्ति मै। १०-१०. यज्ञाय (यज्ञा मै) एव (एवे ब[1] पू) तैर्भवति मूको। ११. रात्रिः संख्या च मूको। १२. संख्या° मूको। १३. धारयतीति ब[2] मै। १४. °म्नातादिति मूको। १५. नास्ति ब[2]। १६. दीक्षान्तो (°तो ब[1]) ब[1] मै पू।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

अपरिमिता इति बहुवचनात् त्रिप्रभृति प्राप्ता एका द्वे च[1] न प्राप्नुतः, तस्मादाह—एकाहप्रभृति रात्रिसंख्यानेन[2]। सति अहर्गणे नोपपद्यते। उभयत्रापि श्रुतिः—तिस्रो रात्रीः षड् रात्रीः द्वादश [3]रात्रीः (?) इति। द्वादशाहानि[3] दीक्षणं भवति। एतस्मान्न दोषः। अपरिमिता इति वचनात् संवत्सरादधिका अपि प्राप्नुवन्ति। तस्मादाह—आ संवत्सरादिति। तस्मात् संवत्सरादधिका न[4] भवन्ति[5]। अपरो मार्गः, दीक्षणमादिं कृत्वा त्रिसंख्यानेन[6] रात्रिगणनया दीक्षा[7] अपरिमिता भवन्ति एकाहप्रभृतिषु क्रतुषु अहीनेषु सर्वेषु च। अपरिमिता इति बहुवचनाद् एका द्वे च न प्राप्नुतः। एकाहानां तु वचनादेका भवति। 'एकास्तिस्रो वा दीक्षाः' (आश्रौ ४, २, १७) इति संख्यानात् साग्नौ अपरिमिता अनन्ता वेति[8] व्याख्या। 'दीक्षितानां सञ्चरः[9]' (आश्रौ ४, २, १२) इति दीक्षितानामधिकाराद् [10]या दीक्षा[10] वक्ष्यन्ते, ता[11] दीक्षितानामेव सत्राधिकारे एव स्युस्तस्मादेकाहप्रभृतीत्युच्यते। एकाहप्रभृतिसर्वक्रतुषु अपरिमिता दीक्षा इति संवत्सरं त्वेव सत्रते[12]। समासे (?) अपरिमिताः प्राप्ताः यथा 'सर्वजित्[13], व्रतवन्तमायुष्कामः' (आश्रौ १०, २, २७), द्वितीयस्त्रयोदशरात्रः[14], गवामयनम्। या या प्राप्तिस्तस्यास्तस्या अयमपवादः[15]। तु-शब्दः प्राप्तव्यावृत्त्यर्थः। एव-शब्दोऽवधारणार्थः। साग्नौ[16] 'संवत्सरं दीक्षितः उख्यं बिभर्त्ति' (आपश्रौ १६, ९, १)। अनग्नावपि समहात्रते संवत्सरमेवेति ॥ १४ ॥

[द्वादशाहतापश्चितेषु सुत्योपसत्कालपर्यन्तं दीक्षाकालः]

द्वादशाहतापश्चितेषु यथासुत्योपसदः[17] ॥ १५ ॥

[18]अथ द्वादशाहाः' (आश्रौ १०,५,१) इति वक्ष्यते†। 'चत्वारि तापश्चितानि' (आश्रौ १२, ५, ८) इति च[18]। [19]तेषु द्वादशाहेषु तापश्चितेषु[19] च यथा[20] सुत्यानि यावत्कालं सुत्यानि उपसदश्च तावत्कालं दीक्षा भवन्ति। अपरिमिताः प्राप्ताः। द्वादशाहे[20] द्वादश सुत्यानि द्वादशोपसदः द्वादशैव दीक्षाः। 'त्रैवर्षिकं[21] तापश्चितं तस्य [22]सौत्यः संवत्सरः[22]' (आश्रौ १२, ५, ११)। एवं[20] संवत्सरमुपसदः संवत्सरं

---

१. नास्ति ब[1]। २. रात्र्यसं° मै। ३-३. रात्रिरहनि मै। ४. नास्ति मूको। ५. भवति मूको। ६. रात्रिसं° ब[2]। ७. दीक्षाया मूको। ८. इति मै। ९. संवत्सरः मूको। १०-१०. या दीक्षिता ब[2]; दीक्षिता मै। ११. तेषां मै। १२. सवने मै। १३. तु. काश्रौ २२,१,४४। १४. तु. आश्रौ ११,२,३। १५. अपवादः मै। १६. अग्नौ ब[2]; त्रुटितम्। १७. सुत्यान्युपसदः देवव्रातपाठः। १८-१८. नास्ति मै। †. वक्ष्यति ब[2]। १९-१९. द्वादशाहतापश्चितेषु मै; त्रुटितम् पू। २०. नास्ति ब[1] मै पू। २१. त्रिवार्षिकं मै। २२-२२. सौत्य-सांव° मूको।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

दीक्षाः । यथा सुत्यानीति सिद्ध उपसद्ग्रहणम् उपसदामपि तावत्येव[1] प्राप्त्यर्थम् ॥ १५ ॥

[ऐकाहिकेषु कर्मस्वाचरणीयानां कर्मणामुपक्रमः]

कर्माचारस्तु[2] एकाहानाम्[3] ॥ १६ ॥

ज्योतिष्टोमादयः ये च नवमेऽध्याये[4] आम्नातास्तेषाम् एकाहानां तु कर्माचारो यत् कर्म आचर्यते[5] क्रियते, स कर्माचार इत्युच्यते । कर्माचार इत्यनुच्यमाने वक्ष्यमाणविधौ प्राप्तस्य विधेः[6] प्रतिषेध एव स्यात् । कर्माचारे क्रियमाणे एतत्तु आचर्यते,[7] इतरदप्यस्तीति[8] सिद्धं भवति । अपरिमिता दीक्षास्तिस्रः षड् वा उपसद इति कर्माचारः, तद् वक्ष्यते ॥ १६ ॥

[दीक्षोपसत्सुत्यानां प्रयोगकालविधानम्]

एका तिस्रो वा दीक्षास्तिस्र उपसदः सुत्यमहरुत्तमम्[9] ॥ १७ ॥

अपरिमिताः प्राप्ताः । एका दीक्षा भवति तिस्रो वा । एवमध्वर्यवः आचरन्ति[10] । अग्निष्टोमसंस्थे क्रतौ एष कर्माचारो भवति । उत्तरासु संस्थासु अग्निष्टोम उत्तरवेदिः[11] । उत्तरेषु क्रतुष्वग्निचयनम्[12] । अध्वर्यूणां साग्निचित्येऽपि दीक्षोपसदो[13] भवन्ति तिस्रः षड् द्वादश चतुर्विंशतिः[14] । तदाऽप्यग्निष्टोमे[15] तिस्रो दीक्षाः [16]उपसदि शंसन्ति[16] । [17]तस्मादग्निष्टोमे केषां चिदग्निरस्तीति[17] वक्तव्यम् । तस्मादनग्नावेका[18] दीक्षा, साऽग्नौ तिस्र इत्युक्तं भवति । 'तिस्र उपसदः । तिस्रः षड् वा' (आश्रौ ४, ८, १३-१४) इति वक्ष्यति । उपसदस्तिस्र एव आचर्यन्ते[19] साग्नावनग्नावग्निष्टोमे । सुत्यमहरुत्तमम् । सुत्यसंज्ञमुत्तममहर्भवति । अभिषूयते सोमः अस्मिन्निति सुत्यम् । 'सुत्यासु हविरुच्छिष्टभक्षा[20] एव स्युः'

---

१. तावत्वेव ब[1/2]; त्रुटितम् पू । २. °रास्तु मै । ३. एकाहनाम् मै । ४. नवमाध्याये मै । ५. आचार्यते ब[2] मै पू । ६. विधिः ब[1/2] पू । ७. आचार्यते ब[2] मै पू । ८. इत्येतदप्य° मै । ९. उत्तरम् मूको भाष्यानुसारं शोधः । १०. तु. आपश्रौ १०, १५, १ । ११. उत्तरं वेदिः ब[1] मै पू । १२. °ग्निवसनम् ब[1] पू; °ग्निवचनम् ब[2] । १३. तु. आपश्रौ १६,९,१; बौश्रौ २६, १ : १ । १४ तु. आपश्रौ ११, ४, ७; २१, १, ११ । १५. तदाग्नि° मै । १६-१६. उपसति ब[1]; उपसति शंसति ब[2] पू । १७-१७. तस्मादग्निरस्तीति ब[1] पू । १८. तस्मावृत्तं (तस्मावृत [°त्त पू] ब[2] पू; तस्मादृता मै) ग्नावेका मूको । १९. आचा(आच मै)र्यते मूको । २०. °ष्टा भक्षा मूको ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

(आश्रौ १२, ८, ३२) इति । अहानि दीक्षोपसद्भ्य उत्तराणि भवन्ति । सुत्यग्रहणात्[1] प्राप्तस्य अग्निष्टोमस्य ग्रहणं 'तं सहैवाह्ना संस्थापयेयुः साह्नो वै नाम' (ऐब्रा ३, ४४) इति । तस्मादग्निष्टोम एवायं कर्माचारो[2] भवति । उत्तमग्रहणमनुक्रमार्थम् ॥ १७ ॥

[दीक्षान्त्यस्याह्नो राजक्रय इति संज्ञाकथनम्]

[3]दीक्षान्ते राजक्रयः तदहः[3] ॥ १८ ॥

[4]यस्मिन् अहनि दीक्षणं तस्यान्ते राजक्रयः । राजक्रय इत्येतस्याह्नः[4] संज्ञा । 'राजक्रयाद्यहःसंख्यानेन' (आश्रौ ४, ८, १३) इत्युक्ते एतस्याह्नो ग्रहणम् ॥ १८ ॥

॥ इति चतुर्थस्य द्वितीयं खण्डम् ॥

---

१. सुत्याग्र° मूको । २. कर्मचारो मै । ३-३. दीक्षान्ते राजक्रयः BI सान । ४-४. तस्यान्ते राजक्रय इत्येषा (°षां ब[1] पू) मूको ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

अथ चतुर्थेऽध्याये तृतीयः खण्डः

[दीक्षान्त्येऽहनि प्रायणीयेष्टिविधानम्]

प्रायणीयेष्टिः[1] ॥ १ ॥

तदहरिति वर्तते । [2]यस्मिन्नहनि[2] राजक्रयः, तस्मिन्नहनि प्रायणीया नाम इष्टिः भवति । सा वक्ष्यते । राजक्रयादनन्तरं‡[2] प्राप्ता, पूर्वं तु भवति । अनन्तरं क्रयो भवति 'संस्थितायां राजानं क्रीणन्ति' (आश्रौ ४, ४, १) इति । 'सा प्रायणीययोक्ता' (आश्रौ ६, १४, २) इत्युक्ते एतां प्रतीयात् । प्रायणीया वक्ष्यते ॥ १ ॥

[प्रायणीयेष्टेर्देवतायाज्यानुवाक्यासंयाज्याशंयुवाकान्तत्वकथनम्]

पथ्या स्वस्तिरग्निः सोमः सविताऽदितिः स्वस्ति नः पथ्यासु धन्वस्विति द्वे, अग्ने नय सुपथा राये अस्मानादेवानामपि पन्थामगन्म, त्वं सोम प्रचिकितो मनोषा, या ते धामानि दिवि या पृथिव्यामा विश्वदेवं सत्पतिं य इमा विश्वा जातानि सुत्रामाणं पृथिवीं द्यामनेहसं महीमू षु मातरं सुव्रतानां सेदग्निरग्नीरत्यस्त्वन्यानिति द्वे संयाज्ये । शंयवन्तेयम् ॥ २ ॥

पथ्या स्वस्तिरग्निः सोमः सविताऽदितिः **इत्येता देवता भवन्ति । तासां याज्यानुवाक्याः नित्याः प्राप्ताः, अन्या आदिश्यन्ते त्रिष्टुब्गायत्रीजगत्यः ।** 'प्रवत्यो नेतृमत्यः पथिमत्यः स्वस्तिमत्य एतस्य हविषो याज्यानुवाक्याः' (ऐब्रा १, १०) इति श्रुतिः । **तस्मात् तल्लक्षणा आदिश्यन्ते ।** 'स्वस्ति नः पथ्यासु' (ऋ १०, ६३, १५-१६) इति पथ्यायाः स्वस्तेः । **पादग्रहणाद् एका प्राप्ता, तस्माद् द्वे इत्याह ।** 'अग्ने नय' (ऋ १, १८९, १), 'आ देवानाम्' (ऋ १०,२,३) इत्यग्नेः । 'त्वं सोम प्रचिकितो' (ऋ १, ९१, १), 'या ते धामानि' (ऋ १,९१,४) इति सोमस्य । 'आ विश्वदेवम्' (ऋ ५, ८२, ७), 'य इमा विश्वा' (ऋ ५,८२,९) इति सवितुः । 'सुत्रामाणम्' (ऋ १०, ६३, १०), 'महीमू षु' (शौ ७, ६ [७], २)

---

१. तदहः प्रायणीयेष्टिः BI आन. । २-२. तदनन्तरं मै । †. तस्मिन्न° ब[१/२] पू । ‡. °दनन्तरा ब[१/२] पू ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

इत्यदितेः। 'सेदग्निः' (ऋ ७, १, १४-१५) इति द्वे संयाज्ये। पादग्रहणादेका प्राप्ता सैवानुवाक्या सैव याज्या इति प्राप्ते द्वे[1] इत्याह। शेषं पौर्णमासेन। शंय्वन्तेयम्। शंयुवाकः अन्ते[2] यस्याः सा शंय्वन्ता। इयमिति वचनादियमेव [3]शंय्वन्ता नामकर्मभिः[3]। 'सा शंय्वन्ता' (आश्रौ २, १९, २) इति वचनादनया या अतिदिश्यते, सा अन्ते[4] गच्छति ॥ २ ॥

[अत्राऽऽज्यभागप्रतिषेधकथनम्]

अनाज्यभागा ॥ ३ ॥

[5]न आज्यभागौ[5] यस्याः सा अनाज्यभागा इष्टिः। पौर्णमासेन प्राप्तयोः प्रतिषेधः, 'चक्षुषी एवाग्नीषोमौ' (ऐब्रा १, ८) इति श्रुतेः। तस्मान्नित्यावाज्यभागौ प्रतिषिद्धौ। यद्यध्वर्यवः प्रकृतिप्राप्ताविति ब्रुवन्ति, कुर्वन्त्यन्याय्यम्[6]। अस्माकमप्यभ्युपेत्य प्रतिषेधादिति[7]। यदि केषांचिदभ्युपेत्यारब्धौ तयोः स विकल्पः स्यात् ॥ ३ ॥

॥ इति चतुर्थस्य तृतीयं खण्डम् ॥

---

१. नास्ति ब[1]। २. अन्तो ब[2] मै पू। ३-३. शंय्वन्तकर्मभिः ब[1]; शंय्वन्तानेकर्मभिः ब[2]; त्रुटितम् पू। ४. अन्तं ब[1,2] पू। ५-५. नास्ति ब[2]; त्रुटितम् पू। ६. कुर्वन्त्यन्याय्यम् इत्यारभ्य ४, ४, २ सूत्रव्याख्यास्थ—मात्राप्रमाणम् इति पर्यन्तः पाठो नास्ति ब[2]; कुर्वन्तीत्यन्याय्यम् मै। ७. °षेधादि मूको।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

अथ चतुर्थेऽध्याये चतुर्थः खण्डः

[प्रायणीयेष्टिं समाप्य सोमक्रयविधानम्]

संस्थितायां राजानं क्रीणन्ति ॥ १ ॥

संस्थितायां प्रायणीयायां राजानं क्रीणन्ति अध्वर्यवः। 'दीक्षान्ते राजक्रयः' (आश्वौ ४, २, १८) इति वचनात् क्रय एव पूर्वं प्राप्तः, तस्मात् प्रायणीयां पूर्वमुक्त्वा आह—संस्थितायां राजानं क्रीणन्ति। [1]इष्टौ क्रमो[1] विधीयते। अस्मात् संबन्धवचनात् तीर्थेन निष्क्रम्यैव राजक्रयं कुर्वन्ति। कर्मैक्यात् स्वरो ह्येक एव उक्तः ॥ १ ॥

[क्रीतसोमस्य प्रभ्रामणादि-तन्मन्त्रकथनम्]

तं प्रवक्ष्यत्सु पश्चादनसस्त्रिपदमात्रेऽन्तरेण वर्त्मनी अवस्थाय प्रेषितोऽग्रेऽभिहिङ्कारात् त्वं विप्रस्त्वं कविस्त्वं विश्वानि धारयन्। अप जन्यं भयं नुदेत्यस्पन्दयन् पार्ष्णीं प्रपदेन दक्षिणापांसूंस्त्रिरुदुप्यानुब्रूयाद् भद्रादभिश्रेयः प्रेहि बृहस्पतिः पुर एता ते अस्तु। अथेमवस्य वर आ पृथिव्या आरे शत्रून् कृणुहि सर्ववीर इति तिष्ठन् ॥ २ ॥

तं क्रीतं राजानम् अध्वर्यवः सर्वा दिशः प्रवाहयन्ति प्रभ्रामयन्त्यध्वर्यवः। तेषु प्रवक्ष्यत्सु कर्तृषु एतस्मिन्निमित्ते इदं कर्म क्रियते। अनः शकटम्। तस्माद् अनसः पश्चाद् अपरस्यां दिशि त्रीणि पदानि मात्रा प्रमाण[2] यस्य देशस्य स त्रिपदमात्रो देशः। तस्मिन्[3] त्रिपदमात्रे देशे, अन्तरेण वर्त्मनी चक्रमार्गौ[4], [5]वर्त्म च वर्त्म च[5] वर्त्मनी, अन्तरेण मध्येन, अवस्थाय स्थित्वा, अध्वर्युणा प्रेषितः, अग्रेऽभिहिङ्कारात् पूर्वम् अभिहिङ्कारात् त्वं विप्र इत्येतेन[6] मन्त्रेणा-स्पन्दयन् पार्ष्णीं पदस्य पश्चिमो भागः पार्ष्णी, ताम् अस्पन्दयन् अचालयन्। पदस्य [7]पूर्वो भागः[7] प्रपदम्। तेन प्रपदेन दक्षिणापांसून् दक्षिणस्यां दिशि ये

१-१. इष्टो क्रमो ब[1]; इष्टक्रमो मै; त्रुटितम् पू। २. प्रमाणम् इत्यादाय ४, ३, ३ सूत्रव्याख्यास्थ—कुर्वन्त्यन्याय्यम् इतिपर्यन्तः पूर्वतनः पाठो नास्ति ब[2]। ३. तस्मात् मै। ४. चक्रमार्गे मूको। ५-५. नास्ति ब[1] पू; वर्त्म च मै। ६. इत्यनेन ब[1] मै। ७-७. पूर्वभागः मै।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

पांसवस्तान् त्रिरुदुप्य[1] त्रिः ऊर्ध्वम् उत्क्षिप्य 'अनुब्रूयात्—भद्रादभि' (तैसं १,२,३,३; ऐब्रा १, १३) इति। उदुप्यानुब्रूयादिति[2] वचनादभिहिङ्कारलोपः प्राप्तस्तस्मादाह—अग्रेऽभिहिङ्कारादिति। अभिहिङ्कारस्यालोपं[3] दर्शयति। अत्र त्रिरुदुप्येति[4] सकृन्मन्त्रेण द्विस्तूष्णीं संस्कारकर्मत्वात्। भद्रादभि इत्येतामृचं तिष्ठन्नाह। पुनः तिष्ठन्नित्यनुच्यमाने[5] अनुव्रजन्निति वचनात् प्रथमामुक्त्वाऽनुव्रजन्नेव[6] उत्तरा[7] ब्रूयात्। उत्तरा-शब्दश्च अधिकारार्थः स्याद् उत्तरा वक्ष्यन्त इति[8] ॥ २ ॥

[चक्रमार्गयोर्मध्येऽनुगच्छत उत्तराया ऋचोऽनुवचनविधानम्]

अनुव्रजन्नुत्तरा अन्तरेणैव वर्त्मनी ॥ ३ ॥

अनुव्रजन् अनुगच्छन् उत्तरा ऋचः ब्रूयाद्, या वक्ष्यामः। वर्त्म चक्रमार्गः। वर्त्म च [9]वर्त्म च[9] वर्त्मनी, तयोर् अन्तरेण[10] मध्येनैवानुव्रजन्[11] उत्तरा ऋचः। एव-शब्दोऽवधारणार्थः ॥ ३ ॥

[उत्तराया ऋचः कथनं सोममभिमुखमवस्थानञ्च]

उत्तरा ऋचो वक्ष्यन्ते—

सोम यास्ते मयोभुव इति तिस्रः सर्वे नन्दन्ति यशसाऽऽगतेनाऽऽगन् देव ऋतुभिर्वर्धतु क्षयमित्यर्धर्चं आरमेत्। अवस्थितेऽनसि दक्षिणात् पक्षादभिक्रम्य राजानमभिमुखोऽवतिष्ठते ॥ ४ ॥

'सोम यास्ते मयोभुवः' (ऋ १, ९१, ९-११) इति तिस्रः। पादग्रहणादेका प्राप्ता, तस्मादाह—तिस्र इति। 'सर्वे नन्दन्ति' (ऋ १०, ७१, १०) एका[12]। 'आगन्देवः' (ऋ ४, ५३, ७) इत्येतस्या अर्द्धर्चम् उक्त्वा आरमेद् विरमेद् यावद् राजानं प्रपादयन्ति[13]। 'अवस्थितेऽनसि प्राचि तिष्ठति अनसि सोममादधति। तं दक्षिणा परिवहन्ति। तं प्रत्यञ्चमावर्तयन्ति। तमुदीचस्तिष्ठत उपावहरन्ति' इति श्रुतिः[14]। तस्मादुदीचीं दिशमभि यदा अनः शकटमवस्थितं भवति। तस्मादाह—

---

१. °दुष्य मै। २. उदुप्यै (°प्ये मै) वानु° मूको। ३. °रस्य लोपं (°पो मै) ब[2] मै। ४. °रुदुप्यै (°प्ये ब[1]; °प्ये मै) वेति (वेति ब[2] मै) मूको। ५. °न्नित्युच्यमाने ब[1] पू। ६. प्रथममु° ब[1,2] मै; त्रुटितम् पू। ७. नास्ति मूको। ८. नास्ति मै। ९-९. नास्ति ब[2]। १०. तयोत्तरेण ब[1]; तयोरुत्तरेण ब[2] मै पू। ११. मध्यमेनै° मै। १२. एकाह ब[1,2] पू; एकाहं मै। १३. °यन्ति अवस्थितो अवस्थिते ब[1] पू; °यन्ति अवस्थिते अयं वच्छिद्य ब[2]; °यन्ति अवस्थिते मै। १४. तु. ऐब्रा १, १४।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

तस्मिन्नवस्थितेऽनसि शकटे । तस्य शकटस्य 'दक्षिणश्च उत्तरश्च' पक्षः । तयोर्दक्षिणात् पक्षादभिक्रम्य गत्वा चक्रमतिक्रम्य अर्वाग् धुराया देशे राजानमभिमुखोऽवतिष्ठते । प्रत्यग् दक्षिणाभिमुखस्तावदास्ते यावद् राजानं प्रपादयन्ति ॥ ४ ॥

[प्रपाद्यमाने सोमे शकटाग्रेणानुगमनविधानम्]

प्रपाद्यमाने राजन्यग्रेणानोऽनुसंव्रजेत् ॥ ५ ॥

आतिथ्यायाः हविर्निरुप्य राजानं प्रपादयन्ति । तस्मिन् प्रपाद्यमाने राजनि अग्रेणानः गत्वा अनुसंव्रजेद् अनुमार्गेणैव [२]संयुक्त एव[२] व्रजेद् गच्छेत् ॥ ५ ॥

[प्रपाद्यमाने सोमे मन्त्रमनुब्रूयात् , निहिते च तस्मिन् तदुपस्पृशन् परिदध्यात्]

या ते धामानि हविषा यजन्तीमां धियं शिक्षमाणस्य देवेति निहिते परिदध्याद् राजानमुपस्पृशन् ॥ ६ ॥

वसनेऽशुषु वा ॥ ७ ॥

'या ते धामानि' (ऋ १, ९१, १९) इत्येतामनुब्रूयात् प्रपाद्यमाने राजनि । तस्या अर्धर्चमुक्त्वा विरमेद् यावद् राजा निधीयते । अर्थाद् आरमणं भवति, न च[३] वचनात् । 'इमां धियम्' (ऋ ८, ४२, ३) इत्येतया आसन्द्यां निहिते स्थापिते राजनि परिदध्यात् परिधानं कुर्यात् ब्रिब्रूयात्[४] राजानमुपस्पृशन् पाणिना[५] राजानमुपस्पृशन्[६] परिदध्यात् त्रिष्वपि वचनेषु स्पृशेत् । तत्र यदा पूर्वेणाहवनीयं गत्वा सादयन्ति, तदा[७] अनुसंव्रजेदिति वचनात् [८]प्रत्यङ्मुखस्य परिधानं प्राप्तम् । तत्र व्रजनमेवानुगमनम् । निहितेऽनुव्रजनाभावात् प्रत्यङ्मुखेन परिधानं कर्तव्यम् । यदा तु अपरेणाहवनीयं गत्वा सादयन्ति तदा† अनुसंव्रजेदिति वचनात्[८] तेनैव मार्गेण गत्वा प्राङ्मुखः परिदध्यात्[९], परिदध्यादिति वचनात् । उपस्पर्शनविवक्षार्थम्[१०] उपस्पृशन् परिदध्यादिति । त्रिष्वपि वचनेषु उपस्पर्शनं[११] भवति । वसने वस्त्रे उपस्पृशेत् । राजानम्

१-१. नास्ति ब[२] । २-२. संयुक्तं एवं मूको । ३. नास्ति मै; त्रुटितम् पू । ४. त्रिब्रूयात् ब[१,२] पू; निब्रूयात् मै । ५. नास्ति ब[२] मै । ६. नास्ति ब[२] मै; त्रुटितम् पू । ७. नास्ति मै । ८-८. नास्ति मै । †. नास्ति मूको । ९. नास्ति ब[२] । १०. उपस्पृशन् विव° मूको । ११. स्पर्शनं मूको ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

उपस्पृशेदिति। अंशुषु उपस्पर्शने प्राप्ते वसने उपस्पृशेदित्युच्यते। अंशुषु वा। सोमांशवः सोमकाण्डानि[1] तेषु सोमांशुषु वा उपस्पृशेत्। वसने वा इति विकल्पः। राजानमुपस्पृशन्नित्येतेनैव सिद्धे अंशुषु इति[2] न वक्तव्यम्। [3]यदि नोच्यते उपस्पृशन्† सविकल्पः स्यात्। कथम्? राजानम्‡ उपस्पृशन् वसने वा इत्युच्यमाने राजानमुपस्पृशन्[3] वसने वा नोपस्पृशेदिति अयमर्थः स्यात्॥ ६-७॥

॥ इति चतुर्थस्य चतुर्थं खण्डम्॥

---

१. सोमातिकाण्डानि मै। २. वेति मूको। ३-३. नास्ति ब[1]।
†. स्यविकल्पः ब[2]; त्रुटितम् पू। ‡. जातुं ब[2]।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

अथ चतुर्थेऽध्याये पञ्चमः खण्डः

[आतिथ्येष्टेरुपक्रमस्तस्या इळान्तत्वविधानञ्च]

अथातिथ्येळान्ता ॥ १ ॥

अथ अनन्तरम् अस्मात् सोमप्रवहणादनन्तरम् आतिथ्या [1]नाम इष्टिः। सा वक्ष्यते। 'हविरातिथ्यं निरुप्यते सोमे राजन्यागते। सोमो वै राजा यजमानस्य गृहानागच्छति। तस्माद् एतद्धविरातिथ्यं[1] निरुप्यते। तदातिथ्यस्यातिथ्यत्वम्' (ऐब्रा १, १५) इति श्रुतिः। इळान्ता [2]सा आतिथ्या इष्टिः इळान्ता भवति। इळा अन्तो यस्याः सा इळान्ता। या इळाप्राशने सन्तिष्ठते[2] ॥ १ ॥

[तत्रादावग्निमन्थनविधानम्]

तस्या अग्निमन्थनम् ॥ २ ॥

तस्या आतिथ्याया आदौ अग्निमन्थनं भवति। तदुक्तं वैश्वदेवे[3]। तस्या इति वचनाद् मन्थनेऽपि य आतिथ्यायाः स्वरः[4], स भवति। यथा वैश्वदेवे वा ॥ २ ॥

[धाय्ययोरतिथिमतोराज्यभागयोरनुवाक्ययोर्विष्णोर्याज्यानुवाक्ययोः संयाज्ययोः ऋत्विजामाज्याभिमर्शनस्य च विधानम्]

धाय्ये अतिथिमन्तौ समिधाऽग्निं दुवस्यताऽऽप्यायस्व समेतु त इति। विष्णुः। इदं विष्णुर्विचक्रमे तदस्य प्रियमभि पाथो अश्यां होतारं चित्ररथमध्वरस्य प्र प्रायमग्निर्भरतस्य शृण्व इति संयाज्ये। संस्थितायामाज्यं तानूनप्त्रं करिष्यन्तोऽभिमृशन्त्यनाधृष्टमस्यनाधृष्यं देवानामोजो अभिशस्तिपाः। अनभिशस्त्यञ्जसा सत्यमुपगेषां स्विते मा धा इति ॥३॥

धाय्ये सामिधेनीषु भवतः[5]। अतिथिमन्तौ आज्यभागौ भवतः। तयोरनुवाक्ये 'समिधाग्निम्' (ऋ ८, ४४, १), 'आप्यायस्व' (ऋ १,९१,१६) इत्येते। नित्ये याज्ये। 'तयोर्जुषाणेनैव यजति' (ऐब्रा १, १७) इति श्रुतिः। विष्णुर्देवता।

१-१. नास्ति ब[1]। २-२. नास्ति ब[2]। ३. तु. आश्रौ २, १६, १-७।
४. तु. आश्रौ ४, १, २३-२४। ५. तु. आश्रौ २, १, २६।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

तस्या याज्यानुवाक्ये उपांशुयाजविहिते[1] प्राप्ते वचनाद् अन्ये भवतः। 'इदं विष्णुः' (ऋ १, २२, १७), 'तदस्य प्रियम्' (ऋ १, १५४, ५) इत्येते। 'होतारम्' (ऋ १०, १, ५), 'प्र प्र' (ऋ ७, ८, ४) इति स्विष्टकृतः संयाज्ये। शेषं पौर्णमासेन। संस्थितायां परिसमाप्तायामिष्टचां ध्रौवम् आज्यं तानूनप्त्रसंज्ञं करिष्यन्तो येऽस्मिन् क्रतौ कर्म करिष्यन्ति ऋत्विजः पुरोपदिष्टा यजमानसप्तदशास्ते-अभिमृशन्ति 'अनाधृष्टम्' (तु० मासं ५, ५) इत्येतेन मन्त्रेण। संस्थितायामिति पुनरुच्यते कर्मणोऽनुक्रमार्थम्[2]। इष्टचां येऽधिकृतास्तेषामेवाभिमर्शने प्राप्ते करिष्यन्त इति वचनात् सर्वकर्तृणां प्राप्तिः ॥ ३ ॥

[उदकस्पर्शानन्तरं सोमस्यावसेञ्चनविधानम्]

स्पृष्ट्वोदकं राजानमाप्याययन्ति ॥ ४ ॥

पाणिना उदकं स्पृष्ट्वा निर्लेपं कृत्वा 'घृतेन हि वज्रेणेन्द्रो वृत्रमहन्' (ऐब्रा १, २६) इति श्रुतिः। उदकं स्पृष्ट्वा राजानं सोमम् आप्याययन्ति। उदकेनावसिञ्चन्ति सहिरण्यैः पाणिभिरद्भिः[3] स्पृशन्ति सर्वे। ये करिष्यन्त[4] इति वर्तते[5]। 'अंशुरंशुष्टे' (आश्रौ ४, ५, ६) इत्यनेन[6] मन्त्रेण आप्याययन्ति[7]। अभिमर्शनं भवति आप्यायनम्। मुखहृदययोश्चमसेषु च दृष्टत्वादभिमृश्य जपति, न मन्त्रान्तेन प्रधानत्वात् ॥ ४ ॥

[एतदुदकस्पर्शनादिकर्मसूपसत्सु च जलार्थं उष्णोदकस्य ग्रहणम्]

इदमादि मदन्तीरबर्थ उपसत्सु ॥ ५ ॥

इदमादि[8] इदमुदकस्पर्शनमादि कृत्वा मदन्तीः[9] मदन्तीसंज्ञा आपः। अबर्थे अद्भिरर्थः[10] अबर्थः, अप्सु कार्यम्, तस्मिन्[9] मदन्तीरापो* भवन्ति उपसत्सु च, न सर्वत्र। इदमिति वचनाद् [11]यथा इदमुदकस्पर्शनम् एवंविधे† एव‡ भवति। कर्मणि नियुक्तस्य वचनाद्[11] आसनान्निरसनादिषु स्पर्शनार्थमेव नाचमनादिषु। इदमादीति वचनाद् आ क्रतुसमाप्तेः[12] प्राप्ते[9] उपसत्स्वेवेत्युच्यते ॥ ५ ॥

---

१. तु. आश्रौ १, ६, १। २. कर्मणामनु° मै; त्रुटितम् पू। ३. तु. आपश्रौ ११, १, ११। ४. °ष्यन्ति मै। ५. वर्तन्ते मूको। ६. इति ब[1]; इत्येतेन मै। ७. आप्यायन्ते ब[1] मै; आप्याययन्ते ब[2] पू। ८. एवमादिः मै। ९. नास्ति मूको। १०. °रर्थे ब[1][2]। *. 'मदन्तीरापः' इत्यस्य स्थाने 'मदन्त्य आपः' इति सुपाठः, तु. नावृ—'तत्र मदन्तीरेव गृह्णीयात्। मदन्त्यो नाम तप्ता आपः' इति। एतेन मदन्तीरिति प्रथमाबहुवचनान्तं केनचिदुक्तं निरस्तम्। अपितु द्वितीयाबहुवचनान्तं मूले अध्याहृतं गृह्णीयादिति क्रियाकर्म। ११-११. नास्ति ब[1]। †. °धेः मै। ‡. एवं मूको। १२. °माप्ते मूको।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

[सोमावसेचनमन्त्रकथनम्]

अंशुरंशुष्टे देव सोमाऽऽप्यायतामिन्द्रायैकधनविद आ तुभ्यमिन्द्रः प्यायतामा त्वमिन्द्राय प्यायस्वाऽऽप्याययास्मान् सखीन् । सन्या मेधया स्वस्ति ते देव सोम सुत्यामुदृचमशीयेति ॥ ६ ॥

'अंशुरंशुष्टे' (ऐब्रा १, २६) इति एतेन मन्त्रेणाऽऽप्यायनं क्रियते ॥ ६ ॥

[उदकस्पर्शनानन्तरं समन्त्रस्य निह्नवकर्मणो विधानम्]

स्पृष्ट्वोदकं निह्नवन्ते प्रस्तरेण पाणीन् निधायोत्तानान् दक्षिणान्त्सव्यान्नीच एष्टा राय एष्टा वामानि प्रेषे भगाय । ऋतमृतवादिभ्यो नमो दिवे नमः पृथिव्या इति ॥ ७ ॥

आप्यायनादनन्तरं पुनर् उदकं स्पृष्ट्वा निह्नवन्ते[1] निह्नवनं[2] कर्म कुर्वते । तद् वक्ष्यति । 'पाण्योश्च निह्नवः' (आश्रौ ४, ८, ११) इत्युक्ते एतत् प्रत्येतव्यम् । [3]आज्यलिप्ते प्रस्तरे[3] निह्नवः[4] क्रियते । तस्मात् सोममुपस्पृश्य उदकं स्पृश्यते । निह्नवः[4] कर्म वक्ष्यते । प्रस्तरे पाणीन् निधाय । वेद्यां प्रस्तरो नाम स्रुचां सादनार्थो भवति । तस्मिन् प्रस्तरे पाणीन् निधाय स्थापयित्वा वक्ष्यमाणं मन्त्रं जपेयुः । [5]उत्तानान् दक्षिणान् पाणीन् निधाय सव्यान् नीचान् निधाय† 'एष्टा रायः' (ऐब्रा १,२६) इत्येतं मन्त्रं जपेयुः[5] । पाणीनिति [6]कर्तृबहुत्वाद्† बहुवचनम्‡[6] । प्रस्तरे इति वचनाद् न भूमौ पाणीन् निदध्यात् । निधायेति वचनाद् निधाय जपन्ति, न मन्त्रान्ते[7] ॥ ७ ॥

॥ इति चतुर्थे पञ्चमं खण्डम् ॥

---

१. नास्ति ब[1]; निहनुवन्ते ब[2] मै ; निहनुवते पू। २. निहनुवनं ब[1/2] मै ; नास्ति पू। ३-३. °लिप्तस्तरे ब[1]। ४. निहनुवः मै। ५-५. नास्ति ब[2]। †. विधाय ब[1]। ६-६. कर्तृबहुवचनम् ब[1]। †. त्रुटितम् पू। ‡. वचनम् मै। ७. मन्त्रान्तेन ब[1] मै पू।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

अथ चतुर्थेऽध्याये षष्ठः खण्डः

[उदकस्पर्शनानन्तरं खरसमीपेऽभिष्टवनविधानम्]

स्पृष्ट्वोदकं प्रवर्ग्येण चरिष्यत्सूत्तरेण खरं परिव्रज्य पश्चादस्योपविश्य प्रेषितोऽभिष्टुयादृगावानम् ॥ १ ॥

निह्नवादनन्तरम्[1] आज्यलेपप्रक्षालनार्थं पुनर् उदकं स्पृष्ट्वा तीर्थेन निष्क्रम्यासीत । साकाङ्क्षत्वाद् वाक्यस्य तीर्थेन निष्क्रमणमध्याह्रियते । आतिथ्यायां संस्थितायां तीर्थेन निष्क्रम्यैव तानि कृतानीति । प्रवर्ग्येण चरिष्यत्सु । प्रवर्ग्य इति कर्मनामधेयम् । 'प्रवर्ग्यवांश्चेत्' (आश्रौ ५, १३, १) इत्युक्ते एतस्य ग्रहणम् । तेन प्रवर्ग्येण कर्मणा चरिष्यत्सु कर्तृषु प्रचरिष्यत्सु तस्मिन्निमित्ते होता प्रपद्य उत्तरेण खरं परिव्रज्य । खरो नाम महावीरस्य स्थानम्, तमुत्तरेण गत्वा अस्य खरस्य पश्चाद् अपरस्यां दिशि उपविश्य अध्वर्युणा प्रेषितः ब्रह्मणा च प्रसवे दत्ते घर्मम् अभिष्टुयात् वक्ष्यमाणाभिः ऋग्भिः । तदेतत् कर्म अभिष्टवनमित्युच्यते । तत्[2] सामिधेनीविधानेन[3] व्याख्यातम्[4] । पश्चादस्योपविश्य । अस्येत्यनुच्यमाने ऋत्विजां पश्चाद् विहारस्य वा पश्चादिति स्यात् । प्रेषितोऽभिष्टुयादिति उक्ते[5] प्रेषितोऽपि न ब्रूयाद् यावद् ब्रह्मणा प्रसवो न दत्त इति । कस्मात्? सर्वार्थमध्वर्युराह—प्रवर्ग्येण प्रचरिष्याम[6] इति । सर्वानेव प्रसौति[7] ब्रह्मा प्रचरणे । तस्माद् दत्तप्रसूतेन प्रचरितव्यम् । ऋगावानम् । अस्मिन्नभिष्टवने अर्धर्चे[8] प्राप्ते ऋगावानं विधीयते, ऋगावानं भवति । तद् वक्ष्यत उत्तरेण । 'ऋगावानमुत्तराः' (आश्रौ ५, १, ५), 'तस्याद्यां पच्छ ऋगावानम्' (आश्रौ ५, २०, ३) इत्युक्ते[9] एतस्य ग्रहणम् ॥ १ ॥

[ऋगावानस्वरूपनिरूपणम्]

किं तद् ऋगावानमिति, तदुच्यते—

ऋचमृचमनवानमुक्त्वा प्रणुत्यावस्येत् ॥ २ ॥

---

१. निहनुवाद° मै । २. नास्ति ब[1] । ३. °धाने मै । ४. तु. आश्रौ १, २, २-२३ । ५. उक्तं मूको । ६. तु. ऐब्रा १, १९ । ७. प्रस्तौति ब[2] मै; वृद्धितम् पू । ८. तु. आश्रौ १, २, १० । ९. नास्ति मूको ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

'ऋचम् ऋचम् अनवानम्' अनुच्छ्वसन् उक्त्वा प्रणुत्य प्रणवं कृत्वा अवस्येत्, एतदृगावानमित्युच्यते । वीप्सावचनं सर्वासु प्राप्त्यर्थम् । अन्यथा आद्यायामेव स्यात् । अनवानमिति वचनाद् अर्धर्चेऽवसानं भवति । उत्तरसंताननिमित्तः प्रणवः । इह तूत्तरसंतानाभावात् प्रणवो न प्राप्नोति । तस्मात् प्रणुत्येत्युच्यते । प्रणुत्येत्युक्ते उत्तरेण [1]संतानं प्राप्तं*[1], तस्मादवसानं विधीयते ॥ २ ॥

[अभिष्टवनविधिप्रदर्शनम्]

ब्रह्म जज्ञानं प्रथमं पुरस्ताद् वि सीमतः सुरुचो वेन आवः । स बुध्न्या उपमा अस्य विष्ठाः सतश्च योनिमसतश्च वि वः । इयं पित्रे राष्ट्र्येत्यग्रे प्रथमाय जनुषे भूमनेष्ठाः । तस्मा एतं सुरुचं ह्वारमह्यं घर्मं श्रीणन्ति प्रथमस्य धासेः । महान् मही अस्तभायद् वि जातो द्यां पिता सद्म पार्थिवं च रजः ॥ स बुध्नादाष्ट जनुषाऽभ्युग्रं बृहस्पतिर्देवता तस्य सम्राट् । अभि त्यं देवं सवितारमोण्योः कविक्रतुमर्चामि सत्यसवं रत्नधामभि प्रियं मतिं कविम् ॥ ऊर्ध्वा यस्यामतिर्भा अदिद्युतत् सवीमनि हिरण्यपाणिरमिमीत सुक्रतुः कृपा स्वस्तृपा स्वरिति वा, सं सीदस्व महां असीति संसाद्यमानेऽञ्जन्ति यं प्रथयन्तो न विप्रा इत्यज्यमाने, पतङ्गमक्तमसुरस्य मायया, यो नः सनुत्यो अभिदासदग्ने, भवा नो अग्ने सुमना उपेताविति द्वयृचाः । कृणुष्व पाजः प्रसितिं न पृथ्वीमिति पञ्च, परि त्वा गिर्वणो गिरोऽधि द्वयोरदधा उक्थ्यं वचः, शुक्रं ते अन्यद् यजतं ते अन्यदपश्यं गोपामनिपद्यमानं, स्रक्वे द्रप्सस्यायं वेनश्चोदयत् पृश्निगर्भाः, पवित्रं ते विततं ब्रह्मणस्पत इति द्वे, वि यत् पवित्रं धिषणा अतन्वत घर्मं शोचन्त प्रणवेषु बिभ्रतः । समुद्रे अन्तरायवो विचक्षणं त्रिरह्नो नाम सूर्यस्य मन्वत ॥ गणानां त्वा, प्रथश्च यस्यापश्यं त्वेत्येतस्याऽऽद्यया यजमानमीक्षते द्वितीयया पत्नीं तृतीययाऽऽत्मानं, का राधद्धोत्राऽश्विना वामिति नव, आभात्यग्निर्ग्रावाणेवेळे द्यावापृथिवी इति प्रागुत्तमाया अरूरुचदुषसः पृश्निरग्रिय इत्यावपेतोत्तरेणार्धर्चेन पत्नीमीक्षेतोत्तमाया परिहिते समुत्थाप्यैनानध्वर्यवो वाचयन्तीति नु पूर्वं पटलम् ॥ ३ ॥

---

*. 'संतानः प्राप्तः' इति सुपाठः, संतानेर्घञि प्रयोगाद् 'घञपः पुंसि' इति पुंस्त्वात् ।

1-1. संतानप्राप्तः ब[2] ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

'ब्रह्म जज्ञानम्' (तु० शौ ४, १, १-२ ; ७, १४ [१५], १-२) इति यथा-समाम्नाताश्चतस्रः । तत्र चतुर्थ्यां कृपा स्वर्[1] इति तृपा स्वरिति वा भवति। शाखान्तरेषूभयथाऽऽम्नानात्[2]। 'सं सीदस्व' (ऋ १, ३६, ९) इत्येतया संसाद्यमाने महावीरे [3]अभिष्टुयाद्[†] यदा एतयर्चा एवं खरे महावीरं सादयत्यध्वर्युः, तदा एतयाऽभिष्टुयात् । 'अञ्जन्ति यम्' (ऋ ५, ४३, ७) इत्येतया महावीरे[3] अज्यमाने अभिष्टुयात्। अभिपूर्यमाणे एतयर्चाऽभ्यवपूरयति। अभिपूरणमेवाञ्जनमित्युच्यते मन्त्रलिङ्गदर्शनादनुक्रमवचनाच्च। सादनादनन्तरमञ्जनम्[4] उपदिश्यमानम्[5] अभिपूरणमेव भवति, नान्यदुपपद्यते। प्रागपि सादनादञ्जनमस्ति[6]। [7]तस्मिन्नेव प्रस्तोता साम गायत्यध्वर्युः प्रेष्यति मुख्यत्वात् । नास्माकम्, सादनानन्तरं चोदितत्वात्। 'वपावन्तम्' (ऋ ५, ४३, ७) इति[7] मन्त्रलिङ्गादभिपूरणमञ्जनम्[8]। क्रमाच्च यथा 'अस्ना रक्षः संसृजताच्छमितारोऽपापेत्युपांशु' (आश्रौ ३, ३, २) इत्युक्ते य एव शमितृशब्दः क्रमेणाम्नातः, स एवोपांशु भवति, 'दैव्याः शमितारः' (आश्रौ ३, ३, १) इत्ययं न भवति। एवमिहापि आज्येन पूरणं कृत्वा अध्वर्यवः सादयन्ति। तथा सति विपर्यासः कर्तव्यः संसाद्यमाने अज्यमाने[9] इति वचनात्। 'पतङ्गमक्तम्' (ऋ १०, १७७, १-२), 'यो नः' (ऋ ६, ५, ४-५), 'भवा नः' (ऋ ३, १८, १-२) इत्येते द्वयृचाः। पादग्रहणाद् ऋचः प्राप्ताः, तस्माद् द्वयृचा इत्याह। 'कृणुष्व पाजः' (ऋ ४,४,१-५) इत्येताः पञ्च पादग्रहणादेका[10] प्राप्ता। 'परि त्वा' (ऋ १,१०,१२), 'अधि द्वयोः' (ऋ १,८३,३), 'शुक्रं ते' (ऋ ६,५८,१), 'अपश्यं गोपाम्' (ऋ १, १६४, ३१) इत्येता एकपातिन्यः पादग्रहणात्। 'स्रक्वे द्रप्सस्य' (ऋ ९,७३) इति सूक्तम्, सूक्तादौ हीनपादग्रहणात्[11]। 'अयं वेनः' (ऋ १०, १२३, १) इत्येका, 'पवित्रं ते' (ऋ ९,८३,१-२) इति द्वे। पादग्रहणादेका प्राप्ता। 'वियत् पवित्रम्' (ऐब्रा १, २०) इति यथासमाम्नाता[12]। 'गणानां त्वा' (ऋ २, २३) इति सूक्तम्। 'प्रथश्च यस्य' (ऋ १०, १८१) इति सूक्तम्। 'अपश्यं त्वा' (ऋ १०, १८३) इति सूक्तम्। एतस्य सूक्तस्याद्ययर्चा अभिष्टुवन् यजमानं वीक्षते[13]। इति-करणमधिकृतस्य ग्रहणार्थम्। अनेन सूक्ताधिकाराद् आद्यया यजमानमीक्षते इत्युक्ते ईक्षणार्थं[14] न भवति, अभिष्टवनार्थम्[15] एव, सूक्तस्य तदर्थत्वात्। लिङ्गात्तु ईक्षणमपि क्रियते। तस्माद् यजमानबहुत्वे प्रतियजमानं नावर्तते, [16]न च तद् गृह्यते[16]। [17]ईक्षणार्थं न भवति, यस्माद् द्वितीयया पत्नीम् एतस्य सूक्तस्य द्वितीययर्चा पत्नीमीक्षते, यदि[17] ईक्षणार्थं स्यात्। अविद्यमानायां लोपः प्राप्नोति। तथा सति सक्तादेशोऽनर्थकः। तृतीययाऽऽत्मानम् इति केचित्

---

१. स्वः मै। २. °म्नाताः मूको। ३-३. नास्ति ब[1]। †. अनुष्टुयाद् ब[1] मै ; अष्टुयात् पू। ४. स्पन्दनाद° ब[2] मै पू। ५. उपादि° ब[1]। ६. °दञ्जनमिति ब[2] मै। ७-७. नास्ति ब[2]। ८. लिङ्गाद° ब[2]। ९. आसाद्यमाने मै। १०. तु. आश्रौ १, १, १७। ११. तु. आश्रौ १, १, १८। १२. °म्नाताः मूको। तु. शांश्रौ ५,९,१६। १३. ईक्षते मै। १४. ईक्षार्थं ब[2]। १५. °वनार्थः मूको। १६-१६. न च हुह्यते ब[1]; तच्चन्द्गृह्यते ब[2]; न उह्यते मै; त्रुटितम् पू। १७-१७. नास्ति ब[1]।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

पठन्ति, देवताऽनुक्रमण्यां[1] तथा दृष्टत्वात् । [2]स चाहोता[2] एव । कस्मात् ? 'प्रजामेवास्मिन्' (ऐब्रा १, २१) इति यजमानमेव निदर्शयति, न होतारम् , [3]तस्माच्छुतौ होतुरनधिकारः[3] । अस्मिन्निति निर्दिष्टे पत्नी अपि निर्दिष्टा भवति तुल्यफलत्वात् , पुत्रकामा[4] पुत्रकाम[5] इति तल्लिङ्गदर्शनाच्च । श्रुतौ यत् , तदेव सूत्रकारेणापि कल्पितम् । यदुक्तं देवतायां[6] तदप्रमाणम् । कस्मात् ? देवताकारो देवतामेव विदधाति, न क्रियामपि । देवतायां [7]क्रिया विधीयते । 'अहं गर्भमदधाम्' (ऋ १०, १८३, ३) इत्येतस्मिन् सूक्ते शस्यमाने आत्मनः ईक्षणं प्राप्नोति[7] आत्मस्तवत्वात्[8] । 'अहं गर्भम्' (ऋ १०,१८३,३) इति अयमप्यात्मन एव [9]स्तवः । न च[9] एवमुक्तं वृद्धशौनकेन । अथ यदि अन्यस्मिन्[10] ब्राह्मणे व्यक्तमस्ति, तथा सति विकल्पः । 'का राधत्' (ऋ १,१२०,१-९) इत्येता नव ऋचः । पादग्रहणादेका प्राप्ता । 'आभात्यग्निः' (ऋ ५,७६) इति सूक्तम् । 'ग्रावाणेव' (ऋ २, ३९) इति सूक्तम् । 'ईळे द्यावापृथिवी' (ऋ १, ११२) इति सूक्तम् । इत्येतस्य सूक्तस्य प्रागुक्तमाया उक्तमाया[11] ऋचः प्राक् 'अरूरुचत्' (ऋ ९, ८३, ३) इत्येतामृचम् आवपेत प्रक्षिपेत् । उत्तरेणार्धर्चेन पत्नीमीक्षेत । अरूरुचत् इत्येतस्या उत्तरेण द्वितीयेन अर्धर्चेन पत्नीमीक्षते । उक्तमया सूक्तस्य उक्तमया[11] परिधानं भवति । तस्मिन् परिधाने कृते समुत्थाप्य एनान् कर्तॄन् उत्तिष्ठतेत्युक्ता अध्वर्यवः शान्ति वाचयन्ति । यदि न वाचयन्ति, 'अपश्यं गोपाम्' (ऋ १, १६४, ३१) इत्येतामभावे जपेदित्युक्तं शाम्बबके[12] । इति नु पूर्वं पटलम्[13] इत्येतत् तु यदनुक्रान्तं कर्म 'ब्रह्म जज्ञानम्' (शौ ४, १, १) इत्येवमादि तत् पूर्वपटलसंज्ञं वेदितव्यम् । ब्राह्मणोक्ता संज्ञा । तस्या ज्ञाने धर्मः । यथाऽऽज्यभागसंज्ञा कर्मसंज्ञाश्च, तुरायणं, सौत्रामण्युशनसः स्तोमः, आङ्गिरसं धृतिवातवतोरयनम् । संव्यवहाराभावाज् ज्ञाने धर्मप्रयोजनम् । नु निपातः पूर्वप्रकृतापेक्षः[14] । यदुक्तं ब्रह्म जज्ञानादि, तत् सर्वं पटलसंज्ञं भवति । पूर्वमिति वचनादभिष्टवनमेतत् समाप्तं, दर्शयति उत्तरमप्यस्तीति परिधानदर्शनात् समाप्तमिति स्यात् । तथा[15] सति उत्तरस्य अभिष्टवनसंज्ञा प्राप्नोति ऋगावानं च । पूर्वमुत्तरमिति वचनात् कृतेऽपि परिधाने सैव[16] संज्ञा ऋगावानं च, तदेव स्थानं स एव कर्ता वाग्यमश्च [17]आ समाप्तेः[17] सिद्धो भवति ॥ ३ ॥

॥ इति चतुर्थे षष्ठं खण्डम् ॥

---

१. तु. बृवे ८, ८२ । २-२. अव (°ब मै) हव मूको । ३-३. तस्माच्छुतौ होतुरादेवतायां क्रिया विधीयते, अहं गर्भमदधामित्येतस्मिन् सूक्ते शस्यमाने आत्मन ईक्षणं प्राप्नोति । अधिकारः (नास्ति पू) मै पू । ४. ऋ १०, १८३, २ । ५. ऋ १०, १८३, १ । ६ तु. बृवे ८, ८२ (?) । ७-७. नास्ति ब[2] पू । ८. आत्मस्तावत्वात् मै । ९-९. स्तवनं च मै । १०. अस्मिन् ब[1]; त्रुटितम् पू । ११. तु. ऋ १, ११२, २५ । १२. शान्ववके ब[1,2] पू; शन्वबके मै ; तु. कौगृ २, ५, ३ । १३. तु. ऐब्रा १, २१ । १४. पूर्वं प्रकृताः पेक्षय (? पूर्वप्रकृतापेक्षया) ब[2]; °ताक्षय ब[2]; °तापेक्षे पू; पूर्वं प्र° मै । १५. यथा मूको । १६. नैव मै । १७-१७. असमाप्ते मै ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

अथ चतुर्थेऽध्याये सप्तमः खण्डः

[सोमयागस्योत्तरपटलोपक्रमः]

अथोत्तरम् ॥ १ ॥

अथ अनन्तरं पूर्वस्मात् पटलादनन्तरम्[1] उत्तरं पटलं वक्ष्यते ॥ १ ॥

[उपविष्टेषु ऋत्विक्षु अध्वर्युकर्तृकं घर्मदुघाह्वानम्]

उपविष्टेष्वध्वर्युर्घर्मदुघामाह्वयति स संप्रैष उत्तरस्य ॥ २ ॥

शान्ति परिसमाप्य उपविशन्ति ऋत्विजः। तेषु उपविष्टेषु अनन्तरम् अध्वर्युः, घर्माय दुह्यते गौर्घर्मधुक्, तां घर्मदुघां नाम आह्वयति—गौरेहीति। स संप्रैष उत्तरस्य। गौरेहीति यदाह्वानं, स सम्प्रैषो भवति उत्तरस्य पटलस्य। उपविष्टेष्विति वचनाद् होतुरुपवेशनं भवति चोदितं, सर्वस्मिन् कर्मणि क्रियमाणे होता आह्वयतीति स्यात् 'कर्म चोदनायां होतारम्' (आश्रौ १, १, १४) इति। असंप्रैषत्वात् [2]स संप्रैष[2] इत्युच्यते। तस्माद् गौरेहीति उक्ते उत्तरं पटलमारब्धव्यम्। अथोत्तरमित्यधिकारात् पुनरुत्तरस्येत्युच्यते स संप्रैष उत्तरस्य। उत्तरस्य[3] पटलस्य त्रिष्वपि वचनेषु स संप्रैषो भवति। [4]त्रिराह्वयत्यध्वर्युस्त्रिराह्वयति होता 'उपह्वये' (ऋ १, १६४, २६) इति। एवं कृते अभिरूपं कृतं भवति। 'एकविंशतिरभिरूपाः'[4] (ऐब्रा १, २२) इति हि ब्राह्मणम् ॥ २ ॥

[अत्राभिहिङ्कारनिषेधः]

अनभिहिङ्कृत्य ॥ ३ ॥

अभिहिङ्कारमकृत्वा उत्तरं पटलं प्रतिपद्यते। 'एतेन' (आश्रौ १, २, २३) इति प्राप्ते[5] प्रतिषेधः। अभ्यासस्तु भवति ॥ ३ ॥

[उत्तराभिष्टवनविधानम्]

उप ह्वये सुदुघां धेनुमेतामिति द्वे, अभि त्वा देव सवितः, समीं वत्सं न मातृभिः, सं वत्स इव मातृभिर्यस्ते स्तनः शशयो यो मयोभूर्गौरमीमेदनु

---

१. पटलानन्तरं ब[1] पू। २-२. असम्प्रैष मूको। ३. नास्ति ब[1] पू। ४-४. नास्ति ब[1]; त्रुटितम् पू। ५. प्राप्तो ब[1]।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

वत्सं मिषन्तं, नमसेदुप सीदत संजानाना उप सीदन्नभिज्ञ्वा दशभि-विवस्वतो, दुहन्ति सप्तैकां, समिद्धो अग्निरश्विना तप्तो वां घर्म आ गतम् । दुह्यन्ते गावो वृषणेह धेनवो दस्रा मदन्ति कारवः । समिद्धो अग्निर्वृषणा रतिर्दिवस्तप्तो घर्मो दुह्यते वामिषे मधु । वयं हि वां पुरुतमासो अश्विना हवामहे सधमादेषु कारवः । तदु प्रयक्षतममस्य कर्माऽऽत्मन्वन्नभो दुह्यते घृतं पय, उत्तिष्ठ ब्रह्मणस्पत इत्येतामुक्त्वाऽव-तिष्ठते दुग्धायामधुक्षत् पिप्युषीमिषमित्याह्रियमाण उप द्रव पयसा गोधुगोषमा घर्मे सिञ्च पय उस्रियायाः । वि नाकमख्यत् सविता वरेण्योनु द्यावापृथिवी सुप्रणीतिरित्यासिच्यमान आ नूनमश्विनो-र्ऋषिरिति गव्य आ सुते सिञ्चत श्रियमित्याज आसिक्तयोः समु त्ये महतीरप इति महावीरमादायोत्तिष्ठत्सूदु ष्य देवः सविता हिरण्ययेत्य-नूत्तिष्ठेत् प्रैतु ब्रह्मणस्पतिरित्यनुव्रजेद् गन्धर्व इत्था पदमस्य रक्षतीति खरमवेक्ष्य तमतिक्रम्य नाके सुपर्णमुप यत्पतन्तमिति समाप्य प्रणवेनोप-विशेदनिरस्य तृणं प्रेषितो यजति तप्तो वां घर्मो नक्षति स्वहोता प्रवामध्वर्युश्चरति प्रयस्वान् । मधोर्दुग्धस्याश्विना तनाया वीतं पातं पयस उस्रियायाः । उभा पिबतमश्विनेति चोभाभ्यामनवानमग्ने वीहीत्यनुवषट्कारो घर्मस्याग्ने वीहीति वा ब्रह्मा वषट्कृते जपत्यनुवषट्कृते च विश्वा आशा दक्षिणसाद् विश्वान् देवानयाळिह । स्वाहाकृतस्य घर्मस्य मध्वः पिबतमश्विनेत्येवमेवाऽऽपराह्णिके यदुस्रियास्वाहुतं घृतं पयोऽयं स वामश्विना भाग आ गतम् । माध्वी धर्तारा विदथस्य सत्पती तप्तं घर्मं पिबतं सोम्यं मधु । अस्य पिबतमश्विनेति चाप्रेषितो होताऽनुवषट्कृते स्वाहाकृतः शुचिर्देवेषु घर्मो यो अश्विनोश्चमसो देवपानः । तमीं विश्वे अमृतासो जुषाणा गन्धर्वस्य प्रत्यास्ना रिहन्ति । समुद्रादूर्मि-मुदियर्ति वेनो, द्रप्सः समुद्रमभि यज्जिगाति । सखे सखायमभ्या ववृत्स्वोर्ध्व ऊ षु ण ऊतय इति द्वे तं घेमित्था नमस्विन इति प्रगाथौ पूर्वाह्णे काण्वीम-पराह्णेऽन्यतरां वाऽत्यन्तं काण्वीं त्वेवोत्तमे पावकशोचे तव हि क्षयं परीत्युक्त्वा भक्षमाकाङ्क्षेद् वाजिनेन भक्षोपायो हुतं हविर्मधु हविरिन्द्र-तमेऽग्नावश्याम ते देव घर्म । मधुमतः पितुमतो वाजवतोऽङ्गिरस्वतो नमस्ते अस्तु मा मा हिंसीरिति भक्षजपः कर्मिणो घर्मं भक्षयेयुः सर्वे तु

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

दीक्षिताः सर्वेषु दीक्षितेषु गृहपतेस्तृतीयोत्तमौ भक्षौ संप्रेषितः श्येनो न योनिं सदनं धिया कृतमा यस्मिन्त्सप्त वासवा रोहन्तु पूर्व्या रुहः। ऋषिर्ह दीर्घश्रुत्तम इन्द्रस्य घर्मो अतिथिः। सूयवसाद् भगवती हि भूया इति परिदध्यात् ॥ ४ ॥

'उप ह्वये' (ऋ १, १६४, २६-२७) इति द्वे। पादग्रहणाद् एका प्राप्ता। 'अभि त्वा' (ऋ १, २४, ३), 'समीं वत्सं' (ऋ ९, १०४, २), 'सं वत्सः' (ऋ ९, १०५, २), 'यस्ते' (ऋ १,१६४,४९), 'गौरमीमेत्' (ऋ १,१६४,२८), 'नमसेत्' (ऋ ९, ११, ६), 'संजानानाः' (ऋ १, ७२, ५), 'आ दशभिः' (ऋ ८, ७२, ८), 'दुहन्ति' (ऋ ८, ७२, ७), 'समिद्धो अग्निरश्विना' (शौ ७, ७३ [७७], २), 'समिद्धो अग्निः' (शौ ७, ७३ [७७], १), 'तदु प्र' (ऋ १, ६२, ६), 'आत्मन्वत्' (ऋ ९, ७४, ४), 'उत्तिष्ठ' (ऋ १, ४०, १), इत्येतामुक्त्वा अवतिष्ठते। उत्तरा ऋचो न ब्रवीति यावद् गौर्दुह्यते तावदवस्येदिति। दुग्धायाम् अधुक्षत्। यदा गौर्दुग्धा भवति तदा तस्यां दुग्धायां सत्याम् 'अधुक्षत्' (ऋ ८, ७२, १६) इति एतामृचं प्रतिपद्यते। [1]आह्रियमाण उप द्रव। दुग्धे पयसि आह्रियमाणे[1] 'उप द्रव' (शौ ७, ७३ [७७], ६) इति एतां प्रतिपद्यते। आसिच्यमान आ नूनम् [2]इति गव्ये[2]। महावीरे गव्यं[3] पय[4] आसिच्यते, तस्मिन्नासिच्यमाने [5]पयसि 'आ नूनम्' (ऋ ८, ९, ७) इत्येतयाऽभिष्टुयात्। †आ सुते सिञ्चत श्रियम् इत्याजे†। 'आ सुते' (ऋ ८, ७२, १३) इत्येतयाऽभिष्टुयात् आजे पयस्यासिच्यमाने[5]। अस्मान्नियमादेतयोः पयसोः विपर्यासे सति ऋचोरपि[6] विपर्यासः कर्तव्यः, तदर्थत्वात्। [7]ब्राह्मणे तु[7] अविपर्यासेनाम्नायः—समाह्रियमाणे[8] आसिच्यमाने[8] गव्य आज इति। 'एकविंशतिरभिरूपा' (ऐब्रा १,२२) इति श्रुतिवाक्येन सिद्धत्वात्। अस्मादारम्भात् सर्वा अभिरूपा अपि सत्यः स्वस्वनिमित्तेन[10] प्रयुज्यन्ते। एता एव तिस्र आभिरूप्येण प्रयुज्यन्ते, नान्या इति दर्शयति। आसिक्तयोः समु त्ये। गव्याजयोः पयसोर्मिश्रीकृत्य आसिक्तयोः कृते आसेचनेऽनन्तरं 'समु त्ये' (ऋ ८, ७, २२) इति एतयाऽभिष्टुयात्। आसेचनादनन्तरं[11] भवतीत्यर्थः सेचनलिङ्गाभावात्। शफक्षोणीभ्यां[12] परिगृह्यमाणे इत्युक्तं शांबवके[13] क्षोणीलिङ्गदर्शनात्। तदप्यस्माकमविरुद्धम्, समानकालत्वात्।

---

१. आहूय° मूको। २-२. इतीति ब[1,2] पू; इति मै। ३. नास्ति ब[1,2]। ४. नास्ति पू। ५-५. नास्ति ब[2]। †-†. नास्ति मूको। ६. ऋचोरपि च ब[2]; वृटितम् पू। ७-७. ब्राह्मण मूको। ८. समाहूयमाने (°णे ब[2] पू) मूको। ९. उपासि° मै। १०. स्वे स्वे निमि° ब[1]; स्वाभ्य (स्वेस्य मै; स्वोस्य पू) निमि° ब[2] मै पू। ११. आसेचनात् ब[1,2] पू; आसेचनान्न मै। १२. सपक्षो° ब[1,2] मै; वृटितम् पू। १३. शाम्भवके मै।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

महावीरमादायोत्तिष्ठत्सूदु ष्य देवः सविता हिरण्ययेत्यनूत्तिष्ठेत्। [1]महावीरो नाम यज्ञियपात्रविशेषः†, तं[1] महावीरमादाय गृहीत्वा उत्तिष्ठन्ति ऋत्विजः। तेषूत्तिष्ठत्सु 'उदु ष्य देवः' (ऋ ६, ७१, १) इत्येतयाऽभिष्टुवन्[2] अनूत्तिष्ठेत्[3]। उदु ष्य इति उत्थानलिङ्गम्[4]। [5]तेन लिङ्गेन[5] उत्तिष्ठेत्, न कृत्स्नेन मन्त्रेण। तस्मान्मन्त्र उत्थानार्थो न भवति, अभिष्टवनार्थ एव। उत्थानार्थे सत्युपांशु स्यात्। [6]अनु प्रयोगाद्, उत्थितेषु सत्सु[6] अनूत्तिष्ठेत्। [7]प्रेतु ब्रह्मणस्पतिरित्यनुव्रजेत्[7]। 'प्रेतु' (ऋ १, ४०, ३) इत्येतयाऽभिष्टुवन् अनुव्रजेत् अनुगच्छेत्। अनु पश्चाद्भावे। 'प्र देव्येतु' (ऋ १, ४०, ३) इति पूर्वे अर्द्धर्चे लिङ्गद्वयमस्ति, तस्मादर्द्धर्चे समाप्ते व्रजति। उत्तरं तु तिष्ठन्नेव समापयेत्। 'गन्धर्वः' (ऋ ९,८३,४) इत्येतया खरमवेक्ष्य अभिष्टुयात्। खरो नाम महावीरस्यायतनम्। तदभिवादी प्रथमपादः। तेन पादेन खरमवेक्ष्य न[8] ऋक्छेषेण[9], प्रकृत्यायतनं[10] द्यावापृथिव्योः सन्धिमीक्षमाणो[11] घर्ममभिष्टुयात्। तमतिक्रम्य तं खरम् अतिक्रम्य, नित्यत्वाद् अतिक्रम्य[12] तूष्णीमेव गत्वा 'नाके सुपर्णम्' (ऋ १०, १२३, ६) इत्येतयाऽभिष्टुयात्। ऋचं समाप्य प्रणवेनोपविशेत् अर्वाग् दर्शपौर्णमासिकास्थानात्[13]। अनिरस्य तृणम्। निरसनमकृत्वा उपविशेत्। तमतिक्रम्येति[14] उपवेशनस्य[15] देशो विधीयते। समाप्येति वचनात् पूर्वाणि कर्माणि ऋचः समाप्यैवं मन्त्रलिङ्गेनैव कृतानीति दर्शयति। अनूत्तिष्ठेद् अनुव्रजेद् अवेक्ष्येति एकदेशेनैव क्रियते, न कृत्स्नेन मन्त्रेण। पत्नीयजमानयोस्तु कृत्स्नेन क्रियते। 'अपश्यं त्वा' (ऋ १०, १८३, १) इति कृत्स्नो हि मन्त्रस्तल्लिङ्गः। समाप्येति वचनाद् अप्रणवं[16] तूष्णीमुपवेशनं प्राप्तं तस्मादाह—प्रणवेनोपविशेदिति। उपविशेदिति चोदिते निरसनोपवेशने प्राप्ते[17], तयोः प्रतिषेधः, अनिरस्य तृणमिति निरसने प्रतिषिद्धे उपवेशनमन्त्रोऽपि[18] न भवति तयोः साहचर्यात्। प्रेषितो यजति। [19]अध्वर्युणा प्रेषितो याज्यया यजति 'तप्तो वाम्' (शौ ७, ७३ [७७], ५) इत्येतया समाम्नातया†, 'उभा पिबतम्' (ऋ १, ४६, १५) इत्येतया वा। च-शब्दः समुच्चयार्थः, द्वाभ्यां यजति[19]। [20]द्वाभ्याम् ऋग्भ्याम् अनवानं यजति[20]।

१-१. नास्ति ब[2]; त्रुटितम् पू। †. नास्ति मूको। २. °ष्टुवत् मूको। ३. अन्वतिष्ठेत् मूको। ४. उत्थानलिङ्गेन ब[2]। ५-५. नास्ति ब[2]; त्रुटितम् पू। ६-६. अनुप्रेया (°प्रयो ब[2]) दुत्थितेषु (°स्व ब[2] मै पू) सत्सु मूको। ७-७. नास्ति मूको। ८. तृ ब[1] पू; त ब[2]। ९. तदुच्छेषणं मै। १०. प्रकृत्यायम ब[1]; प्रकृत्यायन ब[2]; त्रुटितम् पू। ११. तु. आश्रौ १,१,२३। १२. अतिक्रम्यात् मूको। १३. दर्शपो° ब[1?2] पू; दर्शपूर्णमासिकस्था° मै। १४. तमभिक्रम्येति ब[2]। १५. उपविशन् अस्य ब[1?2] मै; त्रुटितम् पू। १६. प्रणवं मूको। १७. तु. आश्रौ १, ३, ३२। १८. मन्त्रेऽपि ब[2]; त्रुटितम् पू। १९. नास्ति ब[1]। †. समाप्ता तया ब[2] पू; समाप्ततया मै। २०-२०. त्रुटितम् ब[2]।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

यजतीत्युक्त्वा द्वे ऋचौ चोदिते[1]। तस्मात् ते द्वे याज्ये। ततः स्वधर्मविहिते प्राप्ते, तस्मादाह[2]—उभाभ्यामनवानम् इति। तस्मादुभाभ्याम् ऋग्भ्यामेका याज्या अनवानं भवति। अनवानमिति वचनाद् द्वयोर्मध्ये अवसाने प्रतिषिद्धे ऋगाद्यन्तोपदिष्टावागूर्वषट्कारौ[3] मध्ये न भवतः। अग्ने वीहीत्ययमनुवषट्कारो[4] भवति। वषट्कारमन्वेव क्रियते। संप्रैषो न विद्यत इत्यर्थः। 'स्विष्टकृद्भाजनम्' (ऐब्रा १, २२) इति श्रुतिः। घर्मस्याग्ने वीहीति वा। [5]अनुवषट्कारविकल्पः। तस्योक्तं विधानं वाजिने†। ब्रह्मणो विधिरुच्यते, प्रागनुक्तत्वात्। वषट्कारे कृते[5] जपति विश्वा आशा इति मन्त्रं यथासमाम्नातम्[6]। एवमेवापराह्णिके। वषट्कृते अनुवषट्कृते यदुस्रियास्वाहुतम् इति उक्ते याज्ये। पौर्णमासवद् भवतीत्यर्थादापन्नम्[7]। एवमेवेति वचनाद् ब्रह्मजपोऽधिकृतः, स एवादिष्टो भवति, न होतुर्विधानमिति। तन्न, उभयोरधिकारादुभयमप्यतिदिष्टम्। तस्मात् 'प्रेषितो यजति ब्रह्मा जपति' उभयोरधिकाराद् उत्तरत्र अप्रेषित इत्याह होता इति जपेद् ब्रह्मणोऽधिकारात्। 'यदुस्रियास्वाहुतम्'[8] (तु० शौ ७, ७३ [७७], ४) इति यथासमाम्नाता ऋक्। 'अस्य पिबतमश्विना' (ऋ ८, ५, १४) इत्येतया च प्रेषितो यजति उभाभ्यामनवानम्। च-शब्दः समुच्चयार्थः। एवमेवापराह्णिक इति वचनाद् आपराह्णिके प्रवर्ग्ये प्रेषितो यजतीत्येवमादि सर्वमनुवर्तते। तस्मात् 'तप्तो वाम्' (तु० शौ ७, ७३ [७७], ५) इत्येतया च। ऋचौ प्राप्ते, तस्मात् तयोः स्थाने यदुस्रिया इत्येते आम्नाते समानजातिन्यायेन ऋचोः स्थाने ऋचौ भवतः। शेषं समानं होतुः ब्रह्मणश्च। अप्रेषितो होता। अध्वर्युणा अप्रेषितो होता अनुवषट्कारे कृते स्वाहाकृत इत्येवमादिभिरभिष्टुयात्। प्रेषितो यजत्यधिकाराद् अप्रेषित इत्याह। आपराह्णिक[9] इत्यधिकाराद् आपराह्णिके एव स्वाहाकृत इत्येवमाद्याः प्राप्ताः, तस्मादाह—अनुवषट्कृते इति। तस्मादुभयोरपि प्रवर्ग्ययोः अनुवषट्कारादनन्तरा एव ता ऋचो भवन्ति। 'समुद्रादूर्मिम्' (ऋ १०,१२३,२), 'द्रप्सः' (ऋ १०, १२३, ८), 'सखे' (ऋ ४, १, ३), 'ऊर्ध्वः' (ऋ १, ३६, १३-१४) इति[10]। पादग्रहणादेका प्राप्ता, तस्माद् द्वे इत्याह। 'तं घ' (ऋ ८, ६९, १७; १, ३६, ७) इति प्रागाथी च काण्वी च। तयोः समानं प्रतीकम्, श्रुतौ च अविशेषः[11]। 'तं घेमित्था नमस्विन इत्यभिरूपा' (ऐब्रा १, २२) इति। अविशेषादुभयोः प्राप्तिः। अन्यतरस्यामुभयथा ह्याचार्याः कल्पयन्ति। उभयोः[12] प्रयोगे सति 'एतस्य समाम्नायस्य' (आश्रौ १,१,१) इति समाम्नायक्रमात्

---

१. नास्ति मै। २. तस्मात् मूको। ३. तु. आश्रौ १, ५, ४; ५। ४. °त्यनुव° मै। ५-५. अनुवषट्कारकृते ब[2]। †. तु. आश्रौ २, १६, १५। ६. तु. मासं ३८, १०। ७. भवतीत्यर्थः। यदापन्नं मै। ८. °स्रियास्वा मूको। ९. यजतीत्यधिकारादपरा° मूको। १०. नास्ति मूको। ११. विशेषः ब[1]। १२. नास्ति ब[1]।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

काण्वी पूर्वाह्णे अपराह्णे प्रागाथी इत्येवं प्राप्ते कण्वानां [1]प्रगाथः प्रधानः[1], तेषां हि तेन समाख्या श्रूयते 'प्रगाथाः' (ऐआ २, २, २; आगृ ३, ४, २) इति रहस्यब्राह्मणे ऋषीणां तर्पणे च। 'प्रगाथं मण्डलम्[2]' (ऋअ ८; १) इति प्रधानस्य पूर्वं प्रयोगः कृतः[3]। प्रागाथीं पूर्वाह्णे इति। प्रागाथी प्रगाथे मण्डले भवा प्रियमेधेन दृष्टा इह प्रागाथी इत्युच्यते। [4]काण्वीमपराह्णे। कण्वेन दृष्टा काण्वी। शर्तर्चिषु †दृष्टा कण्वेन सा‡, अस्मात् काण्वी† इत्युच्यते[4]। यदि प्रागाथे मण्डले दृष्टा स्यात्, कण्वेन दृष्टाऽपि प्रागाथी इत्येव स्यात्। अन्यतरां वाऽत्यन्तम्। अथवा[5] अन्यतरां[6] वा एकामेवात्यन्तं[7] कुर्यात् काण्वीं प्रागाथीं वा। अतिशयेन[8] [9]अन्तम् अत्यन्तम्[9]। आ[10] प्रवर्ग्यपरिसमाप्तेः अन्यतरामेव वाऽत्यन्तं[11] कुर्याद् इति विकल्पः। काण्वीं त्वेव। अन्यतराप्रयोगे यद्यपि प्रागाथी प्रयुक्ता [12]काण्वीन्त्वेवोत्तमे इत्यधिकारादुत्तमे[12] प्रवर्ग्ये काण्वी भवति, नोत्तमेऽप्यहनि[13]। प्रागाथीं कृत्वा काण्व्यपि सकृत् कर्तव्या। एवं कृते कृत्स्नः समाम्नायः प्रयुक्तो भवति। तस्मात् सूत्रारम्भादन्यतरप्रयोगादुभयप्रयोग[14] इष्टतर इति दर्शयति। 'पावकशोचे' (ऋ ३, २, ६) इति एतयाऽभिष्टुत्य एताम् उक्त्वा भक्षमाकाङ्क्षेद् इच्छेत्। आकाङ्क्षा इच्छा। यावद् भक्ष्यमानयन्ति[15], तावदासीत[16], न ब्रूयात्। उक्त्वा-वचनाद् भक्षस्य[17] स्थानमुपदिष्टं भवति। अन्यथा भक्षार्थोऽयं[18] मन्त्रः स्यात्। भक्षमाकाङ्क्षेदिति वचनाद् भक्षमेवाकाङ्क्षति[19], नान्यत् करोति, नान्यदभिभाषते। वाजिनेन भक्षोपायः। वाजिनभक्षविधानं वैश्वदेवे व्याख्यातम्[20]। तेन वाजिनेन भक्षोपायेन भक्षविधिः व्याख्यातः। 'वाजिनभक्षमिळामिव प्रतिगृह्य' (आश्रौ २, १६, १७) इत्येवमादि यत्। 'हुतं हविः' (ऐब्रा १, २२) इति अयं भक्षजपः भक्षमन्त्रः। वाजिनेन भक्षमन्त्रे[21] प्राप्ते अयं मन्त्रो विधीयते। कर्मिणः[22] प्रवर्ग्ये येषां कर्म विद्यते ते[23] कर्मिणः। ते घर्मं भक्षयेयुः। वषट्कारेण हुतस्य आज्यस्य घर्म इत्येषा संज्ञा। वाजिनेनैव कर्मिणां[24] भक्षः प्राप्तः किमर्थमिदं पुनरुच्यते इति,

---

१-१. प्र (प्रा मै) गाथप्रधानः (°न ब[1/2]) ब[1/2] मै; त्रुटितम् पू। २. तु. बृदे ६, ३९। ३. नास्ति ब[1]। ४-४. नास्ति ब[2]। †-†. त्रुटितम् पू। ‡. ता ब[1] मै। ५. अथ मै। ६. °तरा मै पू। ७. एवात्यन्तम् ब[1] मै; त्रुटितम् पू। ८. °शये ब[2]। ९-९. अन्त इत्यन्तम् ब[2]; अन्त त्यन्तम् ब[1]। १०. अन्तान् आ मूको। ११. वा अन्तान् ब[1/2] पू; अत्यन्तं मै। १२-१२. काण्वीमेवोत्तमेत्यधिका° मूको। १३. नोत्तरमेन्याहनि मै; °त्तमेन्यहनि ब[1/2] पू। १४. °तराप्र° ब[1/2] पू। १५. °मानयति ब[1]। १६. °दास्ते मूको। १७. भक्ष्यस्य मै। १८. भक्ष्यार्थोऽयं मै। १९. भक्ष्यमेव काङ्क्षति मै। २०. तु. आश्रौ २, १६, १७-२१। २१. तु. आश्रौ २, १६, १९। २२. कर्मणः मूको। २३. नास्ति ब[2]। २४. कर्मणां मै; त्रुटितम् पू।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

उत्तरसूत्रविवक्षार्थम् । अनुच्यमाने तु दीक्षितानामेव धर्मभक्षः स्यात्, अदीक्षितानां न स्यात्, तस्मान्नित्यानुवादः । अथवा षोडश ऋत्विजः सोमे अधिकृताः, तेषां 'वा व्युदासार्थं[1] कर्मिण इत्युच्यते । एवमपि न वक्तव्यम् । नहि कस्याप्यनधिकृतानां भक्ष उपपद्यते, तस्मादुत्तरविवक्षार्थोऽयं[2] नित्यानुवाद एव । सर्वे तु दीक्षिताः । दीक्षिताः[3] सन्तः सर्वे तु गृहपतिसप्तदशा एव भक्षयन्ति, न कर्मिण एव । तु-शब्दः प्राप्तव्यावृत्त्यर्थः । सर्वग्रहणं मैत्रावरुणादीनामपि प्राप्त्यर्थम् । वाजिनेन भक्षोपाय इति वचनात् कर्मिणामेव भक्षः प्राप्तस्तस्मादुच्यते—सर्वे तु दीक्षिता इति । सर्वेषु दीक्षितेषु । सर्वे यदि दीक्षिता भवन्ति तेषु सर्वेषु दीक्षितेषु[4] सत्सु गृहपतेस्तृतीयोत्तमौ भक्षौ[5] भवतः । तृतीयश्च भूत्वा भक्षयति । अध्वर्योरनन्तरं भक्षयति । अन्ततश्च[6] पुनः वाजिनेन भक्षोपाय इति वचनात्[7] । तस्मात् 'आत्मादीनां मुख्यानाम्' (आश्रौ ४, १, १७); ततो द्वितीयानाम्, ततस्तृतीयानाम्[8], ततश्चतुर्थानाम् । अन्ततो गृहपतेरिति[9] प्राप्ते इदमुच्यते—गृहपतेस्तृतीयोत्तमाविति । तस्मात्[10] 'तन्मुखाः सत्राण्यासते'[11] (आश्रौ ४, १, ८) इति वचनात् प्रवरानुक्रमन्यायेन प्राप्ते भक्षे अयमन्यः क्रमो विधीयते । वषट्कर्ता प्रथमः सर्वभक्षान् भक्षयति[12] । वाजिनन्यायादुत्तमो भक्षयति । एवमनुक्रमेण भक्षे क्रियमाणे, एवमुपहवे । नाम्ना च उपहवो भवति । यदा अनुक्रमेण भक्षा न भवन्ति, तदा यजमाना उपह्वयध्वमित्युक्त्वा सर्वे भक्षयन्ति । तदन्येषां[13] वचनमस्ति, नास्माकम् । दीक्षितेषु गृहपतेस्तृतीयोत्तमौ भक्षावित्येतावता सिद्धे सर्वग्रहणात्[14] सर्वेषामुत्तमो भवति, न वाजिनेनैव प्राप्तानाम् । पुनर्दीक्षितग्रहणे अक्रियमाणे अदीक्षितेष्वपि गृहपतेस्तृतीयोत्तमौ प्राप्नुतः । एकाहेऽपि यजमानस्य गृहपतिशब्दोऽस्ति[15] गृहपते यज इति प्रैषः, 'होताऽध्वर्युगृहपतिभ्यां होतरेतद् यजेत्युक्तः' (आश्रौ ५, ८, ५), 'गृहपतये राजानं प्रदाय' (आश्रौ ४, १०, ९) इति च । संप्रेषितः । भक्षादनन्तरम् अध्वर्युणा संप्रेषितः 'श्येनो न योनिम्' (ऋ ९, ७१, ६) इत्येतयाऽभिष्टुयात् । अत्र अभिहिङ्काराभ्यासौ प्राप्तौ[16] 'नावच्छेदादौ' (आश्रौ १, २, २५) इति [17]प्रतिषिद्धौ । आ यस्मिन् इत्येतया च यथाम्नातया । 'सूयवसाद्' (ऋ १, १६४, ४०) इति एतया परिदध्यात् परिधानं कुर्यात् विब्रूयात् । 'सर्वत्रोत्तमां परिधानीयेति[17] विद्यात्' (आश्रौ २, १६, ८) इति प्राप्ते पुनरुच्यते [18]परिधानादनन्तरस्य प्राप्त्यर्थम्[18] 'परिधाय तस्मिन्नेवासन

१-१. वाक्पर्युदा° मै । २. तस्मादुत्तरार्थोऽयं मै । ३. नास्ति मूको । ४. नास्ति ब[1] पू । ५. नास्ति मै । ६. अन्तश्च मूको । ७. तु. आश्रौ २, १६, २१ । ८. नास्ति ब[1] । ९. °पतिरिति मूको । १०. कस्मात् मूको । ११. °ण्यासत् मूको । १२. तु. ऐब्रा ३, ३२; आपश्रौ १२, २४, ६ । १३. तु. लाश्रौ ५, ७, ७ । १४. नास्ति ब[2]; त्रुटितम् पू । १५. तु. आश्रौ ५, ८, ६-७ । १६. तु. आश्रौ १, २, २४ । १७-१७. नास्ति ब[1] । १८-१८. °रस्याप्रा° मूको ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

उपविश्य' (आश्वौ २, १७, १०) इति वाग्विसर्गप्राप्त्यर्थम्। वचनादृते अभिष्टवने न प्राप्नोति[1]। तस्मिन् मुख्यत्वात् [2]पूर्वाह्लिको विधिर्भवति। पौर्वाह्लिके[2] त्याज्ये [3]एतस्मिन्नत्याज्ये सति विहितधर्मो[3] भवतीति[4] त्याज्या[5] काण्वी भवति ॥ ४ ॥

[उत्तमयोः प्रवर्ग्ययोः स्वरूपकथनमावपनविधानञ्च]

उत्तमे प्रागुत्तमाया हविर्हविष्मो महि सद्म देवमित्यावपेत ॥ ५ ॥

'हविर्हविष्मः' (ऋ ९, ८३, ५) इति चावापः ॥ ५ ॥

॥ इति चतुर्थे सप्तमं खण्डम् ॥

---

१. तु. आश्वौ २, १७, ११। २-२. पूर्वाह्लिके ब[1]। ३-३. एतस्मिन्नाज्यती (°न्नाज्यं तं ब[2]) विहितधर्मा ब[1,2]; तस्मिन् त्या (? आ) ज्यान्तविहितधर्मा मै; त्रुटितप्रायम् पू। ४. भवन्तीति मै। ५. त्याज्यां ब[1,2] पू; त्याज्यम् मै।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

अथ चतुर्थेऽध्यायेऽष्टमः खण्डः

[उपसदिष्ट्युपक्रमः]

अथोपसत्[1] ॥ १ ॥

अथ अनन्तरम् अथोत्तरं[2] प्रवर्ग्यादनन्तरम् उपसत् नाम इष्टिः । सा वक्ष्यते । 'प्रथमस्याम् उपसदि' (आश्रौ ४, ८, १८) इत्युक्ते एतस्या[3] ग्रहणम् ॥ १ ॥

[उपसदि पित्र्येष्टिवज्जपविधानम्]

तस्यां पित्र्यया जपाः ॥ २ ॥

तस्याम् उपसदि पित्र्यया जपा व्याख्याताः[4] । ये पित्र्यायां जपा लुप्यन्ते[5] [ते उपसद्यपि[7] लुप्यन्ते । तस्यामिति पुनरुच्यते अधिकारार्थं पूर्वत्र[8] प्रथमा-निर्दिष्टत्वात् । यथा 'वर्षकामेष्टिः' (आश्रौ २, १३, १) इत्युक्त्वा 'तस्याम्' (आश्रौ २, १३, २) इति पुनरधिकारार्थमुक्तम्, एवम् ॥ २ ॥

[प्रादेशोपवेशननियमयोरपि पित्र्येष्टिवद्विधानम्]

प्रादेशोपवेशने च ॥ ३ ॥

प्रादेशश्च उपवेशनं च प्रादेशोपवेशने । ते[6] च उपसदि पित्र्यायां व्याख्याते । 'नेह प्रादेशः' (आश्रौ २, १९, ११) इति पित्र्यायामुक्तम्[9] । स इहापि न भवति । जपा व्याख्याता[6] इत्युक्ते जपा लुप्यन्ते, न कर्माणि । कर्मणामपि प्रादेशादीनां लोपार्थमिदमुच्यते । 'ईक्षितः सीद होतरिति वोक्त उपविशेत्' (आश्रौ २,१९,१५) इत्युक्तं तदप्युपवेशनम् उपसदि पित्र्यया एव व्याख्यातम् । तस्मादुपसदि ईक्षितो वा उपविशेत्, सीद होतः इति वा उक्त उपविशेत् । च-शब्दः पित्र्याधिकारसमुच्चयार्थः ॥ ३ ॥

---

१. °सदा मूको । २. उत्तरां ब[1] पू । ३. एव तस्याः मूको । ४. तु. आश्रौ २, १९, ३ । ५. नास्ति ब[2]; वृटितम् पू । ६-६. नास्ति ब[2] । ७. पूर्वं तु मैं । ८. नास्ति ब[1] । ९-९. तु. आश्रौ ४, ८, २ ; २, १९, ३ ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

[उपसदि उपस्थस्य प्रकृतिवत्प्रयोगविधानम्]

प्रकृत्येहोपस्थः ॥ ४ ॥

इह तु उपसदि प्रकृत्या उपस्थो भवति । 'दक्षिणोत्तरिणोपस्थेन' (आश्रौ १, ३, ३१) इति 'सव्योत्तर्युपस्थाः' (आश्रौ २, १९, १६) इत्युक्तं पित्र्यायां तथेह न भवति । उपवेशनं पित्र्यायां व्याख्यातम्[1] । उपवेशनसहचरितस्योपस्थस्यापि प्राप्तिः स्यादिति प्रकृत्येहोपस्थ इत्युच्यते । इह वचनाद् इदंप्रभृति सोमे[2] प्रकृत्योपस्थो भवति, यदा दक्षिणे मार्जालीये भवति । एतस्यां[3] प्रकृत्या उपस्थो भवति । वषट्कारक्रियां[4] एव भवतीति ॥ ४ ॥

[उपसदि सामिधेनीनामृचां कथनम्]

उपसद्याय मीळ्हुष इति तिस्र एकैकां त्रिरनवानं ताः सामिधेन्यः ॥ ५ ॥

'उपसद्याय' (ऋ ७, १५, १-३) इति एताः तिस्रः ऋचः । एकैकाम् ऋचं त्रिः ब्रूयाद् अनवानम् अनुच्छ्वसन् । पादग्रहणादेका प्राप्ता तिस्र इत्युच्यते । एकैकामित्यनुच्यमाने सर्वास्त्रिरनवानं स्युः । त्रिरित्यनुच्यमाने सकृदेव ब्रूयात् । अर्धर्चावसाने प्राप्ते अनवानमित्याह । ताः[5] सामिधेन्यः । ता एता ऋचः उपसदि सामिधेन्यो भवन्ति प्रकृतीनां स्थाने समानजातिन्यायात् । [6]ता इति वचनात् ता[6] एव सामिधेन्यो, न नित्या इति । अन्यथा सामिधेन्य इत्युक्त्वा एता ऋचो यथाविधानमुक्त्वा अनन्तरं सामिधेन्यो ब्रूयात् । [7]इति वचनात्[7] तासां सामिधेन्य इति संज्ञा स्यात् । तस्मादाह ता[8] सामिधेन्य इति ॥ ५ ॥

[सामिधेनीनामुत्तमेन प्रणवेनाग्निसोमविष्णूनामावाहनम्]

तासामुत्तमेन प्रणवेनाग्निं सोमं विष्णुमित्यावाह्योपविशेत् ॥ ६ ॥

तासां सामिधेनीनाम् उत्तमो यः प्रणवः अन्त्यः, तेन उत्तमेन प्रणवेन अग्निं सोमं विष्णुम् इति एता देवता[9] आवाह्य उपविशेत्, 'ईक्षितः सीद होतरिति वा उक्तः' (आश्रौ २, १९, १५) । तासामिति पुनरुच्यते प्रणवेनेति प्रणवस्योपांशुत्वप्राप्त्यर्थम् । कथम् ? ऋच उपांशु[10] ऋगन्तलक्षणश्च[11] प्रणवस्तस्मादुपांशु भवति । 'आगूःप्रणववषट्काराः' (आश्रौ २, १५, १२) इत्युच्चैः प्राप्तः, तासां प्रणवेनेति वचनादुपांश्वेव भवति ।

---

१. तु. आश्रौ २, १९, १५ । २. °नादिह प्र° ब[1,2]; वृत्तिम् पू । ३. तस्यां मूको । ४. वषट्क्रिया ब[1] । ५. हताः ब[1]; हलोः ब[2]; हेताः मै पू । ६-६. नास्ति ब[2] । ७-७. नास्ति ब[1] । ८. एताः मूको । ९. नास्ति ब[1] । १०. उपांशुः मूको । ११. ऋगश्च ब[1]; ऋगल्लक्षश्च ब[2] मै पू ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

प्रणवबहुत्वादुत्तमेनेत्युच्यते। प्रणवः सन्तानार्थः। तेन देवतासन्तानमुपदिशति[1]। तस्मात् 'अग्ने महाँ असि' (आश्रौ १, २, २७) इत्येतस्य निगदस्य लोपः। प्रतिपत्तिस्तु[2] न लुप्यते। आवाहनार्था हि सा। पित्र्यायामपि प्रतिपत्तिदर्शनात्[3]। यावदुक्तं भवतीति चेत्, यावदुक्ते सति स्विष्टकृदादि लुप्यते। [3]प्रयाजा आज्यभागौ[3] चेति न वक्तव्यम्। नह्यनावाहितानामिज्यावदाने। तस्मात् प्रधानदेवता आवाहने चोदिताः सत्यः[4] आवाह्यन्ते। इज्याभागा[5] एव। अत्र आज्यभागादीनां लोपः। आवाहनं न क्रियते। तस्मात्[6] प्रतिपद्यादि प्लावयन् (आश्रौ १, ३, ६) तिस्रो देवता आवाह्य 'आवह जातवेदः सुयजा यज' (आश्रौ १, ३, २२) इति ब्रूयात्। आवाह्योपविशेद् इति आवाहनेनोपवेशनं संधाय पठति। तस्माद् 'ऊर्ध्वजानुरुपविश्य' (आश्रौ १,३,२२) इति एतस्य लोपः। 'आश्रावयिष्यन्तमनुमन्त्रयेत' (आश्रौ १, ३, २३), 'प्र वृणानं देव सवितः' (आश्रौ १, ३, २३) इत्येतयोश्च अनुमन्त्रणयोर्लोपः[7]। नैमित्तिकत्वाद् वषट्कारानुमन्त्रणवद् अलोपे प्राप्ते लोपो विधीयते। तस्मादन्यत्र नैमित्तिकस्य अलोपो भवति। 'आपद्यातो देवा अवन्तु नः' (आश्रौ १, ५, ३८) इत्यत्र प्रवरणं न विद्यते इति चेत्, तन्न, 'सीद होतः इत्येतावान् प्रवरः' (आपश्रौ ८, १४, २२) इत्युक्तम् अध्वर्यूणाम्। इहागत्य आचार्येणोपवेशनादीनां लोप उक्तः। पित्र्यायामप्येवमेव भवति। उभयोः समानविधानत्वात् ॥ ६ ॥

[आवाहननिषेधविकल्पः]

नावाहयेदित्येके। अनावाहनेऽप्येता एव देवताः ॥ ७ ॥

देवता नावाहयेद् इत्येवम् एके आचार्या मन्यन्ते। कस्मात्? 'तिस्र एव सामिधेनीरनूच्य तिस्रो देवता यजन्ति' (ऐब्रा ३, ४५) इति श्रुतिः। तस्मादन्यत् सर्वं लुप्यते। इज्यायां चोदितायाम् आवाहनं नेत्यपरे। वाजिने प्राप्तस्यावाहने या ऋचो वक्ष्यन्ते, तास्तासां याज्याऽनुवाक्या भवन्ति। 'उक्ता देवतास्तासां याज्यानुवाक्याः' (आश्रौ १, ६, १) इति वचनादावाहने अक्रियमाणे तु देवताऽधिकाराभावाद् वक्ष्यमाणा ऋचो याज्यानुवाक्या न प्राप्नुवन्ति, नित्याः प्राप्नुवन्ति, 'अदृष्टादेशे नित्ये' (आश्रौ २, १, ८) इति वचनात्। [8]अग्नेस्ता नित्ये[8] सोमस्य[9] श्यामाकेष्ट्यां[10] विष्णोरुपांशुयाजके[11]। एवं प्राप्त इदमुच्यते। अनावाहनेऽपि एता एव देवता अधिक्रियन्ते। तस्माद् वक्ष्यमाणा ऋचः अधिकृतानां

---

१. °मुपविशति ब[1,2] पू। २. तु. आश्रौ २, १९, ७। ३-३. प्रयाजाज्यभागौ मै। ४. सन्तः मूको। ५. °भाग मै; त्रुटितम् पू। ६. यस्मात् मूको। ७. °मन्त्रेण तयोर्लोपः मै; °मन्त्रणलोपः पू। ८-८. अग्नेस्तानि ब[1]; तु. आश्रौ १, ६, १। ९. सौम्यस्य मूको। १०. °केष्ट्या ब[2] मै; तु. आश्रौ २, ९, ९। ११. तु. आश्रौ १, ६, १।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

याज्यानुवाक्या भवन्ति । अनावाहितानां वचनाद् याज्यासु एता देवता आदिश्यन्ते । अपि-शब्दः समुच्चयार्थः । अनावाहने च । उपविशेदित्येव[1] । उपवेशनानुमन्त्रणलोपः[2] । एव-शब्दोऽवधारणार्थः[3] । एता एव देवता अधिक्रियन्ते ॥ ७ ॥

[उक्तदेवतानां याज्यानुवाक्याकथनं स्विष्टकृदादिप्रयाजाज्यभागलोपकथनञ्च]

[? देवताः] उक्तास्तासां याज्यानुवाक्याः—

अग्निर्वृत्राणि जङ्घनद्, य उग्र इव शर्यहा, त्वं सोमासि सत्पतिर्गयस्फानो अमीवहेदं विष्णुर्वि चक्रमे, त्रीणि पदा वि चक्रम इति । स्विष्टकृदादि लुप्यते प्रयाजा आज्यभागौ च ॥ ८ ॥

'अग्निर्वृत्राणि' (ऋ ६, १६, ३४), 'य उग्रः' (ऋ ६, १६, ३९) इत्यग्नेर्याज्यानुवाक्ये । 'त्वं सोमासि' (ऋ १,९१,५), 'गयस्फानः' (ऋ १,९१,१२) इति सोमस्य[4] । 'इदं विष्णुः' (ऋ १,२२,१७), 'त्रीणि पदा' (ऋ १,२२,१८) इति विष्णोः । नित्याः प्राप्ता अन्या आदिश्यन्ते । 'जघ्निवतीर्याज्यानुवाक्याः कुर्यात्' (ऐब्रा १, २५) इति श्रुतिः । 'सच्छन्दसः' (ऐब्रा १, २५) इति च[5] श्रुतिः । स्विष्टकृदादि । स्विष्टकृतमादि कृत्वा स्विष्टकृदादि यत्परं, तत्सर्वं लुप्यते । [6]प्रयाजा लुप्यन्ते । प्रयाजानुयाजानामिज्याभावात् तेषामावाहनमपि† लुप्यते[6] । [7]आज्यभागौ च । आज्यभागौ च† लुप्येते[7] । [8]तयोरिज्याभावाद् आवाहनमपि लुप्यते[8] । च-शब्दो लोपाधिकारसमुच्चयार्थः । तस्मात्[9] सर्वं लुप्यत इति । 'तिस्र एव सामिधेनीरनूच्य तिस्रो देवता यजन्ति' (ऐब्रा ३, ४५) इति श्रुतिः । प्रयाजार्थं स्रुगादापनं[10] प्रयाजादौ प्रयाजमध्ये हि क्रियते । तत्र हि घृतवत्यौ स्रुचौ भवतो, नान्यत्र । 'घृतवतीम्' (आश्रौ १, ४, ११) इति च लिङ्गं तत्रैव[11] सार्थकं, नान्यत्र । तस्मात् प्रयाजाभावात्[12] स्रुगादापनं न[13] प्राप्तम् । अध्वर्युवशात् तु उपसदि भवति । 'घृतवति शब्दे जुहूपभृतावादाय' (आपश्रौ २, १७, १) इति तेषां वचनम् । घृतवत्यौ कृत्वैव स्रुचावाददेदध्वर्युः । तस्मात् घृतवतीमिति लिङ्गमपि सार्थकं भवति ॥ ८ ॥

---

१. उपविश्येत्येव ब[1]; मै पू; उपविश्यत्येव ब[2] । २. °मन्त्रेण लोपः मै । ३. °धारार्थः मै । ४. सौम्यस्य ब[1] । ५. नास्ति मै । ६-६. नास्ति मै । †. °नमिति ब[1] पू; °नापि ब[2] । ७-७. नास्ति मै । †. नास्ति ब[1/2] पू । ८-८. नास्ति ब[2] । ९. नास्ति मूको । १०. तु. आश्रौ १, ४, ९ । ११. नास्ति ब[1]; तथैव पू । १२. प्रयाजौ भावात् मै । १३. न (भवति) मै ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

[आप्यायननिह्नवयोर्नित्यप्रयोगविधानम्]

नित्यमाप्यायनं निह्नवश्च ॥ ९ ॥

उपसदन्ते नित्यम् अच्युतम् आप्यायनं भवति । तदुक्तम्—'राजानमाप्याययन्ति' (आश्रौ ४, ५, ४) इति सर्वे तानूनप्त्रिणः आप्यायनं कुर्वन्ति । निह्नवश्च नित्यः[1] अच्युतः[2] । आप्यायनादनन्तरः समाख्यातः 'निह्नवन्ते प्रस्तरे' (आश्रौ ४, ५, ७) इति । इष्टयङ्गाभावादेते कर्मणी[3] उक्ते । तस्माद् 'एषैवापराह्णे' (आश्रौ ४, ८, १०) इत्युक्ते तत्रापि इष्यते, एते कर्मणी[3] भवतः । नित्याधिकारसमुच्चयार्थश्चकारः ॥ ९ ॥

[अपराह्णेऽपि पूर्वाह्णविधेरेव करणीयत्वम्]

एषैवापराह्णे ॥ १० ॥

एषैवापराह्णे अपि क्रियते [4]प्रवर्ग्यान्ते सति प्रवर्ग्ये[4] । एव-शब्दोऽवधारणार्थः । साङ्गा[5] एव भवतीति[6] आप्यायनं निह्नवश्च । अपराह्ण इति वचनादुक्ता इष्टिः पूर्वाह्णे भवति, अविद्यमानेऽपि प्रवर्ग्ये ॥ १० ॥

[आपराह्णिक्यामुपसदि सामिधेनीमन्त्रकथनं याज्यानुवाक्याविपर्यासः पाण्योर्निह्नवश्च]

इमां मे अग्ने समिधमिमामिति तु सामिधेन्यः । विपर्यासो याज्यानुवाक्यानाम् । पाण्योश्च निह्नवे । इत्युपसदः ॥ ११ ॥

'इमाम्' (ऋ २, ६, १) इति अधिकपादग्रहणात् तृचो भवति । इति एतास्तु सामिधेन्यो भवन्ति । आपराह्णिक्यामुपसदि 'एषैवापराह्णे' (आश्रौ ४,८,१०) इति[7] प्राप्तानां स्थाने इमा भवन्ति, तेनैव विधिना । तु-शब्दः स्थाने प्राप्त्यर्थः । स्थाने चोदितत्वाद् धर्मप्राप्त्यर्थम्[8] । सामिधेन्य इति वचनात् सामिधेनीनां स्थाने विपर्यासः । एषैवेति वचनात् ता एव याज्यानुवाक्याः प्राप्ताः इत्यतस्तासामेव[9] याज्यानुवाक्यानामिह विपर्यासो विधीयते । यास्तत्रानुवाक्यास्ता इह याज्या भवन्ति । यास्तत्र याज्यास्ता इहानुवाक्या भवन्ति । एताभिः 'विपर्यस्ताभिरपराह्णे[10] यजति' (ऐब्रा १, २५) इति श्रुतिः । पाण्योश्च पाण्योश्च विपर्यासो भवति [11]निह्नवे इति[11] निह्नवकर्मणि । चकारो

---

१. नित्यम् ब[1]; त्रुटितम् पू । २. अच्युतम् ब[1]; त्रुटितम् पू । ३. कर्मणि मूको । ४-४. प्रवर्ग्योऽन्ते सति प्रवर्ग्यः मै । ५. सांग ब[1] मै; संगो ब[2]; त्रुटितम् पू । ६. भवति ब[1] मै; त्रुटितम् पू । ७. इति प्राप्ते ब[2] मै पू । ८. °प्राप्त्यर्थं ब[1] । ९. त्यत्यतास्तासामेव ब[1]; त्यत्यतास्तामेव ब[2]; तास्तासामेव मै; त्रुटितम् पू । १०. त्रुटितम् पू । ११-११. निह्नवेति मूको ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

विपर्यासाधिकारसमुच्चयार्थः । 'उत्तानान् दक्षिणान् सव्यान्नीचः' (आश्रौ ४,५,७) इत्युक्तम् । 'इह तु' सव्य उत्तानः, दक्षिणो नीचः । निह्नव इत्यनुच्यमाने संशयो वा भवति पाण्योर्वा विपर्यासः क्व भवतीति । पाण्योरिति प्रतिपुरुषम् उक्तं द्रष्टव्यम् इत्युपसदः । इत्येवमुपसदो भवन्ति । एकस्मिन्नहनि[2] पूर्वाह्णे प्रवर्ग्योपसदौ कृत्वा पुनरपराह्णे प्रवर्ग्योपसदौ भवतः । एवं विहिता उपसदो भवन्ति । यत्र यत्र[3] वक्ष्यामस्तित्रः, षड्, द्वादश, चतुर्विंशतिरिति[4] । यदिदं नारभ्येत, उपसदिति इष्टिसंज्ञा, तस्मात् षडुपसद इत्युक्ते षडिष्टयः प्रत्यहनि* प्राप्नुवन्ति । तस्मादिदमुच्यते—इत्युपसद इति ॥ ११ ॥

[सुष्ठुपूर्वाह्णे सुष्ठ्वपराह्णे चोपसदः प्रयोगकाल इति कथनम्]

सुपूर्वाह्णे स्वपराह्णे च ॥ १२ ॥

सुष्ठु पूर्वाह्णे पूर्वा उपसत् कार्या । अप्रवर्ग्ये सति उदितमात्र आदित्ये । सप्रवर्ग्ये तु प्रवर्ग्यादनन्तरम् । 'तस्मात् सुपूर्वाह्ण एव पूर्वयोपसदा प्रचरितव्यम्' (ऐब्रा १, २३) इति श्रुतिः । स्वपराह्णे च । सुष्ठु अपराह्णे स्वपराह्णे अपरा द्वितीया कार्या अस्तमनकाले । 'स्वपराह्णेऽपरया' (ऐब्रा १,२३) इति श्रुतिः ॥१२॥

[राजक्रयाद्यहर्गणनयोपसदां त्रित्वम्]

राजक्रयाद्यहःसंख्यानेनैकाहानां तिस्रः ॥ १३ ॥

दीक्षान्ते राजक्रयः (आश्रौ ४, २, १८) इत्युक्तं[5] राजक्रयमादि कृत्वा राजक्रयादि अहःसंख्यानेन[6] न[7] रात्रिसंख्यानेन एकाहानां क्रतूनाम् । ज्योतिष्टोमादयः ये नवमेऽध्याये आम्नातास्तेषामेकाहानां तिस्रः उपसदो भवन्ति । राजक्रयादिवचनाद् दीक्षाभ्योऽनन्तरा उपसदो भवन्ति । 'रात्रिसंख्यानेन दीक्षाः' (आश्रौ ४, २, १३) इति [8]प्रकृतम् । तस्मादुपसदस्तु अहःसंख्यानेनेत्युच्यते[8] । अहःसंख्यानादुत्तरमहः रात्रावेवारभ्यते । 'अथैतस्या रात्रेर्विवासकाले' (आश्रौ ४, १३, १) इति रात्रिसंख्याने सति न युज्यते । [9]एकाहग्रहणेऽक्रियमाण[9] उत्तरत्र अहीनग्रहणाद्[10] अहीनानामेव स्युः तिस्रः । षड् वा । 'अहीनानाम्' (आश्रौ ४, ८, १३-१५) इति ॥ १३ ॥

१-१. नास्ति ब[1] । २. एतस्मिन्न° ब[1] । ३. नास्ति ब[1] । ४. आश्रौ ४, ८, १३-१५ । *. प्रत्यहम् इति वा प्रत्यहे इति वा साधु । ५. इत्युक्ते मूको । ६. °संख्यातेन ब[2] मै ; व्युटितम् पू । ७. नास्ति मूको । ८-८. नास्ति ब[2] । ९-९. °ग्रहण उत्तर (°रे मै) क्रियमाणे मूको । १०. °नाग्रह° ब[1] पू ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

[उपसदां षट्संख्याकत्वविकल्पकथनम्]

षड् वा ॥ १४ ॥

एकाहानां[1] षड् वा उपसदो भवन्ति तिस्रो वा इति विकल्पः। विनिवेश एवायम्। साग्निचित्ये षड् अनग्निचित्ये तिस्रः एवमध्वर्यूणां वचनम्[2] ॥ १४ ॥

[अहीनानां सत्राणां त्रिविधविकल्पकथनम्]

अहीनानां द्वादश चतुर्विंशतिः संवत्सर इति सत्राणाम् ॥ १५ ॥

अहीनानां क्रतूनां त्रयो विकल्पाः। अहीनाधिकारात् सत्राणाम् इत्युच्यते। अत्र 'उपसदः' (आश्रौ ४, ८, ११) उक्त्वाऽनन्तरं[3] सत्राणामित्याह, तस्माद् द्वादशप्रभृतयः सर्वे कल्पाः[4] सत्रेषु[5] भवन्ति। अन्यथा पूर्वसत्राणामित्यवक्ष्यत्[6] सत्राणां चतुर्विंशतिः संवत्सर इति ॥ १५ ॥

[ज्योतिष्टोमे घर्मकरणाकरणविकल्पकथनम्]

प्रथमयज्ञे नैके घर्मम् ॥ १६ ॥

प्रथमयज्ञः ज्योतिष्टोमः। 'ज्योतिष्टोमेनानिष्ट्वा यो अन्येन यजते स पापीयान् भवति' (?) इति श्रुतिः[7]। तस्माज्ज्योतिष्टोमः प्रथमयज्ञः। 'वसन्ते ज्योतिष्टोमेन यजेत' (आपश्रौ १०, २, २) इत्येतस्मिन्नपि कल्पे [८]प्रथमयज्ञ एव[८]। [९]प्रथमो यज्ञः[९] [१०]प्रथमयज्ञः[१०]। तस्मिन्[१०] प्रथमयज्ञे एके शाखिनः घर्मं न मन्यन्ते इति विकल्पः। 'न[११] प्रथमयज्ञे [१२]प्रवृञ्ज्यात्, प्रवृञ्ज्याद्[१२] वा' (आपश्रौ ११, २, ६-७) इत्यध्वर्यूणां वचनम् ॥ १६ ॥

[औपवसथ्येऽहनि पूर्वाह्ण एवोभयोरुपसदोः करणीयत्वम्]

औपवसथ्य उभे पूर्वाह्णे ॥ १७ ॥

औपवसथ्ये अग्नीषोमीये। [१३]उपवसथो यस्मिन्नहनि[१३] तदौपवसथ्यमहः, तस्मिन्नौपवसथ्येऽहनि उभे [१४]उपसदौ पूर्वाह्ण एव कुर्यात्, प्रवर्ग्यौ च। अप्राप्तमारभ्यते[१४] ॥ १७ ॥

---

१. नास्ति ब[२]। २. तु. आपश्रौ १५, १२, ५ (?)। ३. उक्तादनन्तरं ब[२] मै; उक्तानन्तरं ब[१]; त्रुटितम् पू। ४. विकल्पाः ब[२]। ५. सर्वेषु ब[१२] पू। ६. पूर्वसत्राद (°दि मै) वक्ष्यते मूको। ७. तु. तांब्रा १६, १, २; शांब्रा १६, ९। ८-८. प्रथमे याज्यामेव मूको। ९-९. नास्ति मूको। १०-१०. नास्ति ब[१] मै पू। ११. न च मूको। १२-१२. प्रवृज्य (°ज ब[२]) न प्रवृज्याद् ब[१२] पू; प्रवृञ्ज्यादप्रवृञ्ज्याद् मै। १३-१३. उपसन्ने (°न्न ब[२]) यस्मि° ब[२] मै। १४. नास्ति ब[१]।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

[प्रथमस्यामुपसदि कृतायामध्वर्युणा प्रेषितस्य दीक्षितस्य होतुः पुरीष्यचितयेऽनुवचनम्]

प्रथमस्यामुपसदि वृत्तायां प्रेषितः पुरीष्यचितयेऽन्वाह होता दीक्षितश्चेत् ॥ १८ ॥

या प्रथमा उपसत् राजक्रयेऽहनि तस्यां प्रथमस्यामुपसदि वृत्तायां कृतायाम् अध्वर्युणा प्रेषितः[1] पुरीष्यचितये[2] [3]पुरीष्याग्नेः या चितिः[3] तदर्थमिदमनुवचनम्[4] अन्वाह । उपसदामधिकारे पुनरुपसद्ग्रहणम् उपसदां या प्रथमा, तस्याः प्राप्त्यर्थम् । अन्यथा 'उभे पूर्वाह्णे' (आश्रौ ४, ८, १७) इत्यधिकारात् तयोः प्रथमस्यामिति स्यात् । 'प्रेषित' इति वचनाद् अप्रेषितो[5] न प्रतिपद्यते । पुरीष्यचितय इत्यनुच्यमाने किमर्थमिति न विज्ञायते । होता पुरीष्यचित्यनुवचनमाह दीक्षितश्चेद् भवति । होतृग्रहणं यजमानविवक्षार्थम् । [6]दीक्षितश्चेदिति वचनाद्[6] [7]अदीक्षितो न ब्रूयात्[7] ॥ १८ ॥

[अदीक्षिते होतरि यजमानस्यानुवचनविधानम्]

यजमानोऽदीक्षिते ॥ १९ ॥

[7]अदीक्षिते होतरि यजमानो ब्रूयात् । अदीक्षित इति वचनाद्[7] दीक्षिते होतरि होतैव ब्रूयान्न यजमानः ॥ १९ ॥

[अनुवचनकथनम्]

पश्चात् पदमात्रेऽवस्थायाभिहिङ्कृत्य पुरीष्यासो अग्नय इति त्रिरुपांशु सप्रणवाम् ॥ २० ॥

यत्राध्वर्युः संप्रैषमाह तस्य पश्चाद् अपरस्यां दिशि पदमात्रे देशे अवस्थाय अभिहिङ्कृत्य अभिहिङ्कारं कृत्वा 'पुरीष्यासः' (ऋ ३, २२, ४) इति एतां त्रिः अन्वाह उपांशु सप्रणवां सह प्रणवैरुपांशु[8] अन्वाह । अप्राप्ते अभिहिङ्कारे त्रिर्वचनं च[9] विधीयते । अनियमे प्राप्ते उपांशुत्वं विधीयते । 'आगूःप्रणववषट्कारा उच्चैः' (आश्रौ २, १५, १२) इति प्राप्ते सप्रणवामित्याह ॥ २० ॥

---

१. प्रेक्षितः मै । २. नास्ति मूको । ३-३. पुरीष्यान्ते ब[1]; पुरीष्याते ब[2] पू ; पुरीष्यास्ते मै । ४. तदमनुवचन° ब[1]; तदर्थमिदमन्वहम् मै ; त्रुटितम् पू । ५. अप्रेक्षितो मै । ६-६. नास्ति पू । ७-७. नास्ति ब[1] मै पू । ८. उपांशुम् ब[1,2] मै ; त्रुटितम् पू । ९. नास्ति ब[2] ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

[अनुवचनस्य सुमन्द्रस्वरविकल्पकथनम्]

अपि वा सुमन्द्रम् ॥ २१ ॥

उपांशित्युक्तम् । अपि वा सुमन्द्रं ब्रूयात् । मन्द्रस्वरस्य प्रथमो यमः सुमन्द्रम्[1] इति व्याख्यातम्[2] । अपि-शब्दप्रयोगात् समानं विधानम् इह च उपसत्सु च । उभयत्राऽप्यपि-शब्दो विधीयते । 'अपि वा सुमन्द्रतन्त्राः' (आश्रौ २, १५, ११), अपि वा सुमन्द्रम् इति । तस्मादुपसत्सु यद्युपांशु प्रयुक्तमिहाप्युपांशु एव, यदि सुमन्द्रं[3] प्रयुक्तमिहापि सुमन्द्रमेव । अपि वेति वाक्यसामर्थ्यात् [4]तत्समानं विधानम्[4] । वा-शब्दो विकल्पार्थः ॥ २१ ॥

[व्रजत्सु कर्तृषु अनुव्रजत एवानुवचनविधानम्]

व्रजत्स्वनुव्रजेत् ॥ २२ ॥

व्रजत्सु कर्तृषु ब्रुवन्नेव अनुव्रजेत् । 'अवस्थाय' (आश्रौ ४, ८, २०) इति वचनाद् व्रजत्स्वपि व्रजनं[5] न प्राप्नोति ॥ २२ ॥

[तिष्ठत्सु कर्तृषु अनुवक्तोच्चैः प्रणयतेति ब्रूयात्]

तिष्ठत्सु विसृष्टवाक् प्रणयतेति ब्रूयात् ॥ २३ ॥

असमाप्ते अनुवचने यदि तिष्ठन्ति [6]न तु व्रजन्ति[6] । ततस्तेषु[7] तिष्ठत्सु कर्तृषु विसृष्टवाक्[8] विसृष्टा वाग् येन स विसृष्टवाक् । उच्चैरित्यर्थः । यथाऽध्वर्युः शृणोति, तथा उच्चैः प्रणयतेति ब्रूयात् । एवं विसृष्टवाग् गच्छति । उपांशित्यधिकारात् प्रणयतेति उपांशवेव ब्रूयात्, तस्मादाह—विसृष्टवागिति ॥२३॥

[संचितेऽग्नौ प्रस्तोत्रानुगीतेऽनुशंसनविधानम्]

अथाग्निं संचितमनुगीतमनुशंसेत् ॥ २४ ॥

अथ-शब्दः पूर्वप्रकृतापेक्षः । तस्माद्[9] 'होता दीक्षितश्चेद्' (आश्रौ ४, ८, १८) इत्येवमादि प्रकृतमिहानुवर्तते । अग्निं संचितं परिसमाप्ते [10]चयने संचितो[10] भवति । संचितं सन्तम्[11] अनुगीतं प्रस्तोत्रा पञ्चभिः सामभिः अनुगीतं सन्तं होता यजमानो वा अनुशंसेत् वक्ष्यमाणेन विधानेन । संचितमिति

---

१. °न्द्र मै । २. तु. आश्रौ २, १५, ११ । ३. सुमन्द्र मै । ४-४. °मानवि° मूको । ५. व्रजन ब[1/2] पू ; व्रजन् मै । ६-६. नानुव्र° ब[1] पू । ७. नास्ति ब[1] । ८. नास्ति ब[1] पू । ९. नास्ति मै । १०-१०. च यथा संचितो (°ते ब[1]; °तं मै) ब[1/2] मै; त्रुटितम् पू । ११. नास्ति मै ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

न वक्तव्यम् । अथाग्निमनुगीतम्[1] अनुशंसेदित्युच्यमाने[2] असंचितेऽप्यनुगाने[3] पुरुषादीनामुपधाने अनुशंसनं स्यात् । तस्मात् संचितमित्याह । अनुगीतमिति वचनाद् अनुगानादनन्तरमेवानुशंसनं क्रियते, न तु वैश्वानरीयस्य [4]काले। वैश्वानरीयमुत्तरेद्युरभिभवति । 'एतस्मिन्नेवासने' (आश्रौ ४, ८, २६) इति वचनाद् वैश्वानरीयस्य[4] काले अनुशंसनं प्राप्तम्, तस्मादाह—अनुगीतम्। अनुशंसेद् इति चोदितत्वाद् आहावप्रतिगरत्वादयः[5] शस्त्रधर्मा भवन्ति, नान्यत्र[6] यथा 'महानाम्नीर्भो अनुब्रूहि' (आश्रौ ८, १४, १५) इति चोदिते अनुवचने धर्मा न क्रियन्ते । वैतानिके विषये[7] न भवतीति अनुशंसनविधानं वक्ष्यते ॥ २४ ॥

[अनुशंसनविधिकथनम्]

पश्चादग्निपुच्छस्योपविश्याभिहिङ्कृत्याग्निरस्मि जन्मना जातवेदा इति त्रिर्मध्यमया वाचा ॥ २५ ॥

अग्निपुच्छस्य पश्चाद् अपरस्यां दिशि उपविश्य अभिहिङ्कारं कृत्वा 'अग्निरस्मि' (ऋ ३, २६, ७) इति एतामृचं त्रिः ब्रूयात् मध्यमया वाचा मध्यमस्वरेण । 'अनुगीतमनुशंसेद्' (आश्रौ ४, ८, २४) इति वचनाद् अनुगानादनन्तरमेवानुशंसेत् । न संप्रैषो[8] विद्यते । अवस्थायेत्यधिकाराद् उपविश्येत्युच्यते । अप्राप्तोऽभिहिङ्कारो विधीयते 'नाभिहिङ्काराभ्यासावबहुषु' (आश्रौ १, २, २४) इति । त्रिर्वचनं चाप्राप्तमारभ्यते । अप्राप्तो विधिः यत्रारभ्यते, तत्रैव च भवति, नानुवर्तते । उपांशु सुमन्द्रं वेत्यधिकाराद् मध्यमया[9] वाचेत्युच्यते ॥ २५ ॥

[अनुशंसनासन एवोपविश्य वैश्वानरीयेष्टिकरणम्]

एतस्मिन्नेवासने वैश्वानरीयस्य यजति ॥ २६ ॥

यस्मिन्नासने उपविश्यानुशस्तम् एतस्मिन्नेवासने [10]उपविश्य वैश्वानरीयस्य† हविषा यजति होता यजमानो वा इष्टिन्यायात् । वेदिश्रोण्यामुपविश्य यजतीति प्राप्ते एतस्मिन्नेवासन[10] इत्याह[11] । पुनर्निरसनं न क्रियते, समानं

---

१. °गीते ब[2] मै पू । २. °शंसेदिति यदी (°दि ब[2]) त्युच्यमाने मूको । ३. संचि° ब[1] पू । ४-४. नास्ति ब[2] । ५. आहा (°ह ब[2] पू) वप्रतिगरादयः ब[1,2] पू ; आहव° मै । ६. °त्र च ब[2] । ७. विषयो मूको । ८. प्रैषः ब[1] । ९. तु. आश्रौ ४, ८, २०-२१ । १०-१०. नास्ति ब[2] । †. नरस्य मै । ११. त्यहः ब[2] ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

ह्यासनं यस्मात्[1] । यदाऽन्यस्मिन्नहनि[2] क्रियते, तदा निरसनं कर्तव्यम् 'अहरहः प्रथमोपवेशने' (आश्रौ १, ३, ३२) इति । वैश्वानरीयं प्रदानमात्रं भवति । इष्टिर्वा कृत्स्नतन्त्रा । यस्य हविषो यां यां देवतां यजति, तस्यास्तस्या[3] देवताया निगमेषु निगमनं क्रियते, यथा उपसदि । अत्र केचित् शुद्धं वैश्वानरं चोदयन्ति । तथा सति तल्लक्षणे याज्यानुवाक्ये ग्राह्ये, लक्षणं[4] देवताभिज्ञानमित्यनेन[5], भवतः ॥ २६ ॥

[प्रणयनानुशंसनेष्टीनां साग्निचित्य एव क्रतौ कर्तव्यत्वम्]

त्रयमेतत् साग्निचित्ये ॥ २७ ॥

प्रणयनमनुशंसनमिष्टिरिति एतत्त्रयं साग्निचित्ये क्रतौ भवति, नान्यत्र । अथाग्नि[6] संचितम् (आश्रौ ४, ८, २४) इति वचनादनुशंसनं साग्नावेव भवति । प्रणयनं वैश्वानरीयं च अग्निशब्देन चोदितत्वाद् अनग्निचित्ये प्राप्नुतः, तस्मादाह—त्रयमेतत् साग्निचित्य इति ॥ २७ ॥

[ब्रह्मणो विधिकथनं, होत्राऽग्निप्रणयनं, ब्रह्मणो वसोर्धाराकाले उपसर्पणञ्च]

ब्रह्माऽप्रतिरथं जपित्वा दक्षिणतोऽग्नेर्बहिर्वेद्यास्त औदुम्बर्याभिहवनात् ॥ २८ ॥

उक्तमग्निप्रणयनम् ॥ २९ ॥

दीक्षितस्तु वसोर्धारामुपसर्पेत् ॥ ३० ॥

ब्रह्माऽप्रतिरथम् इति [7]पञ्चदश पदानि[7] सूत्रम् । व्यवहितत्वाद् अक्रमेण[8] व्याख्या क्रियते । 'औपवसथ्य उभे पूर्वाह्णे' (आश्रौ ४, ८, १७) इति औपवसथ्याधिकारो वर्तते । औपवसथ्येऽहन्युभे उपसदौ कृत्वा अग्निप्रणयनं भवति । तदुक्तं व्याख्यातम् । तस्मिन्नग्निप्रणयने ब्रह्मा अप्रतिरथम् [9]ऋषि जपित्वा दक्षिणतोऽग्नेः आहवनीयस्य दक्षिणतः बहिर्वेदि [10]वेदेर्बहिः आस्ते[10]। कियन्तं कालमिति आ औदुम्बर्या अभिहवनाद् अभिहोमात् । दीक्षितस्तु

---

१. इत्यस्मात् मै । २. यदाऽस्मिन्नहनि ब[2]; यदा यस्मिन्नहनि मै; यदन्यस्मिन्नहनि पू । ३. तस्मात्तस्या ब[1/2] । ४. लक्षणं ब[1/2] पू; लक्षणे मै; तु. आश्रौ २, १४, २५ । ५. देवता अभिज्ञा° मै । ६. यथाग्नि ब[1/2] पू; यथाग्नि मै । ७-७. पदं च दशंति (दशनि ब[2] मै पू) मूको । ८. क्रमेण मूको । ९. तु. ऋ १०, १०३ । १०-१०. बहिरास्ते मूको ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

यदि भवति ब्रह्मा वसोर्धारां हूयमानाम् उपसर्पेद् उप समीपे गच्छेद् यजमानार्थम् अप्रतिरथं जपित्वा । दक्षिणतोऽग्नेर्बर्हिर्वेद्यास्ते इति न वक्तव्यम्, 'समाप्योपवेशनाद्युक्तम्' (आश्रौ १, १२, २८) इति सिद्धत्वात्, 'एतद् ब्रह्मासनं पशौ' (आश्रौ ४, १०, ११) इति पशुग्रहणात् प्रणयनादि । दक्षिणतः आहवनीयस्यासने प्राप्ते बर्हिर्वेदीत्युच्यते । बर्हिर्वेदीति वचनाद् यत्र क्व च प्राप्ते [1]दक्षिणतोऽग्नेरित्युच्यते[1] । दक्षिणतोऽग्नेरिति वचनाद् अग्नेः आञ्जस्येन बर्हिर्वेदि यो देशस्तत्र भवति । प्रणयने यदासनं तत् पाशुके कर्मणि प्राप्तं हविर्धानप्रवर्तनादिष्वपि प्राप्त्यर्थम् औदुम्बर्याभिहवनादित्युच्यते । ब्रह्मणो विधानमध्ये होतुर्विधानमुच्यते—उक्तमग्निप्रणयनम् इति । तस्माद् यथा ब्रह्मा प्रणयनादि सकृत् प्रपन्न आ औदुम्बर्याभिहवनाद् आस्ते, एवं होताऽपि प्रणयनादि सकृत् प्रपन्न एव हविर्धानप्रवर्तनादि कुर्याद् आग्नीषोमप्रणयनात् ॥ २८-३० ॥

॥ इति चतुर्थे अष्टमं खण्डम् ॥

१-१. नास्ति मूको ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

अथ चतुर्थेऽध्याये नवमः खण्डः

[हविर्धानशकटद्वयश्रामणम्]

हविर्धाने प्रवर्तयन्ति ॥ १ ॥

हविर्धानं शकटम्, हविः सोमो निधीयते इति। हविर्धानं च हविर्धानं[1] च[2] हविर्धाने द्वे भवतः। ते हविर्धाने प्रवर्तयन्ति श्रामयन्ति[3] अध्वर्यवः, एतदधिकृतं वेदितव्यम्। तत्र विधानं वक्ष्यते ॥ १ ॥

[हविर्धानशकटद्वयश्रामणविधानस्य सोमप्रवहण उक्तत्वम्]

तदुक्तं सोमप्रवहणेन ॥ २ ॥

तयोः प्रवर्तने यद् विधानं तदुक्तं व्याख्यातं सोमप्रवहणेन, 'तं प्रवक्ष्यत्सु पश्चादनसः' (आश्रौ ४, ४, २) इत्येवमादिना[4] ॥ २ ॥

[दक्षिणस्य शकटस्योत्तरचक्रस्य वर्त्म पादयोर्मध्ये कृत्वाऽवस्थानमिति विशेषः]

दक्षिणस्य तु हविर्धानस्योत्तरस्य चक्रस्यान्तरा वर्त्म पादयोः ॥ ३ ॥

दक्षिणस्य तु हविर्धानस्य उत्तरस्य चक्रस्य वर्त्म मार्गः[5] पादयोरन्तरा मध्ये यथा भवति तथा तिष्ठेत्। हविर्धाने इति द्वयोरधिकाराद् द्वयोरपि सोमप्रवहणेन विधाने प्राप्ते दक्षिणस्येति नियमः। 'अन्तरेणैव[6] वर्त्मनी[7]' (आश्रौ ४, ४, ३) इति प्राप्ते अन्तरा वर्त्म पादयोरित्युच्यते। एतत् कृत्वा अभिहिङ्कारादनुवचनम्। तद् वक्ष्यते ॥ ३ ॥

[अनुवचनविधानम् अव्यवस्तायां रराटचामर्धर्चं आरमणविधानञ्च]

युजे वां ब्रह्म पूर्व्यं नमोभिः, प्रेतां यज्ञस्य शंभुवा युवां, यमे इव यतमाने यदैतमधि द्वयोरदधा उक्थ्यं वच इत्यर्धर्चं आरमेदव्यवस्ता चेद्रराटी ॥ ४ ॥

---

१. नास्ति ब[2] पू। २. नास्ति ब[1/2] पू। ३. प्रामयन्ति ब[1] पू; प्रमेयन्ति ब[2]; प्रापयन्ति मै। ४. °वमादि मूको; तु. आश्रौ ४, ४, २-६। ५. चक्रमार्गः ब[2] पू। ६. अन्तरेण मूको। ७. वर्त्म मूको।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

'युजे वाम्' (ऋ १०, १३, १) इत्येका । 'प्रेताम्' (ऋ २, ४१, १९) इत्यधिकपादग्रहणात् तृचो (ऋ २, ४१, १९-२१) भवति । 'यमे इव' (ऋ १०, १३, २) इत्येका, 'अधि द्वयोः' (ऋ १, ८३, ३) इत्येका च । एतस्या ऋचः अर्धर्चमुक्त्वा आरमेत् । अव्यवस्ता चेद् रराटी भवति । रराटी छदिःकटिका भवति । सा द्वार्थयोरुपरि बध्यते । सा चेद् यदि अव्यवस्ता अप्रतिबद्धा भवति । तयोरर्धर्चं आरमेत् । यदि पूर्वमेव प्रतिबद्धा भवति, नारमेत् ॥ ४ ॥

[व्यवस्तायां रराट्यामनुवचनविधानम्]

विश्वा रूपाणि प्रति मुञ्चते कविरिति व्यवस्तायाम् ॥ ५ ॥

'विश्वा रूपाणि' (ऋ ५, ८१, २) इति एताम् ऋचं व्यवस्तायां प्रतिबद्धायां रराट्यामन्वाह । 'रराट्यामीक्षमाणोऽनुब्रूयात्' (ऐब्रा १, २९) इति श्रुतिः ॥ ५ ॥

[उपनिहितयोर्मेथ्योः परिधानविधानम्]

मेथ्योरुपनिहितयोः परि त्वा गिर्वणो गिर इति परिदध्यात् ॥ ६ ॥

द्वयोरपि हविर्धानयोरुभयतश्चक्रसमीपे मेथ्यौ निहन्येते । तयोः उपनिहितयोः 'परि त्वा' (ऋ १, १०, १२) इति एतया परिधानं कुर्यात् । 'तौ यदैवाध्वर्युश्च प्रतिप्रस्थाता चोभयतो मेथ्यौ निहन्यातामथ परिदध्यात्' (ऐब्रा १, २९) इति श्रुतिः । परिदध्याद् इति हि पुनरुच्यते निमित्तविवक्षार्थम् । उपनिहितयोरेव परिदध्यादिति ॥ ६ ॥

॥ इति चतुर्थे नवमं खण्डम् ॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

अथ चतुर्थेऽध्याये दशमः खण्डः

[अग्नीषोमौ प्रणेष्यत्स्वध्वर्युषु होतुस्तीर्थेन प्रपदनादि प्रेषितानुवचनान्तं कर्म]

अग्नीषोमौ प्रणेष्यत्सु तीर्थेन प्रपद्योत्तरेणाऽऽग्नीध्रीयायतनं सदश्च पूर्वया द्वारा पत्नीशालां प्रपद्योत्तरेण शालामुखीयमतिव्रज्य पश्चादस्योपविश्य प्रेषितोऽनुब्रूयात् सावीर्हि देव प्रथमाय पित्रे वष्मर्णमस्मै वरिमाणमस्मै । अथाऽस्मभ्यं सवितः सर्वताता दिवे दिव आसु वा भूरि पश्व इत्यासीनः ॥ १ ॥

अग्निश्च सोमश्च अग्नीषोमौ । तौ सह प्रणयन्त्यध्वर्यवः । तेषु प्रणेष्यत्सु एतस्मिन्निमित्ते होता तीर्थेन प्रपद्य उत्तरेण आग्नीध्रीयस्य आयतनं सदश्च उत्तरेण गत्वा पूर्वया द्वारा पत्नीशालां प्रपद्य उत्तरेण शालामुखीयम् अग्निम् अतिव्रज्य गत्वा अस्य शालामुखीयस्याग्नेः पश्चाद् अपरस्यां दिशि उपविश्य अध्वर्युणा प्रेषितोऽनुब्रूयात् । अनुवचनमाह—'सावीर्हि' (तु० तैब्रा २, ७, १५, १) इति । एतामृचम् आसीनो ब्रूयात् । तीर्थेन प्रपद्येति वचनाद् इह प्रभृति एतत्तीर्थं[1] भवति । सौमिके कर्मणि एतदाप्नानं[2] तीर्थम् इत्याचक्षते । तदेतदृचाऽभ्युक्तम्[3]—'आप्नानं तीर्थं क इह प्र वोचद् येन पथा प्रपिबन्ते सुतस्य' (ऋ १०, ११४, ७) इति । पूर्वेषु कर्मसु हविर्धानप्रवर्तनादिषु ऐष्टिकमेव[4] तीर्थम् । सांख्यायनकेऽप्येवमेवोक्तम्[4] । तीर्थेन प्रपन्नस्य बहिर्वेदि सञ्चरे प्राप्ते अन्तर्वेदि प्राप्त्यर्थमुत्तरेण सद इत्युच्यते । अन्तर्वेदि सञ्चरे प्राप्ते आग्नीध्रीयायतनम् । तस्य दक्षिणेन प्राप्ते उत्तरेणाग्नीध्रीयमित्युच्यते । द्वारबहुत्वात् [5]पूर्वया द्वारा[5] इत्युच्यते । प्रदेश[6] इह प्रभृति पत्नीशालसंज्ञो भवति । वक्ष्यति—'आग्नीध्रीयं पत्नीशालं च' (आश्रौ १२, ६, ६) इति । क्रीते सोमे प्रपद्य[7] सोमं शालामुखीयमग्रेणापरेण वा गत्वा आसन्द्यां सादयन्ति । ये अग्रेण गत्वा सादयन्ति तैः सह[8] प्रयोगे सोमस्य प्रणयनत्वाद् दक्षिणेन शालामुखीयं गत्वा सोमस्य पश्चादुपवेशनं प्राप्तम् । एवं विकल्पे प्राप्ते अग्नेरेवोत्तरेण सञ्चरो[9] विधीयते ।

---

१. तु. आश्रौ १, १, ७ । २. तु. लाश्रौ १, ५, ४ तदाप्नानं तीर्थम् । ३. तु. षड्विंशब्राह्मणम् ३, ४, ६ । ४. शांश्रौ ५, १४, २ ; १७, ७, ११ (?) । ५-५. पूर्वापरद्वारा मै । ६. प्रवेशः मूको । ७. प्रपाद्य ब[1] मं पू । ८. नास्ति मै । ९. सञ्चारो मै ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

तस्यैव पश्चादुपवेशनम् । अनुव्रजन्निति[1] वचनात् प्रथमामप्यनुव्रजन्नेव ब्रूयात् । तस्मात् पुनराह—आसीन इति । उत्तर-शब्दश्चाधिकारार्थं स्यात् ॥ १ ॥

[उत्तरासामृचामनुव्रजता होत्राऽनुवचनम्]

अनुव्रजन्नुत्तराः ॥ २ ॥

प्रथमामासीनो ब्रूयात् , उत्तरा ऋचः अनुव्रजन् अनुब्रूयात् । 'उपविश्य' (आश्रौ ४, १०, १) इति वचनात् कृत्स्नमनुवचनमुपविष्टस्य प्राप्तम् ॥ २ ॥

[उत्तरासामृचां कथनम्]

उत्तरा ऋचो वक्ष्यन्ते—

प्रैतु ब्रह्मणस्पतिर्होता देवो अमर्त्यः पुरस्तादुप त्वाऽग्ने दिवे दिवे दोषावस्तरुप प्रियं पनिप्नतमित्यर्धर्चं आरमेदाग्नीध्रीये निहितेऽभिहूयमानेऽग्ने जुषस्व प्रति हर्य तद्वच इति समाप्य प्रणवेनोपरमेत् ॥ ३ ॥

'प्रैतु' (ऋ १, ४०, ३) । 'होता देवः' (ऋ ३, २७, ७-९) अधिकपादग्रहणात् तृचः । 'उप त्वाऽग्ने' (ऋ १, १, ७-९) इति तृचः । 'उप प्रियम्' (ऋ ९, ६७, २९) इति एतस्या ऋचः अर्धर्चमुक्त्वा आरमेद् यावदग्निर्निधीयते । आग्नीध्रीये यः प्रणीतोऽग्निः स आग्नीध्रीय इत्युच्यते । तस्मिन् निहिते स्थापिते । अभिहूयमाने[2] आग्नीध्रीयायतने अग्निमाधायाध्वर्युराज्याहुतिं[3] जुहोति । तस्मिन्नभिहूयमाने 'अग्ने जुषस्व' (ऋ १, १४४, ७) इति एतामृचं समाप्य प्रणवेन उपरमेद् विरमेत् प्रणवेनावस्येत् । निहित इति वचनान्निहितमात्रे यो[4] होमः, तत्रैवैतामृचमन्वाह[5] । अन्यत्र होमे मा भूदिति 'आग्नीध्रीये जान्वाच्याहुतिं जुहुयात्' (आश्रौ ४, १३, १) इत्येवमादिषु । प्रणवेनोपरमेदिति वचनाद् अर्धर्चान्ते प्रणवः प्राप्तस्तस्मादाह—समाप्येति । समाप्योपरमेदिति वचनाद् अप्रणवमवसानं[6] प्राप्नोति उत्तरसन्तानार्थत्वात् प्रणवस्य । तस्मादाह—प्रणवेनोपरमेदिति ॥ ३ ॥

[आग्नीध्रीयं निधायोत्तरेणातिव्रजतो होतुरनुवचनम्]

उत्तरेणाग्नीध्रीयमतिव्रजत्स्वतिव्रज्य सोमो जिगाति गातुविद् देवानां तमस्य राजा वरुणस्तमश्विनेत्यर्धर्चं आरमेत् ॥ ४ ॥

निधाय[7] आग्नीध्रीयं तम् उत्तरेण ऋत्विजो व्रजन्ति । तेष्वतीत्य व्रजत्सु कर्तृषु उत्तरेणैवानुव्रजेत् । अतिव्रज्य[8] गत्वा 'सोमो जिगाति' (ऋ ३,६२,१३-१५)

---

१. अनुव्रजन्तीति मूको । द्र. आश्रौ ४, १०, ७ । २. अभिह्रियमाणे ब[2] मै । ३. °हुतीः ब[2] । ४. नास्ति ब[2] मै पू । ५. °तामृचमाह ब[1] मै । ६. प्रणव° ब[1] । ७. नास्ति ब[2] । ८. अभिव्रज्य मूको ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

'इत्येतं तृचमन्वाह'। उत्तरेणेति प्राप्ते एष सञ्चरः[२] पुनरारभ्यते। यद्यपि दक्षिणेन सोमं नयन्ति, उत्तरेणैव व्रजेदिति। अतिव्रजत्सु इति वचनाद् अनुव्रजत्सु न व्रजेत्। अतिव्रज्येति वचनाद् अग्निमतिव्रज्यैव ब्रूयात्। 'पृष्ठत एवाग्नीध्रं कृत्वा' (ऐब्रा १, ३०) इति श्रुतिः। 'तमस्य' (ऋ १, १५६, ४) इति एतस्या ऋचः अर्धर्चमुक्त्वा आरमेद् विरमेद्[3] यावत् प्रपादयन्ति ॥ ४ ॥

[प्रपाद्यमाने सोमे होतुरनुवचनविधिप्रदर्शनम्]

प्रपाद्यमानं राजानमनुप्रपद्येत। अन्तश्च प्रागा अदितिर्भवासि श्येनो न योनिं सदनं धिया कृतमस्तभ्नाद् द्यामसुरो विश्ववेदा इति परिदध्याद् ॥ उत्तरया वाऽक्षेमाचारे ॥ ५ ॥

तं प्रपाद्यमानं राजानम् अनु मार्गेणैव प्रपद्येत, 'अन्तश्च' (ऋ ८,४८,२) इत्येतामनुब्रुवन्। 'श्येनो न योनिम्' (ऋ ९, ७१, ६)। 'अस्तभ्नाद् द्याम्' (ऋ ८, ४२, १) इति एतया परिदध्यात्। परिदध्याद् इति पुनरुच्यते परिधानीयाविकल्पविवक्षार्थम्। उत्तरया वा[४] परिदध्यात्[3] परिधानं कुर्यात्। अक्षेमाचारे[५], अक्षेममाचरन्ति तस्कराः प्रजा विलुम्पन्ति। अक्षेमाचारे[६] सति 'एवा वन्दस्व' (ऋ ८, ४२, २) इत्येतया परिदध्यात्। [७]वेति विकल्पः। न† क्षेमाचारेऽपि सति विकल्पः। कथम्? यदि प्रजा उपधावेयुः अभयं वेच्छेरन्‡, तत (? दा) एतया परिदध्यात्। यदि नोपधावेयुः (? तदा) पूर्वया एव परिदध्यात्। एवं श्रुतिः—'यद्युप वा धावेयुरभयं वेच्छेरन्‡' (ऐब्रा १, ३०) इति[७] ॥ ५ ॥

[अत्र ब्रह्मणो विधिप्रदर्शनम्]

ब्रह्मैवमेव प्रपद्यापरेण वेदिमतिव्रज्य दक्षिणतः शालामुखीयस्योपविशेत् ॥ ६ ॥

ब्रह्मणोऽपि विधिरुच्यते। यथा होता प्रपन्न एवमेव ब्रह्मा प्रपद्य उत्तरेण शालामुखीयं गत्वा अपरेण ऐष्टिकीं वेदिमतिव्रज्य गत्वा दक्षिणतः शालामुखीयस्य उपविशेत्। 'अग्रेणाहवनीयं परीत्य' (आश्रौ १, १२, ८) इति प्राप्ते अयं सञ्चरो[८] विधीयते। प्रपद्यापरेण वेदिम् इति वेद्यधिकाराद् वेदेर्दक्षिणत उपविशेदिति

१-१. इत्येतामृच° मै। २. तु. आश्रौ ४, २, १२। ३ नास्ति ब[1]। ४. नास्ति ब[2]। ५. नास्ति पू। ६. °चारेऽपि ब[2] पू। ७-७. परिदिनोऽपबाधेयुः। पूर्वया एव परिदध्यादित्येवं श्रुतिः। यद्यप्यबाधेयुः अभयं वेच्छेरन्निति मै। †. तं ब[1] पू; त ब[2]। ‡. नास्ति ब[2]। ८. सञ्चारो ब[2]; संवत्सरो मै।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

प्राप्ते शालामुखीयस्येत्युच्यते । इहोत्तरेणाग्नीध्रीयायतनं सञ्चर उक्तः[1]। एतस्मादेव दर्शनाद् अग्निप्रणयनेऽपि ऐष्टिकेन प्रपद्य उत्तरेण महावेदिम् अग्रेणाहवनीयायतनं गत्वा दक्षिणतः शालामुखीयस्योपविशेत् । एवं निरूढेऽपि पशौ[2] वरुणप्रघासे[3] च ब्रह्मणः सञ्चरः[4]। एवम् अव्यवायो भवति ॥ ६ ॥

[ब्रह्मणो होतारमनूत्थानं सोमस्य प्रणयने सत्यग्रतो गमनञ्च]

स होतारमनूत्थाय यथेतमग्रतो व्रजेद् यदि राजानं प्रणयेत् ॥ ७ ॥

स ब्रह्मा होतारम् उत्थितम् अनूत्थाय यथेतं यथागतम् अपरेण वेदिं निष्क्रम्य उत्तरेण होतारम् अध्वर्युं च गत्वा अग्रेण व्रजेद् यदि राजानं ब्रह्मा प्रणयेत् । यदि तु पूर्वं राजा आहवनीयमपरेण नीत्वाऽऽसादितो भवति, तदा[5] तेनैव मार्गेण परिहृत्य[6] हरेत् । यद्याहवनीयमार्गेण नीत्वाऽऽसादितो भवति, तदा[5] दक्षिणेन शालामुखीयं परिहृत्याग्रेणाहरेत् । स इति पुनरुच्यते । स एवानेन सञ्चरेण सञ्चरति सोममन्यस्मै प्रदाय । यथेतम् इत्यनुच्यमाने तत एव दक्षिणेन शालामुखीयं व्रजेत् । 'नित्यः सर्वकर्मणां दक्षिणतः' (आश्रौ १, १२, ३) इति प्राप्ते अग्रतो[7] व्रजेदित्युच्यते । यदीत्यनित्यभावे । अध्वर्युवशाद् ब्रह्मा यजमानो वा प्रणयति ॥ ७ ॥

[सोमस्य प्रणयनाभावे ब्रह्मणो यथोक्तविधिनिर्देशः]

उक्तमप्रणयतः ॥ ८ ॥

यदा न प्रणयति, तदा तस्य अप्रणयतः उक्तं[8], 'नित्यः सर्वकर्मणां दक्षिणतो ध्रुवाणां व्रजतां[9] वा' (आश्रौ १, १२, ३) इति । यथेतं[10] निष्क्रम्य सहैव दक्षिणतो व्रजति । [11]अन्यत्राऽग्निप्रणयनाद् दक्षिणतो व्रजति[11] । अन्यत्राऽग्निप्रणयनाद् दक्षिणत उपविशेदिति चोदितम् । तस्मादिह दक्षिणतो व्रजनक्रियायाः[12] प्रतिषेधः स्यात् । तस्मादिह पुनरुच्यते उक्तमप्रणयत इति । दक्षिणतश्चाग्रतश्च व्रजन् जपति, 'आशुः शिशानः' (ऋ १०, १०३) इति सूक्तम्[13] । आग्नीध्रीये निहिते 'समाप्योपवेशनाद्युक्तम्' (आश्रौ १, १२, २८) इति उपवेशनं प्राप्तम् । कर्मार्थमुपवेशनम् । इह च कर्म न विद्यते, तस्मादुपवेशनं क्रियते । अग्नि-

---

१. तु. आश्रौ ४, १०, १ । २. तु. आश्रौ ३, १, ८ (?) । ३. तु. आश्रौ २, १७, २ ; ६ ; ९ (?) । ४. सञ्चारः मै । ५. नास्ति मूको । ६. हृत्य मूको । ७. अग्रेण मूको । ८. तु. आश्रौ १,१२,८;२७ । ९. नास्ति ब[2] मै ; त्रुटितम् पू । १०. यथैनं ब[2]; यथैवं मै; त्रुटितम् पू । ११-११. नास्ति ब[1/2] पू । १२. व्रजकि° ब[2] मै पू । १३. तु. आश्रौ १, १२, २७ ; ४, १०, ७ ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

प्रणयने तु वचनाद् भवति । यदि शालामुखीयस्य दक्षिणेन सोमः परिहृतः इहापि तथैव कर्तव्यः । यदि तत्रोत्तरेण इहाप्युत्तरेणैव[1] ॥ ८ ॥

[हविर्धाने गृहपतये सोमस्य प्रदानं ब्रह्मण आहवनीयस्य दक्षिणत उपवेशनञ्च]

प्राप्य हविर्धाने गृहपतये राजानं प्रदाय हविर्धाने अग्रेणापरेण वाऽतिव्रज्य दक्षिणत आहवनीयस्योपविशेत् ॥ ९ ॥

निगदेनैव व्याख्यातम् । तत्र यदा पूर्वया द्वारा प्रपादयन्ति, तदाऽप्यपरद्वारदेशे[2] गृहपतये राजानं प्रदाय अग्रेणैव गत्वा उपविशति । यदा तु अपरया द्वारा प्रपादयन्ति, तदा अपरेण गत्वा उपविशेत् । अप्राप्तमुपवेशनं विधीयते ॥ ९ ॥

[साग्निचित्यायामग्निपुच्छस्य दक्षिणतो ब्रह्मण उपवेशनम्]

अग्निपुच्छस्य साग्निचित्यायाम् ॥ १० ॥

अग्निपुच्छस्य दक्षिणत उपविशेत् साग्निचित्यायां क्रियायाम् । 'दक्षिणत[3] आहवनीयस्य' (आश्रौ ४, १०, ९) इति वचनात् पक्षस्य दक्षिणत उपवेशने प्राप्ते अग्निपुच्छस्य दक्षिणत इत्युच्यते । साग्निचित्यायाम् इत्यनुच्यमाने अनग्निचित्यायाम् अनुपवेशनं प्राप्नोति ॥ १० ॥

[एतस्य ब्रह्मासनविधानस्य पशुकर्मणि विहितत्वम्]

एतद् ब्रह्मासनं पशौ ॥ ११ ॥

एतद् ब्रह्मण आसनं पशौ कृत्स्ने भवति । एतद् ब्रह्मासनम् इति वचनाद् आग्नीध्राये आसनप्रतिषेधः । एतदेव[4] नान्यत्रेति । एतदासनमिति वचनाद् ब्रह्मजपः प्राप्तः । 'न तु सौमिके प्रणयने ब्रह्मजपः' (आश्रौ १, १२, २९) इति प्रतिषेधे प्राप्ते 'दक्षिणत आहवनीयस्योपविशेद्' (आश्रौ ४, १०, ९) इत्युक्ते उपवेशनमात्रमेवैतदासनं स्यात् । कृत्स्ने पशौ न प्राप्नोति, तस्मादाह—एतद् ब्रह्मासनं पशाविति ॥ ११ ॥

[प्रातरनुवाकमारभ्य वपाहोमपर्यन्तं ब्रह्मण एतदासनविधानम्]

प्रातश्चाऽऽ वपाहोमात् ॥ १२ ॥

---

१. °रेण ब[1] मै । २. °द्वारदेशं ब[1,2] पू; °प्यपरदेशं मै । ३. दक्षिणैन मूको । ४. एतदेव ब[1,2] पू; एतेनेव मै ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

प्रातश्च एतदेवासनं भवति 'ब्रह्मणः, आ वपाहोमात् प्रातरनुवाकादि आ वपाहोमात् । सवनीयस्याग्नीषोमीयेणातिदेशे तदासनप्राप्तावारम्भः । पशोरस्यापि† प्रातरनुवाकादेः कर्मणः एतदेवासनं भवति' ॥ १२ ॥

[हविर्धानेऽग्रेण ब्रह्मणो गमन उपवेशने च सति प्रपाद्यमाने सोमे पुनर्ब्रह्मणः प्रत्यागमनम्]

यदि त्वग्रेण प्रत्येयात् प्रपाद्यमाने ॥ १३ ॥

यदि तु हविर्धाने अग्रेण गत्वोपविशेत् । तत उपविश्य पुनः प्रत्येयात् प्रत्यागच्छेत् । प्रपाद्यमाने[२] अव्यवायार्थं गृहपतये राजानं प्रदाय 'नित्यः सर्वकर्मणां दक्षिणतः' (आश्रौ १, १२, ३) इति वचनात् तस्य दक्षिणेन गत्वोपविशेत् । ततः प्रपादिते राजनि पुनस्तत्रैवोपविशेत् । तु-शब्दः अपराधिकारव्यावृत्त्यर्थः । यदि अपरेण गत्वोपविशेत्, न तु प्रत्येयात् ॥ १३ ॥

॥ इति चतुर्थे दशमं खण्डम् ॥

१-१. नास्ति ब[२] । मूको ।

†. पशुर° मूको ।

२. °माने व्यपा (°वा मे) यांश्च

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

अथ चतुर्थेऽध्याये एकादशः खण्डः

[अग्नीषोमीयपशुकर्मोपक्रमः]

अथाग्नीषोमीयेण चरन्ति ॥ १ ॥

अथ अनन्तरम् अग्नीषोमप्रणयनादनन्तरम्[1] अग्नीषोमीयेण पशुना चरन्ति। पुरोळाशो वा भवति साद्यस्क्रेषु । तस्मात् पशुना पुरोळाशेन वा भवति। अधिकारसूत्रमेतत्[2] । इत उत्तरं यद् वक्ष्यते तत् पशोर्विधानम् ॥ १ ॥

[उत्तरवेदिसमीपे दण्डप्रदानपर्यन्तस्य पाशुककर्मणः स्थानविधानम्]

उत्तरवेद्यामा दण्डप्रदानात् ॥ २ ॥

[3]उत्तरवेदिः आहवनीयस्थानं स्थण्डिलम् । तस्याम् उत्तरवेद्यां पाशुकं कर्म क्रियते आ दण्डप्रदानात्[3] । वेदिश्रोण्यां प्राप्तम् उत्तरवेद्यामित्युच्यते[4]। उत्तरवेद्यामिति सप्तमी समीपार्थे भवति। यथा गङ्गायां गावश्चरन्तीत्युक्तम्। तस्मादुत्तरवेदिसमीपे पाशुकं कर्म क्रियते ॥ २ ॥

[स्वस्वधिष्ण्यसमीपे होतृमैत्रावरुणयोरितिकर्तव्यताविधानम्]

दण्डं प्रदाय मैत्रावरुणमग्रतः कृत्वोत्तरेण हविर्धाने अतिव्रज्य पूर्वया द्वारा सदः प्रपद्योत्तरेण यथास्वं धिष्ण्यावतिव्रज्य पश्चात् स्वस्य धिष्ण्यस्योपविशति होता ॥ ३ ॥

अवतिष्ठत इतरः ॥ ४ ॥

दण्डं प्रदाय मैत्रावरुणमग्रतः कृत्वा होता उत्तरेण हविर्धाने अतिव्रज्य पूर्वया द्वारा सदः प्रसृप्य उत्तरेण यथास्वं धिष्ण्यावतिव्रज्य यो यस्य स्वो धिष्ण्यः, स तमुत्तरेण गत्वा पश्चात् स्वस्य धिष्ण्यस्योपविशति होता। अवतिष्ठते इतरो मैत्रावरुणः इति निगदेनैव व्याख्यातम्। दण्डं प्रदायेति पुनरुच्यते। होता दण्डं ददातीत्ययमेव पक्षः इष्टतर इति दर्शयति । मैत्रावरुणमग्रतः

---

१. °यनानन्तरम् ब[1] पू । २. अधिकारमेतत् ब[1/2] मै; वृत्तिम् पू । ३-३. नास्ति ब[2] । ४. नास्ति मूको ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

कृत्वेति प्रकृतावुपदिष्टं[1] होतारम् उत्तरेण मैत्रावरुणो गच्छति[2] । इह तु[3] न सम्भवति । तस्मादिदमुच्यते । उत्तरेण हविर्धाने इति सञ्चरो[4] विधीयते श्रुत्यन्तरप्रतिषेधार्थम् । शाङ्खायनके तु उत्तरेणाग्नीध्रीयं सञ्चरं[5] वेदिश्रोण्यां पाशुकं कर्म प्राप्तं सदसि तु विधीयते । वेदिश्रोणीसमीपे[6] यद् द्वारं तेन प्रपदने प्राप्ते पूर्वया द्वारा इत्युच्यते । उत्तरेण सर्वान् धिष्ण्यान् सञ्चरः[7] शाङ्खायनके[8] । तत्प्रतिषेधार्थं[9] यथास्वं धिष्ण्यानुसारेण विधीयते । अनेन सञ्चरेण गत्वा वेदिश्रोण्यामेवासने प्राप्ते पश्चात् स्वस्य धिष्ण्यस्योपविशति[10] इत्युच्यते । होतुरासनादुत्तरेण मैत्रावरुणस्य[11] सञ्चरे प्राप्ते स्वस्य धिष्ण्यस्योत्तरेण विधीयते । होतृग्रहणं मैत्रावरुणस्य स्थानविवक्षार्थम्[12] । उभयोरधिकारात् पश्चात् स्वस्य धिष्ण्यस्योपविशतीति उभयोरपि प्राप्ते अवतिष्ठत इतर इति[13] पुनरुच्यते ॥ ३-४ ॥

[देवसुवां हविषामनुनिर्वापे सति अष्टानां देवतानां सगुणत्वकथनम्]

यदि देवसूनां हवींष्यन्वायातयेयुरग्निर्गृहपतिः सोमो वनस्पतिः सविता सत्यप्रसवो बृहस्पतिर्वाचस्पतिरिन्द्रो ज्येष्ठो मित्रः सत्यो वरुणो धर्मपती रुद्रः पशुमान् पशुपतिर्वा ॥ ५ ॥

देवसूनाम् इति देवतासंज्ञा । देवसूनां यदि हवींषि **यदि**[13] पशुपुरोळाशम् अन्वायातयेयुः **अनुनिर्वपेयुः अध्वर्यवस्ततः । ताश्च देवताः, तासां च याज्यानुवाक्याः वक्ष्यन्ते । यदि** [14]**वचनादनित्या एताः साग्निचित्ये**[14] **भवन्ति, अनग्नावपि चातुर्मास्येषु च ।** अग्निर्गृहपतिः, सोमो वनस्पतिः, सविता सत्यप्रसवः, बृहस्पतिर्वाचस्पतिः, इन्द्रो ज्येष्ठः, मित्रः सत्यः, वरुणः धर्मपतिः, रुद्रः पशुमान् **अष्टमी ।** पशुपतिर्वा **अष्टम्या**[15] **गुणविकल्पः**[16] ॥ ५ ॥

[अष्टानां देवतानां याज्यानुवाक्याकथनम्]

त्वमग्ने बृहद्वयः, हव्यवाळग्निरजरः पिता नः (ऋ ५, ४, २), त्वं च सोम नो वशो (ऋ १,९१,६), ब्रह्मा देवानां पदवीः कवीनाम्

---

१. प्रकृतानुपदिष्टं मूको । २. गच्छेदिति मै । ३. नास्ति मै । ४. सञ्चारो मै । ५. सञ्चरन् मूको । ६. वेदिश्रोणिस° मै । ७. तु. शांश्रौ ६, १३, ३ । ८. °तिषिद्धार्थं ब²; त्रुटितम् पू । ९. °विशेत् ब¹ᵛ² °विशते पू । १०. °वरुण- ब¹; त्रुटितम् पू । ११. स्थानविशेषार्थम् मै । १२. इति प्राप्ते मूको । १३. यदि हवींषि ब² । १४-१४. °दनित्यानेऽसा° ब¹, °दनित्यानिसा° ब² पू; °दनित्यानि सा° मै । १५. अष्टमीति ब² मै; अष्टम्यां मै । १६. विकल्पः मूको ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

(ऋ ६, ६६, ६), आ विश्वदेवं सत्पतिं (ऋ ५, ८२, ७), न प्रमिये सवितुर्दैव्यस्य तद् (ऋ ४, ५४, ४), बृहस्पते प्रथमं वाचो अग्रम् (ऋ १०, ७१, १), हंसैरिव सखिभिर्वावदद्भिः (ऋ १०, ६७, ३), प्र ससाहिषे पुरुहूत शत्रून् (ऋ १०, १८०, १), भुवस्त्वमिन्द्र ब्रह्मणा महान् (ऋ १०,५०,४), अनमीवास इळया मदन्तः (ऋ ३, ५६, ३), प्र स मित्र मर्तो अस्तु प्रयस्वान् (ऋ ३, ५६, २), त्वां नष्टवान् महिमाय पृच्छते त्वया बद्धो मुमुक्षते। त्वं विश्वस्माद् भुवनात् पासि धर्मणाऽसुर्यात् पासि धर्मणा। यत् किं चेदं वरुण दैव्ये जने (ऋ ७, ८६, ५), उप ते स्तोमान् पशुपा इवाकरम् (ऋ १, ११४, ६) इति द्वे ॥ ६ ॥

अष्टानां देवतानाम् 'त्वमग्ने बृहद्वयः' (ऋ ८, १०२, १) इत्येवमादि अनुक्रमेण द्वे द्वे याज्यानुवाक्ये षोडश ऋचो वक्ष्यन्ते नित्यासु प्राप्तासु ॥ ६ ॥

॥ इति चतुर्थे एकादशं खण्डम् ॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

अथ चतुर्थेऽध्याये द्वादशः खण्डः

[सर्वपृष्ठानां हविषामन्वायातने तेषामष्टानां देवतानां कथनम्]

यद्यु वै सर्वपृष्ठान्यग्निर्गायत्रस्त्रिवृद्राथन्तरो वासन्तिक इन्द्रस्त्रैष्टुभः पञ्चदशो बार्हतो ग्रैष्मो विश्वे देवा जागताः सप्तदशा वैरूपा वार्षिका मित्रावरुणावानुष्टुभावेकविंशौ वैराजौ शारदौ बृहस्पतिः पाङ्क्तस्त्रिणवः शाक्वरो हैमन्तिकः सविताऽतिच्छन्दास्त्रयस्त्रिंशो रैवतः शैशिरोऽदिति-विष्णुपत्न्यनुमतिः ॥ १ ॥

देवसुवामनन्तरं यदि सर्वपृष्ठानि हवींषि अन्वायातयेयुः अध्वर्यवस्ततः। तेषां देवता याज्यानुवाक्याश्च वक्ष्यन्ते। उ वै इत्येतौ निपातौ वाक्यपूरणार्थौ ब्राह्मणे[1]। ब्राह्मणवाक्यमेवैतत्, तस्मात् पुनरुक्तदोषो न भवति। तान्यश्वमेधा एव भवन्ति। तान्यत्र[2] अग्नौ वा भवन्ति। वैश्वानरीयादनन्तरं रथन्तरादीनां सर्वेषां पृष्ठानां हवींषि सर्वपृष्ठानि। अग्निर्गायत्रस्त्रिवृद् राथन्तरो वासन्तिकः एका देवता। इन्द्रस्त्रैष्टुभः पञ्चदशो बार्हतो ग्रैष्मः द्वितीया देवता। [3]विश्वेदेवा जागताः[3] सप्तदशा वैरूपाः वार्षिकाः तृतीया। मित्रावरुणावानुष्टुभावेकविंशौ वैराजौ शारदौ चतुर्थौ। बृहस्पतिः पाङ्क्तस्त्रिणवः शाक्वरो हैमन्तिकः पञ्चमी। सविताऽतिच्छन्दास्त्रयस्त्रिंशो रैवतः शैशिरः षष्ठी देवता। अदितिर्विष्णुपत्नी सप्तमी। अनुमतिः अष्टमी ॥ १ ॥

[उक्तानामष्टानां देवतानां याज्यानुवाक्यानां कथनम्]

समिद्दिशामाशया नः स्वर्विन्मधुरेतो माधवः पात्वस्मान्। अग्निर्देवो दुष्टरीतुरदाभ्य इदं क्षत्रं रक्षतु पात्वस्मान्। रथन्तरं सामभिः पात्वस्मान् गायत्री छन्दसां विश्वरूपा। त्रिवृन्नो विष्ठया स्तोमो अह्नां समुद्रो वात इदमोजः पिपर्तु। उग्रा दिशामभिभूतिर्वयोधाः शुचिः शुक्रे अहन्योजसीनाम्। इन्द्राधिपतिः पिपृतादतो नो महि क्षत्रं विश्वतो धारयेदम्। बृहत्साम क्षत्रभृद् वृद्धवृष्ण्यं त्रिष्टुभौजः शुभितमुग्रवीरम्।

---

१. नास्ति ब[2]। २. नान्यत्र ब[1] मै। ३-३. नास्ति ब[1]।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

इन्द्रस्तोमेन पञ्चदशेन मध्यमिदं वातेन सगणेन रक्ष । प्राची दिशां सहयशा यशस्वती विश्वेदेवाः प्रावृषाऽह्नां स्वर्वती । इदं क्षत्रं दुष्टरमस्त्वोजोऽनाधृष्टं सहस्यं सहस्वत् । वैरूपे साम्नन्निह तच्छकेयं जगत्येनं विक्ष्वावेशयानि । विश्वे देवाः सप्तदशेन वर्च इदं क्षत्रं सलिलवातमुग्रम् । ध्रुवी दिशां क्षत्रमिदं दाधारोपस्थाशानां मित्रवदस्त्वोजः । मित्रावरुणा शरदाह्नां चिकित्वमस्मै राष्ट्राय महि शर्म यच्छतम् । वैराजे सामन्नधि मे मनीषाऽनुष्टुभा संभृतं वीर्यं सहः । इदं क्षत्रं मित्रवदार्द्रदानु मित्रावरुणा रक्षतामाधिपत्ये । सम्राड्दिशां सहनाम्नो सहस्वत्यृतुर्हेमन्तो विष्ठया नः पिपर्तु । अवस्युवाता बृहती तु शक्वरीमं यज्ञमवतु नो घृताची । स्वर्वती सुदुघा नः पयस्वती दिशां देव्यवतु नो घृताची । त्वं गोपाः पुर एतोत पश्चाद् बृहस्पते याम्यां युङ्धि वाचम् । ऊर्ध्वा दिशां रन्तिराशौषधीनां संवत्सरेण सविता नो अह्नाम् । रेवत्सामातिच्छन्दा उ छन्दोऽजातशत्रुः स्योना नो अस्तु । स्तोमत्रयस्त्रिंशे भुवनस्य पत्नी विवस्वद् वाते अभि नो गृणीहि । घृतवती सवितराधिपत्ये पयस्वती रन्तिराशा नो अस्तु । ध्रुवा दिशां विष्णुपत्न्यघोरास्येशाना सहसो या मनोता । बृहस्पतिर्मातरिश्वोत वायुः संध्वाना वाता अभि नो गृणन्तु । विष्टरश्रवो दिवो धरुणः पृथिव्या अस्येशाना जगतो विष्णुपत्नी । व्यचस्वतीषयन्ती सुभूतिः शिवा नो अस्त्वदितेरुपस्थे । अनु नोऽद्यानुमतिर्यज्ञं देवेषु मन्यताम् । अग्निश्च हव्यवाहनो भवतं दाशुषे मयः । अन्विदनुमते मन्यासै शं च नस्कृधि । क्रत्वे दक्षाय नो हिनु प्र ण आयूंषि तारिषदिति । वैश्वानरीयं नवमम् ॥ २ ॥

अष्टानां देवतानाम् अनुक्रमेण द्वे द्वे याज्यानुवाक्ये षोडश ऋचो वक्ष्यन्ते—'समिद् दिशाम्' (तु० तैसं ४, ४, १२, १) इत्येवमादि यथासमाम्नाताः। वैश्वानरीयं हविर्नवमम् । तस्य उक्ते[1] याज्यानुवाक्ये । नवममित्यनुच्यमाने पृथगिष्टिः स्यात् ॥ २ ॥

[कायस्य दशमत्वं, तस्य याज्यानुवाक्ये, औपयजैरङ्गारैर्व्यवायपरिहारे यत्नस्य करणीयत्वञ्च]

कायं दशमं को अद्य युङ्क्ते धुरि गा ऋतस्येति द्वे। औपयजैरङ्गारैरनभिपरिहारे प्रयतेरन् ॥ ३ ॥

---

१. तु. आश्रौ २, १५, २ ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

कायस्य वरुणप्रघासोक्ते[1] [2]याज्यानुवाक्ये न भवतः[2] 'को अद्य युङ्क्ते' (ऋ १, ८४, १६; १७) इत्येते तु भवतः। पादग्रहणादेका प्राप्ता, द्वे भवतः इत्युच्यते। दशमित्यनुच्यमाने पृथगिष्टिः स्यात्। दशहविष्का च सर्वपृष्ठा भवति। औपयजेज्यार्था[3] अङ्गारा औपयजाः। अनुयाजकाराः अङ्गारा होतुर्धिष्ण्ये निरुप्यन्ते। तैरौपयजैरङ्गारैरनभिपरिहारे अव्यवाये[4] प्रयतेरन्[5]। अभिपरिहारो नाम व्यवायः। अनभिपरिहारः, औपयजैरङ्गारैः कर्तुरव्यवायो यथा भवति, तथा प्रयतेरन् प्रयत्नं कुर्वीरन्[6] इति सूत्रार्थः। कर्तुः कर्म कुर्वतः योऽग्निरभ्यन्तरः, तस्मादानीता अङ्गाराः कर्तुरभ्यन्तरा एव यथा[7] भवन्ति तथा प्रयत्नः कर्तव्यः। यस्तु बहिरग्निस्तस्मादानीता अङ्गारा बहिरेव कर्तुर्यथा भवन्ति, तथा प्रयत्नः कर्तव्यः। तस्योपायमुत्तरेण सूत्रेण वक्ष्यति ॥ ३ ॥

[आग्नीध्रीयादानीतेष्वङ्गारेषूत्तरेण होतारं होतुर्धिष्ण्ये निवपनम्]

आग्नीध्रीयाच्चेदुत्तरेण होतारम् ॥ ४ ॥

आग्नीध्रीयाच्चेद् अङ्गारा आनीता भवन्ति, उत्तरेण होतारं परिहृत्य होतुर्धिष्ण्ये निवपेरन्। होतुर्बहिराग्नीध्रस्तस्मादानीतास्ते बहिरेव भवन्ति। परिहारे तु अक्रियमाणे विसंस्थितसञ्चरेण निष्क्रमतः होतुरबाह्या अङ्गारा भवन्तीति सदोषाः ॥ ४ ॥

[शामित्रादानीतेष्वङ्गारेषु दक्षिणेन मैत्रावरुणं होतुर्धिष्ण्ये निवपनम्]

शामित्राच्चेद् दक्षिणेन मैत्रावरुणम् ॥ ५ ॥

शामित्राच्चेद् अङ्गारा आनीता भवन्ति, दक्षिणेन मैत्रावरुणं परिहृत्य होतुर्धिष्ण्ये निवपेरन्। एवं कृते अव्यवायो भवति। कथम्? [8]आहवनीयाच्छामित्र आनीतः[8]। [9]आहवनीयः कर्तुरभ्यन्तरस्तस्मादानीता[9] यद्यपरिहृत्य निरुप्यन्ते, ततो मैत्रावरुणस्य विसंस्थितसञ्चरेण निष्क्रमतः ते[10] अङ्गारा बहिर्भवन्ति[11] सदोषाश्चेदित्यनित्यभावेन[12] सवनीयेऽपि एष एव विधिः प्राप्तः। 'अनुयाज्याद्युक्तं पशुनाऽऽशंयुवाक्तात्' (आश्रौ ६, ११, ३) इति वचनात्, अनभिपरिहारे प्रयतेरन्' (आश्रौ ४, १२, ३) इत्यस्मादारम्भात्, आग्नौ सवनीये अनभिपरिहाराद्, अव्यवायत्वादङ्गारा अपरिहृत्यैव साद्यन्ते। कथमव्यवाय इति उत्तरेणाग्नीध्रीयं

---

१. तु. आश्रौ २,१७,१५। २-२. नास्ति मूको। ३. उपय° ब[1/2] पू। ४. नास्ति ब[2]। ५. नास्ति पू। ६ नास्ति मै। ७. नास्ति मूको। ८-८. °मित्रो नीतः ब[1] पू; °मित्रान्वीतः ब[2]; °मित्रोन्नीतः मै। ९-९. °नीयक्रतुर° ब[1/2] मै; लुटितम् पू। १०. तैः ब[1/2] पू। ११. हविर्भवन्ति ब[2] मै। १२. सदोषा मूको।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

सर्वान् धिष्ण्यानुत्तरेण [1]प्रपन्नास्तेनैव निष्क्रामन्ति। तस्मात् सर्वेऽग्नयः अभ्यन्तरा बाह्याः कर्तारः। यदा तु आग्नीध्रादन्तराः वेदिश्रोण्यो निरुप्यन्ते†, तदा 'यथाप्रसृप्तं विनिःसृप्य' (आश्रौ ६,१२,२) इति विनिःसर्पन्तः[1] अङ्गाराणामुत्तरेण गत्वा आग्नीध्रीये विनिःसृप्ताहुतीर्जुह्वति[2]। 'अनभिपरिहारे प्रयतेरन्' (आश्रौ ४, १२, ३) इति वचनात् ॥ ५ ॥

[उपोत्थानादिवेदग्रहणम्]

उपोत्थानमग्रे कृत्वा निष्क्रम्य वेदं गृह्णीयात् ॥ ६ ॥

'उदायुषेत्येतेनोपोत्थाय' (आश्रौ १, १०, ४) इत्येवम् उपोत्थानमग्रे कृत्वा निष्क्रम्य अप्रदत्तं वेदं स्वयमेव गृह्णीयात्। प्रकृतिवदाहृत्याध्वर्युर्न ददाति वेदम्। तस्मात् कर्मविपर्यासः क्रियते। अप्रदत्तमपि गृहीत्वा [3]काले पत्नीसंयाजार्थं व्रजति[3] ॥ ६ ॥

[इदमाद्यनूबन्ध्यायाः पूर्वं हृदयशूलोद्वासनप्रतिषेधः]

नेदमादिषु हृदयशूलमर्वागनूबन्ध्यायाः ॥ ७ ॥

[1]इदमग्नीषोमीयं पशुमादिं कृत्वा[1] इदमुत्तरं ये पशवस्तेषु हृदयशूलं न उद्वासयन्ति। अर्वागनूबन्ध्यायाः ये पशवः, तेषु प्राप्तः प्रतिषिध्यते। अनूबन्ध्यायां तु हृदयशूलप्रतिषेधः[4]। तस्मादेतद्विधित्रयं यथाऽध्वर्यवः कुर्वते, तथा भवति तत्प्रत्ययत्वात् संस्थायाः ॥ ७ ॥

[अग्नीषोमीयपशुकर्मणि समाप्ते वसतीवरीणामपां परिहारः दीक्षितानामृत्विजाञ्चान्तर्भावविधानम्]

संस्थिते वसतीवरीः परिहरन्ति दीक्षिता अभिपरिहारयेरन् ॥ ८ ॥

संस्थिते पशौ वसतीवरीः परिहरन्ति। वसतीवरीरापस्ताः परिहरन्ति अध्वर्यवः[5]। तदा सर्वे ऋत्विजः अनभिपरिहारे प्रयतेरन् बहिर्वेदि तिष्ठेरन्। एवमव्यवायो भवति। 'न[1] विहारेण व्यवेयात्' (आश्रौ ३, १, १९) इत्येतेनैव प्राप्ते आरम्भो दीक्षितानामभिपरिहारविवक्षार्थम्। दीक्षिता ये भवन्ति[1] ते आत्मानमभ्यन्तरीकृत्य परिहारयेरन्। तासु परिहार्यमाणासु दीक्षिताः अन्तर्वेदि[6] आसीरन् ॥ ८ ॥

॥ इति चतुर्थे द्वादशं खण्डम् ॥

१-१. नास्ति ब[2]। †. निरूप्यन्ते मूको। २. विनिसृता (°स्रुवा ब[2]; °सृप्या मै; °सृप्ता पू) हुति (°ती ब[2]) र्जुहोति मूको। ३-३. नास्ति मै। ४. हृदयप्र° मूको। ५. नास्ति ब[1]। ६. अन्तर्वेदिः ब[1] मै पू।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

अथ चतुर्थेऽध्याये त्रयोदशः खण्डः

[यस्यां रात्रौ पशुः संस्थितस्तस्या अन्तेऽध्वर्युणा प्रेषितस्य होतुः कर्मकथनम्]

अथैतस्या रात्रेर्विवासकाले प्राग्वयसां प्रवादात् प्रातरनुवाकायाऽऽमन्त्रितो वाग्यतस्तीर्थेन प्रपद्याऽऽग्नीध्रीये जान्वाच्याऽऽहुतिं जुहुयात्। आसन्यान्मा मन्त्रात् पाहि कस्याश्चिदभिशस्त्यै स्वाहेति ॥१॥

अथ अनन्तरम् एतस्या रात्रेः यस्यां रात्रौ पशुः संस्थितः, एतस्या एव रात्रेः विवासकाले[1] विवसन्ति प्रतिबुध्यन्ति[2] यस्मिन् काले सः, तस्मिन् विवासकाले प्राग् वयसां प्रवादाद् वयांसि शकुनयस्तेषां प्रवादात्। प्रातरनुवाच्यमानः[3] प्रातरनुवाको नाम अनुवचनम्। तस्मै प्रातरनुवाकाय प्रातरनुवाकस्य[4] अर्थे आमन्त्रितो होता होतरेहीत्युक्तो वाग्यतस्तीर्थेन प्रपद्य आग्नीध्रीये जान्वाच्य आहुतिं जुहुयाद्, आसन्यान्मा[5] इति एतेन यथासमाम्नातेन। 'अस्तं यन्तमनुयाजैर्यजेरन्' (तु० आपश्रौ ११, २०, २) इत्यध्वर्यूणां वचनम्। तस्माद् रात्रौ संतिष्ठते। तस्मादाह—एतस्या रात्रेरिति सम्बन्धार्थम्[6]। सम्बन्धादन्यस्या[7] रात्रेर्न भवति।

विवासकाले इति निमित्तसप्तमी। तस्मिन्निमित्तभूते काले। सुप्ता यावन्न प्रतिबुध्यन्ति। 'पुरा वाचः प्रवदितोरनूच्यः' (ऐब्रा २, १५) इति श्रुतिः। प्राग्वयसां प्रवादादित्ययं द्वितीयकालः। प्रतिबुद्धेष्वपि मनुष्येषु यावद् वयांसि न प्रतिबुध्यन्ति, यावद् वयांसि न प्रवदन्ति। तस्मिन् काले उपाकरणं क्रियते। 'पुरा शकुनिवादादनुब्रूयात्' (ऐब्रा २, १५) इति हि[8] श्रुतिः। 'यदा वा अध्वर्युरुपाकरोति' (ऐब्रा २, १५) इति श्रुतिः। प्रातरनुवाकायेति वचनाद् अस्मै[9] कर्मणे आमन्त्रितः। अनेन विधिना प्रतिपद्यते। अप्रपन्नस्य वाग्यमो विधीयते [10]'पुरा वाचः'[10] प्रवदितोरनूच्यः' (ऐब्रा २, १५) इति। तीर्थेन प्रपद्येति प्राप्तमपि पुनरुच्यते। तीर्थेन प्रपदनात्[11] प्राग् वाग्यमप्राप्त्यर्थम्। अन्यथा प्रपन्नस्यैव वाग्यमः[12] स्यात् ॥ १ ॥

---

१. विकाश° ब[1]; त्रुटितम् पू। २. बुध्यन्ति ब[2]। ३. प्रातरनुवाकाय वाच्यमानः ब[1] पू। ४. नास्ति मूको। ५. तु. तैसं ३,१,७,१। ६. संबद्धार्थम् ब[2]; त्रुटितम् पू; °न्धार्थे मै। ७. °न्यस्य मूको। ८. नास्ति ब[2]। ९. यस्मै मूको। १०-१०. नास्ति ब[1]। ११. प्रपादनात् मै। १२. वाग्यतः मूको।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

[आहवनीये होतुर्हवनकर्मविधानम्]

आहवनीये वागग्रेगा अग्र एतु सरस्वत्यै वाचे स्वाहा । वाचं देवीं मनोनेत्रां विराजमुग्रां जैत्रीमुत्तमामेह भक्षाम् । तामादित्या नावमिवारुहेमानुमतां पथिभिः पारयन्तीं स्वाहेति द्वितीयाम् ॥ २ ॥

आहवनीये **जान्वाच्याहुतिं**[1] जुहुयाद् वागग्रेगा इत्येतेन मन्त्रेण । आग्नीध्रीयाधिकारादाहवनीयग्रहणम्[2] । अन्यत् सर्वमनुवर्तते । वाचं देवीम् इति अनेन द्वितीयाम् आहुतिं जुहुयात् । आहुतिमित्यधिकाराद् एका आहुतिः प्राप्ता आहुतेरेकत्वान्मन्त्रोऽपि सर्व एक एव स्यात् । तस्मादाह— द्वितीयाम् इति ॥ २ ॥

[प्रातरनुवाकायाऽऽमन्त्रणमारभ्यैतदाहुतिहोमपर्यन्तं सर्वं कर्म होतृवद् ब्रह्मणाऽपि कर्त्तव्यम्]

आऽतः समानं ब्रह्मणश्च ॥ ३ ॥

[3]आ अतः[3] एतस्मादाहुतिहोमाद् यदनुक्रान्तं[4] प्रातरनुवाकायाऽऽमन्त्रित इत्येवमादि, तत् सर्वं समानं तुल्यं ब्रह्मणश्च मैत्रावरुणस्य च[5] । ब्रह्माऽप्यनेनैव विधिना प्रतिपद्याहुतीर्हुत्वा[6] अस्मिन्नासने उपविश्यास्ते आ वषाहोमात् । 'प्रातश्चाऽऽ वषाहोमात्' (आश्रौ ४, १०, १२) इत्युक्तम् । च-शब्दः समुच्चयार्थः । ब्रह्मणो मैत्रावरुणस्य चेति । अध्वर्युवशादेतद् भवति । अहर्गणेऽतिरात्रे[7] आश्विनस्य अध्वर्युः उपाकरणं करोति[8], होता शंसति, प्रतिप्रस्थाता प्रातरनुवाकस्योपाकरणं करोति[9], 'मैत्रावरुणोऽनुब्रूयात्' (?) इति तेषां वचनम् । तदेवेहोपहवकरणादध्याह्रियते[10] आऽतः समानं ब्रह्मणो मैत्रावरुणस्य चेति ॥ ३ ॥

[हविर्धाने प्राप्य रराटचा अभिमर्शनं द्वारि स्थितयोः स्थूणयोश्चाभिमर्शनम्]

प्राप्य हविर्धाने रराटीमभिमृशत्युर्वन्तरिक्षं वीहीति ॥ ४ ॥

द्वार्यें स्थूणे देवी द्वारौ मा मा सन्ताप्तं लोकं मे लोककृतौ कृणुतमिति ॥५॥

हविर्धाने[11] प्राप्य गत्वा । [12]रराटी छदिःकटिका[12]। ताम् अभिमृशति 'उर्वन्तरिक्षम्' (मासं० ११, १५) इति एतेन मन्त्रेण । प्राप्यग्रहणात्

---

१. जान्वाच्य ब[2] । २. आग्नीध्राधि° मूको । ३-३. नास्ति मूको । ४. अतो यद° ब[1,2] पू ; अतो यदनुक्तं तं मै । ५. नास्ति ब[2] । ६. प्रपद्या° ब[2] । ७. °णेष्वितिरात्र मूको । ८. नास्ति मै । ९. नास्ति ब[1] पू । १०. तदोपहवका(°क मै)रणा° ब[1] मै पू; तदेवेहवकारणा° ब[2] । ११. प्राप्य ग्रहणात् प्राग्वै श्रुणोति एवाभिमृशति । स्थूणेपि तत्र निहिते (तत्र निहिते?) हविर्धानि मै । १२-१२. रराटीस्थः मै ; रराटी स्थदि (°दिं° ब[1]) ब[1,2] पू ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

प्राग्रे[1] शृणोति एवाभिमृशति (?)[2] । स्थूणे अपि तत्र निहिते भवतः, [3]ते चाभिमृशति[3] ॥ ४-५ ॥

[प्रातरनुवाकानुवचनविधिप्रदर्शनम्]

प्रपद्यान्तरेण युगधुरा उपविश्य प्रेषितः प्रातरनुवाकमनुब्रूयान्मन्द्रेण ॥६॥

हविर्धाने प्रपद्य अन्तरेण मध्येन युगमध्येन । युगं शकटाङ्गम् । युगविशिष्टो धूः युगधूः । युगधूश्च युगधूश्च युगधुरौ । यावन्तरेण मध्येन उपविश्य होताऽध्वर्युणा प्रेषितः प्रातरनुवाकसंज्ञमनुवचनम्[4] अनुब्रूयात् मन्द्रेण स्वरेण 'आपो रेवतीः' (ऋ १०, ३०, १२) इत्येवमादि । 'प्रातरनुवाकायाऽऽमन्त्रितः' (आश्रौ ४,१३,१) इत्यधिकृत्य [5]य उक्तो[5] विधिः स[6] सर्वकर्मसु प्रातःसवने प्रातःप्रातरनूच्यते प्रातरनुवाक इति संज्ञाया अन्वर्थत्वात् । तस्माद् वक्ष्यमाणस्य मन्त्रसमाम्नायस्य प्रातरनुवाके स्वरविधानाभावादित्यनियमे प्राप्ते स्वरो नियम्यते मन्द्रेणेति । 'प्रातःसवनं च' (आश्रौ ५,१,४) इति प्राप्ते न वक्तव्यम् इति । तेन तत्र[7] (? तन्न) अभिषवादिप्रातःसवनम् । प्रागभिषवात् प्रातःसवनसंज्ञा न विद्यते । प्रातरनुवाको वक्ष्यते ॥ ६ ॥

आपो रेवतीः क्षयथा हि वस्व उप प्रयन्त इति सूक्ते अवा नो अग्न इति षळग्निमोळेऽग्निं दूतं वसिष्वाहीति सूक्तयोरुत्तमामुद्धरेत् त्वमग्ने व्रतपा इत्युत्तमामुद्धरेत् त्वं नो अग्ने महोभिरिति नवेमे विप्रस्येति सूक्ते युक्ष्वा हि प्रेष्ठं वस्त्वमग्ने बृहद्वय इत्यष्टादशार्चन्तस्त्वेति सूक्ते अग्ने पावक दूतं व इति सूक्ते अग्निर्होता नो अध्वर इति तिस्रोऽग्निर्होताऽग्न इळेति चतस्रः प्र वो वाजा उपसद्याय त्वमग्ने यज्ञानामिति तिस्र उत्तमा उद्धरेदग्ने हंस्यग्निं हिन्वन्तु नः प्राग्नये वाचमिति सूक्त इमां मे अग्ने समिधमिमामिति त्रयाणामुत्तमामुद्धरेदिति गायत्रं त्वमग्ने वसूंस्त्वं हि क्षैतवदग्ना यो होताऽजनिष्ट प्र वो देवायाग्ने कदा त इति पञ्च सखायः सं वस्त्वामग्ने हविष्मन्त इति सूक्ते बृहद्वय इति दशानां चतुर्थनवमे उद्धरेदुत्तमामुत्तमां चाऽऽदितस्त्रयाणामित्यानुष्टुभमबोध्यग्निः समिधेति चत्वारि प्राग्नये बृहते प्रवेधसे कवये त्वं नो अग्ने वरुणस्य विद्वान् इत्येतत्प्रभृतीनि चत्वार्यूर्ध्वं ऊ षु ण ससस्य यद् वियुतेति पञ्च

---

१. प्राग्रे मै । २. एवमभि° मै । ३. तेनाभि° मूको । ४. °वाक-संज्ञामनु° मूको । ५-५. यदुक्तो मूको । ६. नास्ति मूको । ७. तं न मूको ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

भद्रं ते अग्ने इति सूक्ते सोमस्य मा तवसं प्रत्यग्निरुषस इति त्रीण्या होतेति दशानां तृतीयाष्टमे उद्धरेद् दिवस्परीति सूक्तयोः पूर्वस्योत्तमामुद्धरेत् त्वं ह्यग्ने प्रथम इति षण्णां द्वितीयमुद्धरेत् पुरो वो मन्द्रमिति चत्वारि तं सुप्रतीकमिति षड्ढुवे वः सुद्योत्मानं नि होता होतृषदन इति सूक्ते त्रिर्मूर्धानमिति त्रीणि वह्निं यशसमुप प्र जिन्वन्निति त्रीणि का त उपेतिरिति सूक्ते हिरण्यकेश इति तिस्रोऽपश्यमस्य महत इति सूक्ते द्वे विरूपे इति सूक्ते अग्ने नयाग्रे बृहन्नित्यष्टानामुत्तमादुत्तमास्तिस्र उद्धरेत्त्वमग्ने सुहवो रण्वसंदृगिति पञ्चाग्निं वो देवमिति दशानां तृतीयचतुर्थे उद्धरेदिति । त्रैष्टुभमेना वो अग्निं प्र वो यह्वमग्ने विवस्वत्सखायस्त्वाऽयमग्निरग्न आयाह्यच्छा नः शीरशोचिषमिति षळदर्शि गातुवित्तम इति सप्तेति बार्हतमग्ने वाजस्येति तिस्रः पुरु त्वा त्वामग्न ईळिष्वा हीत्यौष्णिहं जनस्य गोपास्त्वामग्न ऋतायव इममू षु वो अतिथिमुषर्बुधमिति नव त्वमग्ने द्युभिरिति सूक्ते त्वमग्ने प्रथमो अङ्गिरा नू चित्सहोजा अमृतो नि तुन्दत इति पञ्च वेदिषद इति षण्णां तृतीयमुद्धरेदिमं स्तोममर्हते सञ्जागृवद्भिश्चित्र इच्छिशोर्वसुं न चित्रमहसमिति जागतमग्निं तं मन्य इति पाङ्क्तम् ॥ ७ ॥

'आपो रेवतीः' (ऋ १०,३०,१२) इत्येका । 'उप प्रयन्तः' (ऋ १,७४-७५) इति द्वे सूक्ते । 'अवा नो अग्ने' (ऋ १, ७९, ७-१२) इति षड् ऋचः । 'अग्निमीळे' (ऋ १, १), 'अग्निं दूतम्' (ऋ १, १२), 'वसिष्वा हि' (ऋ १, २६-२७) इत्येतयोः सूक्तयोः उत्तमाम् ऋचम् उद्धरेत् । 'नमो महद्भ्यः' (ऋ १, २७, १३) इति वैश्वदेवी त्रिष्टुप्, 'त्वमग्ने व्रतपाः' (ऋ ८, ११) इति एतस्य सूक्तस्य उत्तमामुद्धरेत्[1], 'प्रत्नो हि कम्' (ऋ ८, ११, १०) इति त्रिष्टुप्, 'त्वं नो अग्ने महोभिः' (ऋ ८, ७१, १-९) इति एता नव ऋचः, 'इमे विप्रस्य' (ऋ ८, ४३-४४) इति द्वे सूक्ते, 'युक्ष्वा हि' (ऋ ८, ७५), 'प्रेष्ठं वः' (ऋ ८, ८४), 'त्वमग्ने बृहद्वयः' (ऋ ८, १०२, १-१८) इति एता अष्टादश ऋचः, 'अर्चन्तस्त्वा' (ऋ ५, १३-१४) इति द्वे सूक्ते, 'अग्ने पावक' (ऋ ५, २६), 'दूतं वः' (ऋ ४, ८-९) इति एते द्वे सूक्ते, 'अग्निर्होता नो अध्वरे' (ऋ ४, १५, १-३) (? इति) । पादग्रहणाद् ऋक् प्राप्ता, तस्मादाह—तिस्र ऋच इति । 'अग्निर्होता पुरोहितः' (ऋ ३, ११) अग्निसूक्तम् । 'अग्न इळा'

---

१. °त्तमां समुद्ध° ब[2] ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

(ऋ ३, २४, २-५) इति[1] चतस्र ऋचः । 'प्र वो वाजाः' (ऋ ३, २७), 'उपसद्याय' (ऋ ७, १५), 'त्वमग्ने यज्ञानाम्' (ऋ ६, १६) इति एतस्य सूक्तस्य तिस्र ऋच उत्तमा उद्धरेत्, 'वीती यो देवम्' (ऋ ६, १६, ४६-४८) इति त्रिष्टुबनुष्टुभौ, 'अग्ने हंसि' (ऋ १०, ११८), 'अग्निं हिन्वन्तु नः' (ऋ १०, १५६), 'प्राग्नये वाचम्' (ऋ १०, १८७-१८८) इत्येते द्वे सूक्ते, 'इमां मे अग्ने समिधमिमाम्' (ऋ २, ६-८) इति एतानि त्रीणि सूक्तानि, त्रयाणां सूक्तानाम् उत्तमाम् ऋचम् उद्धरेत्; 'अग्नेरिन्द्रस्य सोमस्य' (ऋ २,८,६) अनुष्टुब् वैश्वदेवी च। 'एतस्य समाम्नायस्य' (आश्रौ १, १, १) इति समानकरणत्वादुभयोः प्राप्तिः। तस्मादिमामिति विशेषणं क्रियते आप्रीसूक्तस्य[2] प्रतिषेधार्थम्। प्राप्तप्रतिषेधश्च कर्तव्यो यथा '[3]न त्विह द्विदेवत्याः' (आश्रौ ५, १३, ११) इति। सम्भवात्[3] त्रीणि[4] भवन्ति। असम्भवादेकमपि भवति। एवं प्राप्ते विशेषणं क्रियते इमाम् इति।

इति गायत्रम् इत्येतद् गायत्रं छन्दः आम्नातम् 'उपप्रयन्तः' (ऋ १, ७४) इत्येवमादि। 'सप्ताग्नेयानि छन्दांस्यन्वाह' (ऐब्रा २, १७) इति श्रुतिः। इति गायत्रमित्येवमादिछन्दसां निर्देशः अधिकारार्थात्[5]। तस्मान्नान्यैराग्नेयं गायत्रम्। '[6]तद् गायत्रं[6] तत्[7] त्रैष्टुभम् तज्जागतम्[8] इत्युक्ते अधिकृतानामेव ग्रहणम्। अन्यथा 'एतस्य समाम्नायस्य' (आश्रौ १, १, १) इति समाम्नायानुक्रमेण गायत्रीत्रिष्टुब्जगतीनां च आवापः प्राप्नोति। यथा च 'ऐन्द्राणि त्रैष्टुभानि' (आश्रौ ७, १२, २) इति। एषां छन्दसाम्[9] इति अधिकृतानां निर्देशो नोपपद्यते।

'त्वमग्ने वसून्' (ऋ १, ४५), 'त्वं हि क्षैतवत्' (ऋ ६, २), 'अग्ना यो' (ऋ ६, १४), 'होताजनिष्ट' (ऋ २, ५), 'प्र वो देवाय' (ऋ ३, १३), 'अग्ने कदा ते' (ऋ ४, ७, २-६) इति एताः पञ्च ऋचः, 'सखायः सं वः' (ऋ ५, ७), 'त्वामग्ने हविष्मन्तः' (ऋ ५, ९-१०) इति एते सूक्ते, 'बृहद्वयः' (ऋ ५, १६-२५) इति एतानि सूक्तानि, एतेषां दशानां सूक्तानां चतुर्थं (ऋ ५, १९) च नवमं (ऋ ५, २४) च चतुर्थनवमे द्वे सूक्ते उद्धरेत्। 'अभ्यवस्थाः' (ऋ ५, १९) इति विच्छन्दस्त्वादुद्ध्रियते 'अग्ने त्वं नः' (ऋ ५, २४) इति द्वैपदं च। उत्तमामुत्तमां चादितस्त्रयाणाम्। आनुष्टुभस्य छन्दसः आदितः यानि त्रीणि सूक्तानि 'त्वमग्ने वसून्' (ऋ १, ४५), 'त्वं हि क्षैतवत्' (ऋ ६, २),

---

१. इति पादग्रहणाद् ऋक्चतस्र (तिस्र मै) ऋच इत्युच्यते मूको। २. तु. ऋ १०, ७०। ३-३. तदीहे (त ब²) द्विदेवत्य इति सं० ब¹'² पू; तदिह द्विदेवत्यसं° मै। ४. त्रीणि त्रीणि ब¹'² मै; त्रुटितम् पू। ५. °कारार्थं ब¹'² पू। ६-६. गायत्रं ब² मै; नास्ति ब¹ पू। ७. नास्ति मै। ८. जागतम् मै। ९. तु. आश्रौ ४, १५, २।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

'अग्ना यो' (ऋ ६, १४) इत्येतेषां त्रयाणां सूक्तानाम् उत्तमामुत्तमां चोद्धरेत्। च- शब्द उद्धरेदित्यधिकारसमुच्चयार्थः। 'अर्वाञ्चं दैव्यं जनम्' (ऋ १, ४५, १०) इति वैश्वदेवी, 'अच्छा नो मित्रमहः' (ऋ ६, २, ११; १४, ६) इति शक्वरी, 'बृहद्वयः' (ऋ ५, १६-२५) इति[1] दशानां च उत्तमामुत्तमां[2] चोद्धरेद् इति प्राप्तम्। अस्ति च सर्वेषु उत्तमा पङ्क्तिः। तासामुद्धारे क्रियमाणे दशानामपि सूक्तानाम्[3] उत्तमाया उद्धारः प्राप्नोति। तस्मात् पङ्क्तीनामनुद्धारः[4]। आदित एव [5]त्रयाणामुत्तमा उद्ध्रियन्ते[5]।

इत्यानुष्टुभम् इत्येतदानुष्टुभं छन्दः त्वमग्ने वसून् इत्येवमादि व्याख्यातम्।

'अबोध्यग्निः समिधा' (ऋ ५, १-४) इति एतानि चत्वारि[1] सूक्तानि, 'प्राग्नये बृहते' (ऋ ५,१२), 'प्र वेधसे कवये' (ऋ ५, १५), 'त्वं नो अग्ने वरुणस्य विद्वान्' (ऋ ४,१,४) इति एतामृचमादिं[6] कृत्वा एतत्प्रभृतीनि चत्वारि सूक्तानि। पादग्रहणाद् ऋक् प्राप्ता। एतत्प्रभृतीनीति वचनात् सूक्तशेषं भवति। उत्तराणि सूक्तानि (ऋ ४,२-४), 'ऊर्ध्व ऊ षु णः' (ऋ ४,६), 'ससस्य यद् वियुता' (ऋ ४, ७,७-११) इत्येताः पञ्च ऋचः, पादग्रहणादेका प्राप्ता। 'भद्रं ते अग्ने' (ऋ ४, ११-१२) इति एते द्वे सूक्ते, 'सोमस्य मा तवसम्' (ऋ ३, १) इत्येतत् सूक्तम्, 'प्रत्यग्निरुषसः' (ऋ ३, ५-७) इति एतानि त्रीणि सूक्तानि, 'आ होता' (ऋ ३, १४-२३) इति दशानां सूक्तानां तृतीयाष्टमे सूक्ते उद्धरेत्— 'अयमग्निः' (ऋ ३, १६) इत्येतद् बार्हतम्, 'इमं नो यज्ञम्' (ऋ ३, २१) इत्येतत् [7]स्तोकसूक्तं विच्छन्दस्त्वात्[7]। 'दिवस्परि' (ऋ १०, ४५-४६) इति सूक्तयोः पूर्वस्योत्तमामुद्धरेत्, 'अस्ताव्यग्निः' (ऋ १०, ४५, १२) इत्येतां वैश्वदेवीम्। 'त्वं ह्यग्ने प्रथमः' (ऋ ६, १-६) इति षण्णां सूक्तानां द्वितीयमुद्धरेत् 'त्वं हि क्षैतवत्' (ऋ ६, २) इत्यानुष्टुभम्, 'पुरो वो मन्द्रम्' (ऋ ६, १०-१३) इति एतानि चत्वारि सूक्तानि, 'तं सुप्रतीकम्' (ऋ ६, १५, १०-१५) इति षड् ऋचः, 'हुवे वः' (ऋ २, ४) इत्येतत् सूक्तम्, 'नि होता होतृषदने' (ऋ २, ९-१०) इति एते द्वे सूक्ते, '[8]त्रिमूर्धानम्' (ऋ १, १४६-१४८) इति त्रीणि सूक्तानि, 'वह्निं यशसम्' (ऋ १, ६०), 'उप प्र जिन्वन्' (ऋ १, ७१-७३) इति एतानि त्रीणि† सूक्तानि, 'का त उपेतिः' (ऋ १, ७६-७७) इति एते द्वे सूक्ते[8], 'हिरण्यकेशः' (ऋ १, ७९, १-३) इति तिस्र ऋचः, 'अपश्यमस्य महतः' (ऋ १०, ७९-८०) इति द्वे सूक्ते, 'द्वे विरूपे' (ऋ १, ९५-९६)

---

१. नास्ति ब[1]। २. उत्तमां ब[1]; उत्तमानुत्तमां ब[2] पू; उत्तमानुवर्तमानं मै। ३. सूक्ते मूको। ४. °नामुद्धारः मूको। ५-५. उत्तमामुद्ध्रियते मूको। ६. °तामृचमादिं ब[1/2] पू। ७-७. स्तोकविच्छ° मै; तु. आश्रौ ३,४। ८-८. नास्ति मै। †. नास्ति मूको।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

इत्येते[1] द्वे सूक्ते, 'अग्ने नय' (ऋ १, १८९), 'अग्ने बृहन्' (ऋ १०, १-८) इति अष्टौ सूक्तानि, तेषाम् अष्टानाम् सूक्तानाम्[2] उत्तमात् सूक्तात् उत्तमास्तिस्र ऋचः (ऋ १०, ८, ७-९) उद्धरेत् 'अस्य वितः क्रतुना' (ऋ १०, ८, ७-९) इत्येता [3]ऐन्द्रच ऋचः[3]। उत्तमा इति बहुवचनात् सर्वेषाम् उत्तमानाम् उद्धारे प्राप्ते उत्तमादित्याह। 'त्वमग्ने सुहवो रण्वसंदृक्' (ऋ ७, १, २१-२५) इति एताः पञ्च ऋचः, पादग्रहणादेका प्राप्ता, 'अग्निं वो देवम्' (ऋ ७, ३-१२) इति दश सूक्तानि, तेषां दशानां तृतीयं च चतुर्थं च तृतीयचतुर्थे तु द्वे सूक्ते उद्धरेत्। 'प्राग्नये तवसे' (ऋ ७, ५-६) इत्येते द्वे सूक्ते वैश्वानरीये उद्धरति। इति[4] त्रैष्टुभम् इत्येतत् त्रैष्टुभं छन्दः अत्रोध्यग्निः इत्येवमादि व्याख्यातम्।

'एना वोऽग्निम्' (ऋ ७, १६), 'प्र वो यह्वम्' (ऋ १, ३६), 'अग्ने विवस्वत्' (ऋ १, ४४), 'सखायस्त्वा' (ऋ ३, ९), 'अयमग्निः' (ऋ ३, १६), 'अग्न आ याहि' (ऋ ८, ६०), 'अच्छा नः शोरशोचिषम्' (ऋ ८, ७१, १०-१५) इति एताः षड् ऋचः, 'अदर्शि गातुवित्तमः' (ऋ ८, १०३, १-७) इति एताः सप्त ऋचः, पादग्रहणादेका प्राप्ता। इति बार्हतम् इत्येतद् बार्हतं छन्दः [5]एना व इत्येवमादि[5] व्याख्यातम्।

'अग्ने वाजस्य' (ऋ १, ७९, ४-६) इति एतास्तिस्र ऋचः, 'पुरु त्वा' (ऋ १, १५०), 'त्वामग्ने' (ऋ ३, १०, १), 'ईळिष्वा हि' (ऋ ८, २३) इति औष्णिहम् इत्येतदौष्णिहं[6] छन्दः 'अग्ने वाजस्य' इत्येवमादि व्याख्यातम्[7]।

'जनस्य गोपाः' (ऋ ५, ११), 'त्वामग्न ऋतायवः' (ऋ ५, ८), 'इममू षु वो अतिथिमुषर्बुधम्' (ऋ ६, १५, १-९) इति एता नव ऋचः, 'त्वमग्ने द्युभिः' (ऋ २, १-२) इति एते द्वे सूक्ते, 'त्वमग्ने प्रथमो अङ्गिराः' (ऋ १, ३१), 'नू चित् सहोजा अमृतो नि तुन्दते' (ऋ १, ५८, १-५) इति एताः पञ्च ऋचः, 'वेदिषदे' (ऋ १, १४०-१४५) इति षण्णाम्[8] इत्येतेषां षण्णां सूक्तानां तृतीयसूक्तम् उद्धरेत्, 'समिद्धो अग्न आ हव' (ऋ १, १४२) इति आप्रीसूक्तम्, 'इमं स्तोममर्हते' (ऋ १, ९४), 'सं जागृवद्भिः' (ऋ १०, ९१), 'चित्र इच्छिशोः' (ऋ १०, ११५), 'वसुं न चित्रमहसम्' (ऋ १०, १२२)। इति जागतम् इत्येतज्जागतं छन्दः जनस्य गोपाः इत्येवमादि व्याख्यातम्।

'अग्निं तं मन्ये' (ऋ ५, ६) इति पाङ्क्तम् इत्येतत् पङ्क्तिश्छन्दो व्याख्यातम् ॥ ७ ॥

---

१. इति मै। २. नास्ति ब[1/2] पू। ३-३. ऐन्द्रचस्त्वृचः ब[1/2] पू। ४. नास्ति ब[1] पू। ५-५. एनावमादि मूको। ६. इत्येता औष्णिहं मै; वृद्धितम् पू। ७. नास्ति ब[2]। ८. षट् मूको।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

इत्याग्नेयः क्रतुः ॥ ८ ॥

इति [1]अधस्तनेऽतः[1] पूर्वेण, उपप्रयन्तः इत्येवमादीनां छन्दसां पाङ्क्तपर्यन्तानाम् आग्नेयः क्रतुर् इत्येषा संज्ञा । अग्निदेवता यस्य क्रतोः स आग्नेयः क्रतुः । "'अग्निं नरो दीधितिभिररण्योः' (ऋ ७, १, १-३) इति तृचमाग्नेये क्रतौ" (आश्रौ ८, १२, २) इत्युक्ते एतस्य ग्रहणम् । 'तदाहुर् यत् त्रीन् क्रतूनन्वाहाग्नेयमुषस्यमाश्विनम्' (ऐब्रा २, १८) इति श्रुतिः ॥ ८ ॥

॥ इति चतुर्थे त्रयोदशं खण्डम् ॥

१-१. °स्तने ता मूको ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

अथ चतुर्थेऽध्याये चतुर्दशः खण्डः

[उषस्यक्रतूपक्रमः]

अथोषस्यः ॥ १ ॥

अथ इदानीम् उषस्यः क्रतुर्वक्ष्यते। आग्नेयात् क्रतोरनन्तरस्य प्रातरनुवाकसमाम्नायस्य सप्तानां छन्दसामुषस्यः क्रतुरित्येषा संज्ञा। "'उषा अप स्वसुस्तमः' (ऋ १०, १७२, ४) इति पच्छो द्विपदां त्रिरुषस्ये" (आश्रौ ८, १२, ३) इत्युक्ते एतस्य ग्रहणम् ॥ १ ॥

[उषस्यक्रतावनुवचनमन्त्रविधानम्]

प्रति ष्या सूनरी कस्त उष इति तिस्र इति गायत्रमुषो भद्रेभिरित्यानुष्टुभमिदं श्रेष्ठं पृथू रथ इति सूक्ते प्रत्यर्चिरित्यष्टौ द्युतद्यामानमुषो वाजेनेदमु त्यदुदु श्रिय इति सूक्ते व्युषा आ वो दिविजा इति षळिति त्रैष्टुभं प्रत्यु अदर्शि सह वामेनेति बार्हतमुषस्तच्चित्रमा भरेति तिस्र औष्णिहमेता उ त्या इति चतस्रो जागतं महे नो अद्येति पाङ्क्तमित्युषस्यः क्रतुः ॥ २ ॥

'प्रति ष्या सूनरी' (ऋ ४, ५२), 'कस्त उषः' (ऋ १, ३०, २०-२२) इति एताः तिस्र ऋचः। इति गायत्रम् [1]इत्येतद् गायत्रं[1] छन्दः व्याख्यातम्।

'उषो भद्रेभिः' (ऋ १, ४९) इत्येतत् सूक्तम्। इत्यानुष्टुभम् इत्येतदानुष्टुभं छन्दः।

'इदं श्रेष्ठम्' (ऋ १, ११३), 'पृथू रथः' (ऋ १, १२३-१२४) इति एते द्वे सूक्ते, 'प्रत्यर्चि.' (ऋ १, ९२, ५-१२) इति एता अष्टौ ऋचः, 'द्युतद्यामानम्' (ऋ ५, ८०), 'उषो वाजेन' (ऋ ३, ६१), 'इदमु त्यत्' (ऋ ४, ५१), 'उदु श्रिये' (ऋ ६, ६४-६५) इति एते द्वे सूक्ते, 'व्युषा आ वो दिविजा' (ऋ ७, ७५-८०) इति एतानि षट् सूक्तानि। इति त्रैष्टुभम् इत्येतत् त्रैष्टुभं छन्दो व्याख्यातम्।

१-१. नास्ति ब[1] मै।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

'प्रत्यु अदर्शि' (ऋ ७, ८१), 'सह वामेन' (ऋ १, ४८) 'इति बार्हतम्' इत्येतद् बार्हतं छन्दो व्याख्यातम् ।

'उषस्तच्चित्रमा भर' (ऋ १, ९२, १३-१५) इति तिस्र ऋचः औष्णिहं छन्दो व्याख्यातम् ।

'एता उ त्याः' (ऋ १, ९२, १-४) इति एताः चतस्र ऋचः जागतं छन्दो व्याख्यातम् । 'महे नो अद्य' (ऋ ५, ७९) इति पाङ्क्तं छन्दो व्याख्यातम् । इत्युषस्यः क्रतुः इत्ययमुषस्यः क्रतुर्व्याख्यातः । पुनरुच्यते अधिकारनिवृत्त्यर्थम्[2] । अनुच्यमाने त्वाश्विनक्रतौ उषस्यसंज्ञा च अनुवर्तेत आश्विनसंज्ञा च ॥ २ ॥

॥ इति चतुर्थे चतुर्दशं खण्डम् ॥

१-१. वास्ति मूको । २. °वृत्त्यर्थे: ब[1]; °वृत्त्यर्थ: ब[2] ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

अथ चतुर्थेऽध्याये पञ्चदशः खण्डः

[आश्विनक्रतूपक्रमः]

अथाश्विनः ॥ १ ॥

अथाश्विनः क्रतुर्वक्ष्यते । उषस्यक्रतोरनन्तरं सप्तानां छन्दसामाश्विनः क्रतुरित्येषा संज्ञा । "'आ शुभ्रा यातमश्विना स्वश्वा' (ऋ ७, ६८, १-३) इति तृचमाश्विने क्रतौ" (आश्रौ ८, १२, ४) इत्युक्ते एतस्य ग्रहणम् ॥ १ ॥

[आश्विनक्रतौ प्रातरनुवाकेऽनुवचनमन्त्रविधानम्]

एषो उषाः प्रातर्युजेति चतस्रोऽश्विना यज्वरीरिष आश्विनावश्वावत्या गोमदू षु नासत्येति तृच दूरादिहेवेति तिस्र उत्तमा उद्धरेद् वाहिष्ठो वां हवानामिति चतस्र उदीराथामा मे हवमिति गायत्रं यदद्य स्थ इति सूक्ते आ नो विश्वाभिस्त्यं चिदत्रिमित्यानुष्टुभमा भात्यग्निरिति सूक्ते ग्रावाणेव नासत्याभ्यामिति त्रीणि धेनुः प्रत्नस्य क उ श्रवदिति सूक्ते स्तुषे नरेति सूक्ते युवो रजांसीति पञ्चानां तृतीयमुद्धरेत् प्रति वां रथमिति सप्तानां द्वितीयमुद्धरेदिति त्रैष्टुभमिमा उ वामयं वामोत्यमह्व आ रथमिति सप्त द्युम्नी वां यत्स्थ इति बार्हतमश्विना वर्तिरस्मदाश्विनावेह गच्छतमिति तृचौ युवोरु षू रथं हुव इति पञ्चदशेत्यौष्णिहमबोध्यग्निर्जम एष स्य भानुरावां रथमभूदिदं यो वां परिज्मेति त्रीणि त्रिश्चिन्नो अद्येळे द्यावापृथिवी इति जागतं प्रति प्रियतममिति पाङ्क्तम् । इत्येषां छन्दसां पृथक्सूक्तानि प्रातरनुवाकः ॥ २ ॥

शतप्रभृत्यपरिमितः ॥ ३ ॥

'एषो उषाः' (ऋ १, ४६), 'प्रातर्युजा' (ऋ १, २२, १-४) इति एताः चतस्रः ऋचः, 'अश्विना यज्वरीरिषः' (ऋ १, ३, १-३), 'आश्विनावश्वावत्या' (ऋ १, ३०, १७-१९), 'गोमदू षु नासत्या' (ऋ २, ४१, ७-९)

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

[1]इति एते[1] त्रयस्तृचाः, [2]'दूरादिहेव' (ऋ ८, ५) इति एतस्य सूक्तस्य तिस्र ऋचः[2] उत्तमा उद्धरेत्—'ता मे अश्विना' (ऋ ८,५,३७-३९) इत्येता विच्छन्दसस्त्वृचः,[3] 'वाहिष्ठो वां हवानाम्' (ऋ ८, २६, १६-१९) इति चतस्रः ऋचः, 'उदीराथाम्' (ऋ ८, ७३), 'आ मे हवम्' (ऋ ८, ८५) इति गायत्रम्। इत्येतद् गायत्रं छन्दो व्याख्यातम्।

'यदद्य स्थः' (ऋ ५,७३-७४) इति एते द्वे सूक्ते, 'आ[2] नो विश्वाभिः' (ऋ ८, ८), 'त्यं चिदत्रिम्' (ऋ १०, १४३)। इत्यानुष्टुभं छन्दो व्याख्यातम्।

'आ भात्यग्निः' (ऋ ५, ७६-७७) इति एते द्वे सूक्ते[2], 'ग्रावाणेव' (ऋ २, ३९), 'नासत्याभ्याम्' (ऋ १, ११६-११८) इति त्रीणि सूक्तानि, 'धेनुः प्रत्नस्य' (ऋ ३, ५८), 'क उ श्रवत्' (ऋ ४, ४३-४४) इति द्वे सूक्ते, 'स्तुषे नरा' (ऋ ६, ६२-६३) इति द्वे सूक्ते, 'युवो रजांसि' (ऋ १, १८०-१८४) इति पञ्चानां सूक्तानां तृतीयं सूक्तम् उद्धरेत्—[4]'अभूदिदम्' (ऋ १, १८२) इति जागतम्[4], 'प्रति वां रथम्' (ऋ ७, ६७-७३) इति सप्त [4]सूक्तानि। तेषां[4] सूक्तानां द्वितीयमुद्धरेत्—'आ शुभ्रा यातमश्विना स्वश्वा' (ऋ ७, ६८) इति वैराजम्। इति त्रैष्टुभम् इत्येतत्[5] त्रैष्टुभं छन्दो व्याख्यातम्।

'इमा उ वाम्' (ऋ ७, ७४), 'अयं वाम्' (ऋ १, ४७), 'ओ त्यमह्व आ रथम्' (ऋ ८,२२,१-७) इति एताः सप्त ऋचः, 'द्युम्नो वाम्' (ऋ ८, ८७), 'यत्स्थः' (ऋ ८, १०)। इति बार्हतम् इत्येतद् बार्हतं[6] छन्दो व्याख्यातम्।

'अश्विना वर्तिरस्मदा' (ऋ १, ९२, १६-१८), 'अश्विनावेह गच्छतम्' (ऋ ५, ७८, १-३) इति द्वौ तृचौ, 'युवोरू षू रथं हुवे' (ऋ ८, २६, १-१५) इति पञ्चदश ऋचः। इत्यौष्णिहम् इत्येतदौष्णिहं छन्दो व्याख्यातम्।

'अबोध्यग्निर्जमः' (ऋ १, १५७), 'एष स्य भानुः' (ऋ ४, ४५), 'आवां रथम्' (ऋ १, ११९), 'अभूदिदम्' (ऋ १, १८२), 'यो वां परि ज्मा' (ऋ १०, ३९-४१) इति त्रीणि सूक्तानि, 'त्रिश्चिन्नो अद्य' (ऋ १, ३४), 'ईळे द्यावापृथिवी' (ऋ १, ११२)। इति जागतम् जागतं छन्दो व्याख्यातम्।

'प्रति प्रियतमम्' (ऋ ५, ७५)। इति पाङ्क्तम् इत्येतत् पाङ्क्तं छन्दो व्याख्यातम्।

'प्रातरनुवाकमनुब्रूयात्' (आश्रौ ४, १३, ६) इत्यधिकृत्य यावान्[7] समाम्नाय आम्नातः स[8] सर्वः प्रातरनुवाको भवतीत्येवं प्राप्ते इदमुच्यते—

१-१. इत्येताः मूको। २-२. नास्ति ब[2]। ३. °न्दसस्तृ(°स्त ब[1/2])चश्च मूको। ४-४. नास्ति मै। ५. इत्येताः मै। ६. नास्ति ब[2]। ७. यावत् मूको। ८. नास्ति मूको।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

इति एतेषां छन्दसाम् इति । इत्येवमनेनानुपूर्व्येण एतेषामेकविंशतिच्छन्दसां पृथग् एकैकस्य छन्दसः सूक्तानि भिन्नानि प्रातरनुवाको भवति ।

शतादूर्ध्वमपरिमितः । 'तस्मादपरिमितमेवानूच्यम्' (ऐब्रा २, १७) इति श्रुतिः । तस्मादयमेव कल्पो[1] नित्यः । कामादितरे 'शतमनूच्यमायुष्कामस्य' (ऐब्रा २, १७) इत्येवमादयः[2] । शतप्रभृत्यपरिमितः इति वचनात् समाम्नायादावेव यथोत्साहम्—'इत्येतेषां छन्दसां[3] पृथक्' (आश्रौ ४, १५, २) इति वचनादनुक्रमेणैकविंशतेरपि[4] छन्दसां पृथगेकैकस्मिंश्छन्दसि सूक्तानि प्रातरनुवाको भवति । सूक्तानि तावन्तीति प्राप्ते अर्थाद् ऋक्संख्याभावो भवति शत (? तस्य)सूक्तानामनुपपत्तेः[5] । श्रुतौ[6] त्रीणि षष्टिशतानीति ऋक्संख्या श्रूयते[7] । [8]तस्मात् सूक्तभेदे प्राप्ते सूक्तानीत्याह । तस्मात् सूक्तान्येव उप्यन्ते[8], सूक्तानि भिद्यन्ते । 'उषस्तच्चित्रमा भर' (ऋ १, ९२, १३) इति तिस्रः[3] औष्णिहम् । 'एता उ त्या' (ऋ १, ९२, १-४) इति[9] 'चतस्रो जागतम्' (आश्रौ ४, १४, २) इति अशतसूक्तान्यपि[10] शतसूक्तानीत्याह । तस्मिन् तस्मिन् समाम्नाये असूक्तान्यपि सूक्तानीत्याह 'तृचावमं[11] याज्ञिकाः सूक्तमाहुः' (बृदे ८, ९९) इति वचनात् । प्रातरनुवाकग्रहणं संख्याविवक्षार्थम् । शतादपरिमित इति सिद्धे प्रभृतिग्रहणं शतप्रभृतयो ये कल्पा [12]ब्राह्मणोक्ताः, तेषां प्राप्त्यर्थम् । ब्राह्मणे सहस्रादूर्ध्वमपरिमितवचनं श्रूयते[12] । तस्मात् [13]संख्याभ्यास इष्यते, यः अभ्यासः[13] सूत्रकारेण दर्शितः शतप्रभृत्यपरिमितः इति ब्रुवता । तस्मात् कामाच्छतं भवति । असति कामे शतादपरिमितः । त्रीणि षष्टिशतानि कामात् । असति कामे त्रिभ्यः षष्टिशतेभ्योऽपरिमित[14] इत्येवं सर्वासु संख्यासु । 'शतमनूच्यमायुष्कामस्य' (ऐब्रा २, १७) इति श्रुतिः । तस्य कल्पना—'प्र नूनम्' (ऋ १०, १८८, १-३), 'अग्ने सहन्तम्' (ऋ ५, २३, १-४), 'हिरण्यकेशः' (ऋ १, ७९, १-३), 'अगन्म' (ऋ ७, १२, १-३) इति, 'अयमग्निः' (ऋ ३, १६, १-६), 'पुरु त्वा' (ऋ १, १५०, १-३), 'समिद्धमग्निम्' (ऋ ६, १५, ७-९), 'कस्ते' (ऋ १, ३०, २०-२२), 'उषो भद्रेभिः' (ऋ १, ४९, १-४), 'प्रति स्तोमेभिः' (ऋ ७, ८०, १-३) इति तिस्रः[15], 'उषस्तत्' (ऋ १, ९२, १३-१५), 'एताः' (ऋ १, ९२, १-४), 'महे नः' (ऋ ५, ७९, १-१०), 'अश्विना' (ऋ १, ३, १-३), 'त्यं चिदत्रिम्' (ऋ १०, १४३, १-६), 'आ गोमता' (ऋ ७, ७२, १-५; ७३, १-५; ७४, १-६) इति त्रीणि, 'अश्विना वर्तिः' (ऋ १, ९२, १६-१८), 'समानमु त्यम्' (ऋ १०;

---

१. विकल्पः ब[2] । २. °वमादि (°दिः मै) मूको । ३. नास्ति मूको । ४. °विंशतिरपि मूको । ५. शते सू° मूको । ६. शतं मूको । ७. तु. ऐब्रा २. १७ । ८-८. नास्ति ब[2] । ९. इत्येताः मै । १०. असूक्तान्यपि (°न्युपदि मै) मूको । ११. तृचाधमं मुद्रितपाठः । १२-१२. तु. ऐब्रा २, १७ । १३-१३. संख्याभ्य(°यः ब[2]) इष्यते (इष्येते ब[1] पू) या अन्यायः मूको । १४. त्रिषष्टिभ्योऽप° मूको । १५. द्वे मूको ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

४१, १-३), 'ईळे' (ऋ १, ११२, १-२५), 'प्रति प्रियतमम्' (ऋ ५, ७५, १-९) सूक्तभेदेन[1] तच्छतं [2]ऋचां स्यात्। 'समिद्धमग्निम्'[3] (ऋ ६, १५, ७)। तृचापन्नं हि तत् सूक्तम्। अत्र आपोरेवतीया[4] मङ्गलानि[5] च अभूदुषायाश्च[6] त्रिर्वचनम्। एताः सप्तत्रिंशदृचो[7] न गण्यन्ते। सप्तदशाधिकाः[8] प्रयुज्यन्ते। कस्मात्? एतेषां छन्दसामिति वचनात्। आपोरेवतीया न गण्यते संख्याभ्य उत्तरकालमुपवेशात्। अभूदुषायाः त्रिर्वचनं न गण्यते सूक्तानीति[9] वचनात्। यदि वैतानि गण्यन्ते[10]। सूक्तैः शतमधिकं भवति। न चानुपपद्यमानमर्थं शास्त्रमुपदिशति। [11]तस्मादेतानि गण्यन्ते[11]। ईळेद्यावीयस्य चाभ्यासे संख्याविधानात्।

अथवा प्रतिपन्माङ्गलाभ्यासा[12] गण्यन्ते। 'तृचावमं[13] याज्ञिकाः सूक्तमाहुः' (बृदे ८, ९९) इति वचनात् सूक्ताद्यास्तृचा गृह्यन्ते। दृष्टश्च[14] दशमेऽहनि अनुष्टुभां स्थाने तृचादेशः[15]। तथा कल्पते[16]—प्रतिपत्साभ्यासा त्रयः[17] गायत्रादौ चतुर्ऋचाः[18]। ततः आनुष्टुभादिच्छन्दसामाद्या[19] एकोनविंशतिस्तृचाः[20]। माङ्गलानि[21] त्रीणि प्रतिप्रियतमं सूक्तं[22] साभ्यासमिति। एतदष्टोत्तरशतं[23] भवति। 'अष्टोत्तरमायुः' (?) इति श्रुत्यन्तरे। 'षोडशोत्तरम्'(?) इति च[24] श्रुत्यन्तरेऽप्यस्ति। तथा सति [25]षोडशोत्तरं शतं[25] कल्पते[26]। अष्टौ गायत्र्यः[27] अधिका ओप्यन्ते[28]। प्रतिपन्माङ्गलाभ्यासेष्वगण्यमानेषु[29]। तृचैः केवलैरपि शतं न संपद्यते, अधिकमेव भवति। एकर्चावापे[30] द्व्यृचावापे[31] वा[32] क्रियमाणे शतं पूर्यते। [33]न तु[33] वचनमस्ति, न च न्यायोऽस्ति, न चाचार्यप्रवृत्तिर्दृश्यते। "'उषा अप स्वसुस्तमः' (ऋ १०, १७२, ४) इति पञ्चर्चः द्विपदां त्रिरुषस्ये" (आश्रौ ८, १२, ३) इति वचनात् तृचावाप एवाभिप्रेतः, नैकर्चक्लृप्तिः, न द्व्यृचक्लृप्तिः॥ २-३॥

---

१. सूक्ताभेदेन ब[1२] पू। २-२. तृचः समिद्धमग्निः स्यात् मूको। ३. °तीयं मूको; तु. ऋ १०, ३०, १२। ४. तु. आश्रौ ४, १५, ७। ५. तु. ऋ ५, ७५, ९। ६. अष्ट(°ष्टा मै)त्रि° मूको। ७. द(दे मै)शाधिकाः मूको। ८. सूक्तानीति वचनं न गण्यते। सूक्तानीति ब[2]। ९. न गण्यन्ते मै। १०-१०. तस्मादेता निगद्यन्ते मै। ११. प्रतिपन्मा(°न्मं ब[2]) गल्पा(°ला ब[2])भ्यासा ब[1२] पू; प्रतिप्रसङ्गळाभ्यासा मै। १२. तृचाधमं मुद्रितपाठः। १३. इष्टश्च मै। १४. तु. आश्रौ ८, १२, १; २। १५. कल्प्यते मै। १६. तिस्रः मूको। १७. चतुर्ऋचः ब[1२] पू; चतुर ऋचः मै। १८. अनु° मूको। १९. °शतिऋचः (°चा ब[2]; °चाः पू) मूको। २०. मङ्गलानि मूको; तु. आश्रौ ४,१५,७। २१. ऋ ५, ७५। २२. °त्तरं ब[1]। २३. नास्ति मै। २४-२४. °त्तरशतं ब[1] पू। २५. कल्प्यते ब[1] मै पू। २६. गायत्र्याः (°त्राः ब[1] मूको)। २७. उप्यन्ते ब[1२] पू; उच्यन्ते मै। २८ °न्मङ्ग° मूको। २९. °र्चाविपि ब[1२] पू; °र्चापि मै। ३०. °चावपि ब[2] मै पू; नास्ति ब[1]। ३१. नास्ति मै। ३२-३२. ननु मूको।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

[ब्राह्मणस्याऽऽग्नेयगायत्रमन्त्राऽऽवपनविधानमन्येषां निषेधकथनञ्च]

नान्यैराग्नेयं गायत्रमत्यावपेद् ब्राह्मणस्य ॥ ४ ॥

आग्नेये क्रतौ यद् गायत्रं छन्दः तदोप्यम्[1], अन्यैः छन्दोभिः आनुष्टुभादिभिः[2] गायत्र्या अतिरिक्तं नाऽऽवपेत् ब्राह्मणस्य यजमानस्य । गायत्रमेव बह्वावपेत्[3] । इतराणि तस्मादूनान्यावपेत् । अनियमे प्राप्ते नियम आरभ्यते । 'आग्नेयं गायत्रम्' इति वचनाद् उषस्यम् आश्विनं वा गायत्रं न भवति । ब्राह्मणस्येति वचनात् क्षत्रियवैश्ययोर्न भवति ॥ ४ ॥

[राजन्यस्य त्रैष्टुभमन्त्राणां वैश्यस्य च जागतमन्त्राणामावपनम्]

न त्रैष्टुभं राजन्यस्य न जागतं वैश्यस्य ॥ ५ ॥

आग्नेये क्रतौ यत् त्रैष्टुभं छन्दः, तद् गायत्रादिभिरन्यैश्छन्दोभिः अतिरिक्तं न आवपेत् राजन्यस्य[4] यजमानस्य । त्रैष्टुभमेव[5] बह्वावपेत्, नेतराणि । राजन्यस्येति[6] वचनादन्यस्य वर्णस्य न भवति । न जागतं वैश्यस्य । आग्नेयमिति वर्तते । आग्नेये क्रतौ यद् जागतं[7] छन्दः, तद् गायत्रादिभिरन्यैश्छन्दोभिः अतिरिक्तं नावपेत् [8]वैश्यस्य यजमानस्य । वैश्यस्येति वचनादन्यस्य वर्णस्य न भवति[8] ॥ ५ ॥

[अध्यासवदेकपदद्विपदानां संहितानामन्ते प्रणवकरणम्]

अध्यासवदेकपदद्विपदाः ॥ ६ ॥

वक्ष्यति[9] 'उत्तमा वैश्वदेवसूक्ते साध्यासा । उत्तमा जातवेदस्य' (आश्रौ ८, ८, ६) इति । तेन साध्यासेन पादेन तुल्यमन्यमावपेत् । प्रातरनुवाकसमाम्नाये या एकपदद्विपदास्ता अध्यासवद् अनुब्रूयात् । 'सर्वत्राध्यासानुपसमस्य प्रणुयात्' (आश्रौ ८, ८, ७) इति पूर्वेण ऋगन्तेन द्विपदासेकपदां वोपसमस्य प्रणवं कुर्यात् । 'वि द्वेषांसीनुहि' (ऋ ६,१०,७) इत्येकैव द्विपदा । 'आ वां सुम्ने' (ऋ ६,६३,११) इत्येकैवैकपदा । सप्तैव छन्दांस्याम्नातानि । अधिकानामुद्धारे[10] प्राप्तेऽनुद्धारार्थः[11] सूत्रारम्भः[12] । एकपदद्विपदा इति बहुवचननिर्देशात् प्रातरनुवाकादन्यत्रापि प्रावस्तोत्रादिषु अध्यासवत्—प्राप्त्यर्थमित्येके । तन्नोपपद्यते, छन्दोनियमाभावात् । यथा प्रातरनुवाके छन्दोनियमो विद्यते तत्रैवोपसमासो भवत्यनुद्धारार्थम् ।

---

१. तदोप्ये मूको । २. नास्ति ब[1] । ३. वषट्कारादा (°का पू) वपेत मै पु । ४. वैश्यस्य मूको । ५. जागतमेव मूको । ६. वैश्यस्येति मूको । ७. गायत्रं ब[1] । ८-८. नास्ति मूको । ९. वक्ष्यन्ते मै । १०. °द्धारार्थं ब[1] । ११. प्राप्ते मुद्धारः ब[1]; प्राप्ते अ(°य मै)मुद्धारः ब[2] मै पू । १२. नास्ति मूको ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

यथा सामिधेनीषु 'सर्वाणि छन्दांस्यनुब्रूयाद् बहुयाजिनः' (तैसं २,५,१०,४) इति। गायत्र्यः त्रिष्टुभो जगत्य इति सर्वाणि छन्दांसि[1]। तस्मादत्र द्विपदैकपदानामुपसमासो[2] भवति। प्रावस्तोब्रादिषु यत्र सर्वाणि छन्दांसि प्रयुज्यन्ते न तत्रोपसमस्यन्ते, 'आऽतोऽर्धर्चम्'[3] (आश्रौ ५, १४, ७) इत्यर्द्धर्चानामेव[4] ॥ ६ ॥

[माङ्गलसूक्तसंज्ञाकरणं तत्प्रयोगविधानञ्च]

यथास्थानं ध्रुवाणि माङ्गलान्यगन्म महातारिष्मेळे द्यावापृथिवी इति ॥ ७ ॥

'अगन्म महा' (ऋ ७, १२), 'अतारिष्म' (ऋ ७, ७३), 'ईळे द्यावापृथिवी' (ऋ १, ११२) इति एतानि त्रीणि सूक्तानि माङ्गलसंज्ञानि[5]। यद्यस्मिन् छन्दस्याम्नातं यथास्थानम्। तानि यथास्थाने ध्रुवाणि अच्युतानि प्रयोक्तव्यानि। सर्वच्छन्दसामन्ते उपदेशाद् अग्रे एव प्रयोगः प्राप्तः, तस्मादुच्यते—यथास्थानमिति। यथास्थानवचनात्[6] 'अगन्म महा' (ऋ ७, १२) इत्याग्नेये क्रतौ त्रैष्टुभस्यान्ते [7]आम्नातम्। तद्यथास्थानवचनं त्रैष्टुभमुक्त्वाऽनन्तरं माङ्गलमनुब्रूयात्। 'अतारिष्म' (ऋ ७, ७३) इति त्रैष्टुभस्यान्ते[8] 'ईळे द्यावा०' (ऋ १, ११२) इति जागतस्यान्ते आश्विने क्रतौ। उषस्ये क्रतौ माङ्गलमनाम्नातं[9], तत्रापि त्रैष्टुभस्यान्ते 'प्रति स्तोमेभिः' (ऋ ७, ८०) इति माङ्गलं[10] कौषीतके दृष्टम्। [11]ध्रुववचनात् शतादिषु संख्यासु[11] न संख्यायन्ते[12]। सूक्तैः शतं नोपपद्यते। न च तृचैरुपपद्यते। माङ्गलानीति[13] [14]संज्ञाया ज्ञानमेव[14] प्रयोजनम् ॥ ७ ॥

[स्वर्गकामस्य माङ्गलसूक्तसंज्ञाकरणम्]

सं जागृवद्भिरिति च यः प्रेष्यन् स्वर्गकामः ॥ ८ ॥

'सं जागृवद्भिः' (ऋ १०, ९१) इति एतत् च सूक्तं माङ्गलसंज्ञं[15] भवति चतुर्थं यथास्थाने भवति ध्रुवं च। यः प्रेष्यन् स्वर्गकामः यो यजमानो मरिष्यन् स्वर्गकामो यजते सर्वस्वारेणैकाहेन। च-शब्दो माङ्गलसमुच्चयार्थः[16] ॥ ८ ॥

---

१. नास्ति मूको। २. °दानां समा° मूको। ३. अतोऽर्ध° मूको। ४. °चमिव मूको। ५. मङ्गल° मूको। ६. यथास्थानात् ब[1]। ७-७. नास्ति ब[2] मै। †. मङ्ग° ब[1] पू। ८. मङ्गलनाम्नाम्नातं ब[1] पू; मङ्गलानामनाम्नां ब[2]; मङ्गलनामाम्नातं मै। ९. मङ्गलं मूको। १०. तु. शांश्रौ ६, ५, १३। ११-११. ध्रुववचनादिषु संख्या मै। १२. °यते ब[1]। १३. मङ्गलानीति मूको। १४-१४. संज्ञाय यज्ञोनमेव ब[2]; संज्ञा यज्ञानामेव मै। १५. मङ्गलसंज्ञं मूको। १६. मङ्गल° ब[2] मै पू।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

[प्रातरनुवाके तमोविनाशपर्यन्तम् ईळे द्यावीयसूक्तस्यावर्तनविधानम्]

ईळेद्यावीयमावर्तयेदा तमसोऽपघातात् ॥ ९ ॥

ईळेद्यावापृथिवीयम्[1] आवर्तयेत्[2] । आवर्तनकालः आ तमसोऽपघातात् । तमो रात्रिरूपम् । ज्योतिरह्नो रूपम् । ज्योतिषा तमो हन्यते । शतादिपरिमितपक्षे समाप्ते प्रातरनुवाके ईळेद्यावापृथिवीयमावर्तयेत्[3] । अपरिमितपक्षे तु तावदनुब्रूयाद् यावदुपहतं तमः इति । अस्मादारम्भात् तथा[4] प्रातरनुवाकस्योपाकरणं क्रियते, यथाऽपहते तमसि प्रोक्तं भवतीति ॥ ९ ॥

[विनष्टे तमसि आसनादुत्थाय प्रतिप्रियतममिति सूक्तस्योपसन्तानविधानम्]

काले उत्तमयोत्सृप्याऽऽसनान्मध्यमस्थानेन प्रति प्रियतममित्युपसन्तनुयात् ॥ १० ॥

काले अपहते तमसि ईळेद्यावीयस्य उत्तमया ऋचा उत्तमस्थानेन उत्तमस्वरेण 'प्रति प्रियतमम्' (ऋ ५.७५) एतत् सूक्तम् उपसन्तनुयात् उपसन्दध्यात् । [5]कालग्रहणाद् अभ्यास[5] एव विधिर्भवति । आवर्तयेदिति वचनाद् असन्ताने प्राप्ते उत्तमयोपसन्तनुयादित्युच्यते । आसनग्रहणाद् उत्सृप्य पुनरासीत ॥ १० ॥

[पुनरुत्थाय द्वाःस्थस्थूणयोर्मध्येऽवस्थाय परिधानसूक्तस्वरविधानम्]

पुनरुत्सृप्योत्तमयोत्तमस्थानेन परिदध्यादन्तरेण द्वार्ये स्थूणे । अनभ्याहतमाश्रावयन्निवाऽऽश्रावयन्निव ॥ ११ ॥

पुनरुत्सृप्य आसनादुत्सृप्य[6] पाङ्क्तस्य[7] उत्तमया ऋचा उत्तमस्थानेन उत्तमस्वरेण परिदध्यात् त्रिर्ब्रूयात् । अन्तरेण मध्यमेन । द्वार्ये स्थूणे विशाखाग्रे द्वार्ये स्थूणे उच्येते[8], तयोरन्तरेणोपविश्य परिदध्यात् । उत्तमया इति वचनात् तृचक्लृप्त्यामपि सूक्तं कृत्स्नं भवति । [9]उत्सृप्याऽऽसनात् कं प्रतीयाद् इति देशेऽप्राप्ते[9] तस्मादाह—अन्तरेण द्वार्ये स्थूणे इति । अनभ्याहतम् अभ्याहतमुल्बणं भवति आश्लिष्टम्[10] । अनभ्याहतम् अनुल्बणं [11]संश्लिष्टं मन्द्रस्वरेण[11] मध्यमस्वरस्य

---

१. ईळेद्यावीयम् ब[1] । २. आवर्तते ब[1] मै पू । ३. ईळे द्यावीय° ब[1] मै । ४. यथा मूको । ५-५. °ग्रहणाभ्यास मै ; ग्रहणं अभ्यास ब[1/2] पू । ६. नास्ति ब[2] । ७. उपान्तस्य मै । ८. नोच्यते मूको । ९-९. उत्सृप्यासन्तमति(°ती मै) यात् देशे प्राप्तं मूको । १०. अश्लि° ब[2] मै पू । ११-११. स(सं मै)श्लिष्टमन्द्र° ब[1] मै पू ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

सन्धानं मध्यमेन वा मन्द्रस्य सन्धानम्[1] । तदनभ्याहतं[2] यथा भवति, तथा वक्तव्यम् । अनुल्बणः सन्धिः आश्लिष्टो[3] भवति । कथमनभ्याहतं[4] भवतीति तदुच्यते—आश्रावयन्निव ब्रूयात् । एवमनभ्याहतं भवति । आश्रावणं तु कथमिति ओ श्रावयेति चत्वार्यक्षराणि उत्तरोत्तरमुच्चस्वराणि[5] [6]उच्यन्ते । एवमृगन्ते प्रणवादीन्युत्तरस्या† ऋचोऽक्षराण्युत्तरोत्तरमुच्चतराणि[6] अन्त्याक्षरप्राप्तेः वक्तव्यानि । एवमनभ्याहत आश्रावणेन तुल्यस्थानो भवति । आश्रावयन् इवेत्यध्यायान्तलक्षणोऽभ्यासो यथा ब्राह्मणे ॥ ११ ॥

[इति चतुर्थे पञ्चदशं खण्डम्]

चतुर्थोऽध्यायः समाप्तः ॥ ४ ॥

---

१. नास्ति ब[1] ।
२. तदभ्याहतं मूको ।
३. अश्लि° ब[2] मै पू ।
४. °मभ्याहतं मै ।
५. °मुच्चतराणि ब[2] मै ।
६-६. नास्ति ब[1] ।
†. °वादित्युत्त° मूको ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

अथ पञ्चमेऽध्याये प्रथमः खण्डः

(अग्निष्टोमाधिकारः)

[अध्वर्युणा प्रेषितस्य होतुरपोनप्त्रीयानुवचनस्वरविधानम्]

परिहितेऽप इष्य होतरित्युक्तोऽनभिहिङ्कृत्यापोनप्त्रीया अन्वाहेषच्छनैस्तरां परिधानीयायाः ॥ १ ॥

परिहिते प्रातरनुवाकस्य परिधाने कृते 'अप इष्य होतः' (तैसं ६,४,३,३; आपश्रौ १२, ५, २) इति अध्वर्युणा उक्तः अनभिहिङ्कृत्य अभिहिङ्कारमकृत्वा अपांनपाद् देवता यासां ता अपोनप्त्रीया ऋचः अन्वाह अनुब्रूयात्। परिदध्यादित्यधिकारे पुनः परिहितवचनम् अनुवचनयोः सम्बन्धार्थं सम्बन्धात् कर्तृदेशासनानि[1] समानानि भवन्ति। अध्वर्युवचनाद् यदि[2] मैत्रावरुणः प्रातरनुवाकमन्वाह तदाऽपोनप्त्रीया अपि स एवान्वाह। यस्मिन् देशे प्रातरनुवाकस्य परिधानं कृतं तस्मिन्नेव देशे अपोनप्त्रीया अन्वाह आसनस्य समानत्वात्। प्रातरनुवाकस्य स्थाने एव वाग्विसर्गो भवति। सम्प्रैषत्वादुक्त[3] इत्युच्यते। 'एतेन' (आश्रौ १, २, २३) इति प्राप्ते अभिहिङ्कारप्रतिषेधः। ईषच्छनैस्तरां परिधानीयायाः। तासां परिधानीयायाः यः स्वरस्तस्मात् स्वरादीषच्छनैस्तरां[4] भवति ॥ १ ॥

[अपोनप्त्रीयाणां निगदादीनामन्यासाञ्च ऋचां स्वरविधानम्]

तासां निगदादि शनैस्तरां ताभ्यश्चाऽऽ प्रसर्पणात् ॥ २ ॥

तासाम् अपोनप्त्रीयाणां स्वरो विधीयते। अन्यासामपि[5] पुनरुच्यते विभक्त्यन्तरनिर्देशार्थम्[6]। [7]निगदादि शनैस्तरां ताभ्यश्चाऽऽ प्रसर्पणात्[7]। निगदात् पूर्वं या ऋचः, तासामुक्तः स्वरः। ताभ्यश्च स्वरान्निगदादीनां[8] शनैस्तरां[9] स्वरो भवति। आ[10] प्रसर्पणाद् उत्तमयाऽनुप्रपद्यते[11]। तस्मिन् च-शब्दः समुच्चयार्थः।

---

१. अर्थदे° मूको। २. नास्ति ब[2] मै। ३. असं० मूको; तु. आपश्रौ १२, ५, २। ४. °स्तरो मूको। ५. तासामपि मूको। ६. विभक्त्यन्तनि° मूको। ७-७. °स्तरः स्वरो भवति प्रस° ब[1]। ८. स्वसन्नि° ब[1]; स्वस्थूरान्नि° ब[2] पू; तस्थूरान्नि° मै। ९. °स्तरः ब[1/2] मै; वुटितम् पू। १०. नास्ति मूको। ११. उत्तमायाऽनु° ब[1/2]; उत्तमाया अनुप्र° मै; वुटितम् पू; तु. आश्रौ ५, १, १८; ऋ १, २३, ८।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

परिधानीयास्वरादुक्तं शनैस्तराम् । ताभ्योऽपि च इह[1] शनैस्तरामिति । ईषदिति वचनाद् [2]उत्तमादुत्तमो मध्यमः स्वरो भवति निगदादीनाम् । 'तास्वध्वर्यो' (ऐब्रा २, २०; आश्रौ ५, १, १५) इति निगदः, तदादि मध्यमः स्वरः[2] ।

आ प्रसर्पणात् । प्रसर्पणं प्रपदनम् अर्थसामान्यात् । अपोनप्त्रीयाणाम् अधिकारादन्यदनधिकृतम्[3] । 'पूर्वया द्वारा सदः प्रसर्पन्ति' (आश्रौ ५, ३, २१) इत्येतदस्ति, अनधिकृतं हि तत् । तस्मादधिकृतमेव अर्थसामान्याद् गृह्यते । यथा 'नित्यं निनयनम्' (आश्रौ २, ७, ४) इत्यधिकृतमुपनयनं[4] गृह्यते । भवति प्रसर्पणम् प्रपदनम् 'उत्तमयाऽनुप्रपद्येत' (आश्रौ ५, १, १८) इति । आ एतस्मान्मध्यमः स्वरो भवति । अपोनप्त्रीयाप्रकरणे[5] प्रसर्पणं न विद्यते । तस्मात् प्रपदनमेव प्रसर्पणमित्युच्यते अर्थसामान्यात् । यथा 'नित्यं निनयनम्' (आश्रौ २,७,४) इति । 'लेखां त्रिरुदकेनोपनयेत्' (आश्रौ २, ६, १४) इत्येतदेवोप निनयनम्[6] । अर्थसामान्यात् नित्यं निनयनमस्ति, एवमिहापि द्रष्टव्यम् ॥ २ ॥

[प्रसर्पणात् परस्यानुवचनस्य मन्द्रस्वरविधानम्]

परं मन्द्रेण ॥ ३ ॥

प्रसर्पणात् परम् अनुवचनशेषं[7] मन्द्रेण स्वरेण ब्रूयात् । " 'एमा अग्मन् रेवतीर्जीवधन्याः (ऋ १०, ३०, १४-१५) इति द्वे" (आश्रौ ५, १, १९) इत्येते द्वे ऋचौ मन्द्रस्वरेण ब्रूयात् । इत्येते त्रयः स्वराः । अपोनप्त्रीयाणामित्युक्ताः । प्राङ् निगदादुत्तमः स्वरः । निगदादि मध्यमः स्वरः आ प्रसर्पणात् । परं मन्द्रेण ॥ ३ ॥

[प्रातःसवनस्य मन्द्रस्वरेण प्रयोक्तव्यत्वम्]

प्रातःसवनं च ॥ ४ ॥

अपोनप्त्रीयाभ्यः ऊर्ध्वं पाशुकं कर्म, तदादि प्रातःसवनमित्युच्यते । प्रातःसवनं मन्द्रेण प्रयोक्तव्यम् । च-शब्दो मन्द्राधिकारसमुच्चयार्थः । अनियमे प्राप्ते एते नियम्यन्ते अभिषवादिसवनसंस्थान्ताः[8] । तन्मध्ये निपतितं पाशुकं कर्म, [9]ऐष्टिकं कर्म[9] सवनस्वरेणैव भवति सोमाङ्गत्वात् ॥ ४ ॥

---

१. नास्ति मै । २-२. नास्ति मै । ३. °रादन्यधि° ब[1]; त्रुटितम् पू । ४. इत्युक्तमधिकृत° मै । ५. आपोनप्त्रीया [°य मै] प्र° मूको । ६. °तदेव निनय° मूको । ७. °वाचन° ब[1] मै पू । ८. °वनसंस्थात् मूको । ९-९. नास्ति ब[1] ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

[प्रथमाया उत्तरासाञ्च ऋचामनुवचनविधानम्]

अध्यर्धकारं प्रथमामृगावानुत्तराः ॥ ५ ॥

प्रथमाम्[1] ऋचम् अध्यर्धकारं ब्रूयात्, यथा सामिधेनीषु। ऋगावानपक्षे द्वितीयामृचमुक्त्वाऽवस्येत्। 'तस्य त्रिः प्रथमां सन्ततमन्वाह' (ऐब्रा २, १९) इति श्रुतिः। ऋगावानमुत्तराः[2] प्रथमाया उत्तरा या ऋचस्ता ऋगावानं ब्रूयात्, यथा प्रवर्ग्ये ॥ ५ ॥

[वृष्टिकामस्योत्तरासामृचामर्द्धर्चावसानेनानुवचनविकल्पविधानम्]

वृष्टिकामस्य प्रकृत्या वा ॥ ६ ॥

वृष्टिकामस्य यजमानस्य प्रकृत्या वा उत्तरा अनुब्रूयाद् अर्द्धर्चावसानेन। 'तत् सन्ततमनुब्रूयात्' (ऐब्रा २, १९) इति श्रुतिः। उत्तरासामेव विकल्पः। वेत्यनुच्यमाने प्रथमादिषु प्रकृत्या स्यात् ॥ ६ ॥

[प्रकृतिभावे ऋचां पूर्वेष्वर्द्धर्चेषु लिङ्गाकाङ्क्षाविधानम्]

प्रकृतिभावे पूर्वेष्वासामर्द्धर्चेषु लिङ्गानि काङ्क्षेत् ॥ ७ ॥

प्रकृतिभावे सति पूर्वेष्वर्द्धर्चेषु विरम्यावसानं कृत्वा आसाम् ऋचां यानि लिङ्गानि तानि काङ्क्षेत्[3], यावत् कर्म[4] सम्पद्यते तावदास्ते। 'आवर्वृततीरध नु द्विधाराः' (ऋ १०, ३०, १०), 'इत्यावृत्तास्वेकधनासु' (ऐब्रा २, २०) इत्येवमादीनि लिङ्गानि। लाघवार्थः सूत्रारम्भः। तत्र तत्र अर्धर्चं आरमेद् इति वक्तव्यं भवति। ऋगावाने ऋगन्तेन चावस्य लिङ्गानि काङ्क्षेत्[5] ॥ ७ ॥

[अनुवचने दशानामृचां विधानम् आवृत्तास्वेकधनास्वप्सु दशम्या ऋचो विकल्पकथनञ्च]

प्र देवत्रा ब्रह्मणे गातुरेत्विति नव हिनोता नो अध्वरं देवयज्येति दशमीम् ॥ ८ ॥

आवर्वृततीरध नु द्विधारा इत्यावृत्तास्वेकधनासु ॥ ९ ॥

'प्र देवत्रा ब्रह्मणे गातुरेतु' (ऋ १०, ३०, १-९) इति नव ऋचः, 'हिनोता नो अध्वरं देवयज्या' (ऋ १०, ३०, ११) इति दशमीम् ऋचमनुब्रूयात्।

---

१. तु. ऋ १०, ३०, १। २. तु. ऋ १०, ३०, २९। ३. काक्षयेत् मूको। ४. तं कर्म ब[2] मै पू। ५. काङ्क्षेत ब[1]; काङ्क्षते ब[2] मै; काङ्क्षत पू।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

दशमीग्रहणे अक्रियमाणे द्वयोरेव ह्यावृत्तास्वेकधनासु[1] वचनं स्यात् । 'आवर्वृततीश्च नु द्विधाराः' (ऋ १०, ३०, १०) इति **एतामनुब्रूयाद् आवृत्तास्वेकधनासु**[2] ॥ ८-९ ॥

[प्रतिदृश्यमानास्वेकधनास्वप्सु अनुवचनमन्त्रकथनम्]

प्रति यदापो अदृश्रमायतीरिति प्रतिदृश्यमानासु ॥ १० ॥

'[3]प्रति यदापो अदृश्रमायतीः' (ऋ १०, ३०, १३) इति[3] [4]**प्रतिदृश्यमानासु एकधनासु**[4] ॥ १० ॥

[उपायतीषु समायतीषु चाप्सु अनुवचनमन्त्रकथनम्]

आ धेनवः पयसा तूर्ण्यर्थाः ॥ ११ ॥

समन्या यन्त्युपयन्त्यन्या इति ॥ १२ ॥

" 'आ धेनवः पयसा तूर्ण्यर्थाः' (ऋ ५,४३,१) इत्युपायतीषु (ऐब्रा २,२०), 'समन्या यन्त्युपयन्त्यन्याः' (ऋ २, ३५, ३) इति समायतीषु" (ऐब्रा २, २०) **इति हि ब्राह्मणम् ॥ ११-१२ ॥**

[तीर्थदेशे होतृचमसेऽपां पूर्यमाणे मन्त्रानुवचनं समाप्य प्रणवेनोपरमश्च]

तीर्थदेशे होतृचमसे अपां पूर्यमाण आपो न देवीरुप यन्ति होत्रियमिति समाप्य प्रणवेनोपरमेत् ॥ १३ ॥

तीर्थदेशे होतृचमसे अपां पूर्यमाणे 'आपो न देवीरुप यन्ति होत्रियम्' (ऋ १, ८३, २) इति **एतामनुब्रूयात्** । **एताम् ऋचं** समाप्य प्रणवेनोपरमेत् । 'होतृचमसे समवनीयमानासु[5] अन्वाह वसतीवरीष्वेकधनासु च' (ऐब्रा २, २०) **इति ब्राह्मणम् । समाप्य-ग्रहणे अक्रियमाणे अर्द्धर्चान्ते प्रणवेनावसानं स्यात् ॥ १३ ॥**

[आगतमध्वर्युं प्रति होतुः प्रश्नेऽध्वर्युणा प्रत्युक्तस्य होतुर्निगदवचनं प्रतिनिष्क्रमणञ्च]

आगतमध्वर्युमवेरपोऽध्वर्या३ उ इति पृच्छति । उतेमनन्नमुरिति प्रत्युक्तो निगदं ब्रुवन् प्रतिनिष्क्रामेत् ॥ १४ ॥

---

१. व्यावृ(वृ ब[1])त्तास्वे° मूको । २. नास्ति मूको । ३-३. नास्ति मको । ४-४. नास्ति मै । ५. समवनीयमाने(°त्रे मै) मूको ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

आगतमध्वर्युम् 'अवेरपोऽध्वर्या३ उ' (ऐब्रा २, २०) इति पृच्छति होता। त्रिमात्रा प्लुतिर्भवति। 'उतेमनन्नमुः' (ऐब्रा २, २०) इति अध्वर्युणा प्रत्युक्तो होता वक्ष्यमाणं निगदं ब्रुवन् अध्वर्युं प्रति निष्क्रामेत्। 'प्रत्युत्थेया वा आपः' (ऐब्रा २, २०) इति हि ब्राह्मणम्। निगदग्रहणे क्रियमाणे ब्रुवन् प्रतिनिष्क्रामेदिति वचनात् कर्मकरणत्वम्[1]। कर्मकरणत्वादुपांशु[2] स्यात् ॥ १४ ॥

[अनुच्छ्वसतो होतुर्निगदवचनमपां पथ उत्तरेणावस्थानञ्च]

तास्वध्वर्यो इन्द्राय सोमं सोता मधुमन्तं वृष्टिवनिं तीव्रान्तं बहुरमध्यं वसुमते रुद्रवत आदित्यवत ऋभुमते विभुमते वाजवते बृहस्पतिवते विश्वदेव्यावत इत्यन्तमनवानमुक्त्वोदगासां पथोऽवतिष्ठेत ॥ १५ ॥

'तास्वध्वर्यो' (ऐब्रा २, २०) इति निगदो मध्यमस्वरेण। विश्वदेव्यावत इत्यन्तं निगदम् अनवानमुक्त्वा उदगासां पथोऽवतिष्ठेत[3]। आसामेव यः पन्थास्तमुत्तरेण[4] अवतिष्ठेत[3]। इत्यन्तमिति वचनाद् उत्तरो निगदशेषः। अनियतावसानत्वान्निगदस्यानवानं विधीयते। उदगवस्थानमव्यवायार्थम् ॥ १५ ॥

[समीप आनीतास्वप्सु होतुरनुगमनम्]

उपानीतास्वन्वावर्तेत ॥ १६ ॥

उप समीपे आनीतासु अन्वावर्तेत अनुगच्छेत्[5] ॥ १६ ॥

[निगदशेषमुक्त्वा द्वारदेशे तृचस्यानुवचनम्]

यस्येन्द्रः पीत्वा वृत्राणि जङ्घनत् प्र सजन्यानि तारिषो३मम्बयो यन्त्यध्वभिरिति तिस्रः ॥ १७ ॥

'यस्येन्द्रः पीत्वा' (ऐब्रा २, २०) इति निगदशेष आम्नातो ब्राह्मणेऽपि। अनुप्रपदनार्थो[6] निगदः। तस्मादर्द्धर्चेऽपि[7] उत्तरेण सह सन्दध्यात्। उत्तरो हि तृचः प्रपदनार्थ एव। 'ता एताः सर्वा एव अनुब्रुवन्ननुप्रपद्येत' (ऐब्रा २, २०) इति श्रुतिः। [८]तस्मात् तृचान्तेन प्रपदनमुक्तं सूत्रकारेण 'उत्तमयाऽनु[८]-

---

१. °करण्यम् ब[२] भै पू; °करणं ब[१]। २. °करणादु° मूको। ३. °तिष्ठेत् मूको। ४. पन्थानमुत्त° मूको। ५. °गच्छेत मूको। ६. अनुव्र (°व भै) जायो (°घो भै) मूको। ७. °दर्धर्चेऽपि मूको। ८-८. नास्ति ब[१]।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

'प्रपद्येत' (आश्रौ ५, १, १८) इति[1]। तस्माद् द्वारदेशं प्राप्य तृचो वक्तव्यो भवति। स तथा कृत्स्नतां[2] प्रपन्नो भवति। 'अम्बयो यन्त्यध्वभिः' (ऋ १, २३, १६-१८) इति एता तिस्र ऋचः। निगदान्तेन प्रणवेनावसानं कृत्वा [1]तूष्णीमेव गत्वा[1] द्वारदेशं प्राप्यैतं तृचमनुब्रूयात् ॥ १७ ॥

[तृचस्योत्तमयर्चा हविर्धानमण्डपे प्रपन्नानामपामनुप्रपदनविधानम्]

उत्तमयाऽनुप्रपद्येत ॥ १८ ॥

अस्य तृचस्य उत्तमया ऋचा हविर्धाने प्रपन्ना [अपः] अनुप्रपद्येत, कृत्स्नेन प्रपन्नो भवतीत्यभिप्रायः ॥ १८ ॥

[प्रपदनमन्त्रानुवचनमुत्तरयर्चा परिधानमुत्तरां द्वार्यामासादनं राजानमभिमुखमुपवेशनञ्च]

एमा अग्मन् रेवतीर्जीवधन्या इति द्वे सन्नासूत्तरया परिधायोत्तरां द्वार्यामासाद्य राजानमभिमुख उपविशेदनिरस्य तृणम् ॥ १९ ॥

'एमा अग्मन् रेवतीर्जीवधन्याः' (ऋ १०, ३०, १४-१५) इति एते[1] द्वे ऋचौ अनुब्रूयात्। सन्नासु स्थापितासु वसतीवरीष्वेकधनासु च उत्तरया ऋचा 'अग्मन्नाप उशतीः' (ऋ १०, ३०, १५) इत्येतया परिधानं कृत्वा पूर्वस्य द्वारस्य उत्तरां [2]द्वार्यामासाद्यावष्टभ्य राजानमभिमुख उपविशेदनिरस्य तृणम् तृणनिरसनमकृत्वा† 'उपविशेत्' (आश्रौ १, ३, ३१) इति वचनान्निरसने प्राप्ते‡ प्रतिषेधः। यद्यप्यपरया द्वारा प्रपद्य परिधानं कृतं पूर्वयैव द्वारोत्तरां द्वार्यामासाद्योपविशेत्[4] न दक्षिणां द्वार्यामासाद्योपविशेत्। ग्रहेषु हूयमानेषु व्यवायः स्यात्। तस्मादुत्तरां द्वार्यामित्याह। यद्यपरस्मिन्[5] द्वारे उपविशति उत्तरामिति न वक्तव्यम्। तत्र हि व्यवायो दोषो न विद्यते यस्मात् ॥ १९ ॥

॥ इति पञ्चमे प्रथमं खण्डम् ॥

१-१. नास्ति ब[1]। २. कृत्स्नां ब[1] मै पू; कृत्स्न ब[2]। ३. इति ब[1] पू। ४-४. द्वार्यामासाद्योपविशेत् ब[1]। †. निरसन° ब[2] मै पू। ‡. तु. आश्रौ १, ३, ३२। ५. यद्यप्यपरस्मिन् ब[1] पू।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

अथ पञ्चमेऽध्याये द्वितीयः खण्डः

[उपांशुग्रहहोममन्त्रकथनमनुप्राणनविधानञ्च]

उपांशुं हूयमानं प्राणं यच्छ स्वाहा त्वा सुहव सूर्याय प्राण प्राणं मे यच्छेत्यनुमन्त्र्य उः इत्यनुप्राण्यात् ॥ १ ॥

अभिषवे कृते उपांशुग्रहो हूयते। तं हूयमानं 'प्राणं यच्छ' (ऐब्रा २, २१) इति यथासमाम्नातेन अनुमन्त्रणं कृत्वा हूयमानमन्वीक्षमाणो मन्त्रमुक्त्वा अनुच्छ्वस्यैव यथाप्रदर्शितम् अनुप्राण्यात्[1]। [2]अनुप्राण्यादित्युक्ते संशयो भवति[2], [3]तस्मात् प्रदर्शनम्[3] ॥ १ ॥

[अन्तर्यामहोममन्त्रकथनमभ्यपाननविधानञ्च]

अन्तर्याममपानं यच्छ स्वाहा त्वा सुवह सूर्यायापानापानं मे यच्छेत्यनुमन्त्र्य ऊँ इति चाभ्यपान्यात् ॥ २ ॥

[2]अन्तर्यामं हूयमानम् 'अपानं यच्छ' (ऐब्रा २, २१)[2] [4]इति यथासमाम्नातेनानुमन्त्रणं कृत्वाऽनुच्छ्वस्यैव यथाप्रदर्शितं[4] च अभ्यपान्यात्[5]। अभ्यपान्यादित्युक्ते संशयः स्यात्, तस्मात् प्रदर्शनम्। च-शब्दः समुच्चयार्थः अनुप्राण्यादभ्यपान्याच्चेति। अस्मादारम्भादनुप्राण्यानुमन्त्रणं कृत्वाऽभ्यपान्यात्। एवं कृतेऽनुप्राणनादनन्तरम्[6] अभ्यपाननं[7] कृतं भवति ॥ २ ॥

[उपांशुसवनसंज्ञकस्य ग्राव्णोऽभिमर्शनमन्त्रकथनं वाग्विसर्गविधानञ्च]

उपांशुसवनं ग्रावाणं व्यानाय त्वेत्यभिमृश्य वाचं विसृजेत ॥ ३ ॥

उपांशुः अभिषूयते येन सः[4] [2]उपांशुसवनो ग्रावा। तम्[2] उपांशुसवनं च ग्रावाणम्, 'व्यानाय त्वा' (ऐब्रा २, २१) इति एतेन मन्त्रेण अभिमृश्य

---

१. नास्ति मूको। २-२. नास्ति ब[2]। ३-३. नास्ति मूको। ४-४. नास्ति ब[1/2]। ५. नास्ति ब[1]। ६. °नुप्राणाद° ब[1] मै। ७. °पानं मै।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

प्रातरनुवाकस्य स्थाने उपविश्य 'भूर्भुवः स्वरिति वाचं विसृजेत'[1] इति । परिधानादनन्तरं[2] वाग्विसर्गे प्राप्ते इह वचनाद् भवति ॥ ३ ॥

[पवमानाय सर्पणस्य विधेः कथनम्]

पवमानाय सर्पणेऽन्वक्छन्दोगान्मैत्रावरुणो ब्रह्मा च नित्यौ ॥ ४ ॥

पवमानो नाम स्तोत्रम् । पवमानाय पवमानस्य[3] अर्थे सर्पणं भवति । तस्मिन् सर्पणे विधिरुच्यते । अन्वक् छन्दोगान्मैत्रावरुणो ब्रह्मा च नित्यौ । [4]छन्दोगाननुगतौ† मैत्रावरुणो ब्रह्मा च नित्यौ[4] अच्युतौ भवतः । पवमानाय सर्पणे इति वचनाद् अन्यस्मिन् सर्पणे एष विधिर्न भवति । यथा दशमेऽहनि 'अध्वर्युमुखाः समन्वारब्धाः सर्पन्त्या तीर्थदेशात्' (आश्रौ ५, २, ६) इति । किं चान्यत् 'स्तुत आर्भवे पवमाने' (आश्रौ ५, १७, ४) इत्युक्ते अचोदितमपि सर्पणं भवति, तदर्थत्वात् । नित्यवचनाददीक्षितावप्येतौ नित्यौ[5] भवतः, अथोत्तरत्र[6] दीक्षितग्रहणादेतयोरपि दीक्षितयोरेव सर्पणं स्यात् ॥ ४ ॥

[मैत्रावरुणब्रह्मणोर्मध्ये दीक्षितानामृत्विजां सर्पणम्]

तावन्तरेणेतरे दीक्षिताश्चेत् ॥ ५ ॥

तावन्तरेण ब्रह्ममैत्रावरुणावन्तरेण मध्येन इतरे ब्राह्मणाच्छंस्यादयः सर्पन्ति, चेद् यदि दीक्षिता भवन्ति । [7]तौ चेदिति वचनाद्[7] अदीक्षिता न सर्पन्ति ॥ ५ ॥

[विप्रुड्ढोमानन्तरमध्वर्युप्रभृतीनां तीर्थदेशपर्यन्तं सर्पणम्]

द्रप्सश्चस्कन्देति द्वाभ्यां विप्रुड्ढोमौ हुत्वाऽध्वर्युमुखाः समन्वारब्धाः सर्पन्त्या तीर्थदेशात् ॥ ६ ॥

'द्रप्सश्चस्कन्द' (ऋ १०, १७, ११ ; १२) इति द्वाभ्याम् ऋग्भ्यां विप्रुषां होमौ विप्रुड्ढोमौ हुत्वा अध्वर्युर्मुख्यो येषां ते अध्वर्युमुखाः सम्यग् अव्युच्छित्या[8] अन्वारब्धाः सर्पन्ति गच्छन्तीति तीर्थदेशे बहिष्पवमानं स्तुवन्ति । पादग्रहणाद् ऋक् प्राप्ता, तस्मादाह—द्वाभ्यामिति । विप्रुड्ढोमाविति संज्ञा । ज्ञाने धर्मः ।

---

१. विसृजेत् मूको ; तु. आश्रौ २, ५, १३ । २. तु. आश्रौ ५, १, १९ । ३. नास्ति मूको । ४-४. नास्ति ब[1] । †. छन्दो यथानुगतौ ब[2] ; छान्दोगाप्यनुगतौ मै पू । ५. नित्यौ च ब[2] मै पू । ६. तु. आश्रौ ५, २, १ । ७-७. नो चेत् मै । ८. °गव्युत्थित्या मूको ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

हुत्वेति वचनाद् होमात् प्रागन्वारम्भो न विद्यते। अध्वर्युमुखा इति वचनाद् येन मार्गेण अध्वर्युर्गच्छति तेन गन्तव्यम् ॥ ६ ॥

[बहिष्पवमानस्तोत्रायोद्गातारमभिमुखानां सर्वेषामुपवेशनम्]

तत्स्तोत्रायोपविशन्त्युद्गातारमभिमुखाः ॥ ७ ॥

तत्स्तोत्राय[1] स्तवनायार्थे उपविशन्ति **सर्वे** उद्गातारमभिमुखाः। तत्स्तोत्रायेति वचनाद् [2]यावत् स्तुवन्ति तावदुपविशन्ति। अत्र सहकारिभिः सह उपवेशनं चोदितम्, तस्मान्निरसनोपवेशने न[2] भवतः। प्राङ्मुखत्वे प्राप्ते उद्गातारमभिमुखा इत्याह ॥ ७ ॥

[बहिष्पवमानस्तोत्रायोपविष्टानां सर्वेषां होतृकृतमनुमन्त्रणम्]

तान् होताऽनुमन्त्रयतेऽत्रैवाऽऽसीनो यो देवानामिह सोमपीथो यज्ञे बर्हिषि वेद्याम्। तस्यापि भक्षयामसि मुखमसि मुखं भूयासमिति ॥ ८ ॥

तान् स्तोत्रायोपविष्टान्[3] होताऽनुमन्त्रयते। तान् अन्वीक्षमाणो ब्रूयात्। अत्रैव यत्र पूर्वमुपविष्टेन कर्म कृतम् 'उत्तरां द्वार्यामासाद्य' (आश्रौ ५, १, १९) इति। 'अत्रैवासीनो[4] यो देवानाम्' (ऐब्रा २,२२) इति यथासमाम्नातेन। होतृग्रहणं सर्वेषामधिकारात्। अत्रैवासीन इत्यधिकृतमासनमुपदिशति[5]। एव-शब्दोऽवधारणार्थः। अधिकृतमासनमवधारयति। अधिकृतोपवेशनादेव निरसनोपवेशने न भवतः। 'तस्मात् तत्रैवासीनोऽनुमन्त्रयेत' (ऐब्रा २, २२) इति श्रुतिः ॥ ८ ॥

[दीक्षिते होतरि तस्य स्तोत्रोपस्वाराय गमनम्]

दीक्षितश्चेद् व्रजेत् स्तोत्रोपस्वाराय ॥ ९ ॥

दीक्षितश्चेद् होता भवति, अनुमन्त्रणं कृत्वा व्रजेत् गच्छेत् स्तोत्रोपस्वाराय अर्थे। स्तोत्रोपस्वारो नाम याजमानम्[6]। याजमानार्थे[6] व्रजेत्, [7]न तु सर्पेत्[7]। 'यत् सर्पेदृचमेव तत् साम्नोऽनुवर्तमानं कुर्यात्' (ऐब्रा २,२२) इति श्रुतौ प्रतिषेधात् ॥ ९ ॥

[दीक्षिते होतरि उत्तरयोः सवनयोस्तस्य सर्पणविधानम्]

सर्पेच्चोत्तरयोः सवनयोः ॥ १० ॥

---

१. ते स्तोत्राय ब[१२] पू। २-२. नास्ति ब[२]। ३. स्तोत्रोपवि° मूको। ४. तत्रैवा° इति ब्राह्मणपाठः (ऐब्रा २, २२)। ५. °सनमुपविशति ब[१]। ६. यज° मूको। ७-७. अनुस(°त्स मै)र्पेत् मूको।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

दीक्षितश्चेद् होता सर्पेद् उत्तरयोः सवनयोः। च-शब्दः होता दीक्षितश्चेदित्यधिकारसमुच्चयार्थः ॥ १० ॥

[ब्रह्मप्रशास्त्रोरतिसर्जनविधानम्]

ब्रह्मन् स्तोष्यामः प्रशास्तरिति स्तोत्रायातिसर्जितावतिसृजतः ॥११॥

ब्रह्मन् स्तोष्यामः प्रशास्तः इत्येतदतिसर्जनम्। [1]एतेनातिसर्जनेन प्रस्तोता[1] स्तोत्राय स्तवनाय अर्थे अतिसर्जयति[2] अनुज्ञापयति ब्रह्माणं प्रशास्तारं च। तौ अतिसर्जितौ अनुज्ञापितौ अतिसृजतः अनुजानीतः[3]। [4]तयोरतिसर्जनविधानमनुक्रमेण वक्ष्यते। स्तोत्रायेति पुनरुच्यते पवमानाधिकारात्[5] सर्वस्तोत्रेषु प्राप्त्यर्थम् ॥ ११ ॥

[प्रातःसवने ब्रह्मणोऽतिसर्जनम्]

भूरिन्द्रवन्तः सवितृप्रसूता इति जपित्वों स्तुध्वमिति ब्रह्मा प्रातःसवने ॥ १२ ॥

भूरिन्द्रवन्तः सवितृप्रसूताः इत्यन्तं मन्त्रं जपित्वा ओं स्तुध्वम् इत्युच्चैर्ब्रह्मा अतिसृजति प्रातःसवने। जपित्वेति वचनादुपांशु। अतिसर्जनमुच्चैः। उभयोरधिकाराद् ब्रह्मेत्युच्यते। प्रातःसवनग्रहणं माध्यन्दिनेऽविवक्षार्थम्[5]। प्रातःसवनग्रहणे[6] अक्रियमाणे अयं विधिर्माध्यन्दिनार्थ[7] एव स्यात्।

[माध्यन्दिने तृतीयसवने आग्निमारुतादूर्ध्वञ्चातिसर्जनविधानम्]

भुव इति माध्यन्दिने स्वरिति तृतीयसवने भूर्भुवः स्वरिन्द्रवन्तः सवितृप्रसूता इत्यूर्ध्वमाग्निमारुतात् ॥ १३ ॥

भुव इन्द्रवन्तः सवितृप्रसूताः इति जपित्वा ओं स्तुध्वम् इत्यतिसृजति ब्रह्मा माध्यन्दिने। व्याहृतिसमानजातिन्यायात् शेषमधिकारात्समानमेव[8]। तद् दर्शयति—भूर्भुवः स्वरिन्द्रवन्तः सवितृप्रसूता इत्यूर्ध्वमाग्निमारुतात् इति। प्रातःसवनाधिकारान्माध्यन्दिनग्रहणम्। स्वरिति तृतीयसवने। स्वरिन्द्रवन्तः सवितृप्रसूता इति जपित्वा ओं[9] स्तुध्वम् इति अतिसृजति ब्रह्मा तृतीयसवने। व्याहृतिस्थाने व्याहृतिर्भवति। शेषं समानम्। तृतीयसवनग्रहणं माध्यन्दिनाधिकारात्। भूर्भुवः

१-१. °मेतेन प्रस्तोता ब[2]। २. अतिसृजति मूको। ३. अनुज्ञापयेत् मूको। ४-४. नास्ति ब[2]। ५. मध्यन्दिनविव° मूको। ६. °वने ब[1]। ७. मध्य° ब[1]। ८. °धिकारा(°र मै) मानत्वमेव मूको। ९. नास्ति मै।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

स्वरिन्द्रवन्तः सवितृप्रसूता इति जपित्वा ओं[1] स्तुध्वम् इत्यतिसृजति ब्रह्मा ऊर्ध्वमाग्निमारुतात्। स्वरिति तृतीयसवन इति प्राप्त[2] इदमारभ्यते। सर्वासां व्याहृतीनाम् आम्नातत्वात्[3] पुनरिन्द्रवन्तः [4]सवितृप्रसूता इति[4] शब्दः पठ्यते। अन्यथा यावदुक्तोऽयं जपः स्यात् ॥ १३ ॥

[मैत्रावरुणस्यातिसर्जनविधानम्]

स्तुत देवेन सवित्रा प्रसूता ऋतं च सत्यं च वदत। आयुष्मत्य ऋचो मा गात तनूपात् साम्न ओमिति जपित्वा मैत्रावरुणः स्तुध्वमित्युच्चैः ॥ १४ ॥

स्तुत देवेन इति यथाम्नातं जपित्वा मैत्रावरुणः स्तुध्वमित्युच्चैरतिसृजति। जपित्वेति वचनादुपांशु। शेषमुच्चैः। मैत्रावरुणग्रहणं ब्रह्मणोऽधिकारात्। 'प्रणवाद्युच्चैरूर्ध्वं वा प्रणवात्' (आश्रौ १, १२, १४; १५) इति सर्वत्र[5] विकल्पे प्राप्ते विकल्पप्रतिषेधार्थमुच्चैरित्युच्यते। 'स्तोत्रायातिसर्जितावतिसृजतः' (आश्रौ ५, २, ११) इत्यधिकारात् सर्वस्तोत्रेष्वेव भवति। ऊर्ध्वमाग्निमारुतादिति ब्रह्मण एव ॥ १४ ॥

॥ इति पञ्चमे द्वितीयं खण्डम् ॥

---

१. नास्ति मै। २. प्राप्तम् ब[1,2] पू। ३. आम्नातं मूको।
४-४. नास्ति मूको। ५. नास्ति ब[1] पू।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

अथ पञ्चमेऽध्याये तृतीयः खण्डः

[सवनीयपशुना प्रचरणविधानम्]

अथ सवनीयेन पशुना चरन्ति ॥ १ ॥

अथ अनन्तरम् पवमानादनन्तरम्। सवनेषु भवः सवनीयः। सवनीयेन पशुना चरन्ति प्रचरन्ति ऋत्विज इति। एतदधिकृतं वेदितव्यम् इत उत्तरं यद् वक्ष्यामः। सवनीय इति संज्ञार्थम्। 'अथ सवनीयाः' (आश्रौ १२, ७, १) इत्युक्ते एतस्य स्थाने भवति। [1]सवनीयाः पुरोळाशा अपि विद्यन्ते। तस्मात् पशुग्रहणम्[1] ॥ १ ॥

[देवतानुरूपेण पशुना प्रचरणम्]

[2]यद्देवत्यो† भवति[2] ॥ २ ॥

[1]प्रकृतौ विकृतौ च यद्देवत्यः पशुराम्नातो भवति[1], तद्देवत्येन चरन्ति। लाघवार्थः सूत्रारम्भः। सर्वत्र [1]पश्वादेशे क्रियमाणे[1] [4]महान् ग्रन्थः[4] स्यात्। बहवः पशुकल्पाः ऋतुपशवः[5] एकादशिनाः[6] आग्नेय एव वा[7] इत्येवमादयः। तस्मादिदमुच्यते ॥ २ ॥

[ऋत्वनुरूपाणां पशूनां विधानम्]

आग्नेयोऽग्निष्टोम ऐन्द्राग्न उक्थ्ये द्वितीय ऐन्द्रो वृष्णः षोळशिनि तृतीयः सारस्वती मेष्यतिरात्रे चतुर्थी ॥ ३ ॥

अग्निष्टोमसंस्थे क्रतौ आग्नेयः [8]पशुः सवनीयो[8] भवति। 'यद्देवत्यो भवति' (आश्रौ ५, ३, २) इत्येतेनैव सिद्ध इदमुच्यते, ऋतुपशुविवक्षार्थम्। ऐन्द्राग्नः पशुः उक्थ्यसंस्थे क्रतौ द्वितीयो भवति—आग्नेयश्च ऐन्द्राग्नश्च। उक्थ्यग्रहणमग्निष्टो-

---

१-१. नास्ति ब[1] पू। २-२. नास्ति ब[1] पू। †. यद्देवतो° BI आन., तु. आश्रौ ५, ३, ४; १२, ७, २। ३-३. °देशोऽक्रिय° मै। ४-४. महाग्रन्थः ब[1]। ५. तु. आश्रौ ५, ३, ४; १२, ७, २। ६. तु. आश्रौ ३, ७, १५; १२, ७, ६। ७. तु. आश्रौ १२, ७, ३। ८-८. पशुसव° मूको।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

माधिकारात्। द्वितीयग्रहणे अक्रियमाणे ऐन्द्राग्न एव[1] स्यात्। ऐन्द्रो वृष्णिः मेषः[2] षोडशिसंस्थे क्रतौ तृतीयो भवति—आग्नेय ऐन्द्राग्न ऐन्द्र इति। तृतीयग्रहणे अक्रियमाणे ऐन्द्र एव स्यात्। सारस्वती मेषी अतिरात्रसंस्थे क्रतौ चतुर्थी भवति—आग्नेयः ऐन्द्राग्नः ऐन्द्रः सारस्वती इति। चतुर्थीग्रहणे अक्रियमाणे सारस्वती एव स्यात् ॥ ३ ॥

[ऋत्वनुरूपपशुकथनोपसंहारः]

इति क्रतुपशवः ॥ ४ ॥

[3]आग्नेयाद्या ये ते[3] क्रतुपशवः इत्युच्यन्ते। 'क्रतुपशवो वाऽत्यन्तम्' (आश्रौ १२, ७, २) इत्युक्ते एतेषां ग्रहणम् ॥ ४ ॥

[चात्वालमार्जनपर्यन्तं दण्डप्रदानवर्जं परिव्ययणादि सर्वं कर्म अग्नीषोमीयविधिना कार्यम्]

परिव्ययणाद्युक्तमग्नीषोमीयेणाऽऽ चात्वालमार्जनाद् दण्डप्रदानवर्जम् ॥ ५ ॥

परिव्ययणादि परिव्ययणमादिं[4] कृत्वा उक्तं व्याख्यातम् अग्नीषोमीयेण[5] पशुना कर्म। आ चात्वालमार्जनात् यावच्चात्वालमार्जनं दण्डप्रदानं वर्जयित्वा। अञ्जनादि प्राप्तं तस्मादाह—परिव्ययणादीति। अग्नीषोमीयेणातिदेशाद् उत्तरवेद्यां कर्म भवति आ प्रवृताऽऽहुतिहोमात्[6]। अन्यथा पशुनाऽतिदेशाद् वेदिश्रोण्यां स्यात्। आ चात्वालमार्जनादिति वचनात् सदसि सिद्धं भवति। अन्यथा वेदिश्रोण्यां स्यात्। अतिदेशाद् दण्डप्रदानमपि प्राप्तम्। तत् प्रतिषिध्यते ॥ ५ ॥

[उपवेशनादि कृत्वा परिव्ययणीयाया ऋचस्त्रिर्वचनम्]

उपविश्याभिहिङ्कृत्य परिव्ययणीयां त्रिः ॥ ६ ॥

उपविश्य निरसनोपवेशने कृत्वा[7] अभिहिङ्कृत्य अभिहिङ्कारं कृत्वा। परिव्ययणार्था ऋक् परिव्ययणीया। 'युवा सुवासाः' (ऋ ३, ८, ४) इत्येताम् ऋचं त्रिर्ब्रूयात्। [8]'पश्चात् पाशुबन्धिकाया वेदेरुपविश्य'[8] (आश्रौ ३, १, ८) इति [9]सिद्धेऽप्युपवेशने पुनरुपविश्येत्यधिकारार्थः[9]। उत्तरस्य कर्मणः यस्य स्थानमासनं वा अप्रतिषिद्धं[10], तस्मिन्नासनप्राप्त्यर्थम्। 'यथावस्थितमुपाकरणाय[11] यदक्रन्द

---

१. नास्ति मै। २. मेषो भवति मूको। ३-३. आग्नेयाद्येते मूको।
४. °मादि ब[2]। ५. °मीयेण (कर्मणा) मै। ६. प्रवृताऽऽज्याहुति° मूको;
तु. आश्रौ ३, १, १३। ७. कृत्वा उपविश्य मूको। ८-८. पश्चादुत्तरवेदे° मूको।
९-९. °वेशनमुपविश्ये° मै। १०. प्रति° मै। ११. तमवस्थित° BI आन.।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

इत्येकादशिभिः स्तौति' (आश्रौ १०, ८, ५) इत्येतदुपविश्य वक्तव्यमधिकारात्। 'नाभिहिङ्कारान्यासाववहुषु' (आश्रौ १, २, २४) इति प्रतिषेधे प्राप्ते अभिहिङ्कृत्येत्युच्यते त्रिर्वचनं च। [1]पशुः स्वरुरशनम्[1] उत्पादयतीत्येतस्मिन्[2] पक्षे परिव्ययणीया भवति। [3]यूपः स्वरुरशनम्[3] उत्पादयत्येतस्मिन्[4] पक्षे परिव्ययणं न कुर्वन्ति ॥ ६ ॥

[आवाहनादौ ऐष्टिकेषु मन्त्रेषु यजमानशब्दादग्रे सुन्वच्छब्दप्रयोगविधानम्]

आवह देवान्त्सुन्वते यजमानायेत्यावाहनादिसुन्वच्छब्दोऽग्रे यजमानशब्दादैष्टिकेषु निगमेषु ॥ ७ ॥

आवह देवान्त्सुन्वते यजमानाय इत्येवमावाहनमादिं कृत्वा सुन्वच्छब्दः प्रयोक्तव्योऽग्रे यजमानशब्दात्। इष्टौ भवा निगमा मन्त्रास्तेषु ऐष्टिकेषु मन्त्रेषु, न पाशुकेषु। यथा आवह देवान्त्सुन्वते यजमानाय, उपहूतोऽयं सुन्वन् यजमानः, आशास्तेऽयं सुन्वन् यजमान इति। आवह देवान्त्सुन्वते यजमानायेति प्रदर्शनार्थम्। यया[5] विभक्त्या यजमानशब्दः, तयैव[6] विभक्त्या सुन्वच्छब्दोऽपि प्रयोक्तव्यः इत्येतत् प्रदर्श्यते[7]। आवाहनादिग्रहणाद् निगदेष्वेव सुन्वच्छब्दः प्रयोक्तव्यो न ऋक्षु। यथा जुह्वर्थाय यजमानशब्द एव भवति यजमानाभिधानात् 'होतारमवृथाः' (आश्रौ १, ४, १०) इति। ऐष्टिकेष्विति वचनात् पाशुकेषु न भवति। 'देवी जोष्ट्री' (ऋखि ५, ७, ३, ४) इत्यत्र सौमिकेषु प्रैषेषु आम्नात एव ॥ ७ ॥

[अन्त्याद्धारियोजनादूर्ध्वं सुन्वच्छब्दप्रयोगप्रतिषेधकथनम्]

नान्त्याद्धारियोजनादूर्ध्वम् ॥ ८ ॥

अन्त्याद्धारियोजनादूर्ध्वं सुन्वच्छब्दो न प्रयोक्तव्यः आज्येलायाम्। नान्त्यादिति वचनाद् [8]अनन्त्येष्वहःसु हारियोजनादप्यूर्ध्वं सुन्वच्छब्दः प्रयोक्तव्य एव आज्येलायाम्। एकाहे तु स एवाद्यन्त एकत्वात्[8], हारियोजनादूर्ध्वं[9] प्रतिषेध एव। पूर्वसूत्रेण प्राप्ते प्रतिषेधः ॥ ८ ॥

न प्रावित्रं साधु ते यजमान देवता ओमन्वती तेऽस्मिन् यज्ञे यजमानेति च ॥ ९ ॥

१-१. पशुरशनम् ब[1]; पशुष्वरुरशनम् ब[2] मै; शुष्वरुरसनम् पू। २. °यन्तीत्ये° ब[2]। ३-३. यूपस्तुत्तरशनम् ब[1] पू; यूपमुत्तरशनम् ब[2]; यूपस्योत्तररशनम् मै; तु. बौश्रौ २०,२७ : २४। ४. तु. आश्रौ १,३,६। ५. यथा मूको। ६. तथैव ब[1] पू मै। ७. प्रदर्शनार्थम् पू। ८-८. नास्ति ब[1]। ९. दूर्ध्वं ब[1]।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

पूर्वसूत्रेण प्राप्ते प्रतिषेधः[1]। स्रुगादापने 'प्रावित्रं साधु ते यजमान देवता' (तु० तैसं २, ५, ९, ५) इति अस्ति। अस्माद्[2] यजमानशब्दादग्रे सुन्वच्छब्दो न प्रयोक्तव्यः। च-शब्दः प्रतिषेधसमुच्चयार्थः ॥ ९ ॥

[प्रागाज्यपेभ्यः सवनदेवताऽऽवाहनम्]

प्रागाज्यपेभ्यः सवनदेवता आवाहयेदिन्द्रं वसुमन्तमा वहेन्द्रं रुद्रवन्तमावहेन्द्रमादित्यवन्तमृभुमन्तं विभुमन्तं वाजवन्तं बृहस्पतिवन्तं विश्वदेव्यावन्तमावहेति ॥ १० ॥

'प्रागाज्यपेभ्यः देवाँ आज्यपाँ आ वह' (आश्रौ १, ३, २२) इत्याज्यपाः, तेभ्यः[3] आज्यपेभ्यः प्राक् पूर्वं सवनानां यां[4] देवतास्ता आवाहयेद् इन्द्रं वसुमन्तमावह, इन्द्रं रुद्रवन्तमावह, इन्द्रमादित्यवन्तमावह इति यथासमाम्नातास्तृतीयाद्याः[5] ॥ १० ॥

[सवनदेवतानां सूक्तवाके निगमनम्]

ताः सूक्तवाक एवानुवर्तयेत् ॥ ११ ॥

ताः[6] देवताः सूक्तवाक एवानुवर्तयेत् निगमयेत्। वनस्पतिस्विष्टकृत्सूक्तवाकप्रैषेषु निगमयेत्। आवाहितानां[7] सर्वेषु निगमस्थानेषु निगमने[8] प्राप्ते सूक्तवाक एवेति नियमादन्यत्र प्रतिषेधः। एव-शब्दः सूक्तवाकमवधारयति ॥ ११ ॥

[अच्छावाकवर्जं सर्वेषामृत्विजां प्रवृताहुतिहोमकरणम्]

प्रवृताहुतीर्जुह्वति वषट्कर्तारोऽन्येऽच्छावाकात् ॥ १२ ॥

प्रवृताहुतीनां होमकाले प्रवृताहुतीर्जुह्वति सर्वे वषट्कर्तारः अन्ये अच्छावाकाद् अन्ये ऋत्विजो जुह्वति। अप्राप्तमारभ्यते। प्रवृताहुतीरिति संज्ञाया अन्वर्थत्वात् प्रवृतो जुहोति। स प्रवृतः पशावेव तावद्[9] भवति, न प्रकरणान्तरदर्शपूर्णमासादिषु[10]। वषट्कर्तार इति वचनात् प्रवृतोऽप्यवषट्कर्ता न जुहोति निरूढपशुबन्धे मैत्रावरुणः। अन्येऽच्छावाकादिति वषट्कर्तृत्वात् प्राप्ते प्रतिषेधः प्रवरणाभावात्। अस्मात् प्रतिषेधात् प्रवृतो जुहोतीति सिद्धम्।

---

१. प्रतिषिद्धः मूको। २. तस्माद् ब[1]। ३. आ तेभ्यः मूको। ४. नास्ति ब[2]। ५. °तीयाः मूको। ६. नास्ति मूको। ७. °तांगां ब[2] मै; °तागां पू। ८. निगमस्थाने मूको। ९. तद् मूको। १०. प्रकारान्तर° मै; °पौर्णमा° पू।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

तस्मादग्नीषोमीये पशौ यदि सर्वे प्रव्रियेरन्[1] सवनीयं च सर्वे वषट्कर्तारो जुहुयुः । अवषट्कर्ता [2]अप्रवृतस्तु न[2] जुहोति ग्रावस्तोता ॥ १२ ॥

[आदित्यप्रभृतिधिष्ण्योपस्थानविधिकथनम्]

चात्वाले मार्जयित्वाऽध्वर्युपथ उपतिष्ठन्त आदित्यप्रभृतीन् धिष्ण्यान् ॥ १३ ॥

चात्वाले मार्जयित्वा, हविर्धानयोरुत्तरः अध्वर्युपथो भवति, तस्मिन् अध्वर्युपथे स्थित्वा उपतिष्ठन्ते, उत्तरत्र[3] वक्ष्यमाणा[4] होत्रादयः आदित्यप्रभृतीन् धिष्ण्यान्[5]। धिष्ण्या अपि उत्तरत्र[3] वक्ष्यन्ते। चात्वाले मार्जयित्वेति उपस्थानस्य कालो विधीयते। नानेन[6] ऋत्विजो व्यपदिश्यन्ते। यथा 'पत्नीसंयाजैश्चरित्वाऽवभृथं व्रजन्ति' (आश्रौ ६, १३, १) इति अवभृथस्य कालो व्यपदिश्यते। त[7] ऋत्विजः पत्नीसंयाजेष्वनधिकृता अधिकृताश्चावभृथं व्रजन्ति । एवमिहापि पशावधिकृता मार्जयन्ते । अनधिकृता अप्युपतिष्ठन्ते । अध्वर्युपथ इति वचनात् तत्र[8] गत्वोपस्थानं क्रियते ॥ १३ ॥

[आदित्यधिष्ण्यस्य प्रथमोपस्थानविधानम्]

आदित्यमग्रेऽध्वनामध्वपते श्रेष्ठः स्वस्त्यस्याध्वनः पारमशीयेति ॥ १४ ॥

धिष्ण्यानुपतिष्ठन्ते (तु० आश्रौ ५, ३, १३) इति वचनात्[9] सर्वेषां युगपदुपस्थाने[10] पृथगुपस्थानं विधीयते । आदित्यमग्रे प्रथममुपतिष्ठन्ते, अनन्तरमितरान् अध्वनाम् इति एतेन मन्त्रेण[11] । अग्रे-वचनादादित्यस्य नित्यमुपस्थानम् । आदित्यमग्रे अनन्तरमितरानिति । अन्यथा रात्रौ कर्मणि क्रियमाणे आदित्योपस्थानमर्थाल्लुप्येत[12] । अग्रे-वचनात्तु[13] नित्यमुपस्थानम् । नित्यत्वाद् रात्रावादित्योपस्थानमाहवनीये कुर्यात् । 'आदित्यो वा अस्तं यन्नग्निमनुप्रविशति' (ऐब्रा ८, २८) इति श्रुतिः । 'अग्नेर्वा आदित्यो जायते' (ऐब्रा ८, २८) इति च ॥ १४ ॥

---

१. प्रवृत्ते (°ते मै) रन् मै । २-२. अप्रवृत्तस्य नु (°त्तश्च न ब[2] पू; °त्तस्सन् मै) मूको । ३. तु. आश्रौ ५,३,२१;२२ । ४. वक्ष्यन्ते मूको । ५. धिष्ण्यानुपतिष्ठन्ते मूको । ६. नान्ये मै । ७. न मूको । ८. तत्र तत्र ब[1] पू । ९. तु. आश्रौ ५, ३, १३ । १०. उपस्थाने मूको । ११. तु. आपमं २, ३, ३२ । १२. °ल्लुप्यते मूको । १३. °वचनाच्च ब[1] ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

[यूपादित्याहवनीयनिर्मन्थ्यानन्वीक्षमाणानामृत्विजां समन्त्रमुपस्थानविधानम्]

यूपादित्याहवनीयनिर्मन्थ्यानग्नयः सगराः सगरा अग्नयः सगरा स्थ सगरेण नाम्ना पात माऽग्नयः पिपृत माऽग्नयो नमो वो अस्तु मा मा हिंसिष्टेति ॥ १५ ॥

यूपश्च आदित्यश्च आहवनीयश्च निर्मन्थ्यश्च यूपादित्याहवनीयनिर्मन्थ्याः। यस्मिन् स्थाने अग्निर्मथ्यते[1] तत् स्थानं निर्मन्थ्यम्। एतान् अन्वीक्षमाणा उपतिष्ठन्ते—अग्नयः सगराः इति एतेन मन्त्रेण ॥ १५ ॥

[सव्यावृतां शामित्रादीनन्वीक्षमाणानामृत्विजामुपस्थानम्]

सव्यावृतः शामित्रोवध्यगोहचात्वालोत्करास्तावान् ॥ १६ ॥

प्राङ्मुखत्वे प्राप्ते सव्यावृत इत्युच्यते ॥ १६ ॥

[दक्षिणावृतामाग्नीध्रीयादीनन्वीक्षमाणानामृत्विजामुपस्थानम्]

एवमेव दक्षिणावृत आग्नीध्रीयमच्छावाकस्य वादं दक्षिणं मार्जालीयं खरमिति ॥ १७ ॥

एवम्[2] इत्यधिकृतं मन्त्रमुपदिशति। द्वौ मन्त्रावधिकृतौ[3]। तयोः संनिकृष्टं मन्त्रम् एव अवधारयति। दक्षिणावृतः दक्षिणं बाहुम् अन्वावर्तन्ते दक्षिणावृतः। आग्नीध्रीयम्। अच्छावाको यस्मिन् स्थाने वदति[4] तत् स्थानम् अच्छावाकस्य वादः। दक्षिणं मार्जालीयम् यस्मिन् चमसान् मार्जयन्ति। खरो नाम यस्मिन् ग्रहान्[5] गृहीत्वा सादयन्ति। इत्येतान् धिष्ण्यान् अन्वीक्षमाणा उपतिष्ठन्ते। एवमेवेति वर्तते। 'अग्नयः सगराः' (आश्रौ ५, ३, १५) इत्येतेनैव मन्त्रेण। सव्यावृत इति प्राप्ते दक्षिणावृत इत्युच्यते। नानादेशस्थानामसमासः। एकदेशस्थानां तु समासः ॥ १७ ॥

[सदसोऽभिमर्शनविधिकथनम्]

उत्तरेणाग्नीध्रीयं परिव्रज्य प्राप्य सदोऽभिमृशन्त्युर्वन्तरिक्षं वीहीति ॥ १८ ॥

---

१. °र्मन्थ्यते मूको। २. एवमधि° ब[1]। ३. तु. आश्रौ ५,३,१४;१५। ४. भवति मूको। ५. नास्ति ब[1,2]।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

उत्तरेण सञ्चरेण[1]। [2]दक्षिणेनाग्नीध्रीयं सञ्चरः प्राप्तो[2] यथा पशौ, तस्माद् उत्तरेण इत्युच्यते। प्राप्यवचनाद् द्वार्ययोरुपरि सदसोऽभिमर्शनं रराटे[3] स्थाने। प्राप्येत्यनुच्यमाने यत्र क्व चन सदोऽभिमर्शनं[4] [5]स्यात्। रराट्यामुक्तो मन्त्रः †सदसोऽभिमर्शने न स्यादिति†[5] पुनरुच्यते[6] ॥ १८ ॥

[द्वार्ययोः स्थूणयोरभिमर्शनानन्तरमपरेषां धिष्ण्यानामुपस्थानम्]

द्वार्ये संमृश्यैवमपरानुपतिष्ठन्ते ॥ १९ ॥

द्वार्ये च द्वार्ये स्थूणे संमृश्य[7] 'देवी द्वारौ' (आश्रौ ४, १३, ५; तैसं ३, २, ५, ४) इत्येतेन मन्त्रेणाभिमर्शनम्। एवम् 'अग्नयः सगराः' (आश्रौ ५,३.१५) इत्येतेन मन्त्रेण अपरस्यां दिशि ये धिष्ण्या अपरास्तान् उपतिष्ठन्ते। ये सदसि ये च प्राग्वंशे अग्नयस्ते अपराः। कर्मण्युपदिष्टे मन्त्रोऽपि प्राप्नोति तद्गुण-भावात्[8]। तज् ज्ञापयति—तूष्णीं प्रतिसर्पन्ति। अन्यत्र तूष्णीं-ग्रहणात्[9]। एवमिति मन्त्रमुपदिशन्ति। अपरान् इति निर्देशात् प्राग्वंशे ये अग्नयस्तेऽप्युपधिष्ण्या[10] भवन्ति ॥ १९ ॥

[उपस्थितान् धिष्ण्यान् पश्यतामनुपस्थितानपश्यतामपि यत्नेनेक्षमाणानामृत्विजामुपस्थानम्]

उपस्थितांश्चानुपस्थितांश्चाप्यपश्यन्तोऽव्यनीक्षमाणाः ॥ २० ॥

ये च आदित्यादय उपस्थिता ये च उपरवारादयः अनुपस्थिताः, तान् सर्वान् तेनैव मन्त्रेण प्राङ्मुखाः पुनरुपतिष्ठन्ते। यथोत्तरयोः सवनयोः वेद्यां समस्तानुपस्थाय सदः प्रसर्पन्ति, एवं प्रातःसवनेऽपि समस्तानुपस्थाय प्रसर्पन्ति। द्विश्चकारकरणं समुच्चयार्थम्। 'प्रैषांश्चादेशमनुवाक्यां च सप्रैषे' (आश्रौ ३, १,२०-२१) इति, यथा 'प्राणांश्चैव तत्स्वर्गांश्च लोकानाप्नुवन्ति' (ऐब्रा ४, १६) इति। अप्यपश्यन्तोऽव्यनीक्षमाणाः आदित्यप्रभृतिषु उपस्थानेषु इयं परिभाषा द्रष्टव्या। पश्यन्त उपतिष्ठन्ते, अपश्यन्तोऽपि व्यवहितान् धिष्ण्यान् अत्यर्थम् अतियत्नेनेक्षमाणा उपतिष्ठन्ते। अपश्यन्त [11]इत्युक्त्वाऽव्यनीक्षमाणा इति नोपपद्यते[11]। तस्माद् व्यनीक्षमाणा इति भवति[12] ॥ २० ॥

---

१. सञ्चारेण मै। २-२. °ध्रीयसञ्चारे प्राप्ते मै। ३. तु. आश्रौ ४, १३,४। ४. सदसोऽभि° ब[1]। ५-५. नास्ति ब[1]। †-†. °र्शने स्थाने प्राप्ते मै। ६. नास्ति मै। ७. नास्ति मूको। ८. °णाभावात् ब[1] मै पू। ९. तु. आश्रौ ५, ११, ४। १०. °प्युपतिष्ठचा ब[1]; °प्युपधिष्ठचा पू; °प्युपतिष्ठा (°पस्थिता ?) मै। ११-११. °माणा नोपद्यंते मूको। १२. भवंति ब[2]।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

[होत्रादीनां समन्त्रजपं सदःप्रसर्पणम्]

होता मैत्रावरुणो ब्राह्मणाच्छंसी पोता नेष्टेति पूर्वया द्वारा सदः प्रसर्पन्त्युरुं नो लोकमनु नेषि विद्वान् इति जपन्तः ॥ २१ ॥

होता मैत्रावरुणो ब्राह्मणाच्छंसी पोता नेष्टा इति एते पञ्च ऋत्विजः उपस्थानानि कृत्वा पूर्वया द्वारा सदः प्रसर्पन्ति प्रविशन्ति[1] 'उरुं नो लोकम्' (ऋ ६, ४७, ८) इति एतामृचं जपन्तः । इह पूर्वया द्वारा इति वचनाद् द्वार्यायाः संमर्शनमपि [2]पूर्वस्या एव[2] भवति अधिकारात् । जपन्त इति वचनान्मन्त्रं ब्रुवन्तः प्रसर्पन्ति, न मन्त्रान्तेन ॥ २१ ॥

[होत्रादीनां स्वस्वधिष्ण्यस्य पश्चादुपवेशनं मन्त्रजपश्च]

उत्तरेण सर्वान् धिष्ण्यान् सन्नान्सन्नानपरेण यथास्वं धिष्ण्यानां पश्चादुपविश्य जपन्ति यो अद्य सौम्यो वधोऽघायूनामुदीरति । विषूकुहमिव धन्वना व्यस्याः परिपन्थिनं सदसस्पतये नम (तु० पंब्रा १, ३, ३) इति ॥ २२ ॥

सद[3] उत्तरेण सर्वान् धिष्ण्यान् गत्वा स्वस्य[4] स्वस्य धिष्ण्यस्य पश्चात् सन्नं [5]सन्नमासीनमासीनमपरेण[5] गत्वा प्रविशन्ति धिष्ण्यानिति । सर्वग्रहणाद् अच्छावाकधिष्ण्यस्याप्युत्तरेण सञ्चरो[6] भवति, अन्यथाऽधिकृतानां ये धिष्ण्याः तेषामेवोत्तरेण स्यात्[7] । सन्नं सन्नमिति वक्तव्ये बहुवचनं कृतं द्रष्टव्यम् । यथा[8] 'तयोरेकाहिके पुरस्तादन्ये वा शंसेयुः' (आश्रौ ८, ५, ५) इति । एकवचने सति वीप्सा युज्येत[9] । बहुवचने सति वीप्सा न युज्यते । पञ्चैव ऋत्विजो यस्मात् सन्नान्-सन्नान् अपरेणेति सञ्चरविधानान्नेष्ट्रादय[10] उपविशन्ति । धिष्ण्यानां[11] वा कर्तॄणां वा अनुक्रमेण उपवेशने क्रियमाणे सन्नान् सन्नानपरेणेत्यनर्थकम्, कथमुपविष्टः कर्ता धिष्ण्यस्य सन्नो भवति । तयोरन्तरेण सञ्चराभावादपरेणैव[12] सञ्चरो[13] भविष्यति । [14]यथास्वं धिष्ण्यानां यो यस्य स्वो धिष्ण्यः स यथास्वम्[†] । तेषां धिष्ण्यानां[14] पश्चाद् अपरस्यां दिशि उपविश्य जपन्ति यो अद्य सौम्यः (तु० शौ १, २०, २) इति एतं मन्त्रं यथाम्नातम् । उपविश्य जपन्तीत्युक्ते

---

१. नास्ति ब[1] मै पू । २-२. पूर्वस्यैव मूको । ३. सप्त ब[1] पू; स स ब[2] मै । ४. नास्ति ब[2] । ५-५. मपरेण मै । ६. सञ्चारो मै । ७. नास्ति मूको । ८. अथा ब[1]; तथा ब[2] मै पू । ९. युज्यते ब[2] मै । १०. सञ्चार° मै । ११. नास्ति मै । १२. सञ्चारा° मै । १३. सञ्चारो मै । १४-१४. नास्ति ब[1] । †. स्वं मूको ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

उत्तरेण सर्वान् धिष्ण्यान् गत्वा यत्र क्व चनोपवेशने प्राप्ते नियमः क्रियते यथास्वं धिष्ण्यानां पश्चादिति ॥ २२ ॥

[पूर्वोक्तविधिना ब्रह्मणः सदःप्रसर्पणमुपवेशनञ्च]

एवमपरया ब्रह्मा प्रसृप्य दक्षिणपुरस्तान्मैत्रावरुणस्योपविशेत् ॥२३॥

यथा होत्रादयः धिष्ण्यानुपस्थाय पूर्वया द्वारा प्रसृप्ता[1] एवमेतेनैव विधिना अपरया द्वारा ब्रह्मा प्रसृप्य[2] प्रविश्य दक्षिणपुरस्ताद् देशे मैत्रावरुणस्य उदङ्मुख उपविशेत् । यो हि येन द्वारेण प्रपद्यते तस्यैव सदो द्वार्ये[3] चाभिमृश्य प्रपद्यते मन्त्रलिङ्गात् । तत्र अपराः[4] पत्नीशालायां ये अग्नयः, ते एव अपरा इति प्राप्ते एवमित्यतिदेशाद् ये च सदसि ये च पत्नीशालायां, तान् सर्वान् अन्वीक्ष्य प्राङ्मुख उपस्थाय समस्तोपस्थानं च कृत्वा[5] प्रपद्यते । उपविश्य 'यो अद्य सौम्यः' (आश्रौ ५, ३, २२) इति जपति[6] । अविद्यमानेऽपि[7] धिष्ण्ये प्रदर्शनं ग्रावस्तोत्रप्रकरणे ॥ २३ ॥

[ब्रह्माणमनु प्रसर्पकाणामन्येषामृत्विजां प्रसर्पणं सर्वेषां यथावकाशमुपवेशनस्थाननिर्देशश्च]

तमन्वञ्च ऋत्विजः प्रसर्पकाः ॥ २४ ॥

पूर्वेणौदुम्बरीमपरेण धिष्ण्यान् यथान्तरमनूपविशन्ति ॥ २५ ॥

तं ब्रह्माणम् अन्वञ्चः अनुमार्गेण प्रपद्यन्ते ऋत्विजः प्रसर्पका नाम सदस्यग्रावस्तुत्सुब्रह्मण्या इति, ये च दशपेये चमसान् भक्षयन्ति[8] ।

ते[9] च एते प्रपद्य पूर्वेणौदुम्बरीमपरेण धिष्ण्यान् एतस्मिन् देशे यथान्तरं[10] यथावकाशम् अनुक्रमेणोपविशन्ति निरसनोवेशने[11] कृत्वा 'यो अद्य सौम्यः' (आश्रौ ५, ३, २२) इति जपन्ति । 'तमन्वञ्चः' (आश्रौ ५, ३, २४) इति वचनात् तस्योपस्थानादि यद्यद्विधानं, तत् सर्वं भवति ।

ऋत्विजो-ग्रहणात्[12] षोडश ऋत्विजः सदस्यसप्तदशाः[13] । एतेष्वेव[14] [15]ये च[15] सदसि भक्षमन्वञ्चो[16] दृश्यन्ते[17] ते[18] भवन्ति सदस्यादय उदाहृताः । ये

---

१. प्रसृता ब[1] । २. प्रसर्प्य ब[2] । ३. °द्वारे मै । ४. °रा मूको । ५. नास्ति ब[1] मै पू । ६. जपित्वा मै । ७. विद्य° मै । ८. अनुभ° ब[2]; तु. आश्रौ ९,३,१८-२० । ९. ये ब[1?2] मै; ते ये पू । १०. यथोत्तरं मूको । ११. तु. आश्रौ १,३,३२ । १२. ऋत्विजग्र° मूको । १३. सदस्यस्सप्तदश मै । १४. ये तेष्वेव ब[2] पू । १५-१५. येषां मूको । १६. भक्षमन्व ब[1]; भक्षमन्वं ब[2] पू; भक्षमन्वञ्चं मै । १७. दृश्यते मूको । १८. नास्ति मूको ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

पुनर्ऋत्विजः प्रसर्पकाः, तेषामेतदुपस्थानादि विधानं भवति । ये प्रेक्षकास्तेऽपि[1] प्रसर्पका एव । तत्र[2] ग्रावस्तुद् आदित्यप्रभृतीनामुपस्थानानि कुर्याद् उत्तरत्र चोदितत्वाद् 'एतस्मिन् काले ग्रावस्तुत् प्रपद्यते' (आश्रौ ५, १२, १), 'तस्योक्त-मुपस्थानम्'[3] (आश्रौ ५,१२,२) इति । [4]'उक्तमुपस्थानमिति वचनादुपस्थानान्ययं तु[4] कुर्याद् मन्त्रेण । सदो द्वार्ये चाभिमृश्य प्रसृप्योपविशेत्[5], प्रसर्पणं च[6] विद्यते । भक्षः कस्मान्न विद्यते इति । भक्षादुत्तरकालमुपदिष्टत्वाद्[7] 'एतस्मिन् काले ग्रावस्तुत् प्रपद्यते' (आश्रौ ५, १२, १ इति । प्रपदनादुत्तरकालमपि भक्षो न विद्यते सदसि सर्पणाभावात् ॥ २४-२५ ॥

[पूर्वोक्तविधिनाऽऽग्नीध्रस्याऽऽग्नीध्रीयं प्रतिसर्पणम्]

एतयाऽऽवृताऽऽग्नीध्र आग्नीध्रीयमभ्याकाशम् ॥ २६ ॥

यदुक्तं होत्रादिभ्यो विधानम्, एतेन विधानेन एतयाऽऽवृता आग्नीध्रः आग्नी-ध्रीयं प्रसर्पति परिश्रितम् अभ्याकाशम् अभिमृश्य प्रसर्पति । सदसः अभिमर्शे यदुक्तं तदाग्नीध्रस्य न प्राप्नोति, द्वार्ययोर्यदभिमर्शनमुक्तं तदाग्नीध्रस्य न प्राप्नोति द्वार्ययोरभावात्, 'पूर्वया द्वारा सदः प्रसर्पन्ति' (आश्रौ ५, ३, २१) इत्युक्तम् तदाग्नीध्रीयप्रपदने न प्राप्नोति । तस्मादेतत्त्रयप्राप्त्यर्थम् एतयावृता इत्युच्यते । सदसोऽधिकारादाग्नीध्रीयमित्याह । परिश्रिते अभिमर्शनं प्रसर्पणं चोक्तम् । अपरिश्रिते अर्थाल्लोपे प्राप्ते अभ्याकाशमित्युच्यते । तस्मादाकाशमपि अभिमृश्य मन्त्रेण प्रपद्यते ॥ २६ ॥

[दक्षिणादीनां धिष्ण्यानामनुक्रमकथनम्]

दक्षिणादयो धिष्ण्या उदक्संस्थाः प्रसर्पिणाम् ॥ २७ ॥

दक्षिण आदिर्येषां धिष्ण्यानां ते[8] दक्षिणादयो धिष्ण्याः उदक् संस्था येषां ते उदक्संस्थाः । उत्तरतः प्रभृति उपविशन्ति तस्मादुत्तरादयः प्राप्ताः । तस्माद् दक्षिणादय इत्युच्यते[9] । धिष्ण्याधिकारस्य व्यवहितत्वात् पुनर्धिष्ण्यग्रहणम् । दक्षिणादय इत्युक्ते दक्षिणमादिर्भवति । इतरेषामनुक्रमो न प्राप्नोति । यथा देवदत्तादयो ब्राह्मणा आमन्त्रिता इत्युक्ते देवदत्त आदिर्भवति, [10]इतरेषाम् अनुक्रमनियमो नास्ति, तस्मादाह उदक्संस्था[10] इति । अच्छावाकधिष्ण्यस्य

---

१. प्रेषका° ब१२ मै, प्रेप्रका° पू । तु. आश्रौ ५, ३, २४ नारायणवृत्तिः— अर्थितया दिदृक्षया च । २. नास्ति ब२ । ३. तस्योक्तम् मै । ४-४. उक्त-मुपस्थानादन्यस्तु ब१२ पू, उपस्थानादन्यस्तु मै । ५. प्रसर्प्यो° मै । ६. न मूको । ७. तस्मादुत्त° ब१ । ८. नास्ति मूको । ९. °च्यंते मूको । १०-१०. नास्ति ब१ ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

वा प्राप्त्यर्थः अनधिकृतत्वात् तस्यानुक्रमप्राप्तिर्न स्यात् । प्रसर्पका होत्रादयोऽनुक्रमाम्नाताः[1] । धिष्ण्यानामनुक्रमे कृते आनन्तर्येणैकैकस्य कर्तुरेकैको धिष्ण्यो युज्यते । एवं कृते अस्य[2] कर्तुरयं धिष्ण्य इत्येतज् ज्ञातं भवति । 'यथास्वं धिष्ण्यानां पश्चादुपविश्य जपन्ति' (आश्रौ ५, ३, २२) । 'यथास्वं धिष्ण्यानुत्तरेण' (आश्रौ ५, ३, २९) इत्युक्ते स्वो धिष्ण्यो ज्ञातो भवति प्रसर्पिणाम् ऋत्विजाम् ॥ २७ ॥

[होतृमैत्रावरुणयोः क्रमविपर्ययविधानम्]

आद्यौ तु विपरीतौ ॥ २८ ॥

[3]आद्यौ तु होतृमैत्रावरुणौ विपरीतौ भवतः[3] । आद्यो मैत्रावरुणः अनन्तरो[4] होता अनेन क्रमेणैकैकस्य कर्तुरेकैको धिष्ण्यो युज्यते । तस्मादाद्यो धिष्ण्यो मैत्रावरुणस्यानन्तरो होतुर्भवति । यदिदं नारभ्येताऽऽद्यो होतुः प्राप्नोति, अनन्तरो मैत्रावरुणस्य । 'होता मैत्रावरुणो ब्राह्मणाच्छंसी' (आश्रौ ५, ३, २१) इत्येवमाम्नाता यस्माद् धिष्ण्याधिकारात् प्रसर्पिणां ग्रहणम् । तुकार-करणाद्[5] आद्यावेव विपरीतौ । इतरेषां यथाम्नात एव पदक्रमः ॥ २८ ॥

[धिष्ण्यवतां विसंस्थितसंचरसंज्ञाकरणम्]

तेषां विसंस्थितसंचरो[6] यथास्वं धिष्ण्यानुत्तरेण ॥ २९ ॥

तेषां प्रसर्पिणां विसंस्थिते कर्मणि येन मार्गेण संचरन्ति निष्क्रामन्ति [7]प्रविशन्ति वा †स विसंस्थितसंचर इत्युच्यते । स वक्ष्यते इत्यधिकारसूत्रम् । एतदुत्तराभ्यां† सूत्राभ्यां‡ वक्ष्यति । संज्ञा चेयम् । 'नेष्टारं विसंस्थितसंचरेणानुप्रपद्य'[7] (आश्रौ ५, १९, ८), 'शंसिष्यन् विसंस्थितसंचरेण निष्क्रम्य' (आश्रौ ६, ५, २) इत्युक्ते एतस्य वक्ष्यमाणस्य ग्रहणम् । यथास्वं यो यस्य स्वो धिष्ण्यः यथास्वम्, धिष्ण्यानुत्तरेण यो यस्य स्वो धिष्ण्यः, तं तमुत्तरेण विसंस्थितसंचरो [8]भवतीति वेदितव्यम्[8] ॥ २९ ॥

---

१. तु. आश्रौ ५, ३, २१ । २. तस्य b^1 । ३-३. नास्ति b^1 । ४. अन्तरा मूको । ५. तुका(? क)रणात् b^{1*2} । ६. °संचरा BI आन ; °संचारा मै । ७-७. प्रविशंस्थितसंच° b^1 । †-†. तेति संस्थितसंच(°चा मै)रा इत्युच्यन्ते । ते वक्ष्यन्ते इत्यधिकारस्तत्रमेतदुत्तराभ्यां (°कारादत्र एतदुत्तराभ्यां मै) b^2 मै पू । ‡. नास्ति मै । ८-८. भवति b^1 मै ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

[धिष्ण्यरहितानां विसंस्थितसंचरसंज्ञाकरणम्]

दक्षिणमधिष्ण्यानाम् ॥ ३० ॥

[1]दक्षिणधिष्ण्यमुत्तरेण मैत्रावरुणधिष्ण्यमुत्तरेण अधिष्ण्यानां विसंस्थितसंचरो भवति[1]। धिष्ण्या येषां न विद्यन्ते ते[2] अधिष्ण्याः। यथा—सदस्यग्रावस्तुत्सुब्रह्मण्याः। एतेषां मैत्रावरुणधिष्ण्यमुत्तरेण [3]विसंस्थितसंचरो[3] भवति ॥ ३० ॥

॥ इति पञ्चमे तृतीयं खण्डम् ॥

१-१. नास्ति ब[2] मैं। २. नास्ति मूको। ३-३. विसंचरो ब[1] पू।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

अथ पञ्चमेऽध्याये चतुर्थः खण्डः

[इन्द्रादिदेवतानां पुरोडाशैः सहानुसवनं प्रचरणम्]

अथैन्द्रैः पुरोळाशैरनुसवनं चरन्ति ॥ १ ॥

अथ अनन्तरं प्रसर्पणादनन्तरम् ऐन्द्रैः[1] इन्द्रो देवता[1] येषां तैः[1] पुरोळाशैः सवनं सवनम् अनुसवनम् । चरन्ति[2] प्रचरन्तीति । एतदधिकृतं वेदितव्यम् । इत उत्तरं यद् वक्ष्यामस्तत् सर्वं पुरोळाशानां विधानम् । ऐन्द्रैरिति वचनान् नानादेवत्यानि हवींषि इन्द्राय इज्यन्ते । पुरोळाशैरिति वचनाद् धानादीनामपि पुरोळाशवन्निगमो भवति । प्रातःसवनाधिकाराद् अनुवचनमधिक्रियन्ते ॥ १ ॥

[प्रातःसवनस्यानुवाक्याविधानम्]

धानावन्तं करम्भिणमिति प्रातःसवनेऽनुवाक्या ॥ २ ॥

'धानावन्तं करम्भिणम्' (ऋ ३, ५२, १) इति इयमृक् प्रातःसवने पुरोळाशानाम् अनुवाक्या भवति । प्रातःसवन इत्यनुच्यमाने[3] उत्तरत्र माध्यन्दिन इति वचनान् माध्यन्दिन[4] एव[5] स्यात् ॥ २ ॥

[द्वितीयतृतीयसवनयोरनुवाक्याया अनुसवनं लिङ्गैः प्रैषस्य च विधानम्]

माध्यन्दिनस्य सवनस्य धाना इति माध्यन्दिने । तृतीये धानाः सवने पुरुष्टुतेति तृतीयसवने । होता यक्षदिन्द्रं हरिवाँ इन्द्रो धाना अत्त्विति प्रैषो लिङ्गैरनुसवनम् ॥ ३ ॥

'माध्यन्दिनस्य सवनस्य धानाः' (ऋ ३,५२,५) इति इयम् ऋक् पुरोळाशानाम् अनुवाक्या भवति माध्यन्दिने । प्रातःसवनाधिकारान्माध्यन्दिन इत्युच्यते । अनुवाक्याधिकारो वर्तते । 'तृतीये धानाः सवने पुरुष्टुत' (ऋ ३,५२,६) इति इयम् ऋक् अनुवाक्या पुरोळाशानां तृतीयसवने । माध्यन्दिनाधिकारात् तृतीयसवन[6] इत्याह । अनुसवनमनुवाक्या इत्युच्यमाने सर्वा अनुवाक्या एकैकस्मिन् सवने

---

१. नास्ति मूको । २. संचरंन्ति मूको । ३. इत्यु(इत्यनु ब[2])च्यमाने ब[1,2] । ४. मध्यन्दिन ब[1] पू । ५. एवन मै । ६. °यसवनम् मूको ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

प्राप्नुवन्ति । तस्मात् सवननिर्देशः । 'होता यक्षदिन्द्रं हरिवाँ इन्द्रो धाना अत्तु' (ऋखि ५, ७, ४, १) इति प्रैषो भवति । 'एष लिङ्गैरनुसवनं' प्रयोक्तव्यः । लिङ्गानामनुसवनविवक्षार्थं[२] त्रय एते प्रैषास्त्रिभिः सवनलिङ्गैराम्नाताः । [३]समानं तु प्रतीकम्[३] । तस्मादाह—लिङ्गैरनुसवनमिति । प्रातःसवनस्य[४] माध्यन्दिनस्य तृतीयसवनस्येति[५] लिङ्गानि[६] । यदि प्रातःसवने पयस्या न क्रियते 'मित्रावरुणयोः पयस्या' (ऋखि ५, ७, ४, १) इत्युद्धर्तव्यं भवति । यस्मिन् सवने पयस्या क्रियते,[७] तत्रैतद् वाक्यं प्रयोक्तव्यम् । मित्रावरुणयोः पयस्या माध्यन्दिनस्य सवनस्येति ॥ ३ ॥

[देवताऽऽदेशपदमुद्धृत्य तेनैव प्रैषेण याज्याकरणम्]

उद्धृत्यादेशपदं तेनैवेज्या ॥ ४ ॥

देवतादेशपदम् उद्धृत्य तेनैव प्रैषेण अनुसवनम् इज्या[८] । प्रैष एव याज्या भवतीत्यर्थः । तेनैवेज्येति वचनाद् आदेशस्यानुद्धारे प्राप्ते उद्धृत्यादेशपदमित्युच्यते । [९]प्रैषादिरागुरः स्थाने[९] 'आगूर्यादेशम् (आश्रौ १,५,२९) इत्यागुरोऽनन्तरमादेशपदम्[१०]। एवेत्यवधारणार्थः ॥ ४ ॥

[होता यक्षदसौ यज इत्येतयोः स्थान आगूर्वषट्कारयोः प्रयोगं विधाय प्रैषेण याज्याकरणम्]

होता यक्षदसौ यजयोस्तु स्थान आगूर्वषट्कारौ यत्र क्व च प्रैषेण यजेत् ॥ ५ ॥

होता यक्षदसौ यजयोस्तु स्थाने आगूर्वषट्कारौ आगूश्च वषट्कारश्चानन्तर्येण भवतः । होता-यक्षच्छब्दस्थाने आगूः, असौ, "यजशब्दस्य स्थाने" वषट्कारः । तु-शब्दः प्राप्तव्यावृत्त्यर्थः । 'यथाप्रैषं यजति' (आश्रौ ५, ८, ४) इति वचनादादेशपदं नोद्ध्रियते । एतयोस्तु स्थाने आगूर्वषट्कारौ भवतः । एवं यत्र[१२] क्व च प्रैषेण यजेत् तत्र आदेशपदम् अनुसवनमुद्धरेत् । आगूर्वषट्कारयोश्च स्थाने आगूर्वषट्कारौ भवतः । [१३]ऋतुग्रहे तु[१३] पाशुकेष्वनुयाजेषु प्रैषाणामेव आद्यन्तयोर्यजति[१४] । सवनीयाधिकारात् सवनीयेष्वेव स्यात् । अन्यत्र प्राप्त्यर्थोऽयमारम्भः ॥ ५ ॥

१-१. एतल्लिङ्गैर° मूको । २. °सवनं विव° ब[२] । ३-३. सामानानुप्र° ब[२] मै । ४. प्रातःप्रातः सव° ब[१२]; प्रातः प्रातः प्रातः सव° पू । ५. तृतीयस्येति ब[१] पू । ६. तु० ऋखि ५,७,४,१-३ । ७. क्रियन्ते मै । ८. अनुसवमिज्या ब[२] पू । ९-९. °रागूस्थाने मै । १०. इत्यागूरन° मै । ११-११. °शब्दस्थाने मै । १२. नास्ति ब[१] । १३-१३. ऋतुग्रहणे ब[१२] पू । १४. °योर्जयन्ति ब[१] ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

[स्विष्टकृतोऽनुसवनमनुवाक्याविधानम्]

अथ स्विष्टकृतोऽग्ने जुषस्व नो हविर्माध्यन्दिने सवने जातवेदोऽग्ने तृतीये सवने हि कानिष इत्यनुसवनमनुवाक्याः ॥ ६ ॥

अथ स्विष्टकृतः पुरोळाशस्य[1] अनन्तरं स्विष्टकृद् भवति, तस्य स्विष्टकृतः अनुवाक्या प्रैषो याज्येति वक्तव्यानि। तदर्थमधिकारः क्रियते। 'अग्ने जुषस्व नो हविः' (ऋ ३,२८,१), 'माध्यन्दिने सवने जातवेदः' (ऋ ३,२८,४), 'अग्ने तृतीये सवने हि कानिषः' (ऋ ३,२८,५) इति एता अनुसवनमनुवाक्या भवन्ति स्विष्टकृतः। अनुसेवनमेकैका भवतीति प्रदर्शितम्। पूर्वास्वनुवाक्यासु लिङ्गैरनुसवनम्' (आश्रौ ५,४,३) इत्यनुवर्तमाने परिभाषाव्यवधायात् पुनरुच्यते अनुसवनमिति ॥ ६ ॥

[स्विष्टकृतः प्रैषयाज्ययोर्विधानं पूर्वोक्तानुवाक्यासु पुरोडाशशब्दस्य बहुवचनविकल्पकथनञ्च]

होता यक्षदग्निं पुरोळाशानामिति प्रैषः। हविरग्ने वीहीति याज्या। एतास्वनुवाक्यासु पुरोळाशशब्दं बहुवदेके ॥ ७ ॥

'होता यक्षदग्निं पुरोळाशानाम्' (ऋखि ५, ७, ४, ४) इति अयं प्रैषः। अनुसवनमित्यनुवर्तते। प्रैषग्रहणं याज्याविवक्षार्थम्। उत्तरत्र याज्या इति वचनात् प्रैषादि याज्यासंज्ञा स्यात्। 'हविरग्ने वीहि' (ऐब्रा २, २४) इतीयं[2] याज्या। अनुसवन इति वर्तते।

एतासु पुरोळाशस्य स्विष्टकृतश्च अनुवाक्यासु पुरोळाशशब्दम् एकवदाम्नातं बहुवदेके[3] शाखिनो मन्यन्ते पुरोळाशानामिति। पुनः एतास्विति वचनात् पुरोळाशानुवाक्यास्वपि भवत्यूहः[4]। अन्यथा स्विष्टकृदनुवाक्यास्वेव स्यादधिकारात्। एके इति वचनाद् अन्ये शाखिनः ऊहं न मन्यन्ते। कुतः। श्रुतौ प्रतिषेधात् ॥ ७ ॥

[पूर्वोक्तानुवाक्यासु पुरोडाशशब्दस्य बहुवचनविकल्पनिषेधः]

विज्ञायते पूयति वा एतदृचोऽक्षरं यदेनदूहति तस्मादृचं नोहेत् ॥ ८ ॥

विज्ञायते[5] श्रूयते पूयति विनश्यत्येव[6] एतद् ऋगक्षरं यद्येतद् ऊहति कर्ता। तस्मात् कारणाद् ऋचं नोहेत्। अधिकृतानामेव ऋचामूहप्रतिषेधे प्राप्ते पुनः ऋग्ग्रहणात् सर्वत्र ऋचामूहप्रतिषेधः। सूत्रकारेणापि[7] ऋक्षु ऊहो नोक्तः, यजुर्निगदेष्वेव ऊह आरब्धः 'सर्वेषु यजुर्निगदेषु' (आश्रौ ३, २, १६) इति ॥ ८ ॥

॥ इति पञ्चमे चतुर्थं खण्डम् ॥

---

१. °शया ब[1,2]; °शयाछा मैं पू। २. इति ब[1] पू। ३. बहुत्वमेके मूको। ४. °हम् मूको। ५. ज्ञायते मूको। ६. नश्य° ब[2]। ७. नास्ति मैं।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

अथ पञ्चमेऽध्याये पञ्चमः खण्डः

[द्विदेवत्यैर्ग्रहैः सह प्रचरणम्]

द्विदेवत्यैश्चरन्ति ॥ १ ॥

द्विदेवत्यैः द्वे द्वे[1] देवते येषां ग्रहाणां ते[2] द्विदेवत्याः तैर्द्विदेवत्यैः चरन्ति प्रचरन्ति[3] । चरन्तीत्येतदधिकृतं[4] वेदितव्यम् । इत उत्तरं यद् वक्ष्यामः तत् सर्वं द्विदेवत्यानां विधानम् । संज्ञा[5] चेयम् । [6]न न्विह[6] द्विदेवत्या इत्युक्ते एते प्रत्येतव्याः ॥ १ ॥

[वायवे इन्द्रवायुभ्यां च प्रयुज्यमानस्यैकस्य ग्रहस्यानुवाक्याकथनम्]

वायव इन्द्रवायुभ्यां वायवा याहि दर्शतेन्द्रवायू इमे सुता इत्यनुवाक्ये अनवानं पृथक्प्रणवे ॥ २ ॥

वायव इन्द्रवायुभ्यां च [7]एको ग्रहः[7] । द्विः प्रयुज्यमानोऽपि वायुरेकैव देवता । तस्माद् द्विदेवत्यम् । तस्य अनुवाक्ये प्रैषौ[8] याज्ये इह[9] वक्ष्यन्ते । 'वायवा याहि' (ऋ ५, ५१, ५), 'इन्द्रवायू इमे सुताः' (ऋ १, २, ४) इति एते अनुवाक्ये अनवानं भवतः । पृथक् प्रणवौ ययोस्ते पृथक्प्रणवे अनुवाक्ये । द्वयोरनुवाक्ययोः 'समाप्तौ प्रणवेनावसानम्' (आश्रौ १, २, १३) इति पृथगवसाने प्राप्ते तस्मादनवानमित्याह । अनवानमित्युक्ते अनवानभावाद्[10] आवसानिकस्य निवृत्तिः प्राप्ता, तस्मादाह— पृथक्प्रणवे इति । प्रणवस्यावसान लक्षणत्वादुत्तरेण ऋगादिना सह वर्णसंतानो न क्रियते ॥ २ ॥

[वायोरिन्द्रवाय्वोश्च प्रैषविधानम्]

होता यक्षद् वायुमग्रेगां होता यक्षदिन्द्रवायू अर्हन्तेति प्रैषावनवानम् ॥ ३ ॥

---

१. नास्ति ब[2] । २. ते ते ब[2] मै पू । ३. नास्ति मै । ४. प्रचर° ब[2] पू ; त्येतद° ब[1] ; इत्येतद° मै । ५. त्रुटितम् ब[2] । ६-६. नन्विह ब[2]; नन्विह नन्विह मै । ७-७. एकाहः मूको । ८. प्रैषो मूको । ९. इति मूको । १०. °नाभा° पू ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

'होता यक्षद् वायुमग्रेगाम्' (ऋखि ५, ७, ४, ५), 'होता यक्षदिन्द्रवायू अर्हन्ता' (ऋखि ५, ७, ४, ६) इति प्रैषौ अनवानं भवतः। 'प्रैषग्रहणं याज्याविवक्षार्थम्'[1]। अनियतावसाने प्राप्ते आनवान्यं विधीयते। याज्ययोर्मध्ये आगुरः प्रतिषेधात्, प्रैषयोरपि मध्ये आगुरः प्रतिषेधः स्यात्, तस्माद् 'होता यक्षत्' (ऋखि ५, ७, ४, ६) इति द्वितीयमपि प्रैषमादिशन्ति। एकेनैव प्रतीकादेशेन सिद्धे, यथा याज्यायाः प्रतीकादेशद्वयं[2] 'द्विरागूर्य मैत्रावरुणो द्विः प्रेष्यति' (ऐब्रा २, २८) इति श्रुतेः[3] ॥ ३ ॥

[वायोरिन्द्रवाय्वोश्च याज्याविधानम्]

अग्रं पिबा मधूनामिति याज्ये अनवानमेकागुरे पृथग्वषट्कारे ॥ ४ ॥

'अग्रं पिबा मधूनाम्' (ऋ ४, ४६, १; २) इति एते द्वे ऋचौ याज्ये अनवानं भवतः। एका आगूर्ययोस्ते एकागुरे। पृथग्वषट्कारौ ययोस्ते पृथग्वषट्कारे। अर्धर्चयोर्याज्ययोरन्तरा[4] अनवानं विधीयते। 'प्राणा वै [5]द्विदेवत्या अनवानं[5] द्विदेवत्यान् यजेत्' (ऐब्रा २, २८) इति श्रुतिः। नानादेवत्वात् स्वप्रधाने याज्ये भवतः। स्वप्रधानत्वाद् द्वयोरप्यागूर्य वषट्कारौ [6]प्राप्नुतः, तस्मादाह—एकागुरे इति। यत्र समानदेवत्यौ, तत्र स्वप्रधानेन। यथाश्विनशस्त्रयाज्या। तत्र† पृथगागूर्वषट्कारौ‡[6] न भवतः। एकागुरे इत्युक्ते[7] आद्याया एव आगूर्भवति। 'आगूर्याज्यादिः' (आश्रौ १, ५, ४) इत्यन्यत्र समासवचनाद्[8] याज्ययोरादिर्याज्यादिरिति विग्रहः। आगुरः एकत्वाद्[9] वषट्कारोऽप्येक एव स्यात्, 'अन्त्यः[10] सर्वत्र' (आश्रौ १,५,५) इति वचनान् मध्ये प्रतिषेधः स्यात्, तस्मात् पृथग्वषट्कारे इत्याह। 'सकृदागूर्य होता द्विर्वषट्करोति' (ऐब्रा २, २८) इति श्रुतिः। यथाऽनुवाक्ययोः स्वप्रधानत्वात् प्रणवान्त्यस्य[11] वर्णस्य ऋगादिना[12] सह वर्णसंहिता न क्रियते। [13]एवं याज्ययोरपि स्वप्रधानत्वाद् वषट्कारान्त्यस्य† ऋगादिना‡ सहϕ वर्णसंहिता न क्रियते[13]। [14]होमकालाव्यवायाद्धोमाः। होमायोत्तरा याज्या[14]

१-१. प्रैषग्रहणानां विव° ब[1]; °ग्रहणामाना विव° ब[2]; °णं मानवि° मै; °ग्रहणमाना विव° पू। २. नास्ति मूको। ३ श्रुतिः ब[2] मै पू। ४. °ज्ययोश्चान्तरा मूको। ५-५. नास्ति मूको। ६-६. नास्ति मै। †. नास्ति ब[2]। ‡. पृथग्वषट्कारौ ब[2]। ७. इत्युक्तेः ब[1]। ८. समानवच° मूको। ९. एकस्मात् मूको। १०. त्यः ब[1/2] पू; नास्ति मै। ११. °वान्तस्य मै। १२. ऋगादानां मूको। १३-१३. नास्ति ब[2]। †. °रोऽन्तरस्य ब[1]; °रोऽन्त(°न्त्य पू)स्य मै पू। ‡. °दीनां मूको। ϕ. नास्ति मै। १४-१४. होमकालव्यवाद्धोमा (°व्यवायाद्धोमा ब[2] पू; °व्यवायाद् मै) होमोत्तरा (होमो उत्तरा ब[2] पू; होमादुत्तरा मै) मूको।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

वक्तव्या। नह्यपरिसमाप्ते कर्मण्युत्तरं कर्मारभ्यते। वषट्कारानुमन्त्रणं तु अन्ते[1] एव द्विः क्रियते 'समस्तावेव तत्र द्विरनुमन्त्रयेत' (आश्रौ २, १६, १५) इति वचनात्। यद्यपि द्विःप्रैषमिदं कर्म तथापि[2] एकसम्प्रैषवदेव द्रष्टव्यम्। यस्माद् द्वितीयेन प्रैषेण होत्रा[3] प्रथमयाज्या आरभ्यते[4]। पृथग्वषट्कारे इति वचनात् प्राप्तयोर्वषट्कारयोः पुनरारम्भो नियमार्थम्। नियमाद् वषट्कारौ [5]पृथग् भवतो[5], नानुमन्त्रणमिति। अनुमन्त्रणं[6] तु प्रथमं न भवति ॥ ४ ॥

[इत आरभ्य प्रातःसवने इज्यानुवाक्ये अनवानं कर्त्तव्ये]

इदमाद्यनवानं प्रातःसवन इज्यानुवाक्ये ॥ ५ ॥

इदमादि इति वचनात् कृत्स्नेऽहनि प्राप्ते प्रातःसवन इत्युक्तम्[7]। इज्यानुवाक्ये[8] इति वचनात् प्रैषेषु चानवानं भवति। यथा प्रस्थितयाज्याप्रैषे अनवानम्। कस्मात्। अनवानं प्रातःसवने [9]इज्यानुवाक्ये इति वचनात्[9]। 'अनवानं[10] प्रातःसवने[11] यजेत्' (तु० ऐब्रा ६, ८) इति श्रुतिः। इदमादीति सवनीयानां पर्युदासदर्शनात् सोमाहुतीनामेवैतद् भवति, [12]नान्येषां वाजिनादीनाम्। इदमाद्यनवानं† ‡प्रातःसवने इत्यविशेषवचनाद्‡ वाजिनेऽप्यनवानं भवति[12]। यथा [13]ऐष्टिकस्य कर्मणः[13] अविशेषवचनात् सवनस्वरो[14] भवति।

[सूत्रच्छेदे मतान्तरकथनम्]

अपरे पुनः इदमाद्यनवानं प्रातःसवन इज्या एवं सूत्रावसानं कृत्वा वाजिनस्यानुवाक्यामनवानं न[15] कुर्वन्ति। अनुवाक्ये 'प्रैषौ चोत्तरयोर्ग्रहयोः' (आश्रौ ५, ५, ६) इति [16]परसूत्रे एवं वर्ण्यमाने अनुवाक्ये प्रैषौ चेति परिसंख्यानाद् याज्ययोरनवानप्रतिषेधः[16] प्राप्नोति। चकार एतयोरेव समुच्चयार्थो[17] नाधिकृतं समुच्चिनोति ॥ ५ ॥

[द्वितीयतृतीयसवनयोः प्रैषौ चानवानं कर्त्तव्यौ]

प्रैषौ चोत्तरयोर्ग्रहयोः ॥ ६ ॥

---

१. अन्तरे ब[1]। २. नास्ति मूको। ३. होता मूको। ४. आरभते ब[2]। ५-५. पृथगेव तौ मै। ६. नास्ति ब[1]। ७. प्राप्तं मूको। ८. इज्या ब[2]। ९-९. नास्ति व[2] मै। १०. प्रैषेषु वानं व[1] पू; नास्ति ब[2] मै। ११. नास्ति मूको। १२-१२. नास्ति ब[1]। †. इदमनवानं मै। ‡-‡. त्रुटितम् पू; °ने इत्येष वचनाद् ब[2]। १३-१३. ऐष्टिककर्मणः मै। १४. °स्वरो न ब[2]। १५. नास्ति ब[2] पू। १६-१६. सूत्रावसानं कृत्वा वाजिनस्यानुवाक्या(मनवानं न कुर्वन्ति)नानाद्याज्ययोरनवानप्रतिषेधः मै। १७. °च्चयो मै।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

प्रैषौ च ऐन्द्रवायवोत्तरयोर्ग्रहयोः प्रैषावनवानं भवतो याज्यानुवाक्ये च[1]। अप्राप्तं[2] विधीयते। च-शब्दोऽधिकृतसमुच्चयार्थः ॥ ६ ॥

[अध्वर्युकर्तृकं ग्रहपात्राहरणं होतृकर्तृकं समन्त्रं तद्ग्रहणञ्च]

हुत्वैतद् ग्रहपात्रमाहरत्यध्वर्युः ॥ ७ ॥

तद् गृह्णीयादैतु वसुः पुरूवसुरिति ॥ ८ ॥

वषट्कारेण हुत्वा[3] एतद् ऐन्द्रवायवं[4] ग्रहपात्रमाहरत्यध्वर्युः ॥ ७ ॥

तद् होता गृह्णीयात् 'ऐतु वसुः पुरूवसुः' (तु० ऐब्रा २,२७) इति एतेन मन्त्रेण। हुत्वैवाहरणकालो विधीयते।

एतदिति पुनरुच्यते परिभाषाव्यवहितत्वात्। ग्रहपात्रमाहरतीति गत्वा ग्रहणं मा भूदिति। 'कर्मचोदनायाम्' (आश्रौ १, १, १४) इति होतुः प्रतिषेधार्थमध्वर्युग्रहणम्। तदित्यनुच्यमाने तन्न सम्बध्यते ॥ ८ ॥

[ग्रहं गृहीत्वा दक्षिणोरौ तत्स्थापनमपिधानञ्च]

प्रतिगृह्य दक्षिणमूरुमपोच्छाद्य तस्मिन् सादयित्वाऽऽकाशवतीभिरङ्गुलीभिरपिदध्यात् ॥ ९ ॥

प्रतिगृह्य ऐन्द्रवायवप्रतिग्रहानन्तरं दक्षिणमूरुं वस्त्रेणाच्छादितम् अपोच्छाद्य उत्कृष्य वस्त्रमपनीय तस्मिन् ऊरौ ग्रहं सादयित्वा स्थापयित्वा आकाशं विद्यते यासाम् अङ्गुलीनां ता आकाशवत्यस्ताभिः आकाशवतीभिरङ्गुलीभिर्ग्रहमपिदध्यात्[5]। प्रतिगृह्णोति वचनात् प्रतिग्रहानन्तरमपोच्छादनं क्रियत इति। इह[6] दक्षिणग्रहणादुत्तरं कर्म अपोच्छादनं[7] सव्येन क्रियते। यत्र क्व च सादने प्राप्ते[8] तस्मिन् सादयित्वेत्युच्यते। पाणिना अपिधाने प्राप्ते अङ्गुलीभिरित्युच्यते[9]। [10]अच्छिद्राभिरपिधाने प्राप्ते आकाशवतीभिरित्युच्यते[10] ॥ ९ ॥

[उत्तरयोर्ग्रहपात्रयोरपि पूर्वोक्तविधिना सर्वं कर्म कर्त्तव्यम्]

एवमुत्तरे ॥ १० ॥

[10]यथा ऐन्द्रवायवस्य ग्रहणसादनापिधानानि[10] [11]एवमुत्तरे अपि ग्रहपात्रे गृहीत्वोरौ†[11] सादयित्वा अङ्गुलीभिरपिदध्यात्[12] ॥ १० ॥

---

१. नास्ति मूको। २. प्राप्तं मै। ३. हुते ब[1/2] पू। ४. एतत् मै। ५. °रङ्गुलिभिरपि° मै। ६. ह ब[1/2] पू। ७. नास्ति ब[2]। ८. नास्ति ब[1]। ९. °लिभि° मै। १०-१०. नास्ति मै। ११-११. नास्ति मै। †. गृहीत्वैतौ ब[1/2]; त्रुटितम् पू। १२. °लिभि° ब[1/2] मै।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

[उत्तरयोर्ग्रहयोः प्रतिग्रहो भक्षणञ्च]

सव्येन त्वपिधाय तयोः प्रतिग्रहो भक्षणं च ॥ ११ ॥

सव्येन होतुः सव्यस्य पाणेः अङ्गुलीभिः[1] अपिधाय तयोरुत्तरयोर्ग्रहयोः प्रतिग्रहं कुर्यात् । तु-शब्दः दक्षिणव्यावृत्त्यर्थः । 'एवमुत्तरे' (आश्रौ ५, ५, १०) इत्यनुवर्तमाने पुनरुच्यते तयोरिति, उत्तरसूत्रविवक्षार्थम् । सव्येनापिधाय तयोः प्रतिग्रहभक्षणे[2] तु । सर्वेषां भक्षणं च सव्येनापिधाय कर्तव्यम् । सर्वेषामैन्द्रवायवादीनाम् । च-शब्दः सव्येनापिधानसमुच्चयार्थः ॥ ११ ॥

[मैत्रावरुणग्रहस्य आश्विनग्रहस्य च विधिकथनम्]

मैत्रावरुणस्यायं वां मित्रावरुणा होता यक्षन्मित्रावरुणा गृणाना जमदग्निनेति । ऐतु वसुर्विदद्वसुरिति प्रतिगृह्य दक्षिणेनैन्द्रवायवं हृत्वाऽभ्यात्मं सादनम् । आश्विनस्य प्रातर्युजा वि बोधय होता यक्षदश्विना नासत्या वावृधाना शुभस्पती इत्यैतु वसुः संयद्वसुरिति प्रतिगृह्यैवमेव हृत्वोत्तरेण शिरः परिहृत्याभ्यात्मतरं सादनम् ॥ १२ ॥

मैत्रावरुणस्य द्विदेवत्यग्रहस्य विधिर्वक्ष्यते । 'अयं वां मित्रावरुणा' (ऋ २, ४१, ४), [3]'होता यक्षन्मित्रावरुणा'[3] (ऋखि ५, ७, ४, ७), गृणाना जमदग्निना' (ऋ ३, ६२, १८) इति अनुवाक्या प्रैषो याज्येति ऐन्द्रवायवेऽधिकृतमनुवर्तते । 'ऐतु वसुर्विदद्वसुः' (तु० ऐब्रा २, २७) इति एतेन मन्त्रेणाहृतं ग्रहपात्रं प्रतिगृह्य दक्षिणेनैव ऐन्द्रवायवं हृत्वा आत्मानमभि अभ्यात्मम्[4] [5]†आत्मन आभिमुख्यादभ्यन्तरं† भवतीत्येतस्मात् पत्न्या यदुत्तरेण सञ्चरे प्राप्ते दक्षिणेनेत्युच्यते । दक्षिणेनेति[5] वचनाद् दक्षिणत एव सादने प्राप्ते अभ्यात्ममित्युच्यते ।

आश्विनस्य ग्रहस्य विधिरुच्यते[6] । 'प्रातर्युजा वि बोधय' (ऋ १, २२, १), 'होता यक्षदश्विना नासत्या' (ऋखि ५, ७, ४, ८), 'वावृधाना शुभस्पती' (ऋ ८,५,११) इति अनुवाक्या प्रैषो याज्या । नासत्येति विशेषणं तैरोअह्न्यस्य व्युदासार्थम् । 'ऐतु वसुः संयद्वसुः' (तु० ऐब्रा २, २७) इति एतेन मन्त्रेण

---

१. °लिभिः° ब[1,2] मै । २. °क्षणं मूको । ३-३. नास्ति ब[1] । ४. अभ्यात्मा मूको । ५-५. नास्ति ब[2] । †-†. आत्मनोऽभ्यामुख्याद° ब[1] मै पु । ६. स्विष्टिरिष्यते मै ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

प्रतिगृह्य[1] यथा मैत्रावरुणपात्रमाहृतम् एवं हृत्वा उत्तरेण शिरः परिहृत्य नीत्वा मैत्रावरुणपात्रमभ्यात्मं सादितम्, तस्मादप्यभ्यात्मतरमाश्विनं सादयेत्। अधिकारादभ्यात्मसादने प्राप्ते अभ्यात्मतरम् इत्युच्यते ॥ १२ ॥

[अनुवचनप्रैषयाज्यासु अध्वर्युकर्तृक-संप्रैषस्य नित्यत्वम्]

अनुवचन-प्रैष-याज्यासु नित्योऽध्वर्युतः संप्रैषः ॥ १३ ॥

अनुवचनानि च प्रैषाश्च याज्याश्च अनुवचनप्रैषयाज्याः, तासु नित्यः अच्युतः, अध्वर्युतः [2]अध्वर्युः सपुरुषः[2]। तस्मादध्वर्युतः नित्यः संप्रैषः। संप्रैषार्थमिदमुच्यते। तत्र तत्र प्रेषित इत्यनुच्यमाने गुरु स्यादिति। अस्मादारम्भात् [3]संप्रैष आकाङ्क्ष्यो[3] भवति। तथा[4] मैत्रावरुणस्य 'अयं वां मित्रावरुणा' (ऋ २, ४१, ४), 'होता यक्षन्मित्रावरुणा' (ऋखि ५, ७, ४, ७), 'गृणाना जमदग्निना' (ऋ ३, ६२, १८) इति चोदितानां [5]तावत्कालमेव वचने[5] प्राप्ते अस्मादारम्भात् [3]संप्रैष आकाङ्क्ष्यो[3] भवति अनुवचनप्रैषयाज्यास्विति अनुक्रमेण चोदितत्वात्। सप्रैषास्वेव[6] याज्यासु नित्यसंप्रैष इति प्राप्ते अध्वर्युग्रहणादप्रैषास्वपि[7] नित्यसंप्रैषो भवति [8]यथा शस्त्रयाज्यासु[8] ॥ १३ ॥

[उन्नीयमानेभ्यश्चमसेभ्योऽनुसवनं मैत्रावरुणकर्तृकमनुवचनम्]

उन्नीयमानेभ्योऽन्वाहाऽऽ त्वा वहन्त्वसावि देवमिहोप यातेत्यनुसवनम् ॥ १४ ॥

उन्नीयमानेभ्यः चमसेभ्योऽन्वाह मैत्रावरुणः 'आ त्वा वहन्तु' (ऋ १.१६.१), 'असावि देवम्' (ऋ ७, २१, १), 'इहोप यात' (ऋ ४, ३५, १) इति एतानि त्रीणि सूक्तानि सवनं सवनमनु एकैकं सूक्तमन्वाह। उन्नीयमानेभ्य इति निमित्तवचनात् प्रेषितोऽपि[9] न ब्रूयाद् यावदुन्नयनं नारब्धमिति। अनुसवनम् इति वचनात् त्रिष्वपि सवनेषु भवन्ति ॥ १४ ॥

[अनुसवनं होतुः प्रैषाः प्रस्थितयाज्याभिर्यजनविधानं च]

होता यक्षदिन्द्रं प्रातः प्रातःसावस्य होता यक्षदिन्द्रं माध्यन्दिनस्य सवनस्य होता यक्षदिन्द्रं तृतीयस्य सवनस्येति प्रेषितः प्रेषितो होताऽनुसवनं प्रस्थितयाज्याभिर्यजति ॥ १५ ॥

---

१. प्रतिग्रहं मूको। २-२. नास्ति ब[1,2] पू; अध्वर्युः मैं। ३-३. प्रैषाकांक्षो मूको। ४. यथा मूको। ५-५. कालमेवचने ब[1,2] कालेमेव वचने मैं पू। ६. संप्रैषास्वेव ब[1] मैं पू। ७. °णादसप्रैषा° ब[1]; °णादसंप्रैषा° ब[1] मैं पू। ८-८. यस्तु शस्त्रयाज्याः (°ज्ये मैं) मूको। ९. प्रेषितो ब[2]।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

'होता यक्षदिन्द्रं प्रातः प्रातःसावस्य'[1] (तु० ऋखि ५, ७, ४, ९), 'होता यक्षदिन्द्रं माध्यन्दिनस्य सवनस्य' (ऋखि ५, ७, ४, १०), 'होता यक्षदिन्द्रं तृतीयस्य सवनस्य' (तु० ऋखि ५,७,४,११) इति एते त्रयः प्रेषाः। एषामेकैकेन प्रैषेण मैत्रावरुणेन प्रेषितो होता अनुसवनं सवनं सवनमनु अनुसवनं यजति[2]। प्रैषयाज्यानां क्रमेणाम्नातत्वात् कर्मण्यपि क्रमः सिद्धः। एवमिह क्रमेणाम्नायाभावात् कर्मणि क्रमो न प्राप्नोति। तस्मादिदमुच्यते। प्रेषितः प्रेषित इति वीप्सा अनुसवन-प्राप्त्यर्था। होतृग्रहणं मैत्रावरुणकर्माधिकारात्। अनुसवनमिति पुनरुच्यते। आपवादिकस्य[3] विधेस्तावत्कालत्वादुन्नीयमानविषये[4] अनुसवनमित्युक्तं तत्रैव भवति[5], नानुवर्तते[6]। प्रस्थितानां सोमानां याज्याः[7] प्रस्थितयाज्याः[8] ताभिः यजति[9] ॥ १५ ॥

[नामग्रहणेन प्रेषितानां मैत्रावरुणादीनां प्रस्थितयाज्याभिर्यजनम्]

नामादेशमितरे ॥ १६ ॥

प्रशास्तर्यज[10] ब्रह्मन्[10] यजेत्येवमादिप्रैषैः आदिष्टा नामादेशम् इतरे मैत्रा-वरुणादयः प्रस्थितयाज्याभिर्यजन्ति। 'प्रेषितः प्रेषितः' (आश्रौ ५, ५, १५) इत्यधिकारान्नामादेशमित्युच्यते। होतुरधिकारादितरे इति वचनम्। अच्छावाकस्यापि प्रस्थितयाज्यासंज्ञा[11] भवति ॥ १६ ॥

[प्रशास्त्रादीनां प्रस्थितयाज्याभिर्यजनम्]

प्रशास्ता ब्राह्मणाच्छंसी पोता नेष्टाऽऽग्नीध्रः। अच्छावाकश्च ॥१७॥

प्रशास्ता ब्राह्मणाच्छंसी पोता नेष्टा आग्नीध्रः अच्छावाकश्च एते नामभिरादिष्टाः प्रस्थितयाज्याभिर्यजन्ते। च-शब्दः समुच्चयार्थः। कालान्तरे अच्छावाको यः, तस्माच्चकारः समुच्चयार्थः[12] क्रियते। प्रस्थितयाज्यासंज्ञायां सत्याम् अनुवषट्कारप्राप्तिः[13] ॥ १७ ॥

[उत्तरयोः सवनयोराग्नीध्रात् पुरस्तादच्छावाककर्तृकयजनविधानं होत्रादीनां प्रातः-सवनिकीनां प्रस्थितयाज्यानां कथनञ्च]

उत्तरयोः सवनयोः पुराऽऽग्नीध्रादिदं ते सोम्यं मधु मित्रं वयं

---

१. प्रातः सवनस्य मूको। २. नास्ति मूको। ३. अपवादिकस्य मूको। ४. विधिस्ता° मूको। ५. इति ब[2]। ६. वनुव° मूको। ७. याज्या मूको। ८. नास्ति ब[1] पू; °याज्या ब[2] मै। ९. नास्ति मूको। १०. ऋखि ५, ७, ५, ५; ६। ११. °संज्ञा न पू। १२. समुदायार्थः ब[1]। १३. °वट्कारे प्राप्तिः मूको।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

हवामह इन्द्र त्वा वृषभं वयं मरुतो यस्य हि क्षयेऽग्ने पत्नी-रिहाऽऽ वहोक्षान्नाय वशान्नायेति प्रातःसवनिक्यः[1] प्रस्थितयाज्याः ॥१८॥

उत्तरयोः सवनयोः पुराऽऽग्नीध्राद् आग्नीध्रात् पुरस्ताद् अच्छावाको यजति । प्रातःसवनेनातिदेशादन्ते प्राप्तस्तस्मादिदमुच्यते पुराऽऽग्नीध्रात् । तथैव ऋचो वक्ष्यन्ते 'इदं ते सोम्यं मधु' (ऋ ८, ६५, ८) इति यथासमाम्नाता एव ऋचः प्रातःसवने भवाः प्रातःसवनिक्यः प्रस्थितयाज्या भवन्ति षण्णामेव । अच्छावाकस्य तु उत्तरत्र वक्ष्यति ॥ १८ ॥

[द्वितीयतृतीयसवनयोः होत्रादीनामच्छावाकसहितानां प्रस्थितयाज्याकथनमनु-वषट्कारविधानं च]

पिबा सोममभि यमुग्र तर्द इति तिस्रोऽर्वाङेहि सोमकामं त्वाहुः, तवायं सोमस्त्वमेह्यर्वाङ् (ऋ ३, ३५, ६), इन्द्राय सोमाः प्र दिवो विदानाः (ऋ ३, ३६, २), आपूर्णो यस्य कलशः स्वाहा (ऋ ३, ३२, १५) इति माध्यन्दिन्यः । इन्द्र ऋभुभिर्वाजवद्भिः समुक्षितम् (ऋ ३, ६०, ५), इन्द्रावरुणा सुतपाविमं सुतम् (ऋ ६, ६८, १०), इन्द्रश्च सोमं पिबतं बृहस्पते (४, ५०, १०), आ वो वहन्तु सप्तयो रघुष्यदो (ऋ १, ८५, ६), अमेव नः सुहवा आ हि गन्तन (ऋ २, ३६, ३), इन्द्राविष्णू पिबतं मध्वो अस्य (ऋ ६, ६९, ७), इमं स्तोममर्हते जातवेदसे (ऋ १, ९४, १) इति तार्तीयसवनिक्यः सोमस्याग्ने वीहीत्यनुवषट्कारः ॥ १९ ॥

'पिबा सोममभि यमुग्र तर्दः' (ऋ ६, १७, १-३) इति एतास्तिस्र ऋचः । 'अर्वाङ् एहि' (ऋ १, १०४, ९) इति यथा समाम्नाताश्चतस्रः । इत्येता माध्यन्दिने भवा माध्यन्दिन्यः प्रस्थितयाज्याः सप्त सप्तानाम् ।

'इन्द्र ऋभुभिः' इति यथासमाम्नाताः सप्त सप्तानां तृतीयसवने भवाः तार्तीयसवनिक्यः प्रस्थितयाज्याः ।

'सोमस्याग्ने वीहि' (ऋ ३, २८, ३) इत्यनुवषट्कारश्च पश्चाद् भवति । वषट्कारमनु क्रियते अनुवषट्कारः ॥ १९ ॥

---

१. प्रातःसावनिक्यः मूको ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

[अनुवषट्कारस्य स्थानानां कथनम्]

प्रस्थितयाज्यासु शस्त्रयाज्यासु मरुत्वतीये हारियोजने महिम्नि । आश्विने च तैरोअह्न्ये ॥ २० ॥

'प्रस्थितयाज्यासु शस्त्रयाज्यासु† मरुत्वतीये हारियोजने **वषट्कारमनुक्रियते**[1]'। अनुवषट्कार इत्येषा संज्ञा। 'नानुवषट्करोति' (आश्रौ ८, १३, १८) इत्युक्ते चैतस्य प्रतिषेधः। 'त्रयाणां ह वै हविषां स्विष्टकृते न समवद्यन्ति सोमस्य धर्मस्य वाजिनस्येति स यदनुवषट्करोत्यग्नेरेव स्विष्टकृतोऽनन्तरित्यै' (ऐब्रा १, २२) इति श्रुतिः। 'तार्तीयसवनिक्यः' (आश्रौ ५, ५, १९) इत्यधिकारात् पुनः प्रस्थितयाज्याग्रहणम्। शस्त्रयाज्यासु शस्त्राणां याज्याः शस्त्रयाज्यास्तासु[2] अनुवषट्कारः क्रियते। प्रस्थितयाज्यास्विति वचनादन्यत्र न प्राप्नोति तस्मादिदमुच्यते। यथा सवनमुखीये भक्षविधिरुक्तः शस्त्रयाज्यान्तेषु न प्राप्नोतीति पुनरुच्यते। मरुत्वतीये ग्रहे अनुवषट्कारः क्रियते। शस्त्रे उक्तत्वाद् ग्रहे भवति। उत्तरत्र[3] ग्रहेषु प्रतिषेधदर्शनन्यायान्मरुत्वतीयेऽपि प्रतिषेधः स्यादितीदमुच्यते। [4]हारियोजने कृते अनुवषट्कारः क्रियते। सोमस्यानुवषट्कारो †दृष्टो धानामिश्रस्यात्†[5] न स्यादितीदमुच्यते[4]। महिमा[5] ग्रहः। 'महिम्ना पुरस्तादुपरिष्टाच्च वपानां चरन्ति' (आश्रौ १०, ९, ४) इत्यत्र महिम्नि अनुवषट्कारः क्रियते। प्रकरणान्तरे पशुकर्मणि दृष्टः न[6] स्यादितीदमुच्यते, तत्राचोदितत्वाच्च[7]। [8]आश्विने च[8] अश्विनौ देवता यस्य सोमस्य स आश्विनः, तस्मिन् वषट्कारः क्रियते। अह्ना तिरस्कृतो यः सोमः, [9]स तैरोअह्न्यः[9]। शस्त्रयाज्यास्विति[10] प्राप्तः, पुरोडाशयागे आश्विनेऽप्यनुवषट्कारः प्राप्तः, तस्माद्विशेषणं क्रियते तैरोअह्न्य इति। ग्रहाधिकारो वर्तते। अधिकारादाश्विनो द्विदेवत्यः। तस्मादधिकृतादन्यत्वाच्चकारः समुच्चयार्थः क्रियते। ग्रहेषु आश्विने च समम् अनुवषट्कारः क्रियते इति ॥ २० ॥

[अनुवषट्कारप्रतिषेधगाथाप्रदर्शनम्]

तदेषाऽभि यज्ञगाथा गीयते—

ऋतुयाजान् द्विदेवत्यान् यश्च पात्नीवतो ग्रहः ।
आदित्यग्रहसावित्रौ तान् स्म माऽनुवषट्कृथाः ॥ इति ॥ २१ ॥

१-१. नास्ति मै। †. नास्ति ब[1,2]। २. °ज्यास्तासु शस्त्रयाज्यासु मै। ३. तु. आश्रौ ५, ५, २१। ४-४. नास्ति ब[1] मै पू। †-†. °मिश्रस्या न ब[2]; तु. आश्रौ ६, ११, ९; १३। ५. महिम्नो मूको। ६. नास्ति मूको। ७. तत्रे चो° ब[1] पू; तत्र चो° मै। ८-८. नास्ति ब[1]। ९-९. सति शेषे अदृश्यः मै। १०. नास्ति ब[1]।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

तदेषाऽभि यज्ञगाथा गीयते अधिकृतं यदनुवषट्कारकर्म तदभिविनिवर्तकं[1] कर्म गायतीति यज्ञगाथा गीयते। ब्राह्मणे एषा श्रुतिरिति दर्शयति। ऋतुयाजान् ग्रहान् 'ऋतुयाजैश्चरन्ति' (आश्रौ ५, ८, १) इति, [2]"द्विदेवत्यान् ग्रहान्' द्विदेवत्यैश्चरन्ति' (आश्रौ ५, ५, १) इति। यश्च इति श्लोकपूरणार्थः। 'पात्नीवतः आग्नीध्रः पात्नीवतस्य यजति' (आश्रौ ५, १९, ७) इति[3]। ग्रह इति श्लोकपूरणार्थः। आदित्यग्रहसावित्रौ आदित्यग्रहेण चरन्ति[4], सावित्रेण ग्रहेण[5] चरन्ति[6]। तान् एतान् ग्रहान्। स्मेति पूरणार्थो निपातः। माऽनुवषट्कारमेतेषु[7] कृथाः। मा कृथाः मा कुर्विति कर्ता उच्यते। श्रुतिवाक्येन एतेषु अनुवषट्कारः प्रतिषिद्धः। 'स यदनुवषट्करोत्यग्नेरेव स्विष्टकृतोऽनन्तरित्यै' (ऐब्रा १, २२) इति प्राप्तस्य प्रतिषेधः ॥ २१ ॥

[प्रतिवषट्कारं भक्षणविधानम्]

प्रतिवषट्कारं भक्षणम् ॥ २२ ॥

वषट्कारं वषट्कारं प्रति भक्षणं क्रियते। यत्रायं वषट्कारो द्विः[8] विद्यते तत्र द्विर्भक्षणं, यत्र न[8] विद्यते तत्र सकृत्। अवषट्कर्तुरपि अयमेव न्यायः 'इन्दविति द्विरल्पं भक्षयेत्' (लाश्रौ २, ५, ५) इति छन्दोगानाम् ॥ २२ ॥

[उत्तरभक्षणस्य तूष्णीं करणीयत्वम्]

तूष्णीमुत्तरम् ॥ २३ ॥

यत्र द्विर्भक्षणं तत्र प्रतिभक्षणं मन्त्रावृत्तौ प्राप्तायां तूष्णीम् अमन्त्रमुत्तरं भक्षणं भवति ॥ २३ ॥

[अध्वर्योरागमनम्]

एत्यध्वर्युः ॥ २४ ॥

हुत्वा आग्नीध्रचमसमादाय एति आगच्छति अध्वर्युः ॥ २४ ॥

[अयाळग्नीदिति होतुः प्रश्नः]

अयाळग्नीदिति पृच्छति ॥ २५ ॥

---

१. °भिनिव° ब[2]। २-२. नास्ति मूको। ३. नास्ति ब[1,2] पू।
४. तु. आश्रौ ५, १७, २। ५. नास्ति मूको। ६. तु. आश्रौ ५, १८, १।
७. नानुवं मूको। ८. नास्ति ब[1]।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

आगतम् अयाळग्नीदिति 'होता पृच्छति न' दूरस्थम्। प्रथमा द्वितीयार्थे द्रष्टव्या। †प्रथमा तु उत्तरसूत्रार्था। होता पृच्छति बहिर्वृत्तस्याज्ञानात्‡ द्वितीयया वक्तव्यं, तद् गुरु भवति। तस्माद् 'एत्यध्वर्युः' (आश्रौ ५, ५, २४) इति† प्रथमाऽकृतार्थाϕ सतीऽ द्वितीयार्थे भविष्यति, उत्तरसूत्रार्था च ॥ २५ ॥

होत्राऽऽयाळग्नीदिति*[1] पृष्टः अध्वर्युः—

[अयाळिति अध्वर्योः प्रतिवचनम्]

अयाळिति प्रत्याह ॥ २६ ॥

अध्वर्युरिति वर्तते। अयाळग्नीदित्येवं प्रतिवचनं केषांचिदध्वर्यूणामाम्नातम् ॥ २६ ॥

[होतुर्जपविधानम्]

स भद्रमकर्यो नः सोमस्य पाययिष्यतीति होता जपति ॥ २७ ॥

अध्वर्युणा प्रयुक्तः पृष्टो होता 'स भद्रमकर्'[2] इति एतं[3] यथासमाम्नातं मन्त्रं जपति। होतृग्रहणम् अध्वर्योरधिकारात् ॥ २७ ॥

॥ इति पञ्चमे पञ्चमं खण्डम् ॥

१-१. नास्ति ब[1]। †-†. नास्ति मै। ‡. बहिर्वृतस्या ब[3]; त्रुटितम् पू। ϕ. प्रथमाकृतार्था (°र्थे मै) ब[2] मै पू। Ş. सति ब[3] मै पू। *. होतादग्नी (होता ब[2] पू) दग्नीदिति ब[2] मै पू। २. °मकरोत् मूको। ३. इत्यन्तं ब[1]।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

अथ पञ्चमेऽध्याये षष्ठः खण्डः

[ऐन्द्रवायवपात्रग्रहणमन्त्रकथनम्]

ऐन्द्रवायवमुत्तरेऽर्धे गृहीत्वाऽध्वर्यवे प्रणामयेद् एष वसुः पुरूवसुरिह वसुः पुरूवसुर्मयि वसुः पुरूवसुर्वाक्पा वाचं मे पाह्युपहूता वाक्सह प्राणेनोप मां वाक्सह प्राणेन हूयतामुपहूता ऋषयो दैव्यासस्तनूपावानस्तन्वस्तपोजा उपमामृषयो दैव्यासो ह्वयन्तां तनूपावानस्तन्वस्तपोजा (तु० ऐब्रा २, २७) इति ॥ १ ॥

सदसि उपविष्टे अध्वर्यौ होता ऐन्द्रवायवम् उत्तरेऽर्द्धे गृहीत्वा तस्मै अध्वर्यवे तूष्णीमेव प्रणामयेत् । मन्त्रस्तु प्रणामनार्थो न[1] भवति, भक्षायैव । एवं हि श्रुतिः—'वाक्पा वाचं मे पाहि । इत्यैन्द्रवायवं भक्षयति' (ऐब्रा २, २७) । सूत्रकारोऽपि दर्शयति—'उपह्वानादि पुनः संभक्षयित्वा' (आश्रौ ५, ६, ३) इति । अत्र उपह्वानादीति वचनादस्य मन्त्रस्य प्राप्तस्य निवृत्तिः । उत्तरेऽर्ध[2] इति वचनात् [3]पूर्वेऽर्द्धे मध्ये[3] वा नानुगृह्यते[4] । अध्वर्यवे ग्रहं तूष्णीमेव प्रणाम्य 'एष वसुः' (ऐब्रा २, २७) इत्येतं यथासमाम्नातं मन्त्रं जपति ॥ १ ॥

[होतुः सोमग्रहभक्षणविधिकथनम्]

अध्वर्य उपह्वयस्वेत्युक्त्वाऽवघ्राय नासिकाभ्यां वाग्देवी सोमस्य तृप्यत्विति भक्षयेत् सर्वत्र ॥ २ ॥

भक्षार्थत्वात्[5] जपं समाप्य अध्वर्य उपह्वयस्व इत्युक्त्वा अध्वर्युणोपहूतः[6] नासिकाभ्यामुभाभ्यां संसृष्टं[7] कृत्वाऽवघ्राय गन्धमुपादाय वाग्देवी इति एतेन मन्त्रेण[8] ग्रहं भक्षयेत् सर्वत्र । सोमभक्षेषु च नानुपहूतेन सोमः पातव्यः इति श्रुतिः[9] । तस्मादुपहव एषितव्यः । अवघ्रायेति सिद्धे [10]नासिकाभ्यामिति वचनान्[10] नासिकाभ्यां

---

१. नास्ति मै । २. उत्तरार्धं मै । ३-३. पूर्वार्धं (°र्धे मै पू) मध्ये ब[1] मै पू; पूर्वेऽर्धमध्ये ब[2] । ४. ना तु गृह्यते ब[1/2] पू । ५. भक्षार्थं कृतत्वात् ब[3]; त्रुटितम् पू । ६. अध्वर्यु(°र्यूं ब[3] पू)णामुप° मूको । ७. संस्पृष्टं मै । ८. तु. मासं ८, ३७ । ९. तु. मैसं २, ४, १; आपश्रौ १२, २४, १४; गोब्रा २, ५, ६ । १०-१०. नास्ति ब[3] ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

संश्लिष्टं ग्रहं कृत्वाऽवघ्राणं क्रियते । द्विदेवत्याधिकारादन्यत्रापि सोमभक्षणेषु प्राप्त्यर्थं सर्वत्र-ग्रहणम् ॥ २ ॥

[अध्वर्योः सोमप्रतिभक्षणं सोमस्यावनयनादि च]

प्रतिभक्षितं होतृचमसे किंचिदवनीयानाचम्योपह्वानादि पुनः संभक्षयित्वा न सोमेनोच्छिष्टा भवन्तीत्युदाहरन्ति शेषं होतृचमस आनीयोत्सृजेत् ॥ ३ ॥

प्रतिभक्षितं[1] होत्रा भक्षिते अध्वर्युः प्रतिभक्षितं[2] करोति । तेन प्रतिभक्षितं[3] ग्रहपात्रं होतृचमसे किंचिद् एकदेशमवनीय संस्रावं[3] कृत्वा, प्रतिभक्षितम्[2] इति वचनात्, प्रतिभक्षादनन्तरम् अवनयनं क्रियते । किंचिदिति वचनात् कृत्स्नस्यावनयनं न क्रियते । भक्षं कृत्वा नाचामेत् । अनाचम्य उपह्वानादि[4] कृत्वा उपहूयावघ्राय पुनर्द्वितीयं संभक्षयित्वा अध्वर्युः प्रतिप्रस्थाता च संयुतौ भक्षयित्वा । 'यज्ञोपवीतशौचे च' (आश्रौ १, १, १०) इति [5]वचनादाचमने प्राप्ते अनाचम्येत्युच्यते । उत्तरत्र श्रुतिं दर्शयति । उपह्वानादीति[5] वचनात् पूर्वस्य जपस्य[6] लोपः । 'एष वसुः' (ऐब्रा २, २७; आश्रौ ५, ६, १) इत्येतस्य भक्षार्थत्वाद् भक्षचोदिते प्राप्ते उपहूयावघ्राय मन्त्रेण भक्षयेत्[7]। यदि प्रतिप्रस्थाता च भक्षयति । तस्मिन्नपि उपहव एषितव्यः । पुनरिति वचनाद् द्वितीयं भक्षयति । समिति वचनाद् होत्रध्वर्युप्रतिप्रस्थातृणां समवेतानां द्वयोर्वा भक्षः । प्रतिप्रस्थातर्यप्युपहव एषितव्यो यदि भक्षयति, 'यथासभक्षं त्वदीक्षिताः' (आश्रौ ५, ६, १९) इति वचनात् ।

न सोमेन, अनाचम्य[8] इत्युक्तम् । अनाचमनसाधनार्था इयं श्रुतिः । सोमभक्षणेन उच्छिष्टाः कर्तारो न भवन्तीति ब्रह्मवादिन उदाहरन्ति । तेषां वाक्यं प्रमाणम् । तस्मादुक्तं सूत्रकारेण अनाचम्येति[9] । सर्वत्रेत्यधिकारे वर्तमाने अनाचम्येत्युक्तम्[10] । तत्सर्वं सोमभक्षेष्वेवानाचमनम् । तस्य सा श्रुतिः । तस्मात् सर्वार्था । भक्षिते शेषं यद् ग्रहे तच् छेषं होतृचमसे आनीय[11] समवनीय उत्सृजेत् । शेषग्रहणात् सर्वस्यावनयनम् । इह उत्सृजेदिति वचनात् प्रागवनयने कृतेऽप्यनुत्सर्गः । 'न कञ्चन द्विदेवत्यानामनवनीतमवसृजेत्' (आश्रौ ५, ६, ६) इति वचनाद् अवनयने कृते उत्सर्गः प्राप्तः ॥ ३ ॥

---

१. भक्षं (भक्षणं मै) प्रतिभक्षः मूको । २. प्रतिभक्षं मूको । ३. संश्रावं ब[2] मै पू । ४ °नादि ब[2] मै पू । ५-५. नास्ति ब[2] । ६. तु. आश्रौ ५, ५, २७ । ७. तु. आश्रौ ५, ६, १ । ८. नाचामेत् ब[1]; नाचामेत्तत् ब[2] मै; वुटितम् पू । ९. नाचामेति ब[1]; नाचामेदिति ब[2] मै पू । १०. आचामेदित्यु° मूको । ११. नास्ति मूको ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

[उत्तरयोर्ग्रहपात्रयोरेतेनैव विधिनोत्सर्गविधानम्]

एवमुत्तरे ॥ ४ ॥

ऐन्द्रवायवस्य यदुक्तम् उत्तरेऽर्द्धे गृहीत्वेत्येवमादि[1], तद्[2] एवमादि उत्तरे[3] ग्रहपात्रे एतेनैव विधिनाऽध्वर्यवे प्रणाम्य भक्षयित्वा होतृचमसे चानीयोत्सृजेत्[4] ॥ ४ ॥

[उत्तरयोर्ग्रहपात्रयोः पुनर्भक्षप्रतिषेधविधानम्]

न त्वेतयोः[5] पुनर्भक्षः ॥ ५ ॥

एतयोस्तु ग्रहयोः पुनर्भक्षो न विद्यते। 'एवमुत्तरे' (आश्रौ ५, ६, ४) इति प्राप्ते प्रतिषेधः। तुकारः प्राप्तव्यावृत्त्यर्थः ॥ ५ ॥

[होतृचमसेऽनवनीतस्य द्विदेवत्यग्रहस्योत्सर्गप्रतिषेधः]

न कंचन द्विदेवत्यानामनवनीतमवसृजेत् ॥ ६ ॥

द्विदेवत्यानां कंचन द्विदेवत्यं होतृचमसे अनवनीतम् न[3] अवसृजेत्। उत्तरयोरधिकारात् कंचनेत्युच्यते ऐन्द्रवायवेऽपि प्राप्त्यर्थम्। अनवनीतमिति वचनादवनीते[6] उत्सर्गः प्राप्तः, तस्मादुक्तम् ऐन्द्रवायवे 'आनीयोत्सृजेत्' (आश्रौ ५, ६, ३) इति। तस्मात्पूर्वस्मिन्नवनयने अनुत्सर्गः ॥ ६ ॥

[मैत्रावरुणग्रहपात्रग्रहणमन्त्रकथनम्]

मैत्रावरुणमेष वसुर्विदद्वसुरिह वसुर्विदद्वसुर्मयि वसुर्विदद्वसुश्चक्षुष्पाश्चक्षुर्मे पाह्युपहूतं चक्षुः सह मनसोप मां चक्षुः सह मनसा ह्वयतामुपहूता ऋषयो दैव्यासस्तनूपावानस्तन्वस्तपोजा उप मामृषयो दैव्यासो ह्वयन्तां तनूपावानस्तन्वस्तपोजा इति ॥ ७ ॥

मैत्रावरुणं ग्रहपात्रमुत्तरेऽर्द्धे गृहीत्वा अध्वर्यवे तूष्णीमेव प्रणाम्य 'एष वसुः' (ऐब्रा २, २७) इति एतं यथासमाम्नातं मन्त्रं जपेत् ॥ ७ ॥

[प्रथमं दक्षिणेन पश्चाद्वामेनाक्ष्णा ग्रहपात्रावेक्षणम्]

अक्षीभ्यां त्विहावेक्षणं दक्षिणेनाग्रे ॥ ८ ॥

---

१. तु. आश्रौ ५, ६, १। २. यत् मूको। ३. नास्ति मूको। ४. चावनी° व' पू। ५. त्वेनयोः BI आन। ६. °नादनवनीते मै।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

अध्वर्यु उपह्वयस्व इत्युक्त्वा[1] अक्षीभ्यां तु ग्रहं संसृष्टं[2] कृत्वा इहास्मिन् पात्रे अवेक्षणम् अवघ्राणस्य स्थाने भवति। दक्षिणेनाक्ष्णा अग्रे प्रथममवेक्षणम्, [3]अथ सव्येन[3]। अक्षीभ्यामिति वचनादुभाभ्यां संसृष्टं ग्रहं कृत्वा अवेक्षणं क्रियते, न दूरस्थम्। तु-शब्दः अवघ्राणव्यावृत्त्यर्थः। इह-वचनात् समुच्चयो न भवति अवघ्राणमवेक्षणं च। उभाभ्यां सहावेक्षणे प्राप्ते क्रमो विधीयते। अग्र-वचनादनन्तरं सव्येन[4] ॥ ८ ॥

[होतृचमसग्रहणमन्त्रविधिकथनम्]

सव्येन पाणिना होतृचमसमाददीतैतु वसूनां पतिर्विश्वेषां देवानामिति ॥ ९ ॥

मैत्रावरुणभक्षादनन्तरं[5] सव्येन पाणिना कृत्स्नेन पाणिना होतृचमसम् उपाददीत गृह्णीयाद् ऐतु वसूनाम् इति यथासमाम्नातेन मन्त्रेण। दक्षिणो हि व्यापृतः[6] सव्येनेत्याह। कृत्स्नपाणिग्रहणार्थं[7] पाणिग्रहणम्। उत्तरेऽर्द्धे[8] इत्यधिकारादुपरि चमसो गृह्यते, न दण्डे[9] ॥ ९ ॥

[होतृचमसापिधानविधिकथनम्]

तस्यारत्निना तस्योरोर्वसनमपोच्छाद्य तस्मिन् सादयित्वाऽऽकाशवतीभिरङ्गुलीभिरपिदध्यात् ॥ १० ॥

तस्य सव्यस्य [9]अरत्निना तस्य सव्यस्य[9] ऊरोर्वसनं वस्त्रम् अपोच्छाद्य अपनीय तस्मिन् सव्ये ऊरौ सादयित्वा आकाशवतीभिरङ्गुलीभिरपिदध्यात्। तस्यारत्निनेत्यनुच्यमाने दक्षिणस्यारत्निनेति स्यात्। तस्योरोरित्यनुच्यमाने दक्षिणस्य ऊरोर्वसनम् अपोच्छाद्येति स्यात्। तस्मिन् सादयित्वेत्यनुच्यमाने दक्षिणे ऊरौ सादनं स्यात्। पाणिना[10] इत्यधिकारादङ्गुलीभिरपिधीयते[11] ॥ १० ॥

[आश्विनग्रहपात्रपरिहारविधिमन्त्रकथनम्]

आश्विनं यथाहृतं परिहृत्य पुनः सादयित्वाऽध्वर्यवे प्रणामयेदेष वसुः संयद्वसुरिह वसुः संयद्वसुर्मयि वसुः संयद्वसुः श्रोत्रपाः श्रोत्रं मे

---

१. तु. आश्रौ ५, ६, २। २. संस्पृष्टं ब[1] मै पू। ३-३. अपसव्येन मै। ४. नास्ति ब[2]। ५. व्यावृतः ब[1/2] पू; व्याहृ(°वृ)तः मै। ६. नास्ति मूको। ७. तु. आश्रौ ५, ६, १। ८. दण्डैः ब[1]। ९-९. नास्ति मै। १०. तु. आश्रौ ५,६,९। ११. °रपि विधीयते मूको।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

पाट्युपहूतं श्रोत्रं सहाऽऽत्मनोप मां श्रोत्रं सहाऽऽत्मना ह्वयतामुपहूता ऋषयो दैव्यासस्तनूपावानस्तन्वस्तपोजा उप मामृषयो दैव्यासो ह्वयन्तां तनूपावानस्तन्वस्तपोजा इति ॥ ११ ॥

चमसग्रहणादनन्तरम्[1] आश्विनं ग्रहपात्रं यथाहृतं येन मार्गेणाहृतं[2] परिहृत्य पुनस्तस्मिन्नेव सादयित्वा उत्तरेऽर्द्धे गृहीत्वा अध्वर्यवे तूष्णीमेव प्रणाम्य 'एष वसुः संयद्वसुः' (ऐब्रा २, २७) इति एतं यथासमाम्नातं मन्त्रं जपेत्। पुनरिति वचनात् तस्मिन्नेव स्थाने सादनम्। अध्वर्युग्रहणात्[3] तूष्णीमेव प्रणामनम्। स्थाने चोदितत्वान्मन्त्रेण प्राप्तम् ॥ ११ ॥

[आश्विनग्रहपात्रस्य कर्णपर्यन्तमूर्ध्वं धारणं होतृचमसस्थापनमिळोपह्वानञ्च]

कर्णाभ्यां त्विहोपोद्यच्छेद् दक्षिणायाग्रे निधाय होतृचमसं स्पृष्ट्वोदकमि॑ळामुपह्वयते ॥ १२ ॥

अध्वर्यव उपह्वयस्व इत्युक्त्वा[4] कर्णाभ्यां त्विहोपोद्यच्छेत्। इह अस्मिन् ग्रहे कर्णाभ्याम उप समीपे ऊर्ध्वं यच्छेद् धारयेत्। दक्षिणायाग्रे धारयेत्, अथ सव्याय। तु-शब्दः अवघ्राणव्यावृत्त्यर्थः। इह-वचनात् समुच्चयो न भवति। उपेतिवचनात् कर्णसमीपे धारणम्। कर्णाभ्यामिति वचनाद् उभयसमीपे धारणे प्राप्ते क्रमो विधीयते दक्षिणायाग्र इति। अग्र-वचनादनन्तरं सव्याय। निधाय शुचौ देशे होतृचमसं निधाय स्थापयित्वा पाणिना उदकं स्पृष्ट्वा इळामुपह्वयते। सव्यस्याधिकारात् सव्येनैव निधानम्। 'नास्पृष्ट्वोदकाः सोमेनेतराणि हवींष्यालभेरन्' (आश्रौ ५, ७, ८) इति वचनादुदकस्य स्पर्शने प्राप्ते आरम्भः सव्यार्थः[5]। इहोपह्वाने चोदिते साङ्गा भवति इळा[6] ॥ १२ ॥

[आश्विनग्रहस्योपोन्नयनम्]

उपोद्यच्छन्ति चमसान् ॥ १३ ॥

उन्नयनादि[7] उपोद्यच्छन्ति चमसाध्वर्यवः चमसान्[1]। उप समीपे उद्यच्छन्ति[8] ऊर्ध्वं धारयन्ति। अस्मादारम्भादुपोद्यतेषु चमसेषु उपहवः कर्त्तव्यो भवति।

---

१. °णादनन्तर° ब[2]। २. मार्गेण मूको। ३. °ग्रहणं मूको। ४. तु. आश्रौ ५,६,२। ५. °र्थम् मूको। ६. नास्ति मूको। ७. अञ्जनादि मूको; तु. आपश्रौ १२, २१, १४; २३, १४; काश्रौ ९, ९, २३; ११, २; ६। ८. नास्ति मै।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

पौर्णमासस्य सोमस्यातिदेशस्यातिदेशात्[1] पुरोळाशानां सोमस्य समान उपहवस्तस्मादुपोद्यच्छन्ति चमसान् । होतृचमसः सोमस्य अवान्तरेळा[2] । तस्मात् सन्निकृष्टं धारयन्ति ॥ १३ ॥

[अवान्तरेळाप्राशनं होतृचमसभक्षणञ्च]

अवान्तरेळां प्राश्याचम्य होतृचमसं भक्षयेदध्वर्य उपह्वयस्वेत्युक्त्वा ॥ १४ ॥

उपहूय होता अवान्तरेळां प्राश्य आचम्य च अनन्तरं, होतृचमसो नाम चमसः[3], तं चमसं भक्षयेत् । स चापि चमसः अवान्तरेळा । एवम् अध्वर्य उपह्वयस्व इत्युक्त्वा उपहूतः सह भक्षयति । उक्तो[4] भक्षमन्त्रः । अवान्तरेळां प्राश्येति पुनरुच्यते अनुक्रमार्थम्[5]। चमसभक्षणं प्राप्तम् । प्रधानत्वाच्चमसोऽप्यवान्तरेळा । एतदुक्तं ब्राह्मणे—'तस्मादवान्तरेळामेव पूर्वां प्राश्नीयादथ होतृचमसं [6]भक्षयेत्'† (ऐब्रा २,३०) इति । एतस्मादाचम्येति पुनरुच्यते अनुक्रमार्थम्‡। आचमनादनन्तरमेव होतृचमसं[7] भक्षयेदिळाभक्षस्य प्रतिषेधार्थम् । 'इळा सर्वेषाम्' (आश्रौ १२,९,१४) इति प्राप्ते प्रतिषेधः । अवान्तरेळाभक्षणेनैवावाप्त इळाभक्षः । एवं ब्राह्मणं 'तस्मादवान्तरेळामेव पूर्वां प्राश्नीयाद् अथ होतृचमसं भक्षयेत्' इति । अध्वर्य उपह्वयस्व इत्युक्त्वा इत्युपहव एषितव्यः । 'नानुपहूतेन सोमः पातव्यः' (तु० मैसं २, ४,१) इति श्रुतेः । इदं न वक्तव्यम्, उत्तरत्र दीक्षितस्य उपहवविधिर्वक्ष्यते[8], तेनैव सिद्धत्वात् । इदं प्रयोजनम् । अदीक्षितस्य समानभक्षो न विद्यते, तदर्थमिदं द्रष्टव्यम् । दीक्षितस्याच्छावाकस्य बहिः सदसि भक्षः । दीक्षिता न[6] तस्य सन्निहिताः, अध्वर्युरेव सन्निहितः, तदर्थं च द्रष्टव्यम् ॥ १४ ॥

[दीक्षितस्य होतृश्चमसभक्षणोपह्वानम्]

दीक्षितो दीक्षिता उपह्वयध्वम् ॥ १५ ॥

दीक्षितो होता दीक्षिता उपह्वयध्वम् इत्युक्त्वा चमसं भक्षयेत् ॥ १५ ॥

[यजमानोपह्वानविकल्पः]

यजमान इति वा ॥ १६ ॥

---

१. आश्रौ २, १, १; सोमपानस्यातिदेशस्यातिदेशात् मै; त्रुटितम् पू । २. तु. आश्रौ ५, ६, १८ देवव्रातभाष्यम् । ३. नास्ति मूको । ४. तु. आश्रौ ५, ६, २ । ५. °मार्थः मूको । ६-६. नास्ति ब[1]; त्रुटितम् पू । †. नास्ति मै । ‡. °मार्थः मै । ७. तु. आश्रौ ५, ६, १५ । ८. नाम मै ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

यजमाना उपह्वयध्वमिति वा उक्त्वा चमसं[1] भक्षयेत् ॥ १६ ॥

[मुख्यानामृत्विजां होत्रकाणां चोपह्वानविकल्पः]

मुख्यान् वा पृथग्घोत्रका उपह्वयध्वमितीतरान् ॥ १७ ॥

मुख्यान् वा पृथक् अथवा ये मुख्या ऋत्विजो ग्रहपतिश्च अनुक्रमेण पृथग् एकैकमुपहूय मुख्येभ्यो य [2]इतरे तान्[2] होत्रका उपह्वयध्वम् इति उपहूय चमसं भक्षयेत् । [3]कथं प्रयोगः । अध्वर्यु उपह्वयस्व ब्रह्मन्नुपह्वयस्व† उद्गातरुपह्वयस्व‡ होत्रका उपह्वयध्वमिति एवमुपहूय भक्षयेत्[3] ॥ १७ ॥

[इतरेषां स्वस्वचमसभक्षणम्]

एवमितरे ॥ १८ ॥

यथा होता [4]दक्षितोऽदीक्षितश्च[4] [2]अवान्तरेळां प्राश्याचम्य होतृचमसमुपहूय भक्षितवान् एवमितरेऽपि दीक्षिता अदीक्षिताश्च[2] मुख्या होत्रकाश्च होतृचमसे भक्षिते स्वं स्वं चमसमेवमुपहूय[5] भक्षयन्ति । अयं न्यायस्तेषां प्रधानस्य पूर्वभक्षं कुर्वन्ति । होतुस्तु इळाभक्षो वचनात् पूर्वः । उक्तं च कारणं श्रुतौ 'द्विदेवत्यान् पूर्वान् भक्षयति तेनास्य सोमपीथः पूर्वो भक्षितो भवति तस्मादवान्तरेळामेव पूर्वां प्राश्नीयादथ होतृचमसं भक्षयेत्' (ऐब्रा २, ३०) इति होतुः । अन्येषामिळाभक्षः पश्चाद् भवति । दर्शयति—अच्छावाकस्य पुरोळाशदृगलभक्षमनन्तरम्[1] । सोमस्य [6]पौर्णमासेनातिदेशाद्† यथा[6] पौर्णमासे अधिकृताः सर्वे इळां भक्षयन्ति 'इळां सर्वेषाम्' (आश्रौ १२, ९, १४) इति वचनादेवं होतेति प्रकृत्याऽऽदेशादेव सर्वे यजमानसप्तदशा इळां भक्षयन्ति । दर्शयति च—'हविरुच्छिष्टं सर्वे प्राश्नीयुः' (आश्रौ ५, ७, १०) इति । चमसा अपि इळा एव पुरोळाशैः सह उपहूताः । तेषु होतृचमसः अवान्तरेळा भवति । तस्मात् तं होता भक्षयति । इळाया होतुरुक्तो न विद्यते । तस्मादितरचमसान्[7] होता न भक्षयति । इतरे सर्वे भक्षयन्ति । दश चमसाः साधारणाः, तेषु समप्रविभागस्यासंभवादेकैकं सर्वे भक्षयन्तीति । [8]प्राशने समाख्याः[8] श्रूयन्ते होतृचमस उद्गातृचमस इति । भक्षविभागार्थ एव समाख्या[9] । [10]नान्यत् कारणमस्ति[10] । येषां समाख्या न श्रूयते ते अचमसाः । न[11] ते

---

१. नास्ति ब[1] मै पू । २-२. इतरा त ब[1]; इतरात् ब[2]; इतरास्ते मै; त्रुटितम् पू । ३-३. नास्ति मै । †. नास्ति ब[1,2] । ‡. नास्ति ब[2] । ४-४. दीक्षिताश्च मूको । ५. चमसेष्वेवम् मै । ६. तु. आश्रौ ५,७,२; ७; ९ । ७-७. नास्ति ब[1] । †. तु. आश्रौ २, १, १ । ८. °सात् ब[2] । ९-९. प्राप्ते समाख्याना मूको । १०. समाख्यानाः ब[1,2] पू । ११-११. सत्यकरण° ब[1]; अन्यत् कार° ब[2] मै पू । १२. नास्ति ब[1] मै; त्रुटितम् पू ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

भक्षयन्ति समाख्याभावात् । तस्मादुक्तमाचार्येण एवमितरे इति सर्वेषां भक्षप्राप्त्यर्थम् ॥ १८ ॥

[अदीक्षितानामृत्विजां समानपात्रे भक्षणम्]

यथासभक्षं त्वदीक्षिताः ॥ १९ ॥

दीक्षितानामुपहवविधिरुक्तः । इदानीमदीक्षितानामुपहवविधिर्वक्ष्यते । एकस्मिन् पात्रे ये भक्षयन्ति[1], ते तमुपहूय यथासभक्षम्[2] [3]अदीक्षिता भक्षयेयुः[3] । तु-शब्दः प्राप्तव्यावृत्त्यर्थः । अध्वर्यु उपह्वयस्वेति प्राप्तहोतृचमसे होता अध्वर्युः प्रतिप्रस्थाता च भक्षयन्ति । उद्गातृब्रह्मयजमाना होता च समानभक्षिणो[4] वा[2] भवन्ति । होत्रकाणां चमसेषु यदाऽध्वर्युः प्रतिभक्षयति, प्रतिप्रस्थाता यत्र समानभक्षी न विद्यते, तत्र अध्वर्यु उपह्वयस्वेति प्राप्तम् । एवमेव समाने पात्रे भक्षयन्ति इत्युक्तम् अध्वर्यूणाम्[5] । ब्रह्मयजमानयोस्तु यथा होता समानभक्षी न भवति । तयोः अध्वर्यु उपह्वयस्व इत्युपहवो न प्राप्नोति । कदाचिदपि अध्वर्युस्तयोः समानभक्षी न विद्यते । तस्माद् ये समाने पात्रे भक्षयन्ति, तेषूपहव एषितव्यः ॥ १९ ॥

[स्वस्वविभागीयमुख्यचमसाद् गृहीत्वाऽचमसानां भक्षणम्]

मुख्यचमसादचमसाः ॥ २० ॥

होता उद्गाता यजमान इत्येते मुख्या मुख्यचमसाः । मुख्यचमसाद् अचमसा[6] भक्षयेयुः । ग्रावस्तोता उन्नेता सुब्रह्मण्य इत्येते अचमसाः [7]येषां चमसा न विद्यन्ते । होतृचमसाद्[7] ग्रावस्तोता भक्षयति उन्नेता च अध्वर्युरपि । होता एव जुहोति । तस्मादुन्नेता होतृचमसाद् भक्षयति । उद्गातृचमसात् सुब्रह्मण्यः । गृहपतिचमसाद् [8]ये सत्रे[8] यजमानाः, ये [9]याजमाने पदार्थे[9] दीक्षिता चतुर्विंशतिपरमाः । 'सत्रमासीरन्'[10] (आपश्रौ २३,१,१) इति अध्वर्यूणाम् ।

बौधायनीये च प्रवचने उक्तम्—अच्छावाकचमसाद् ग्रावस्तोता भक्षयति । नेष्टृचमसादुन्नेता । उद्गातृचमसात् सुब्रह्मण्यः इति । सर्वे चाऽग्नीध्रचमसाद् इति[11] । कुण्डपायिनामयने तथा दृष्टत्वात्[12] । अचमसास्तु[11] दीक्षिताः सन्तो

---

१. संभवंति मूको । २. नास्ति मै । ३-३. यथासंभक्षयेयुः मै ; यथादीक्षिता भ° ब[1/2] पू । ४. °भक्षणो मूको । ५. अध्वर्युणा मूको । तु. आपश्रौ १२, २४, १६ समाने प्राये भक्षयन्ति इति । ६. नास्ति ब[1] । ७-७. नास्ति ब[1] । ८-८. यद्धोते (°तो मै) मूको । ९-९. यजमानपदार्थे ब[1]; त्रुटितम् पू । १०. सवमासत मूको । ११. तु. बौश्रौ २५, १९ : १४-१६ । १२. तु. आपश्रौ २३, १०, १२ । १३. °सात्सु मूको ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

भक्षयन्ति । यजमानाददीक्षितानां भक्षो न विद्यते कारणाभावात् । चत्वारि भक्षस्य कारणानि—वषट्कारः समाख्या होमो वचनमिति । एतेषामेकमपि[1] कारणं न विद्यते ॥ २० ॥

[द्रोणकलशाद्वा गृहीत्वाऽचमसानां सोमभक्षणम्]

द्रोणकलशाद् वा ॥ २१ ॥

द्रोणकलशाद् अचमसा भक्षयेयुः । स हि सर्वेषां साधारणः । 'द्रोणकलशाद् धाना गृहीत्वाऽवेक्षेरन्' (आश्रौ ६, १२, ४) इत्यवेक्ष्य 'अवघ्रायान्तःपरिधिदेशे निवपेयुः' (आश्रौ ६, १२, ५) इति अवघ्राणभक्षोऽस्माकम् । प्रत्यक्षभक्षोऽध्वर्यूणां दीक्षितानामदीक्षितानां च । एष भक्षः समानः । [2]यद्यचमसा भक्षयन्ति तदा तैः भक्षमुपहूय[2] प्रत्यक्षभक्ष एव कर्तव्यो यथा अध्वर्यूणाम्[3] ॥ २१ ॥

[पूर्वोक्तसोमभक्षजपस्य सर्वत्र भक्षे प्रयोज्यत्वम्]

उक्तः सोमभक्षजपः सर्वत्र ॥ २२ ॥

द्विदेवत्यप्रकरणे उक्तः सोमभक्षजपः[4] सर्वत्र भवति । इदं न[5] वक्तव्यं तेनैव वचनेन प्राप्तत्वात् । इदं प्रयोजनम् । होतृचमसोऽपि [6]अवान्तरेळा एव[6]। अन्ये तु चमसा इळासंज्ञाः । सर्वेषामिळाभक्षमन्त्रः प्राप्तः 'इळे भागम्' (आश्रौ १, ७, ८) इति निवृत्त्यर्थम् उक्तः सोमभक्षजप इति पुनरुच्यते। [7]सर्वत्रग्रहणस्य प्रयोजनम्[7]—यत्रान्यो भक्षमन्त्रः स्यादेतस्य तत्र प्रासङ्गिकस्य भक्षमन्त्रस्य प्रतिषेधो भवति । [8]हारियोजने षोडशिपात्रे च सर्ववचनात्† समुच्चयो भवति, न प्रतिषेधः । तस्माद्धारियोजने षोडशिपात्रं च य आम्नातो मन्त्रस्तं जपित्वा[8] प्रासङ्गिकमपि भक्षमन्त्रं जपेदेव 'वाग्देवी' (आश्रौ ५, ६, २) इति ।

एतेनाचार्यस्याभिप्रायेण भक्षविधिः[9] समाप्तः । कोऽभिप्रायः पौर्णमासे होतुर्वषट्कारे हुतानि हवींषि, अधिकृता ऋत्विजः यजमानपञ्चमा इदानीं भक्षयन्ति[10]। पौर्णमासेन सोमो व्याख्यातः[10]। तस्मात् सोमेऽपि पुरोळाशा दश चमसाः होतुर्वषट्कारे हुताः सन्ति[11]। पौर्णमासवदधिकृताः[12] षोडश ऋत्विजः

---

१. °मेकवचन° मूको । २-२. °चमसा एतद्भक्षमु° मूको । ३. °र्युणा मूको । ४. तु. आश्रौ ५,६,२ । ५. नास्ति मूको । ६-६. °त्तरेलामेव ब[1,2] मै ; त्रुटितम् पू । ७-७. °णप्रयो° ब[2] ; त्रुटितम् पू । ८-८. नास्ति ब[1] । †. °नात् य ब[2] पू । ९. इति भक्ष° मै । १०. तु. आश्रौ १, ७, ८; २, १, १ । ११. संतः मूको । १२. °मादधि° ब[1]; °मासावधि ब[1] पू ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

यजमानसप्तदशा इळां सोमं भक्षयन्ति चमसांश्च। तत्र चमसे सप्तदश पुरुषा भक्षयन्तीति प्राप्ते श्रुतौ पुरुषसमाख्यया चमसा विभक्ताः—होतृचमसो ब्रह्मचमस उद्गातृचमसो यजमानचमस इति। तस्माद् यस्मिंश्चमसे यस्य समाख्या, स एव तं चमसं भक्षयति[1] नान्यं चमसम्। एवं [2]ब्राह्मणे च[2] 'तस्मादवान्तरेळामेव पूर्वां प्राश्नीयादथ होतृचमसं भक्षयेत्' (ऐब्रा २, ३०) इति। एवं बौधायनीयेऽपि प्रवचने 'होतृचमसमेवैते त्रयः समुपहूय भक्षयन्ति' (बौश्रौ ७, १५ : १८-१९)। यथा 'चमसांश्चमसिनः' (आश्रौ ५, ९, २७) इति, यथा ब्राह्मणे, यथा[3] पौर्णमासे, यथा च बौधायनीये प्रवचने, एवमाचार्येण [4]कल्पितम्। सवनमुखे[5] एव एतदुक्तम्[5]। पुनर्नाराशंसादिष्वपि वक्ष्यति। 'उक्थपात्रमग्रे भक्षयेत्, ततश्चमसांश्चमसिनः सर्वशस्त्रयाज्यान्तेषु' (आश्रौ ५, ९, २६-२७) इति। पौर्णमासेनातिदेशादेकपात्रेषु[6] इति अधिकृतानां सर्वेषां भक्षे प्राप्ते श्रुतिवचनाद् वषट्कर्तैव[7] भक्षयति, नान्यः। एवमेव भक्षविधिः कृत्स्नः परिसमाप्तः आचार्यस्याभिप्रायेण[8] ॥ २२ ॥

[भक्षविधौ गौतममतकथनम्]

इदानीं गौतमस्याभिप्रायो वक्ष्यते—

होतुर्वषट्कारे चमसा हूयन्ते उद्गातुर्ब्रह्मणो [9]यजमानस्य तेषां होताऽग्रे भक्षयेदिति गौतमो भक्षस्य वषट्कारान्वयत्वाद्†[9] ॥ २३ ॥

[9]यदुक्तमाचार्येण तत्सर्वं गौतमस्याभिप्रेतमेव। त्रिषु चमसेषु[9] यथाप्राप्तं[10] "तेषां भक्षं होतुश्च भक्षमिच्छति†, कारणं च वक्ष्यति। उद्गातुः ब्रह्मणो[11] यजमानस्य चमसा होतुर्वषट्कारे हूयन्ते यस्मात्[12] तस्माद्[13] होता अग्रे प्रथमं भक्षयतु, अनन्तरमितरे भक्षयन्तु इति[14] गौतम आचार्यो मन्यते। किं कारणम्? भक्षस्य वषट्कारान्वयत्वात् सवनमुखीयो भक्षो[15] वषट्कारान्वयो यस्मात्। किमुक्तं भवति—सवनमुखे सप्त चमसा वषट्कारान्वया वषट्कर्तृभिर्भक्ष्यन्ते यस्मात् तस्माद्धोत्रा[16] भक्षिताः, उद्गात्रादीनामपि [17]चमसा वषट्कारान्वया[17] भक्ष्यन्ते[18]।

---

१. भक्षयन्ति मूको। २-२. °णेन ब[1,2] मै; व्युटितम् पू। ३. नास्ति ब[1]; व्युटितम् पू। ४-४. कल्पितसव° मूको। ५. तु. आश्रौ ५, ६, १४। ६. °शात्पात्रेषु ब[1]; °शादेत(°दे मै)त्पात्रेषु ब[2] मै पू; तु. आश्रौ ५, ६, २९। ७. ऐब्रा ३,३२। ८. °र्याभि° ब[1]। ९-९. नास्ति ब[1] मै। †. सूत्रे व्याख्यायां च सर्वत्र मै. कोशे—वषट्काराचय° इति पाठः। १०. नास्ति मै। ११-११. नास्ति मै। †. °च्छन्ति मूको। १२. नास्ति ब[2]। १३. होता मै पू। १४. नास्ति मूको। १५. भक्ष ब[2] मै पू; नास्ति ब[1]। १६. तद्धोता मूको। १७-१७. चमसो वषट्कारान्वयो ब[1]। १८. भक्षयन्ति मूको।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

एवं कृते सर्वचमसाः समानविधाना भवन्ति। इष्यते चमसानां विकृतम् एकस्मिन् प्रकरणे एके वषट्कारान्वयभक्षा अन्येऽवषट्कारान्वया[1] इति। एतदन्याय्यम्[2]। तस्मात् समानं गौतमो मन्यते। इदं विधानं सवनमुखे एव भवति, नान्यत्र, भक्षस्य वषट्कारान्वयत्वादिति। होतुर्वचनाद्[3] अन्यत्र विहितो[4] वषट्कारो न विद्यते। अधिकृतं न्याय्यं[5] परित्यज्य द्विदेवत्यादिसर्वभक्षाणां न्यायः, स यद्युपदिश्यते। त्रयाणां चमसानां ग्रहणम् अनर्थकम्। सर्वे हि चमसा होतुर्वषट्कारे[3] हूयन्ते यस्मात् तस्मादधिकृत[6] एव न्यायाद् द्रष्टव्यः।

[गौतमपक्षे व्याख्यान्तरम्]

अपरो मार्गः। होतुर्वषट्कारे[3] चमसा हूयन्ते उद्गातुर्ब्रह्मणो यजमानस्य तेषां होताऽग्रे भक्षयेदिति गौतमो भक्षस्य वषट्कारान्वयत्वात्। होतुर्वषट्कारे[3] चमसा हूयन्ते। उद्गातुर्ब्रह्मणो यजमानस्य तेषां त्रयाणां चमसान् होताऽग्रे भक्षयेत्। अनन्तरं ते भक्षयेयुः इत्येवं गौतम आचार्यो मन्यते। कस्माद्धेतोः। भक्षस्य वषट्कारान्वयत्वाद् [7]द्विदेवत्यादिषु सर्वत्र[7] वषट्कारान्वयो भक्षो दृश्यते। यत्र वषट्कर्ता अवषट्कर्तारश्च भक्षयन्ति तत्र वषट्कर्ता प्रथमं भक्षयति। तेन[8] वषट्कारान्वयो भक्षः सर्वत्र। सर्वत्र वषट्कारान्वयादिहापि वषट्कर्ता प्रथमं भक्षयतु, अनन्तरमितरे। एवं कृते [9]सर्वभक्षाणां न्यायः[9] कृतो भवति।

एवं चेद् दश चमसा होतुर्वषट्कारे हूयन्ते। किमर्थं त्रयाणामेव चमसानां भक्ष उपविश्यत इति। इदं प्रयोजनम्—त्रयाणामेव चमसा होतुर्वषट्कारे हूयन्ते, अन्ये सर्वे उपहोमाः[10], यथा शुक्रामन्थिनौ। कथं ज्ञायते उपहोमाः। अत्र वषट्कारे तेषां होमः कृताकृतो[11] यस्मात्। यदि एतेषां भक्षः क्रियते शुक्रस्यापि होतृचमसे द्वितीयो भक्षः कर्तव्यो भवति। न च क्रियते होमत्वादेव। तस्माच्चत्वार एव, चमसा एव वषट्कारे[12] हूयन्ते। तेषामेव होता भक्षयति, न होत्रकाणां चमसान्। एवं सवनमुखे नाराशंसादिषु सर्वचमसा उपहोमा एव, न[13] तेषां वषट्कर्ता भक्षयति। ग्रहार्थो वषट्कारो मुख्यचमसार्थो वा भवति, [14]तद्देवत्या हि याज्या[14] यस्मात्॥ २३॥

[तौल्वलिमतेन उद्गात्रादीनां चमसभक्षणप्रतिषेधकथनम्]

अभक्षणमितरेषामिति तौल्वलिः कृतार्थत्वात्॥ २४॥

---

१. अन्येवष° मूको। २. °दन्यायं मूको। ३. होतृव° मै। ४. वहतो मूको। ५. नाज्यं मूको। ६. °कृतं ब[1/2] मै; त्रुटितम् पू। ७-७. द्विदेवत्यादि स° मूको। ८. तेनैव मै; तेनै ब[2]। ९-९. °क्षणन्यायः ब[1]; °क्षणं न्यायः म पू। १०. उपहूयमानाः ब[1]; उपहूयाः मै। ११. कृताकृतो मूको। १२. °रो मूको। १३. नास्ति मै। १४-१४. यद् देवत्याभियाज्या मूको।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

होतृभक्षे कृते उद्गात्रादीनाम् अभक्षणं तौल्वलिः आचार्यो मन्यते। [1]कस्माद्धेतोः। कृतार्थत्वात्[1]। [2]देवतार्थो होमः, शेषसंस्कारार्थो भक्षः। हुता भक्षिताश्चमसाः† कृतार्था भवन्ति[2]। कृतार्थत्वादभक्षणं[3] तेषां मन्यते[4] ॥ २४ ॥

[गाणगारिमतेन चमसभक्षणविधानहेतुप्रदर्शनम्]

भक्षयेयुरिति गाणगारितः संस्कारत्वात् का च तच्चमसता स्यान्न चान्यः सम्बन्धः ॥ २५ ॥

[5]होत्रा भक्षे कृते उद्गात्रादयो †भक्षयेयुः इति† गाणगारिः‡ आचार्यो मन्यते[5]। कस्माद्धेतोः[6]। अतः संस्कारत्वाद् भवति देवतार्थो[7] होमः। [8]शेषसंस्कारार्थो भक्षः[8]। शेषसंस्कारार्थश्च होत्रा[9] शेषः संस्कृतः। आत्मसंस्कारार्थमितरे भक्षयन्ति। का च तच्चमसता स्यात्। यदि पुरुषसंस्कारार्थो भक्षो न विद्यते। [10]तदा स कस्य संस्कारार्थः[10] स्यात्। सोमस्य भक्षादन्यत् कारणं न पश्यामः। न चान्यः [11]सम्बन्धः। भक्षादन्यः[11] सम्बन्धो न विद्यते, येन सम्बन्धेन तच्चमसे तत्कृतार्थो भवति, [12]न च स तैः क्रीतत्वेन[12] लब्ध इति ॥ २५ ॥

[चमसभक्षणानन्तरं समन्त्रं मुखहृदययोरभिमर्शनम्]

भक्षयित्वाऽपाम सोममृता अभूम शं नो भव हृद आपीत इन्दविति मुखहृदये अभिमृशेरन् ॥ २६ ॥

भक्षयित्वा भक्षं कृत्वा च 'अपाम सोममृता अभूम' (ऋ ८, ४८, ३), 'शं नो भव हृद आपीत इन्दो' (ऋ ८, ४८, ४) इति एताभ्याम् ऋग्भ्यां मुखं च हृदयं च मुखहृदये अभिमृशेरन्। आनन्तर्ययोगेन प्रथमया मुखं, द्वितीयया हृदयम्। अभिमृशेरन्निति सर्वकर्तारो व्यपदिश्यन्ते ॥ २६ ॥

[प्रथमद्वितीयसवनयोः चमसाभिमर्शनमन्त्रकथनम्]

आ प्यायस्व समेतु ते सं ते पयांसि समु यन्तु वाजा इति चमसान् आद्योपाद्यान् पूर्वयोः सवनयोः ॥ २७ ॥

१-१. कस्माद्धो(°द्धे मै)तार्थत्वात् मूको। २-२. नास्ति मै। †. अभ° मूको। ३. अभक्षणं मै। ४. मन्यन्ते तस्माद्धेतोः मै। ५-५. नास्ति ब[2]। †-†. नास्ति मूको। ‡. गाणकारि° ब[1]। ६. नास्ति ब[1]। ७. °तार्थे ब[1] मै पू। ८-८. शेषं (शेष-ब[1]) संस्कारार्थ भक्षः मूको। ९. अहोत्रा मै। १०-१०. तदा संस्कारार्थः मूको। ११-११. नास्ति ब[1]। १२-१२. न नष्ट ते क्रीतः तेन मूको।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

'आ प्यायस्व समेतु ते' (ऋ १, ९१, १६), 'सं ते पयांसि समु यन्तु वाजाः' (ऋ १, ९१, १८) इति एताभ्यां ऋग्भ्यां चमसानभिमृशेरन् आत्मानमभिमृश्य [1]स्वं स्वं[1] चमसं सवानभक्षिभिर्भक्षितम् अभिमृशेरन् सर्वे । आद्योपाद्यान प्रस्थितचमसा आद्याः, उपाद्यास्तदनन्तराः । एतानभिमृशेरन् पूर्वयोः द्वयोः सवनयोः । सर्वत्राभिमर्शने प्राप्ते नियमः ॥ २७ ॥

[तृतीयसवने प्रस्थितचमसाभिमर्शनविधानम्]

आद्यांस्तृतीयसवने ॥ २८ ॥

तृतीयसवने आद्यान् प्रस्थितचमसानेव अभिमृशेरन् ॥ २८ ॥

[द्विदेवत्यादिभ्योऽन्यत्राऽऽत्माभिमर्शनविधानम्]

सर्वत्राऽऽत्मानमन्यत्रैकपात्रेभ्यः ॥ २९ ॥

सर्वत्र भक्षेषु आत्मानम् अभिमृशेरन् अन्यत्र एकपात्रेभ्यः । द्विदेवत्यादीन्येकपात्राणि[2] । तेभ्योऽन्येषु आत्मानमभिमृशेरन् । एकपात्रेषु नाभिमृशेरन् । आद्योपाद्यानित्युक्ते[3] भक्षयित्वेत्यधिकाराद् आद्योपाद्यांश्चमसान् भक्षयित्वा आत्मानम् । चमसानभिमृशेरन्निति प्राप्ते सर्वत्रात्मानमित्युच्यते । ततः सर्वत्रशब्दस्य महाविषयत्वाच्चमसेभ्योऽन्यत्रापि प्राप्ते अन्यत्रैकपात्रेभ्य इत्युच्यते ॥ २९ ॥

[आप्यायितचमसानां स्थापनविधानम्]

आप्यायितांश्चमसान् सादयन्ति ते नाराशंसा भवन्ति ॥ ३० ॥

आप्यायने कृते आप्यायितान् चमसान् इहैव हविर्धानस्य पश्चात् सादयन्ति स्थापयन्ति । ते आसादिताश्चमसा नाराशंससंज्ञा भवन्तीति । 'द्विनाराशंसं प्रातःसवनम्' (ऐब्रा २, २४) इति श्रुतिः । संज्ञायाः प्रयोजनम्—'पुरोळाशाद्युक्तमा नाराशंससादनात्' (आश्रौ ५,१३,११) इत्युक्ते एते प्रत्येतव्याः । आप्यायितानिति वचनाद् अनाप्यायिता नाराशंससंज्ञा न भवन्ति ॥ ३० ॥

॥ इति पञ्चमे षष्ठं खण्डम् ॥

१-१. स्वयं ब[१२] मै; त्रुटितम् पू । २. °वत्यादित्ये° ब[१२] मै; त्रुटितम् पू । ३. आद्यानित्यु° ब[२] ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

अथ पञ्चमेऽध्याये सप्तमः खण्डः

[अच्छावाकस्य स्वधिष्ण्यसमीप उपवेशनम्]

एतस्मिन् काले प्रपद्याच्छावाक उत्तरेणाऽग्नीध्रीयं परिव्रज्य पूर्वेण सद आत्मनो धिष्ण्यदेश उपविशेत् ॥ १ ॥

एतस्मिन् काले सन्नेषु नाराशंसेषु एतस्मिन् काले तीर्थेन प्रपद्य अच्छावाकः उत्तरेणाग्नीध्रीयं परिव्रज्य गत्वा पूर्वेण सद आत्मनः अच्छावाकस्य धिष्ण्यदेशे उपविशेत्। 'बहिस्तु स दीक्षितः'[1] सन् यजमानैः सह याजमानं करोति। आश्रयादन्यत् प्रपद्यते। उत्तरेण हविर्धाने प्राप्ते उत्तरेणाग्नीध्रीयं परिव्रज्येत्युच्यते ॥ १ ॥

[अध्वर्युणा प्रेषितस्याच्छावाकस्य मन्त्रानुवचनविधिः]

पुरोळाशदृगलं प्रत्तमिळामिवोद्यम्याच्छावाक वदस्वेत्युक्तोऽच्छा वो अग्निमवस इति तृचमन्वाह ॥ २ ॥

पुरोळाशदृगलं पुरोळाशशकलं प्रत्तम् अध्वर्युणा दत्तम् इळामिवोद्यम्य यथा इळाम् आस्यसम्मितां प्राणसम्मिताम्[2] [3]उद्यच्छति तथा तदुद्यम्य ऊर्ध्वं धारयित्वा[3] अच्छावाक वदस्व इति अध्वर्युणा उक्ते 'अच्छा वो अग्निमवसे' (ऋ ५,२५,१-३) इति एतं[4] तृचमन्वाह। इळामिवोद्यम्य इत्युक्तम् उद्यमनमेव इळायास्तुल्यम्, अञ्जलिना प्रतिग्रहो न क्रियते। पादग्रहणादेका प्राप्ता, तस्मादाह तृचमिति ॥ २ ॥

[तृचानुवचनान्ते निगदानुवचनम्]

अन्त्येन प्रणवेनोपसन्तनुयाद् यजमान होतरध्वर्योऽग्नीद् ब्रह्मन् पोतर्नेष्टरुतोपवक्तरिषेषयध्वमूर्जोऽर्जयध्वं नि वो जामयो जिहतान्यजामयो निःसपत्नायामनिबाधितासो जयता भीत्वरीं जयता भीत्वर्याश्रवद् व इन्द्रः शृणवद् वो अग्निः प्रस्थायेन्द्राग्निभ्यां सोमं वोचतोपो अस्मान् ब्राह्मणान् ब्राह्मणा उपह्वयध्वमिति ॥ ३ ॥

१-१. बहिस्तमदीक्षितः मूको। २. तु. आश्रौ १, ७, ६। ३-३. इति न ज्ञात्वमुद्यम्या ऊर्ध्वं (अर्धं मैं) वाचयित्वा मूको। ४. इत्येवं (°व ब[1]) मूको।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

एतस्य तृचस्यान्ते[1] प्रणवेनोपसन्तनुयात् संदध्यात् यजमान होतः इति एतं निगवं यथासमाम्नातम् । 'समाप्तौ प्रणवेनावसानम्' (आश्रौ १, २, १३) इत्यवसाने प्राप्ते उपसन्तानो विधीयते । अन्त्येनेति[2] वचनाद् मुख्येन[3] न भवति । इतिकरणो निगदान्तज्ञापनार्थः ॥ ३ ॥

[निगदसमाप्तावध्वर्योरुपहवयाचनमुपहवमन्त्रकथनं च]

समाप्तेऽस्मिन्निगदेऽध्वर्युर्होतर्युपहवं काङ्क्षते ॥ ४ ॥

प्रत्येता सुन्वन् यजमानः सूक्ता नामाग्रभीत् । उत प्रतिष्ठोतोपवक्तरुत नो गाव उपहूता उपहूत इत्युपह्वयते ॥ ५ ॥

समाप्ते निगदेऽध्वर्युः होतरि उपहवम् [4]अनुज्ञां काङ्क्षते[4] । समाप्त इति अनुक्रमविधानार्थम् । अस्मिन्निति वचनाद् वक्ष्यमाणस्यापि उपहवस्य निगदसंज्ञाज्ञापनार्थम् । तस्मान्निगदसंज्ञायाः[5] सवनस्वरो भवति । उपहवानां तु सर्वः[6] स्वरो भवति । अध्वर्युवचनं[7] [8]होता यथा[8] शृणोति स स्वरः । संबोधनार्थत्वाद् निगदग्रहणम् । उपहवस्य निगदसंज्ञार्थे उक्तं [9]प्रयोजनम् । अस्य[9] पुनः उपहवसंज्ञा उक्ता 'अच्छावाकनिगदोपहवप्रत्युपहवे' (आश्रौ ४, १, १६) इति । अध्वर्युग्रहणम् अच्छावाकाधिकारात् । अच्छावाक [10]एवोपहवं काङ्क्षेत[10], याचनेऽध्वर्युरुक्तः । उपह्वयतं इत्युक्ते होता भवति । 'कर्मचोदनायां होतारम्' (आश्रौ १, १, १४) इति । उत्तरेण उपहूतशब्देनैव[11] [12]सिद्धे इत्युपह्वयत इत्येतस्य †प्रयोजनम्, अस्यां प्रत्युपहवनिगदस्य‡ अन्ते उपहूतशब्दो यः, तं निर्दिशति—इत्युपह्वयत इति । तस्मात् सर्वत्र प्रत्युपहवः समाम्नातो[12] द्रष्टव्यो, वाजिनादिषु[13] यथा । 'इति[14] वषट्कारः' (आश्रौ १, ५, १५) इत्युक्ते प्रयाजान्तस्य वौषट् इत्येतस्य ग्रहणमेवमिदं द्रष्टव्यम् ॥ ४-५ ॥

[अच्छावाककर्तृकं चमसायानुवचनं यजनं च]

उपहूतः प्रत्यस्मा इत्युन्नीयमानायानूच्य प्रातर्यावभिरागतमिति यजति ॥ ६ ॥

---

१. तृचांते मूको । २. अनेने° मूको । ३ मुखेन मूको । ४-४. अनुज्ञाकांक्षिणः मूको । ५. तस्मात्र (°दत्र ?) निग° मै । ६. सर्वत्र मूको । ७. यजुर्वचनं मूको । ८-८. श्रोता य (ये ब[2]) मूको । ९-९. °जनस्य मूको । १०-१०. °हवकां मूको । ११. °शब्दे मै । १२-१२. यः तं निर्दिशति । इत्युपह्वयत इति । तस्मात् सर्वत्र प्रत्युपहव सत्युपहव सत्युपहवनिगमस्य अन्ते उपहूतशब्दो माम्नातो मै । †-†. प्रयोजनस्य ब[1?2] पू । ‡. °निगमस्य ब[1?2] पू । १३. आश्रौ २,१६,१७-१९ । १४. इति च ब[2] ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

होत्रा उपहूतः अच्छावाकः 'प्रत्यस्मै' (ऋ ६, ४२, १-४) अनुवचनम् उक्त्वा 'प्रातर्यावभिरागतम्' (ऋ ८, ३८, ७) इति एतयर्चा यजति। उपहूत इति पुनरुच्यते— अध्वर्युणा प्रेषितः अच्छावाकः होत्राऽनुपहूतो न ब्रूयादिति। उन्नीयमानायेति वचनादुन्नयने क्रियमाणे वक्तव्यम्। इदमनुवचनं मैत्रावरुणस्य प्राप्तं दशमेऽहनि तृचावच्छावाक एव ब्रूयात्[1] ॥ ६ ॥

[पुरोडाशशकलस्य निधानं चमसभक्षणं च]

निधाय पुरोळाशदृगलं स्पृष्ट्वोदकं चमसं भक्षयेत् ॥ ७ ॥

क्वचिदुच्चैर्देशे निधाय पुरोळाशदृगलं स्पृष्ट्वोदकम् आज्यलेपं प्रक्षाल्य चमसं भक्षयेत्। दीक्षितोऽपि सन् अध्वर्यं उपह्वयस्व इत्युक्त्वा चमसं भक्षयेत्। कस्मात्[2] असन्निहिता हि दीक्षिताः कथम् उपहूयन्ते। कथं वा प्रत्युपह्वयमाहुः सर्वे। सर्वे आग्नीध्रं गता भवन्ति। तस्मादारम्भादौत्सर्गिको विधिराश्रीयते 'अध्वर्यं उपह्वयस्व इत्युक्त्वा' (आश्रौ ५, ६, २) इति। अथैकपात्रेषु 'नानुपहूतेन सोमः पातव्यः' (तु० आपश्रौ १२, २४, १४; गोब्रा-प्रभृ०) इति श्रुतेः ॥ ७ ॥

[जलमस्पृष्ट्वा सोमेतरहविषां स्पर्शनिषेधः]

नास्पृष्टोदकाः[3] सोमेनेतराणि हवींष्यालभेरन् ॥ ८ ॥

अस्पृष्टम् उदकं यैस्ते अस्पृष्टोदकाः[3] सोमेन लिप्तेन पाणिना उदकम् अस्पृष्ट्वा इतराणि सोमादितराणि वाजिनादीनि नालभेरन्। चमसं भक्षयित्वा स्पृष्ट्वा उदकं पुरोळाशदृगलं गृह्णीयात्। 'सन्नेषु म्रदिष्ठात्' (आश्रौ ५, १७, ५)। सन्नेषु 'आग्नीध्रीयं प्राप्य हविरुच्छिष्टं सर्वे प्राश्नीयुः' (आश्रौ ५, ७, १०; १७, ६) [4]इत्येवमादिषु उपस्पृश्यालभेरन्[4]। सोमेनेति वचनात् पुरोळाशादिभिः संस्पृष्टेन पाणिना यथालाभे सति उदकस्पर्शनं न प्राप्नोति। तस्मादाह— 'निधाय पुरोळाशदृगलं स्पृष्ट्वोदकम्' (आश्रौ ५,७,७) इति। इतराणीति वचनात् सोमेन सोमालम्भनं भवति ॥ ८ ॥

[पुरोडाशशकलाऽऽदानं ध्रिष्ण्योपस्थानानन्तरं तत्प्राशनं च]

आदायैनदादित्यप्रभृतीन् ध्रिष्ण्यानुपस्थायापरया द्वारा सदः प्रसृप्य पश्चात् स्वस्य ध्रिष्ण्यस्योपविश्य प्राश्नीयात् ॥ ९ ॥

---

१. तु. आश्रौ ८, १२, ६। २. नास्ति b^1। ३. °स्पृष्ट्वोद° मूको; BI आन, तु. वैप ४, पृ० ४६६ j। ४-४. °दिष्वपस्पृश्याल° (°र° मै) मूको।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

एकपात्रं भक्षयित्वा चमसभक्षणे[1] आदाय गृहीत्वा च तत् पुरोळाशदृगलं तस्मिन्नेव स्थाने स्थित्वा आदित्यप्रभृतीन् धिष्ण्यान् उपस्थाय पूर्वोक्तेन[2] विधिना, अपरया द्वारा सदः प्रसृप्य पश्चात् स्वस्य धिष्ण्यस्योपविश्य प्राश्नीयात् । आदायेनादित्यनुच्यमाने प्राशनकालेऽस्यादानं प्राप्नोति । उपस्थानमप्राप्तं विधीयते[3]। पूर्वया द्वारा प्रपदने प्राप्ते अपरया द्वारेत्युच्यते तस्योपस्थानं यथा ब्राह्मण उक्तम्, एवं भवति । यत्र प्रसर्पका[4] उपविशन्ति तत्रोपवेशने प्राप्ते पश्चाद् धिष्ण्यस्येत्युच्यते। कतमोऽस्य धिष्ण्यः स्यात्, योऽव्रातिरिक्तः सोऽस्य धिष्ण्यः । स्वग्रहणादन्यमच्छावाकाय कुर्यात् । उपविश्य प्राश्नीयादिति वचनात् तत्रैव प्राश्नीयात्। प्राशनार्थमेवादाय प्रसृप्तः अन्यथा चमसभक्षादनन्तरमेव प्राश्नीयात् । विज्ञायते [5]व शांषत्वके ब्राह्मणे 'सर्व अन्तः[5] सदसि सोमं भक्षयन्ति च द्विरच्छावाकः'(?) कथमस्यान्तः सदसि भक्षणं भवतीति, यदैवैतत् पुरोळाशदृगळं पश्चात् स्वस्य धिष्ण्यस्योपविश्य प्राश्नाति[6], तेनान्तः सदसि भक्षितो भवतीति । अथवा उपविश्य निष्क्रम्य निष्क्रम्य प्राशनेऽपि सदस्येव भक्षः कृतो भवति । सोमादन्येषां सर्वहविषामेव [7]धर्मः। वचनान्न[7] बहिर्भक्षितानि भवन्ति । भक्षमन्त्रमुक्त्वा निष्क्रम्य प्राश्यन्ते सवहवींषि तानि । तस्मात् तानि तत्रैव प्राशितानि भवन्ति । भक्षमन्त्रस्तु करणो न भवति, जपोऽयम् । तस्माज्जप्त्वा निष्क्रम्य प्राश्नीयान्न मन्त्रान्तेन प्राशनम् । तदेतद् दर्शितम्—'अवान्तरेळाया नित्यं जपमुक्त्वा' (आश्रौ २, ९, ९) इति मन्त्रान्तेन प्राशनं न भवति । यदि च[8] मन्त्रान्तेन प्राशनं स्याद् बहिर्भक्षः कृतो भवति । स्थाने जप्त्वा चेत् प्राशनाति स्थान एव भक्षः कृतो भवति ॥ ९ ॥

[सर्वेषामृत्विजामुच्छिष्टस्य हविषः प्राशनम्]

उपविष्टे ब्रह्माऽऽग्नीध्रीयं प्राप्य, हविरुच्छिष्टं सर्वे प्राश्नीयुः प्रागेवेतरे गता भवन्ति ॥ १० ॥

उपविष्टे अच्छावाके एतस्मिन् काले ब्रह्मा आग्नीध्रीयं प्राप्य गत्वा, हविषामुपयुक्तं शिष्टं सर्वे ऋत्विजः प्राश्नीयुः। प्रागेवेतरे गता भवन्ति । अच्छावाकात् प्रागेव सन्नेषु नाराशंसेषु इतरे होत्रादयः आग्नीध्रीयं गता भवन्ति । ऋत्विजां हविरुच्छिष्टप्राशनं विधीयते, प्राशनकालः स्थानं च । उपविष्ट इति वचनाद् ब्रह्मा न गच्छति, सन्नेषु सर्वेषु गच्छति ब्रह्मा तु 'नित्यः सर्वकर्मणां दक्षिणतः' (आश्रौ १, १२, ३) इति वचनाद् उपविष्टे गच्छति । उपविष्टे ब्रह्मा

---

१. °भक्षणो मूको । २. तु. आश्रौ ५, ३, १३-२२ । ३. नास्ति ब[1] पू । ४. प्र (प्रा मै) सर्पिका मूको । ५-५. वशां···न्तः पू ; 'व शांषत्वके' स्थाने 'च शाङ्खायनके' शोधः सम्भाव्यते । ६. प्राप्नोति ब[1,2] मै ; त्रुटितम् पू । ७-७. वर्मवच° मूको । ८. नास्ति ब[1] ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

गच्छतीत्युक्ते अच्छावाकस्य सदसि उपवेशनान्तमेव[1] कर्म, तथा प्राशनान्ते सति प्राशिते ब्रह्मा आग्नीध्रीयं प्राप्येत्येवं ब्रूयात् । सर्वे प्राश्नीयुरिति । सर्वग्रहणात् सवनीयभक्षे अनधिकृतानामपि[2] ब्राह्मणाच्छंस्यादीनाम् । ब्रह्मा आग्नीध्रीयं प्राप्येति वचनादन्येषां प्राप्नोति, तस्मादाह—प्रागेवेतरे गता भवन्तीति ॥ १० ॥

[हविरुच्छिष्टप्राशनानन्तरं सर्वेषां सदः प्रतिसर्पणम्]

प्राश्य प्रतिप्रसृप्य ॥ ११ ॥

प्राश्य हविरुच्छिष्टं सदः प्रतिप्रसृप्य ॥ ११ ॥

॥ इति पञ्चमे सप्तमं खण्डम् ॥

१. °नात्तमेव मूको । २. अधिकृ° ब²; वुटितम् पू ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

अथ पञ्चमेऽध्यायेऽष्टमः खण्डः

[ऋतुयाजसंज्ञकैर्ग्रहैः सह चरणविधानम्]

[प्राश्य प्रतिप्रसृप्य] ऋतुयाजैश्चरन्ति ॥ १ ॥

ऋतुयाजा[1] नाम ग्रहास्तैः चरन्ति, एतदधिकृतं वेदितव्यम्, इत उत्तरं यद् वक्ष्यते। संज्ञा चेयम्। 'ऋतुयाजान् द्विदेवत्यान्' (आश्वौ ५, ५, २१) इत्युक्ते एतेषां ग्रहणम्। प्राश्येति पुनरुच्यते अनुक्रमविधानार्थम्, प्राशनादनन्तरमिति, नान्यथा ऋतुयाजानां स्थानमुपदिष्टं स्यात्। प्राश्य ऋतुयाजैश्चरन्तीत्युक्ते आग्नीध्रीये एव चरन्तीत्येवं प्राप्ते प्रतिप्रसृप्येत्युच्यते। प्रतीतिवचनात् स्वं स्वं धिष्ण्यं प्रतिप्रसृप्येति भवति ॥ १ ॥

[ऋतुयाजग्रहग्रहणप्रैषविधानम्]

तेषां प्रैषाः ॥ २ ॥

तेषाम् ऋतुयाजानां प्रैषा भवन्ति। अध्वर्यणा प्रेषितो वक्ष्यमाणान् प्रैषान् मैत्रावरुणो ब्रूयात्। एतस्मिन्ननुच्यमाने वक्ष्यमाणैः प्रैषैः अध्वर्युणा प्रेषितः तेन तेनैव प्रैषेण वषट्कर्तैव यजेत। तेषां प्रैषाः इति वचनाद् मैत्रावरुणप्रैषा भवन्ति। तेषामित्यनुच्यमाने ऋतुयाजानां न संबध्यते ॥ २ ॥

[पञ्चमस्य प्रैषसूक्तस्यात्र प्रैषरूपेण विधानम्]

पञ्चमं प्रैषसूक्तम् ॥ ३ ॥

प्रैषसमाम्नाये पञ्च प्रैषसूक्तान्याम्नातानि, तेषां यत् पञ्चमं प्रैषसूक्तं, तदिह भवति। सूक्तग्रहणाद् द्वादश प्रैषा भवन्ति। द्वादशैव ऋतुग्रहाः ॥ ३ ॥

[प्रैषमन्त्राणामेव याज्यात्वेन विधानम्]

तेन तेनैव प्रेषितः प्रेषितः स स यथाप्रैषं यजति ॥ ४ ॥

---

१. ऋतु° स्थाने 'क्रतु°' पाठः प्रायः सर्वत्र मै।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

येन येन प्रैषेण मैत्रावरुणः प्रेष्यति तेन तेनैव प्रैषेण स स वषट्कर्ता यथाम्नातेन प्रैषेण यजति । प्रैषाश्चोदिताः[1] । मैत्रावरुणेन प्रेषितेन वक्तव्यम् इति प्राप्तम्, इदानीं याज्या वक्तव्याः । तदर्थमिदमुच्यते तेनैव [2]प्रेषितः प्रेषितः स स यथाप्रैषं[2] यजतीति । एवेत्यवधारणार्थे[1] । येन प्रेषितस्तेनैव यजति, नान्येन । 'होताऽध्वर्युगृहपतिभ्याम्' (आश्रौ ५, ८, ५) इत्युक्ते तेनैव यजति, नान्येन[4] । बहुत्वाद् वीप्सा । [5]'प्रेष्यति प्रैषैर्होतारं[5] होता यजति' (आश्रौ ३, २, ४) इति प्राप्ते स स यजतीत्युच्यते । 'उद्धृत्यादेशपदम्' (आश्रौ ५, ४, ४) इत्यादेशपदस्योद्धारे प्राप्ते यथाप्रैषमिति वचनाद् [6]आदेशपदं नोद्ध्रियते[6] ॥ ४ ॥

[अध्वर्युगृहपतिभ्यामुक्तस्य होतुर्यजनम्]

होताऽध्वर्युगृहपतिभ्यां होतरेतद् यजेत्युक्तः ॥ ५ ॥

'होता यक्षदसौ यजयोस्तु स्थाने आगूर्वषट्कारौ' (आश्रौ ५, ४, ५) इति तुकारप्रयोगाद् आगूर्वषट्कारौ भवतः । एवं होता यजति अध्वर्युणा गृहपतिना च होतरेतद् यजेत्युक्तः । स स यजतीति [7]प्राप्ते इदमुच्यते[7] । तौ न यजतः, ताभ्यां प्रसूतो होता यजतीति ॥ ५ ॥

[पृष्ठ्यषडहस्य षष्ठेऽहनि अध्वर्युगृहपत्योर्यजनम्]

स्वयं षष्ठे पृष्ठ्याहनि ॥ ६ ॥

स्वयं यजत्यध्वर्युर्गृहपतिश्च षष्ठेऽहनि पृष्ठ्यषडहस्य । 'होता यजति' (आश्रौ ३, २, ५) इति प्राप्ते इदमुच्यते । 'यथायथमृत्विज ऋतुयाजान् यजन्त्यसम्प्रदायम्' (ऐब्रा ५, ९) इति श्रुतिः । स्वयं षष्ठे तौ यजतः इति । पृष्ठ्य इत्युक्ते सर्वेष्वहःसु प्राप्ते षष्ठग्रहणम् । षष्ठेऽहनीत्युक्ते अभिप्लवेऽपि प्राप्ते पृष्ठ्यग्रहणम् । अहर्ग्रहणाद्[8] विश्वजित्यप्यहनि[9] स्वयं यजतः[10], यथा व्रात्यस्तोमचतुर्थे । तद्धि षष्ठमहर्भवति ॥ ६ ॥

[उत्तरवेदेः पश्चादध्वर्योः गार्हपत्यस्य पश्चाच्च गृहपतेर्यजनार्थमुपवेशनम्]

पश्चादुत्तरवेदेरुपविश्याध्वर्युः पश्चाद् गार्हपत्यस्य गृहपतिः ॥ ७ ॥

---

१. तु. ऋखि ५, ७, ५ । २-२. नास्ति मूको । ३. °णे मै । ४. नान्यतः ब[2] मै पू । ५-५. प्रैषातिप्रैषैः ब[1/2] मै; त्रुटितम् पू । ६-६. °पदान्तेनो° मै । ७-७. प्राप्तमिद° मूको । ८. अहर्गणात् ब[1/2]; आग्रहणात् मै; त्रुटितम् पू । ९ विश्वजितेऽप्य° मूको । १०. यजमानः ब[1] ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

आहवनीयादनन्तरम् उत्तरवेदिर्भवति। तस्या उत्तरवेदेः पश्चाद् अपरस्यां दिशि उपविश्य निरसनोपवेशने कृत्वा अध्वर्युर्यजति षष्ठेऽहनि। उत्तरवेदिग्रहणाद् अग्निरपि गृह्यते, तत्स्थाने विधीयते। तस्माद्[1] अन्तरेण हविर्धाने इत्युक्तम् अन्येषाम्[2]। अध्वर्युरित्येको[3] निर्दिष्टस्तस्मादेक एव यजति। 'अध्वर्यू यजतम्' (आपश्रौ १२, २७, ६) इति द्वौ प्रेषितौ, द्वौ वा यजतः इत्यध्वर्यूणां विकल्पः। किमर्थमिह आध्वर्यवं याजमानं च विधीयते। याजमानविधानम्[4] इज्याप्राप्त्यर्थम्। आध्वर्यवे तु ऋक् पूर्वा [5]उत्तरः प्रैषः[5] यथा मा भूदिति। [6]पश्चाद् गार्हपत्यस्य[6] गार्हपत्यस्याग्नेः पश्चादुपविश्य गृहपतिर्यजति। 'होताऽध्वर्युगृहपतिभ्याम् (आश्रौ ५, ८, ५) इति वचनात् तत्स्थाने इज्याप्राप्ते, तस्मादिदमुच्यते। 'होताऽध्वर्युगृहपतिभ्याम्' (आश्रौ ५, ८, ५) इति प्रकृतावुक्तम्, तस्मात् प्रकृतौ यजमानो गृहपतिशब्देन चोदितः। तस्मादहीनैकाहेष्वपि षष्ठेऽहनि यजमानः स्वयं यजति ॥ ७ ॥

[वषट्कर्तॄणामानन्तर्येण ऋतुपात्रग्रहभक्षणम्]

अथैतद् ऋतुपात्रमानन्तर्येण वषट्कर्तारो भक्षयन्ति ॥ ८ ॥

अथ ऋतुयाजेज्यायाः अनन्तरम् एतद् एव एकम् ऋतुपात्रम् आनन्तर्येण अनुक्रमेण सर्वे वषट्कर्तारो भक्षयन्ति। [7]गृहपतेः ऋतुयाजेज्या[7]। अथेत्याह, तस्मात् सर्वान्ग्रहानिष्ट्वा[8] भक्षणं भवति वषट्कृते[9]। वषट्कृते तु प्राप्तमेतद् इति। एतदेव पात्रं सर्वे भक्षयन्ति येन येन मुखेन हुतम्। अध्वर्युः षड् ग्रहान् जुहोति, प्रतिप्रस्थाता वा। षडेतमेव भक्षयन्ति। ऋतुपात्रमिति संज्ञा अस्य ग्रहस्य। यस्य[10] कर्तुः द्वौ वषट्कारौ बहवो वा, तस्य तदानीमेव प्रतिवषट्कारं भक्षणं प्राप्तम्। तस्मादाह—आनन्तर्येण वषट्कर्तारो भक्षयन्ति। वषट्कारानुक्रमेणेत्यर्थः। सदस्येवाध्वर्युगृहपतिभ्यां भक्षः आग्नीध्रस्य च ॥ ८ ॥

[अध्वर्योः पृथक् प्रतिभक्षणविधानम्]

पृथगध्वर्युः प्रतिभक्षयेत् ॥ ९ ॥

भक्षं भक्षं पृथगध्वर्युः भक्षयति। आध्वर्यवमिदम्। एतस्मादारम्भाद्[11] भक्षस्तत्र न भवति। अध्वर्युगृहपतिभ्यां[12] यौ भक्षौ, तौ होतुर्भवतः तत्र।

---

१. यस्मात् ब[1] मै पू। २. तु. बौश्रौ ७,४ : १० (?)। ३. °रित्युक्तो मूको। ४. यस्माद् विधानेन ब[1,2] मै; ···नेन पू। ५-५. उत्तरप्रैषः ब[1] पू मै; उत्तरतः प्रैषः ब[2]। ६-६. नास्ति ब[1]। ७-७. गृहपते ऋतुयाज्या° मूको। ८. सर्वान्यिहानिष्ट्वा मूको। ९. नास्ति ब[2]। १०. अस्य मूको। ११. तस्मा° ब[2]। १२. °भ्यामिति ब[1]।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

होमभक्षव्यवायात्, तत्र न[1] भवति भक्षः, पृथगध्वर्युः प्रतिभक्षयति, तस्मात् तत्र न[2] भवति भक्षेण व्यवायात्। अध्वर्युरित्येकश्चोदितस्तस्मादध्वर्युरेक एव भक्षयति, न प्रतिप्रस्थातेति दर्शयति ॥ ९ ॥

[अध्वर्योः प्रतिभक्षण एवोपहवविधानम्]

तस्मिंश्चैवोपहवः ॥ १० ॥

अध्वर्युः प्रतिभक्षयति, तस्मिन्नुपहवः। यदि प्रतिप्रस्थाताऽपि प्रतिभक्षयति तस्मिंश्चैवोपहवो भवति। सर्वेषु समानभक्षेषु 'यथासभक्षं त्वदीक्षिताः' (आश्रौ ५, ६, १९) इति प्राप्ते इदमुच्यते। अध्वर्यावेवोपहवो, नान्येष्विति। च-शब्दः समुच्चयार्थः। अध्वर्यावुपहवः प्रतिप्रस्थातरि च ऋचा यदि भक्षयति ॥ १० ॥

॥ इति पञ्चमेऽष्टमं खण्डम् ॥

---

१. नास्ति मूको। २. नास्ति ब[1]।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

अथ पञ्चमेऽध्याये नवमः खण्डः

[अध्वर्योः परावर्तनं ततो होतुः मन्त्रजपादिकर्मविधानम्]

पराङध्वर्यावावृत्ते सुमत्पद्वग्दे पिता मातरिश्वा छिद्रापदाधादच्छिद्रोक्था कवयः शंसन्। सोमो विश्वविन्नीथा निनेषद् बृहस्पतिरुक्थामदानि शंसिषद् वागार्युर्विश्वायुर्विश्वमायुः क इदं शंसिष्यति स इदं शंसिष्यतीति जपित्वाऽनभिहिङ्कृत्य शोंसावोमित्युच्चैराहूय तूष्णींशंसं शंसेदुपांशु सप्रणवमसन्तन्वन् ॥ १ ॥

पराङध्वर्यावावृत्ते प्रत्यावर्तनम्। प्रतिभक्षं कृत्वा अध्वर्युः पराङावर्तते। पराङ्मुख आवर्तते। तस्मिन् पराङावृत्तेऽध्वर्यौ एतस्मिन्निमित्ते 'सुमत्पद्वग्दे' इति एतं यथासमाम्नातं जपति। होता एतं[1] जपं[2] जपित्वा अनन्तरम् [3]अनभिहिङ्कृत्य अभिहिङ्कारम् अकृत्वा 'शोंसावोम्' इति उच्चैर् मन्त्रेण आहूय आहावं[†] कृत्वा अनन्तरं[3] तूष्णींशंसं शंसेत्। तूष्णींशंसो वक्ष्यते त्रिपदः षट्पदो वा[4]। तं शंसेद् उपांशु सप्रणवं सह प्रणवेन असंतन्वन् पदं पदेन असन्धयन्। 'पराञ्चं चतुष्पद्यासीनमभ्याह्वयते' (ऐब्रा २, ३८) इति श्रुतिः। तस्मादाह—पराङध्वर्यावावृत्त इति। [5]जपित्वेत्युच्चैराहूयते (? °च्चैराहूयेति। तूष्णींशंसं शंसेदिति मन्द्रेण प्राप्ते उपांशित्याह।) अनेन[5] इति प्राप्ते। 'आगूःप्रणववषट्काराः' (आश्रौ २, १५, १२) (? इति) उच्चैः प्राप्ते सप्रणवमित्याह। पदं(? पादं)पाद[6] इत्याह[7] (? प्रत्याहावादेशस्य)। पदशस्य न्याये[8] प्राप्ते असन्तन्वन्नित्याह ॥ १ ॥

[पर्यायानुसारेणाहावविधानम्]

एष आहावः प्रातःसवने शस्त्रादिषु। पर्यायप्रभृतीनां च। सर्वत्र चान्तःशस्त्रम् ॥ २ ॥

---

१. एवं ब[2]। २. नास्ति ब[2]। ३-३. नास्ति ब[2]। †. आवाहनं ब[1]। ४. तु. आश्रौ ५, ९, ११। ५-५. जपित्वे(°त्वं ब[2]; °त्वा मै; °त्व पू)त्युच्चैराहूयते तेनेति (°यतेनेति ब[2] मै; °यते···पू) मूको। ६. पद ब[1]; नास्ति ब[2]। ७. इत्यर्थं ब[2]। ८. पदेशस्यन्याये ब[1/2] पू; पदेस्य न्याये मै।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

'शोंसावोम्' (आश्रौ ५,९,१; ऐब्रा ३,१२) इति य उक्तः, एष आहावः प्रातःसवने शस्त्राणामादिषु भवति । अप्राप्तो विधीयते । अन्येऽप्याहावा वक्ष्यन्ते । तस्मादेष इत्याह । प्रातःसवनाधिकारे पुनः प्रातःसवनग्रहणं पर्यायादिविवक्षार्थम् । प्रातःसवने अक्रियमाणे पर्यायादिष्वाज्याद्ये[1] च अयमाहावः स्यात्, प्रातःसवने न स्यात् । शस्त्रादिग्रहणं पर्यायादिषु तृतीयसवने शस्त्रादिष्विति प्राप्तनिवृत्त्यर्थम् । पर्यायप्रभृतीनां च शस्त्रान्तशस्त्रादिष्वेवाहावो[2] भवति । अन्यान्यपि यानि ऊर्ध्वं षोडशिनो वर्तन्ते । वाजपेये अतिरिक्तोक्तेऽर्थे प्राप्ते च-शब्दः अधिकारसमुच्चयार्थः । सर्वत्र चान्तःशस्त्रम् । सर्वत्र सर्वेषु सवनेषु अन्तःशस्त्रम्[3] शस्त्रमध्ये आदिश्यमान[4] आहावः[5] एष एव भवति, नान्यः । 'स्तोत्रियानुरूपेभ्यः प्रतिपदनुचरेभ्यः प्रगाथेभ्यो धाय्याभ्य इति पृथगाह्वानम्' (आश्रौ ५, १०, १३) इत्युक्ते एष एव भवति, नान्यः । अधिकृतादन्येष्वपि सवनेषु प्राप्त्यर्थं सर्वत्रग्रहणम् । च-शब्दः आहावाधिकारसमुच्चयार्थः । अन्येऽप्याहावाः सन्ति, तस्माच्छस्त्रमध्ये नियम्यते एष आहाव इति ॥ २ ॥

[आहावेन ऋगावानादेरुपसन्तानविधानम्]

तेन चोपसन्तानः ॥ ३ ॥

तेन आहावेन परस्य ऋगावानादेः[6] उपसन्तानो भवति । तस्य च आहावस्य पूर्वं तेन[7] ऋगन्तेन सह उपसन्तानो भवति । च-शब्दः समुच्चयार्थः । तेन च तस्य चेति । 'स्वरादिम् ऋगन्तम्' (आश्रौ १, २, १०) इति ऋक्षु सन्तान[8] उक्तः अनर्थकेष्वाहावादिषु[9] न प्राप्नोति तस्मादारम्भः ॥ ३ ॥

[प्रतिगरस्य स्वरविधानम्]

शस्त्रस्वरः प्रतिगर ओथामो दैवेति ॥ ४ ॥

शस्त्रस्वरः शस्त्रस्य यः स्वरः स एव स्वरः प्रतिगरस्य भवति । सवनस्वरे प्राप्ते इदमुच्यते । यथा तूष्णींशंसः सवनादुपांशु प्रतिगरो भवति । एवं निष्केवल्ये अनुब्राह्मणस्वरेषु मानसे च[10] प्रतिगरः । ओथामो दैव इति अयं प्रतिगरसंज्ञो भवति । [11]ये च[11] वक्ष्यन्ते । 'नित्य इह प्रतिगरः' (आश्रौ ७,११,३१) इत्युक्ते एतस्य ग्रहणम् । किमर्थमिहाध्वर्यवमुच्यते । ब्राह्मणे आम्नातत्वात्,

---

१. प्रत्यायादिष्वाज्याज्ये (°ज्या ये मै) मूको । २. शस्त्रान्नं श° ब[1] पू मै ; शस्त्रान्तश° ब[2] । ३. अन्तः मूको । ४. °माने ब[1] मै पू। ५. °वः शस्त्र ब[1] मै पू । ६. °वानादिरूप सं° ब[1] मै पू ; वादेरुपसं ब[2] । ७. नास्ति ब[1] मै पू । ८. °न इति मै पू । ९. °ष्वावाहादि° ब[1]; °ष्वाहवादिषु ब[2] मै पू । १०. चक ब[1] मै पू । ११-११. यत्र ब[1] ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

आध्वर्यवे च कात्स्न्र्येन आम्नायाभावात् । यथा पृथक् सूक्तानि अश्वादीनामध्वर्युशाखायामाम्नातानि नेह तानि दृश्यन्ते एवम् । 'न च' प्रतिगरस्थानान्यध्वर्यूणां प्रत्यक्षाणि शिल्पादिषु ॥ ४ ॥

[आहावे क्रियमाणे प्रतिगरस्वरूपकथनम्]

शोंसामो दैवेत्याहावे ॥ ५ ॥

शोंसामो दैव इति अयं प्रतिगरः आहावेषु क्रियमाणेषु ॥ ५ ॥

[प्रतिगरस्यादौ प्रणवे आदिस्वरस्य प्लुतिविधानं तदन्त्ये चाप्लुतिविधानम्]

प्लुतादिः प्रणवेऽप्लुतादिरवसाने ॥ ६ ॥

य उक्तः प्रतिगरः 'ओथामो दैव' (आश्रौ ५,९,४) इति, स[१] प्लुतादिः प्रणवे प्रयुज्यते । प्लुतोऽस्य आदिः प्लुतादिः । अस्याद्यमोकारं प्लुतं कुर्यात् त्रिमात्रं कुर्यात् । आहावप्रतिगरमुक्त्वा यदिदमुच्यते, तस्मादाहावप्रतिगरोऽपि[३] प्लुतादिर्भवति । शोंऽसामोमित्योकारं[४] त्रिमात्रं कुर्यात् । अन्यथा आहावप्रतिगरात् पूर्वमेव ब्रूयादितरं नैव । अविपर्यासवचनेऽपि एतावदेव[५] प्रयोजनम् । अवसाने [६]पूर्वः वक्तव्यः[६], अनन्तरम् एष प्रणवे । एतदेव ज्ञापकं[७] भवति, अन्यत्रापि यत्र प्रणवे प्रतिगरो विधीयते, स सर्वः प्लुतादिर्भवतीति । यथा 'होता विष्टीमेन जरितरोथामो दैव' (आश्रौ ८, ३, २४) इत्येतौ । यथासमाम्नातस्यादेः प्लुतिः प्राप्ता प्राकृतस्यादेरेव भवति बहुव्रीहिनिर्देशात् । प्लुतादिः प्रणवे प्लुत आदिरस्येति विग्रहः । आचार्योऽपि दर्शयति—'मध्ये प्रणव उत्तमः' (आश्रौ ८,३,२५-२६) इति[८] । 'अप्लुतादिरवसाने' । ओथामो दैवेति अविशेषेणोक्तं वचनात् प्रणवे एव भवति, अवसाने न प्राप्नोति । तस्मादवसानेऽपि विधीयते अप्लुतिर्यथा—समाम्नातः प्रतिगरः अवसाने भवति । ओथामो दैवेति प्लुतादिरित्यधिकारादप्लुतादिरित्युच्यते । तत्रैव कस्मान्नोक्तं शस्त्रस्वरः प्रतिगरः, ओथामो दैव इति अवसाने इति । लघ च भवति । एवमुच्यमाने अस्य विहितस्थानित्वात् प्लुतादिः प्रणव इत्युक्ते कः प्रतिगरो भवति । अविहितस्थाने न विद्यते । अथ यदि शस्त्रस्वरः प्रतिगरः, ओथामो दैवेत्यवसाने प्लुतादिः प्रणव इत्युच्यते । एवमुच्यमाने आहावप्रतिगरस्य[९] प्लुतिर्न प्राप्नोति, अन्येषां च प्रतिगराणाम् । तस्मादाहावप्रतिगरादूर्ध्वं प्लुतादिः

१-१. त्रुटितम् पू ; नन्वप्र° ब[१] । २. नास्ति मूको । ३. °हावोऽपि प्रति° ब[१२] मै ; त्रुटितम् पू । ४. शेषमित्यों° मूको । ५. एतदेव ब[२] । ६-६. पूर्ववक्त° मूको । ७. ज्ञापितं ब[२] । ८. इति ब्रूयात् मूको । ९. °वे प्र° ब[२] ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

प्रणव[1] इत्युच्यते । प्रणव इत्युक्ते अवसाने न प्राप्नोतीति अप्लुतादिरवसान इत्युच्यते ॥ ६ ॥

[आहावोत्तरे प्रणवे प्रणवस्य प्रतिगरत्वविधानम्]

प्रणवे प्रणव आहावोत्तरे ॥ ७ ॥

आहाव उत्तरो यस्मात् प्रणवात्, स आहावोत्तरः प्रणवः, तस्मिन् आहावोत्तरे प्रणवे प्रणवः प्रतिगरो भवति । ओमिति प्रतिगरः प्रणवः सामिधेनीषु सिद्धः, 'ओकारं त्रिमात्रं मकारान्तं[2] कृत्वा' (आश्रौ १, २, १०) इति । [3]तत्र प्रणव इति । त्रिप्रकारः[3] प्रणवः प्रणवान्तः प्रणवादि[? : प्रणवमध्यः, तं]····· रेद्धा[?त्रेधा]मकारान्तः[? न्तं] कृत्वा (आश्रौ १, २, १०) इति वचनात्····· [? आहावोत्तरे प्रणवे] शुद्धो भवति । तस्मात् स[4] प्रतिगरादौ शुद्धः प्रयुक्तः 'प्लुतादिः प्रणवे' (आश्रौ ५, ९, ६) इति । तस्माद् यत्र प्रतिगरादौ प्रणवमुपदिशति, तत्र शुद्धः प्रणवो भवति [5]मध्ये 'प्रणव[5] उत्तमः' (आश्रौ ८, ३, २६) इति ॥ ७ ॥

[आहावात् पूर्वस्मिन्नवसाने प्रणवस्य प्रतिगरत्वविधानम्]

अवसाने च ॥ ८ ॥

'आहावोत्तरे' (आश्रौ ५, ९, ७) इति वर्तते । आहाव उत्तरः अस्मादवसानात्[6], तस्मिंश्चावसाने प्रणवः प्रतिगरो भवति । 'तार्क्ष्येणैकपदा उपशंसस्य' (आश्रौ ८, १२, २०) । तत्र तृतीयस्यामेकपदायां[7] प्रणवः प्रतिगरो भवति ओम् इति ॥ ८ ॥

[आहावात् पूर्वस्मिन्नवसाने प्रतिगरस्य प्रणवान्तत्वविकल्पः]

प्रणवान्तो वा ॥ ९ ॥

[8]आहावोत्तरे अवसाने प्रणवः प्रतिगर उक्तः प्रणवान्तो वा[8] भवति, ओं (१ ओ) थामो दैवोम् इति विकल्पः ॥ ९ ॥

[शस्त्रमध्ये प्रणवेनावसाने प्रतिगरस्य प्रणवान्तत्वं शस्त्रान्ते तु प्रणवविधानम्]

यत्र यत्र चान्तःशस्त्रं प्रणवेनावस्यति प्रणवान्त एव तत्र प्रतिगरः शस्त्रान्ते तु प्रणवः ॥ १० ॥

---

१. प्रतिगर मूको । २. मकारांतं च b^1 पू । ३-३. तत्र···कारः पू । ४. कं b^2 पू, तं b^2 । ५-५. मध्यप्रण° b^1 । ६. °साने मूको । ७. °दाया मूको ; तु. आश्रौ ८, २, २० ; ऐब्रा ६, २४ । ८-८. नास्ति b^2 ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

'आहावोत्तरे' (आश्रौ ५, ९, ७) इति वर्तते । आहावोत्तरादन्यत्र तु यत्र यत्र[1] चान्तःशस्त्रं प्रणवेनावस्यति, प्रणवान्त एव तत्र प्रतिगरः प्लुतादिप्रणव इति प्राप्तः । आहावोत्तरे इति वर्तते । तस्माद् यत्र[2] यत्रेत्युच्यते । च-शब्दः तु-शब्दार्थो द्रष्टव्यः । आहावोत्तर इत्येतं पक्षं व्यावर्तयति । शस्त्रान्ते तु अवसाने प्रणवं वक्ष्यति । तस्मादन्तःशस्त्रमित्याह । अप्रणवमप्यवसानमस्ति । तस्मादाह यत्र[3] प्रणवेनावस्यतीति । प्लुतादिः प्राप्तः, प्रणवान्तो विधीयते । एव-शब्दः[4] प्रणवान्तमेवावधारयति विकल्पनिवृत्त्यर्थः । यत्रेत्युच्यते तत्रेति वक्तव्यम् । पुनः प्रतिगरग्रहणं संज्ञार्थं[5] न भवति । प्रतिरूपं प्रतिसदृशं गृणातीत्यर्थः । शस्त्रान्ते तु अवसाने प्रणवः प्रतिगरो भवति ओमिति 'प्लुतादिः प्रणवे' (आश्रौ ५, ९, ६) इति प्राप्तः । तु-शब्दः प्राप्तव्यावृत्त्यर्थः ॥ १० ॥

[त्रिपदषट्पदतूष्णींशंसमन्त्रस्वरूपकथनम्]

भूरग्निर्ज्योतिर्ज्योतिरग्नो३म् । इन्द्रो ज्योतिर्भुवो ज्योतिरिन्द्रो३म् । सूर्यो ज्योतिर्ज्योतिः स्वः सूर्यो३मिति त्रिपदस्तूष्णींशंसः । यद्यु वै षट्पदः पूर्वैर्ज्योतिःशब्दैरग्रेऽवस्येत् ॥ ११ ॥

भूरग्निरित्येवमादियथासमाम्नातानि त्रीणि पदानि प्रणवान्तानि यस्य सोऽयं त्रिपदः । 'तूष्णींशंसं शंसेदुपांशु सप्रणवम्' (आश्रौ ५, ९, १) इत्युक्ते एतस्य तद्विधानम् । त्रिपद इति वचनात् पदान्ते अवसानम्, अन्यथा निगदत्वादनियतावसानं स्यात् ।

यद्यु वै षट्पादैरधीयते[6] तूष्णींशंसः । एकैकस्मिन् पादे द्वौ द्वौ ज्योतिःशब्दौ, तेषां पूर्वैः प्रथमैः ज्योतिःशब्दैः अग्रे प्रथमम् अवस्येत् । एवं शस्यमाने षट्पदो भवति । 'षट्पदं तूष्णींशंसं शंसति' (ऐब्रा २, ४१) इति ब्राह्मणम् । यदीत्यनित्यभावे । यदि षट्पदं कुर्यात्, त्रिपदः षट्पदो वेति विकल्पः । षट्पदपक्षे अनुब्राह्मणमानुपूर्व्यं[7] भवति, समानब्राह्मणादुभयविहितं यस्मात् । उ वै इत्येतौ निपातौ वाक्यपूरणार्थौ ब्राह्मणे । ब्राह्मणवाक्यमेवैतत् । तस्मादतिरिक्तदोषो न भवति । पूर्वैरिति नियमः, उत्तरैरवसानं मा भूदिति । अग्रग्रहणाद् द्वितीयमवसानं प्रणवैर्भवति । त्रिपदः षट्पदः इति वचनाद् अभ्यासप्रतिषेधः[8] । पदं पाद इत्यनर्थान्तरम् । ऋगन्ते प्रणवदर्शनाच्च ऋग्धर्मत्वादभ्यासः प्राप्तः । अभ्यासे क्रियमाणे संख्याविघातः स्यात् ॥ ११ ॥

---

१. नास्ति ब[1,2] । २. नास्ति ब[2] । ३. यत्र यत्र मै । ४. तु-शब्दः मूको । ५. संज्ञार्थे ब[1] । ६. षट्पदैर° ब[1] । ७. तु. आश्रौ ५, ९, २३ । ८. अभ्यासे प्र° मूको ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

[निवित्स्वरूपकथनम्]

उच्चैर्निविदं यथानिशान्तमग्निर्देवेद्ध इति ॥ १२ ॥

तूष्णींशंसादनन्तरं निधिद् भवति । तां निविदम् उच्चैः शंसेद् यथानिशान्तं यथाम्नातम् । 'अग्निर्देवेद्धः' (ऋखि ५, ५, १; ऐब्रा २, ३४) इति एषा निवित् । उपांश्वधिकारादुपांशु प्राप्ते उच्चैरित्युच्यते । निविदित्येषा संज्ञा । संज्ञया चोदिते निविद्धर्मो भवति । 'उपैव यजमानं निगृह्णीत' (ऐब्रा ३, १९) इति निविदतिपातयेत् प्रायश्चित्तं, तत्[1] तु न भवति । सूक्ते निविद् भवति । यस्मात् 'न सूक्तेन निविदमतिपद्येत' (ऐब्रा ३, ११) इति श्रुतिः । 'पुरस्तादुक्थानां प्रातःसवने धीयन्ते'[2] (ऐब्रा ३, १०) इति श्रुतिः । यथानुशस्यं वैकश्रुत्यं संततलक्षणं[3] च प्राप्तं[4], तस्माद् यथानिशान्तमित्युच्यते[5] । आदिग्रहणात् कृत्स्ना निविदिति [6]चोदिता, सा खिलसमाम्नाये आम्नाता[6] ॥ १२ ॥

[उक्तनिविद आह्वानाभावकथनम्]

नास्या आह्वानम् ॥ १३ ॥

†[7]अस्या निविद आह्वानं† न विद्यते । 'आह्वानं च निविदाम्'[7] (आश्रौ ५, ९, १९) इत्याह्वाने प्राप्ते प्रतिषेधः । अस्या इत्यनुच्यमाने[8] [9]कृत्स्ने शस्त्रे[9] अविशेषात् प्रतिषेधः स्यात् । आरभ्य प्रतिषेधो विकल्पो भवति ॥ १३ ॥

[उक्तनिविदः पूर्वप्रणवेनोपसन्ताननिषेधः]

न चोपसन्तानः ॥ १४ ॥

पूर्वेण प्रणवेन [10]उपसन्तानश्च अस्या निविदः न विद्यते । च-शब्दः अस्याधिकारसमुच्चयार्थः । पूर्वमुक्तम् 'असंतन्वन्'[10] (आश्रौ ५, ९, १) इति तूष्णींशंसंस्यैव अन्योन्येन सह सन्तानप्रतिषेधार्थः । तस्मादाहावेन प्राणसन्तानो भवति । उपांशूच्चयोर्वर्णसन्तानस्य असम्भवात् । निविदा च सह वर्णसन्तानः प्राप्तः, स[11] प्रतिषिध्यते न चोपसन्तान इति ॥ १४ ॥

---

१. नास्ति ब[2] । २. विधीयन्ते मूको । ३. सततं ल° ब[1] मै पू । ४. प्राप्ते मूको । ५. °न्तमुच्यते ब[1] मै पू । ६-६. नास्ति मै । ७-७. नास्ति मै । †-†. नास्ति ब[1] । ८. इत्युच्य° मूको । ९-९. कृत्स्नशस्त्रे ब[2] । १०-१०. नास्ति पू । ११. तत् मूको ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

[आज्यसूक्तस्योपसन्तानविधानम्]

उत्तमेन पदेन प्र वो देवायेत्याज्यमुपसन्तनुयात् ॥ १५ ॥

उत्तमेन पदेन 'प्र वो देवाय' (ऋ ३, १३, १-७) इति एतत् सूक्तम् आज्यसंज्ञकम् उपसन्ततनुयात् सन्दध्यात् । यथानिशान्तवचनादुपसन्तानो न प्राप्नोति, तस्मादारभ्यते । आज्यम् इति सूक्तस्य संज्ञा । 'आज्याद्यां त्रिः शंसेत्' (आश्रौ ५, ९, २०) इत्युक्ते एतस्य ग्रहणम् ।

"'होताजनिष्ट' (ऋ २, ५, १) इत्याज्यम्" (आश्रौ ७, २, १) इत्युक्ते एतस्य स्थाने तद् भवति । एवं च' "'आ यान्त्विन्द्रोऽवसः' (ऋ ४, २१, १) इति मरुत्वतीयम्, 'आ न इन्द्र' इति निष्केवल्यम्" (आश्रौ ७, ५, १८) इत्युक्ते' कृत्स्नस्य शस्त्रस्य स्थाने प्राप्नोति । तत्र पारिभाषिकी शस्त्रस्य संज्ञा श्रौती । एवम् इयं तु आज्यसंज्ञा पारिभाषिकी, न श्रौती । नहि श्रौती सूक्तस्य आज्यसंज्ञा, सर्वाण्येव प्रातःसवने शस्त्राण्याज्यानीत्युच्यते । 'ते वै प्रातराज्यैरेवाजयन्त आयन्' (ऐब्रा २, ३६) इति ॥ १५ ॥

[उत्तराया निविद उपसंहारकथनम्]

एतेन निविद उत्तराः ॥ १६ ॥

अस्या निविदः [1]संविधानमुक्तम् । एतेन च संविधानेन[3] उत्तरा निविदो व्याख्याताः । 'यथानिशान्तम्' (आश्रौ ५, ९, १२) इत्युक्ते उत्तरा अपि निविदः यथानिशान्तमेव भवन्ति । उत्तरा इति वचनाद् अस्या अनन्तरं या आम्नाता मरुत्वतीयादयः ता यथानिशान्तं भवन्ति, न पुरोरुचः । पुरोरुचोऽपि निविदः 'पुरस्तादुक्थानां प्रातःसवने धीयन्ते' (ऐब्रा ३, १०) इति बहुवचनाद् निविदामपि पुरोरुक्त्वमित्युच्यते । 'तूष्णींशंसं शस्त्वा पुरोरुचं शंसति' (ऐब्रा २, ३९) इति श्रुतिः ॥ १६ ॥

[सर्वेषां पदसमाम्नायानामुपसंहारकथनम्]

सर्वे च पदसमाम्नायाः ॥ १७ ॥

यावन्तः पदानां समाम्नायाः, ते च सर्वे एतेन व्याख्याताः यथानिशान्तं भवन्ति । यथा चेहैतशप्रलापः[4] (तु० शांश्रौ १२,१७,३) प्रतिराधः[5] देवनीथः[6]

---

१. चेत् मूको । २. इत्युच्यते व' । ३-३. संविधानम् एतेनान्ये च विधा° मूको । ४. तु. ऐब्रा ६, ३३; ऋखि ५, १५; आश्रौ ८,३,१४ । ५. तु. ऐब्रा ६,३३; ऋखि ५,१५; आश्रौ ८,३,२३ । ६. तु. ऐब्रा ६, ३४; ऋखि ५, २०; आश्रौ ८,३,२५ ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

महानाम्नीषु[1] च पदानि । निविदधिकारात् खैलिकानामेव[2] । सर्वग्रहणाच् च-शब्दः[3] एतेनेति अधिकारसमुच्चयार्थः ॥ १७ ॥

[इतोऽन्यत्रोपसन्तानविधानम्]

उपसन्तानस्त्वन्यत्र ॥ १८ ॥

अस्या निविदोऽन्यत्र उत्तरासु निवित्सु पदसमाम्नायेषु च पूर्वेण[4] निविद उपसन्धीयन्ते पदसमाम्नायाश्च । 'एतेन निविद उत्तराः' (आश्रौ ५, ९, १६) इत्यतिदेशेन 'न चोपसन्तानः' (आश्रौ ५,९,१४) इत्यनुपसन्ताने प्राप्ते उपसन्तानो विधीयते । तु-शब्दः प्राप्तव्यावृत्त्यर्थः । अन्यत्रेति वचनादस्य प्रतिषेध एव ॥ १८ ॥

[इतोऽन्यत्र निविदामाह्वानविधानम्]

आह्वानं च निविदाम् ॥ १९ ॥

आह्वानम् उपसन्तानः च निविदां भवति । च-शब्द उपसन्तानसमुच्चयार्थः । समुच्चयेऽक्रियमाणे उपसन्तानः पदेष्वेव भवति । '[5]आह्वानं निवित्सु[5]' [6]विग्रहणाय पदेष्वाहावो[6] न भवति ॥ १९ ॥

[आज्यसूक्तस्य प्रथममन्त्रस्यार्धर्चशः त्रिःशंसनम्]

आज्याद्यां त्रिः शंसेदर्धर्चशो विग्राहम् ॥ २० ॥

आज्याद्यां त्रिः शंसेद् आज्यस्य सूक्तस्य आद्याम् ऋचं त्रिः शंसेत् । अर्धर्चशः अर्धर्चे अवस्य । विग्राहं विगृह्य विगृह्य । विग्राहं द्वयोः पादयोर्मध्ये मात्राकालं प्राणसन्तानमवसानं कृत्वाऽर्धर्चेऽवस्येत् । उत्तरमर्धर्चं प्रकृत्या शंसेत् । आज्याधिकारे पुनराज्यग्रहणं परिभाषाकाण्डेन व्यवधानात् कृतम्[7] । शस्त्रमध्ये अप्राप्तेस्त्विर्वचनमारभ्यते । अर्धर्चश इति वचनाद् विग्रहे प्राणसन्तानो भवति । विग्रहे अवसानं प्राप्तं[8] यथा पदान्तरे, तस्मादर्धर्चश इति वचनाद् अर्धर्चान्ते एवावसानं विग्रहनिमित्ते । णमुल् आभीक्ष्ण्ये[9] । तस्मात् त्रिष्वपि वचनेषु विग्रहो भवति । विग्रहो नाम पादयोरन्तरे मात्रावसानं प्राणसन्तानं तावदवग्रहान्तरमित्युक्तम् । अवग्रहे प्राणसन्तानो भवति । विग्रहे अवसानमेव । तस्माद् विग्रहेऽपि प्राणसन्तानो भवति । अर्धर्चश इति वचनादर्धर्च एवावसानं, नान्यत्र ॥ २० ॥

---

१. तु. ऐआ ४,१,१ ; ऋखि ५,४ ; आश्रौ ७,१२,१०-११ । २. °नामेवं मूको । ३. °णात्तु (°णात् मै) शब्दाः मूको । ४. पूर्वाणि ब[1] मै पू । ५-५. °ननिवित्सु मूको । ६-६. °हणाया दृष्वा° ब[1]; °हणायापदेष्वा° ब[2]; °हाणा पादेष्वा° मै; °हणा पादेष्वा° पू । ७. तं मूको । ८. प्राप्ते मूको । ९. तु. पा ३, ४, २२ ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

[आज्यसूक्तस्य प्रथममन्त्रस्यार्धर्चशो विग्राहं निदर्शनम्]

तन्निदर्शयिष्यामः । प्र वो देवायाग्नये बर्हिष्ठमर्चास्मै । गमद् देवेभिरासनो यजिष्ठो बर्हिरासदो३मिति ॥ २१ ॥

यदुक्तम् 'आज्याद्यां त्रिः शंसेदर्धर्चशो विग्राहम्' (आश्रौ ५, ९, २० इति, तन्निदर्शयिष्यामः असंशयार्थम् । 'प्र वो देवायाग्नये' (ऋ ३, १३, १) इति यथाम्नातं निदर्शनम्[1] । आहावोऽपि । अत्र संशयः । आज्याद्यामिति सूक्तस्याद्यामुत शस्त्रस्याद्यामिति संशयः, अधिकाराद् व्यवायात् । विग्राहमिति[2] वचनात् पदान्तरे विग्रहः स्यात् । आज्याद्यामिति ऋगधिकारात् । उत्तरेऽप्यर्धर्चे विग्रहः प्राप्नोति । निदर्शनात् सूक्तस्यैवाद्या भवति । 'पूर्वस्मिन्नेवार्धर्चे । पादयोरेव' विग्रहो भवति । 'प्रथमे पादे विहरति' (ऐब्रा २, ३५) इति ब्राह्मणनिदर्शनादेव उत्तरार्द्धे विग्रहो न भवति । 'समस्यत्येवोत्तरे पदे' (ऐब्रा २, ३५) इति ब्राह्मणम् । अर्धर्चश इति वचनादर्धर्चे अवसानं, विग्रहो न भवति । अर्धर्चावसानमेव इति । ऋगन्ते प्रणवदर्शनाद् ऋगन्ते सन्तानो भवति । विग्राहमितिवचनात्[4] प्राप्तो विग्रहः ॥ २१ ॥

[उक्तवदृगावानशंसनविकल्पः प्रतिपदामाद्याया ऋचोऽनृगावानं शंसनं च]

ऋगावानं वैवमेव । एतेनाद्याः प्रतिपदामनृगावानम् ॥ २२ ॥

'अर्द्धर्चशः' (आश्रौ ५, ९, २०) इत्युक्तम् ऋगावानं वा भवति एवमेव यथा उक्तम् 'आज्याद्यां त्रिः शंसेद् विग्राहम्' (आश्रौ ५, ९, २०) इति । एवमेव शंसेद् ऋगावानं, नार्द्धर्चशः । व्याख्यातम् ऋगावानम् प्रवर्ग्ये[5] । ऋगावानग्रहणाद् अर्द्धर्चावसाननिवृत्तिः[6] । वेति विकल्पः । एवमेवेति वचनाद् विग्रहप्राप्तिः । एवमित्यतिदेशार्थे । एवावधारणार्थे । ऋगावानवचनादप्राप्तं विग्रहमवधारयति । एतेनाद्यायाः शंसनविधानेन मरुत्वतीयेषु[7] च प्रतिपदो यास्तासामाद्या ऋचो व्याख्याताः । अनृगावानम् ऋगावानं वर्जयित्वा । यदन्यत् तेन व्याख्यातम् अर्धर्चविधानेन । एतेनेति प्राप्ते अनृगावानमिति प्रतिषेधः ॥ २२ ॥

[ब्राह्मणोक्तक्रमानुसारेणानुपूर्व्येण वा ऋचः शंसनम्]

अनुब्राह्मणं वाऽऽनुपूर्व्यम् ॥ २३ ॥

---

१. निदर्शितम् ब[2] । २. विग्रह° मूको । ३-३. °र्धर्चपाद° मूको ।
४. विग्रहवच° ब[1,2]; विग्रह- इति वच° मै पू । ५. तु. आश्रौ ४, ६, २ ।
६. °सानमवृत्तिः ब[2]; °सानं वृत्तिः मै । ७. तु. आश्रौ ५, १४ ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

ब्राह्मणमनु वलृप्तम् आनुपूर्व्यम् अनुब्राह्मणम् । अस्य ऋचां वा आनुपूर्व्यम् । यद् ब्राह्मणे[1] आम्नातं, तद् वा भवति । 'प्र दीदिवांसम्' (ऋ ३, १३, ५), 'स नः' (ऋ ३,१३,४), 'उत नः' (ऋ ३, १३, ६), 'स यन्ता' (ऋ ३, १३, ३), 'ऋता वा' (ऋ ३,१३,२), 'तू नः' (ऋ ३, १३, ७) एतदृचामानुपूर्व्यम् । एतद् वा भवति, यथाम्नातं [2]वा । यदा षट्पदः तूष्णींशंसः तदाऽनुब्राह्मणम् आनुपूर्व्यम्, एवं हि ब्राह्मणम्† । यदा तु त्रिपदः, तदा यथासमाम्नातं[3] सूक्तं शंसेत् । एवं व्यवस्थितविभाषामुपदिशन्ति[3] । इष्टतर उत्तरः पक्षः । 'यो वा आज्य आत्मसंस्कृतिं वेद तत् सुविदितम्' (तु० ऐब्रा २, ३९) इति प्रशंसा ब्राह्मणे । अनुब्राह्मणं वेति सिद्धे आनुपूर्व्यवचनम् परिभाषा व्यवधानात् ॥ २३ ॥

[आहावं कृत्वोत्तमयर्चा परिधानम्]

आहूयोत्तमया परिदधाति ॥ २४ ॥

आहूय आहावं कृत्वा उत्तमयर्चा परिदध्यात् त्रिर्ब्रूयात् । अप्राप्त आहाव आरभ्यते । उत्तमया-ग्रहणं[4] सूक्ताधिकारात् शस्त्रस्यान्तप्राप्त्यर्थम्[5] । 'अग्निं तं मन्य इत्याज्यं तस्यैकाहिकमुपरिष्टात्' (आश्रौ १०,१०,२) इत्यत्र, 'अग्निं तं मन्य' (ऋ ५, ६, १ इत्याज्यमित्यस्य आज्यस्य मा भूत् परिधानम् । शस्त्रस्योत्तमया परिदधातीत्युक्ते ऐकाहिकस्य भवति ॥ २४ ॥

[एवमाहूय सर्वशस्त्रपरिधायासु परिधानम्]

सर्वशस्त्रपरिधानीयास्वेवम् ॥ २५ ॥

सर्वशस्त्रपरिधानीयासु सर्वशस्त्राणां परिधानीयासु एवम् आहूय परिदध्यात् । आज्य उक्तो विधिरन्यत्र न प्राप्नोति तस्मादतिदेशः । सर्वग्रहणं सवनादन्यत्रापि प्राप्त्यर्थम् । शस्त्रग्रहणादनुवचनादिषु न भवति । एवमित्यतिदेशाद् यावदतिदिष्टं सर्वशस्त्रेषु भवति । वक्ष्यमाणो विधिः सर्वशस्त्रेषु न भवति । अत्र प्राप्तः शस्त्राधिकारात् ॥ २५ ॥

[मन्त्रजपयाज्यानन्तरमुक्थपात्रभक्षणम्]

उक्थं वाचि घोषाय त्वेति शस्त्वा जपेदग्न इन्द्रश्च दाशुषो दुरोण इति याज्योक्थपात्रमग्रे भक्षयेत् ॥ २६ ॥

---

१. तु. ऐब्रा २, ४१ । २-२. नास्ति ब[2] । †. तु. ऐब्रा २; ४१ । ३. °दिशति ब[1] । ४. उत्तमग्र° मूको । ५. °स्यात्रप्रा° ब[1,2] मै ; शस्त्रस्या ... पू ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

'उक्थं वाचि' इति यथासमाम्नातं मन्त्रं शस्त्वा जपेत् । शस्त्वेति सम्बन्धार्थम् । सम्बन्धादन्यो जपः । तस्माद् 'यजा नो अध्वरमव' (?) दीक्षितस्य (?) होतुः याजमानो जपः ।

'अग्न इन्द्रश्च' (ऋ ३, २५, ४) इति एषा ऋग् याज्या भवति शस्त्रयाज्या । उक्थपात्रम् उक्थस्य पात्रं गृहीत्वाऽध्वर्युस्तत्पात्रं[1] द्विधा करोति । [2]तदुक्थपात्रं चमसादग्रे भक्षयेत्[2] ॥ २६ ॥

[चमसभक्षणम्]

ततश्चमसांश्चमसिनः सर्वशस्त्रयाज्यान्तेषु ॥ २७ ॥

ततः[3] उक्थपात्रभक्षादनन्तरमुपहूय सर्वे चमसिनः चमसान्[3] भक्षयेयुः, स्वं स्वं चमसं भक्षयेयुः । सर्वशस्त्राणां याज्यान्तेष्वेवं विधिः । समाख्याभक्ष एवायम् । सवनमुखे उक्तो विधिरन्यत्र न प्राप्नोति, तस्माच्छस्त्रान्तेषु पुनरारभ्यते ।

'वषट्कर्तैकपात्राणि' (आश्रौ ५, ९, २८) इति भक्षे प्राप्ते क्रमार्थं पुनरुच्यते—'उक्थपात्रमग्रे भक्षयेत्' (आश्रौ ५, ९, २६) इति । आज्ये उक्तो विधिरन्यत्र न प्राप्नोति, तस्मात् सर्वशस्त्रयाज्यान्तेष्वित्युच्यते । प्रातः-सवनाधिकारात् सर्वग्रहणम्[4] ॥ २७ ॥

[वषट्कर्तुरादित्यग्रहसावित्रग्रहयोर्भक्षणनिषेधः]

वषट्कर्तैकपात्राण्यादित्यग्रहसावित्रवर्जम् ॥ २८ ॥

'सर्वत्र होतुर्वषट्कारे चमसा हूयन्ते' (आश्रौ ५, ६, २२-२३) इत्यत्र सर्वत्रग्रहणाद्[5] गौतमपक्षे[6] सर्वत्र प्राप्त एव वषट्कर्ता एकपात्राणि सर्वत्र भक्षयति, आदित्यग्रहश्च सावित्रग्रहश्च, तौ वर्जयित्वा । एतौ ग्रहौ वषट्कर्ता न भक्षयति । तत्र[7] वैश्वदेवे आग्निमारुते च होतृभक्षः प्राप्तः, ऐष्टिके कर्मणि पुरोळाशादीनां[8] वाजिनादीनां च एवमिह प्राप्ते सर्वेषां प्रतिषेधार्थमिदमुच्यते ॥ २८ ॥

॥ इति पञ्चमे नवमं खण्डम् ॥

---

१. °र्युस्तत्र मूको । २-२. °पात्रं चमसादग्रे भक्षः एवं ब[1] मै पू ; °पात्र···भक्षादनंत° ब[2] । ३. नास्ति मूको । ४. सर्वत्रग्र° ब[1] पू । ५. सर्वग्र° ब[2] मै पू । ६. °पक्ष मूको । ७. तत मूको । ८. °शानां ब[2]; °शादीनां च एव मै ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

अथ पञ्चमेऽध्याये दशमः खण्डः

[शस्त्रात् पूर्वं स्तोत्रविधानम्]

स्तोत्रमग्रे शस्त्रात् ॥ १ ॥

येन समाम्नायेन[1] छन्दोगाः स्तुवन्ति तत् स्तोत्रम् । तत् स्तुतं[2] येनानुशस्यते तच्छस्त्रम् । तत् स्तोत्रमग्रे भवति अनन्तरं शस्त्रम् । अनुक्रमो विधीयते । [3]स्तुते स्तोत्रे[3] शस्त्रं भवतीत्यर्थः । यदिदं नारभ्येत 'उद्गातुर्हिङ्कारे प्रातःसवन आह्वयीरन्' (आश्वौ ५, १०, २) इत्युक्ते आहाव एव प्राप्नोति, न शस्त्रम् । तस्मात्तु सूत्रारम्भाद् आहावादि सर्वं शस्त्रं चोदितं भवति ॥ १ ॥

[प्रातःसवने प्रस्तोतुराह्वानकालविधानम्]

एषेति प्रोक्त उद्गातुर्हिङ्कारे प्रातःसवन आह्वयीरन् ॥ २ ॥

स्तोत्रस्यान्त्यायां स्तोत्रियायाम् एषेति प्रस्तोता आह । तेन प्रोक्ते अनन्तरम् उद्गातुर्यो हिङ्कारस्तस्मिन् हिङ्कारे प्राक्कृते[4] प्रातःसवने शस्त्रिणः आह्वयीरन् आहावं कुर्वीरन् । प्रातःसवने स्तोत्रियासु[5] हिङ्कारो विद्यते, तस्माद् विशेषणं क्रियते [6]एषेति प्रोक्त उद्गातुर्हिङ्कार[6] इति । होतुरपि हिङ्कारो विद्यते, तस्मादुद्गातुरिति विशेषणं क्रियते । अस्मादारम्भाद् होतुः हिङ्कारो लुप्यते[7] । आह्वयीरन्नित्युक्ते लोपः[8] प्राप्तः, हिङ्कारो न क्रियते, आह्वानं विधीयते । एवं हि श्रुतिः 'आहावश्च हिङ्कारश्च' (ऐब्रा ३,२३) इति । प्रातःसवनग्रहणे अक्रियमाणे सर्वो विधिरुत्तरयोरेव स्यात् । हिङ्कारे आह्वयीरन्निति वचनात् प्रागभिहिङ्कारः कृतो भवति । यदि हिङ्कृते अभिहिङ्कारं कुर्यात्, आहावश्च हिङ्कारश्चेति ब्राह्मणं विरुध्यते[9] ॥ २ ॥

[द्वितीयतृतीयसवनयोः प्रतिहारस्याह्वानकालविधानम्]

प्रतिहार उत्तरयोः सवनयोः ॥ ३ ॥

---

१. समाप्ता (प्त°ब[3]) येन (एन मैं) मूको । २. सुतं मूको । ३-३. स्तुत-स्तोत्रे ब[1] मैं पू । ४. प्राकृते मूको । ५. °यास्तु मूको । ६-६. प्रोक्ते यो हिङ्कार मूको । ७. न लुप्यते ब[1,2] पू । ८. लोपः प्रसु (?) मैं; लोपस्तु ब[1] पू । ९. विधिरुच्यते ब[1] मैं पू; विधिरुध्यते ब[2] ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

सवनयोर्माध्यन्दिने तृतीयसवने च एषेति प्रोक्ते अनन्तरं प्रतिहारः, तस्मिन् प्रतिहारे उक्ते आह्वयीरन्। 'एषेति प्रोक्ते' (आश्रौ ५ १०,२) इत्युक्ते सवनेष्वाहावो न क्रियते, न तत्र एषेति विद्यते ॥ ३ ॥

[सप्तानां पुरोरुचां प्रत्येकमुपरि एकैकतृचशंसनम्]

वायुरग्रे गा यज्ञप्रोरिति सप्तानां पुरोरुचां तस्यास्तस्या उपरिष्टात् तृचं तृचं शंसेत् ॥ ४ ॥

वायवा याहि दर्शत (ऋ १,२,१-१,३,१२) इति सप्त तृचाः ॥ ५ ॥

[प्रउगशस्त्रे द्वितीयाया ऋचस्त्रिः शंसनम्]

द्वितीयां प्रउगे त्रिः ॥ ६ ॥

[पुरोरुभ्य आह्वानकरणं विषमपदकरणं च]

पुरोरुभ्य आह्वयीत षष्ठ्यां त्रिरवस्येदर्धर्चे ॥ ७ ॥

[उत्तमाया ऋचः शंसनाशंसनविकल्पकथनम्]

उत्तमां न शंसेच्छंसन्त्येके तृच आह्वानमशंसने ॥ ८ ॥

[माधुच्छन्वसप्रउगसंज्ञाकरणम्]

माधुच्छन्दसं प्रउगमित्येतदाचक्षते ॥ ९ ॥

[होत्रविशेषाणां शस्त्रविधानम्]

उक्थं वाचि श्लोकाय त्वेति शस्त्वा जपेद् विश्वेभिः सोम्यं मधिवति याज्या प्रशास्ता ब्राह्मणाच्छंस्यच्छावाक इति शस्त्रिणो होत्रकाः ॥ १० ॥

[स्थलविशेषे शस्त्रविधानम्]

तेषां चतुराहावानि शस्त्राणि प्रातःसवने तृतीयसवने पर्यायेष्वतिरिक्तेषु च ॥ ११ ॥

'वायुरग्रेगा' (ऋखि ५, ६, १-७) इति एवमादि यथासमाम्नाताः सप्त ऋचः खैलिके[1] समाम्नाये[2] समाम्नाताः, तेषां सप्तानां समानः श्रूयते ॥ ११ ॥

---

१. लौकिके मै । २. नास्ति ब' पू ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

[माध्यन्दिने सवने शस्त्रविधानम्]

पञ्चाहावानि माध्यन्दिने ॥ १२ ॥

पञ्चाहावानि माध्यन्दिने होत्रकाणां शस्त्राणि[1] भवन्ति। 'ऊर्ध्वमनुरूपेभ्यः' (आश्रौ ७, २, १०) [2]अनेका ऋचः[2] अनेकानि छन्दांसि शस्यन्ते। यथा योऽन्यः सामप्रगाथाः कद्वन्त आरम्भणीयाश्चतुर्थ्यादिषु वैराजाश्च ऋचः अर्धर्चानि नाभाकाः शिल्पानि सामसूक्तानि अहरहःशस्यानि अहीनसूक्तानि संपाता[3] इति। निमित्तबहुत्वादनेक आहावाः प्राप्ताः, तस्मात् पञ्चाहावानीत्युच्यते ॥ १२ ॥

[आहावस्य स्थाननिर्देशः]

इदानीमाहावस्य स्थानानि वक्ष्यन्ते—

स्तोत्रियानुरूपेभ्यः प्रतिपदनुचरेभ्यः प्रगाथेभ्यो धाय्याभ्य इति पृथगाह्वानम् ॥ १३ ॥

स्तोत्रियेभ्योऽर्थे स्तोत्रियानुरूपेभ्यश्चार्थे। **स्तोत्रियानुरूपेभ्यः** 'आ नो मित्रावरुणा' (ऋ ३, ६२, १६), 'आ नो गन्तं रिशादसा' (ऋ ८, ८, १७)[4] प्रतिपद्भ्यश्च प्रतिपदनुचरेभ्यश्च 'आ त्वा रथम्' (ऋ ८, ६८, १), 'इदं वसो' (ऋ ८,२,१)[5]। प्रगाथेभ्य इन्द्रनिहवादिभ्यः[5]। धाय्याभ्यः 'अग्निर्नेता' (ऋ ३,२०,४) इत्येवमादिभ्यः[6] पृथगाह्वानं भवति। शस्त्रादिषु सिद्धे आहावे स्तोत्रियग्रहणम् अन्तःशस्त्रार्थम्[7]। आग्निमारुते समानादिना समानं छन्दःसंज्ञाऽन्यत्वादनुरूपेभ्य[8] आरम्भः। एवमनुचरेभ्य आरम्भात् प्रतिपद्भ्य आहावप्रतिषेधः[9] स्यात्। यथा 'द्वितीयां प्रउगे त्रिः' (आश्रौ ५,१०,६) इति वचनादाद्यायां[10] न इति। प्रगाथेभ्य इत्यनन्तरत्वात् सकृदाहावे प्राप्ते पृथगाहावप्राप्त्यर्थोऽयमारम्भः। देवताऽन्यत्वाद् ब्रह्मणस्पतेः[11] पृथगाहावः। नानाहःसु प्राधान्येन प्रयुज्यमानानां[12] सन्निपातेऽपि पृथगाहावः सामप्रगाथानां च। धाय्याभ्यः 'तेभ्यश्चान्यदनन्तरम्' (आश्रौ ५, १०, १५) इति सकृदाहावे प्राप्ते पृथगाहावो विधीयते। वैश्वदेवाग्निमारुतयोश्च धाय्यानामप्राप्त आहावो विधीयते। यद्यपि संज्ञा एका, देवताऽन्यत्वात्[13] छन्दोऽन्यत्वाच्च पृथगाहावः[14] ॥ १३ ॥

---

१. नास्ति मूको। २-२. अनेकाभ्यः मूको। ३. संहता ब[2] मै; सहता ब[1]; त्रुटितम् पू। ४. तु. आश्रौ ५,१०,२८। ५. तु. आश्रौ ५,१४,४-५। ६. तु. आश्रौ ५, १४, १७। ७. अंतर्श° मूको। ८. °रूपे आ° मूको। ९. आहावःप्र° मूको। १०. °दाज्यायां ब[1,2] पू; °दाच्यायां मै। ११. ब्रह्मणस्पते मूको। १२. प्रयुं (°यु ब[1]) जाना (°नाः मै) मूको। १३. देवान्य° ब[2]। १४. अपूब °१।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

[होतुः पृथगाह्वानविधानम्]

होतुरपि ॥ १४ ॥

होत्रकाणां स्तोत्रियादिभ्यः पृथगाह्वानमुक्तम्[1] । होतुश्च एतेभ्योऽर्थे पृथगाह्वानं भवति । अपि-शब्दः समुच्चयार्थः । होत्रकाणामुक्तो विधिर्होतुर्न प्राप्नोति, तस्माद्होतुरपीत्युच्यते ॥ १४ ॥

[स्तोत्रियादिभ्यो यदनन्तरं तस्मै आहावविधानम्]

तेभ्यश्चान्यदनन्तरम् ॥ १५ ॥

तेभ्यः स्तोत्रियादिभ्यः च यद् अनन्तरं, तस्मै आहावो भवति 'प्रातःसवने तृतीयसवने पर्यायेष्वतिरिक्तेषु च' (आश्रौ ५,१०,११)। अनुरूपादनन्तरं यत्, तत्र देवतान्यत्वात् संज्ञान्यत्वाच्च पृथगाह्वानम्[2] इत्यधिकारात् पृथगाहावे प्राप्ते चतुराहावानि—वचनादनन्तरे एक एवाहावो भवति । माध्यन्दिने तु प्रगाथेभ्योऽनन्तरं पृथगाहावे प्राप्ते पञ्चाहावानीति[3] वचनादेक एवाहावो भवति। होतुस्तु प्रगाथादनन्तरं तार्क्ष्यैः[4] आहावोऽनुरूपादनन्तरं जातवेदस्याधाय्याभ्योऽनन्तरं द्विपदासूक्तानि[5] एवयामरुच्च[6]। च-शब्दः[7] आहावाधिकारसमुच्चयार्थः[8] । अन्यद् इति वचनादेक आहावो भवति, योनिस्तोत्रिय एव 'पृष्ठचस्तोत्रिया योन्यः' (आश्रौ ७, ३, १३) इति वचनात् । आहावारम्भस्तु विकल्पप्राप्त्यर्थम् । यदि योनिस्तोत्रियो[9] न भवति, जातवेदस्याया आहावो न प्राप्नोति ॥ १५ ॥

[निविद्धानीयानां सूक्तानामादौ प्रथमेष्वाहावविधानम्]

आदौ निविद्धानीयानां सूक्तानामनेकं चेत् प्रथमेष्वाहावः ॥ १६ ॥

निविदः धीयन्ते येषु सूक्तेषु तानि निविद्धानीयानि इति, एषा संज्ञा। तेषां सूक्तानाम् आदावाहावो भवति। सर्वशस्त्रेषु प्रगाथादनन्तरं तार्क्ष्यस्य प्राप्तः तार्क्ष्यादनन्तरस्य न प्राप्नोति। समाना देवता समानं छन्दः। पादग्रहणात्[10] तार्क्ष्यमिति निविद्धानीयं सूक्तं न भवति । तस्मात् तस्य पृथगाहावः। एवं जातवेदस्याया द्विपदासूक्तानामिति[11]। छन्दोऽन्यत्वात् संज्ञान्यत्वाच्च एवयामरुतश्च[12]।

---

१. तु. आश्रौ ५,१०,११। २. पृथगाहावः मूको ; तु. आश्रौ ५,१०,१३। ३. तु. आश्रौ ५, १०, १२। ४. तार्क्ष्यैः ब[1] मै। ५. तु. आश्रौ ८, ९, ६। ६. °रुतं ब[2]; तु. आश्रौ ९,१०,१६। ७. शब्दः ब[1] पू। ८. अवाप्यधि° मूको। ९. स्तोत्रियो ब[1]; यानि स्तो° मै पू। १०. तु. आश्रौ ७,१,१३। ११. °दा (°द मै) सूक्तानीति मूको। १२. संज्ञा (°ज्ञ ब[1,2] मै) त्वाच्च मूको।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

आदाविति सूक्तमुखीयार्थे । सूक्तमुखीया सूक्तस्य आदिः, तस्यामादौ निमित्तभूतायामाहावो भवति । संज्ञान्यत्वाद् देवताऽन्यत्वात् छन्दोऽन्यत्वाच्च पृथगाहावः प्राप्तः बृहस्पतिसवे च गौतमस्तोमे च । अनेकं चेन्निविद्धानं भवति, प्रथमेषु सूक्तेष्वाहावो भवति सर्वशस्त्रेषु । चतुर्विंशे पृष्ठचस्य[1] चतुर्थादिषु च निविद्धानीयस्य सूक्तस्य स्थाने [2]यद्यन्यानि बहूनि[2] तेषु सर्वेषु निवित् प्राप्ता आहावश्च । वचनादन्त्येषु[3] निविद् भवति । वचनादेव प्रथमेष्वाहावो भवति । [4]बहुवचनात् सर्वशस्त्रेषु[4] प्राप्तिः । आहावग्रहणाद्[5] आहाव [6]एव प्रथमेषु[6], अन्त्येषु निविदिति ॥ १६ ॥

[आपोदेवते तृचे आहावविधानम्]

आपोदेवते च तृचे ॥ १७ ॥

आपो देवता अस्य तृचस्य, स[7] आपोदेवतस्तृचः, तस्मिन् आपोदेवते च तृचे आहावो भवति । आग्निमारुते 'आपो हि ष्ठा' (ऋ १०,९,१-३) इति 'तिस्रः' (आश्रौ ५,२०,६) इति, 'इदमादि प्रतिप्रतीकमाह्वानम्' (आश्रौ ५,२०,६) इति वचनात् प्राप्त आरम्भः । निविद्धानीयेन समानार्थत्वात् पृथगाहावो न स्यात् । यथा सूक्तमुखीययोः 'ता अग्निना पर्यगच्छत्' (ऐब्रा ३, ३६) 'ता अद्भिरभ्यषिञ्चत् तस्मादुपरिष्टाज्जातवेदस्यस्यापोहिष्ठीयं शंसति' (ऐब्रा ३,३६) इति । एतयोः समानार्थत्वमपेक्ष्य जातवेदस्यानाम्' (आश्रौ ७, १, १४) इति । बहुवचनं द्रष्टव्यम् । दूरोहणे सति द्रष्टव्यं लाघवार्थम् । एवमुच्यमाने होतुरेव स्याद् अधिकारान्मैत्रावरुणस्योक्तं[8] न प्राप्नोति । 'दूरोहणे च सर्वेषाम्' (?) इत्युच्यमाने नास्ति विशेषः । तत्र तत्र त्वाहूयेत्युच्यमानेऽपि[9] तावन्त्येवाक्षराणि । [चकारः समुच्चयार्थः । चत्वारो(चकारोऽत्रा ?)हावत्वं (°हावं ?) समुच्चिनोति] ॥ १७ ॥

[सर्वेषु सवनेषु होत्रकाणां स्तोत्रियानुरूपास्तृचाः शस्त्राणामादिषु प्रयोज्याः]

तेषां तृचाः स्तोत्रियानुरूपाः शस्त्रादिषु सर्वत्र ॥ १८ ॥

तेषां होत्रकाणां [10]स्तोत्रियानुरूपसंज्ञास्तृचाः शस्त्राणामादिषु वेदितव्याः[10] सर्वत्र सर्वेषु सवनेषु । लाघवार्थमिदमुच्यते । तस्य तस्य नाम गृहीत्वा[11]

---

१. पृष्ठस्य मूको । २-२. यद्यन्यद्बिबहूनि ब[1/2]; यद्यन्यद्धि बहूनि मै पू । ३. °नादन्ये मूको । ४-४. °चन सर्व° ब[1] मै पू; सर्व° ब[2] । ५. °णां ब[1]; °णा ब[2] मै पू । ६-६. एवमेषु ब[1]; त्रुटितम् पू । ७. नास्ति ब[2] । ८. °स्योक्ते मूको । ९. °स्याहूये° मूको । १०-१०. °यानुरूपः संज्ञा शस्त्राणादिषु वेदितव्यः मूको । ११. गृहीत्वा तृचौ स्तोत्रियानाम गृहीत्वा मूको ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

तृचौ स्तोत्रियानुरूपावित्युच्यमाने[1] गुरु स्यात्। होतुरधिकारात् तेषामित्युच्यते। पादग्रहणाद् ऋक् प्राप्ता, तस्मात् तृचा इत्याह। प्रातःसवनाधिकारात् सर्वत्रेत्युच्यते ॥ १८ ॥

[माध्यन्दिने सवने तृतीयेषु प्रतीकेषु प्रगाथविधानम्]

माध्यन्दिने प्रगाथास्तृतीयाः ॥ १९ ॥

माध्यन्दिने सवने तृतीयेषु प्रतीकेषु [2]प्रगाथा वेदितव्याः[2]। लाघवार्थमेव तत्र तत्र[3] प्रगाथग्रहणे गुरु स्यात्। पादग्रहणादृक् प्राप्ता, तस्मात् प्रगाथा इत्याह। सर्वत्राधिकारान्माध्यन्दिनग्रहणम् ॥ १९ ॥

[स्तोत्रियानुरूपेभ्यः प्रगाथेभ्योऽन्येषां यथावद् ग्रहणविधानम्]

यथाग्रहणमन्यत् ॥ २० ॥

स्तोत्रियानुरूपेभ्यः प्रगाथेभ्यश्च यदन्यत् तत् सर्वं यथागृहीतं भवति। पादग्रहणेषु [4]ऋक्, अधिके तृचम्, सूक्तं सूक्तादौ हीनपाद† एव‡ यथागृहीतं भवतिϕ। तेषामित्यधिकृत्य होत्रकाणां शस्त्रेषु स्तोत्रियानुरूपप्रगाथेषु[5] परिभाषानिवृत्तिः। शस्त्रे शेषेऽपि परिभाषानिवृत्तिः स्यादत इदमुच्यते यथाग्रहणमन्यदिति ॥ २० ॥

[शस्त्राणामन्ते याज्याविधानम्]

याज्यान्तानि शस्त्राणि ॥ २१ ॥

याज्याऽन्तो येषां तानि याज्यान्तानि। सहपठितानाम् आद्यन्तप्रज्ञापनार्थमिदमुच्यते[4]। याज्या इत्युक्ते शस्त्रान्तो भवति। अन्तरा च [6]शस्त्रादिषु इति[6] शस्त्रादौ स्तोत्रियानुरूपौ भवतः ॥ २१ ॥

[प्रातःसवने उक्थं वाचीत्येषां शस्त्वा जपकरणम्]

उक्थं वाचीत्येषां शस्त्वा जपः प्रातःसवने ॥ २२ ॥

---

१. °रूपावित्यनुच्य° ब[1] पू; °वित्यनूच्य° ब[2]। २-२. प्रगाथो वेदितव्याः मूको। ३. नास्ति मूको। ४-४. नास्ति ब[1]। †. हीने पादे मै पू। ‡. एवं मै। ϕ. तु. आश्रौ १, १, १७-१९। ५. द्युतप्र° ब[1]; धत्तप्र° ब[2]; द्यत्रप्र° मै; द्यतप्र° पू। ६-६. शास्त्रादिति ब[1]; शस्त्रादिरिति ब[2] मै पू; तु. आश्रौ ५, ९, २।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

सर्वत्रेत्यधिकारात् सर्वसवनेषु[1] प्राप्तेषु प्रातःसवनग्रहणम् । 'ऊर्ध्वं च [2]षोळशि नः' (आश्रौ ५,१०,२३) इत्यत्र[3] सर्वेषामिति वचनात् प्राप्तःसवनेऽपि सर्वेषां शस्त्वा जपे प्राप्ते पुनरुच्यते एषामिति । तेन[3] शस्त्राद् 'उक्थं वाचि' (तैसं ३,२,९,१) इति शस्त्वा जपो भवति ॥ २२ ॥

ऊर्ध्वं च षोळशिनः सर्वेषाम् ॥ २३ ॥

सर्वेषां होतुश्च होत्रकाणां च[4] प्रातःसवनवचनादित्यन्यत्र न प्राप्नोति, तस्मादिदमुच्यते । च-शब्दो जपाधिकारसमुच्चयार्थः । सर्वेषामिति [5]वचनाद् होतुश्च[5] भवति ॥ २३ ॥

[माध्यन्दिने सवने सषोळशिकेषूक्थ्येषु च पृथक्-शस्त्रस्य शस्त्वा जपविधानम्]

उक्थं वाचीन्द्रायेति माध्यन्दिन उक्थं वाचीन्द्राय देवेभ्य इत्युक्थ्येषु सषोळशिकेषु ॥ २४ ॥

'उक्थं वाचीन्द्राय' (तैसं ३, २, ९, १) इति शस्त्वा अयं जपो भवति माध्यन्दिने । एषां होत्रकाणाम् इत्यधिकारः । 'उक्थं वाचीन्द्राय देवेभ्यः' (ऐब्रा ३, १२) इति शस्त्वा अयं जपो भवति । उक्थेषु च । सह षोळशिना उक्थ्यानि [6]सषोळशिकानि । उक्थ्येषु सषोळशिकेषु[6] षोळशिनि चेत्यर्थः ॥ २४ ॥

[अनन्तरस्य शस्त्रस्य पूर्वेण विधिना शस्त्वा जपविधानम्]

अनन्तरस्य पूर्वेण ॥ २५ ॥

नित्यानां शस्त्राणां शस्त्वा जपः प्रागुक्तः । इदानीमनित्यानामपि वक्ष्यते[7] । यस्माच्छस्त्रादनन्तरं शस्त्रे[8] नैमित्तिकमुत्पद्यते । तस्माद्[9] अनन्तरस्य शस्त्रस्य पूर्वेण शस्त्वा जपो व्याख्यातः । यथा सोमातिरेकशस्त्रे अभिप्लुष्टौ चाश्विनानन्तरं बृहताऽष्टाचत्वारिंशेन स्तुवते[10], तस्यां[11] च उभाभ्यामतिरिक्तम् । एतेष्वपि नानादेवत्या ऋचः शस्यन्ते ॥ २५ ॥

---

१. सर्वासा(°स ब[1] पू)नेषु ब[1] मै पू । २-२. षोळशिरत्र मूको । ३. न ब[1/2] पू; नास्ति मै । ४. नास्ति मूको । ५-५. धातुश्च मै । ६-६. सहषो° मूको । ७. वक्ष्यन्ते मूको । ८. शस्त्रैः ब[1] मै पू । ९. तस्यानन्त° मूको । १०. तु. आश्रौ ६, ७, १ (?) । ११. तस्य ब[2] ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

[स्तोत्रियववनुरूपस्य छन्दःप्रमाणलिङ्गदैवतानां विधानम्]

स्तोत्रियेणानुरूपस्य छन्दःप्रमाणलिङ्गदैवतानि ॥ २६ ॥

स्तोत्रियेण यस्मिन् स्तुवीरन् स[1] स्तोत्रियस्तेन स्तोत्रियेण अनुरूपस्य छन्दःप्रमाणलिङ्गदैवतानि व्याख्यातानि । यच्छन्दाः[2] स्तोत्रियः तच्छन्दा[3] एवानुरूपो ग्राह्यः । स्तोत्रियस्य यत् प्रमाणं तत्प्रमाण एवानुरूपो ग्राह्यः । एका तिस्रः षट् नव द्वादशेति स्तोत्रियस्य प्रमाणानि । यत् स्तोत्रिये लिङ्गं तदेवानुरूपे ग्राह्यम् । लिङ्गशब्दो यथा—'आ नो मित्रावरुणा' (आश्रौ ७, २, २) । अत्र 'आ नः' इति लिङ्गम् । 'आ याहि सुषुमा हि ते' (आश्रौ ७,२,३) इत्यत्र आ याहि इति लिङ्गम् । यद्देवत्यः स्तोत्रियः तद्देवत्योऽनुरूपः । 'अनन्तरस्य पूर्वेण' (आश्रौ ५, १०, २५) इत्युक्तेषु सवनेषु सर्वकर्तॄणां भवति । तस्मादेवाधिकारादिदमप्युक्तं[4] सर्वेषु सवनेषु सर्वकर्तॄणां च भवति । प्रकृतौ विकृतौ चाम्नाताः[5] [6]स्तोत्रियानुरूपाः । अनाम्नातार्थं लक्षणं भवति प्रकृतौ गुणविचारेषु विकृतौ च[6] ॥ २६ ॥

[केषाञ्चिन्मतेन स्तोत्रियवदनुरूपस्य ऋषिविधानम्]

आर्षं चैके ॥ २७ ॥

स्तोत्रियेणानुरूपस्य आर्षं च गुणम् एके[7] आचार्या मन्यन्ते यानि च उक्तानि । स्तोत्रियेण समानार्षम्[8] अनुरूपं मन्यन्ते । 'आ याहि सुषुमा हि ते' (ऋ ८, १७, १-६), 'इति षट्स्तोत्रियानुरूपौ' (आश्रौ ५, १०, २८) इति । चशब्दः समुच्चयार्थः । [9]पूर्वोक्तान्यार्षं च समानम्[9] ।

[10]एके इति वचनादन्येषां न[10] भवति । 'आ नो मित्रावरुणा' (ऋ ३,६२, १६-१८) 'आ नो गन्तम्' (ऋ ५,७१,१-३) इति । व्यवस्थितविभाषा इयम् । उपपद्यमाने समानार्षः[11] कार्यः । [12]अनुपपद्यमाने न कार्यः । उक्तान्युदाहरणानि । यत्र च समानलिङ्गं न विद्यते तत्र समानार्षः† कार्यः[12] । तद् दर्शितम्—'इन्द्राग्नी आगतं सुतम् इन्द्राग्नी अपसस्पशि' (ऋ ३,१२,१;७) इति ॥ २७ ॥

---

१. नास्ति मूको । २. यच्छन्दः मूको । ३. तच्छन्दस (°न्द ब[2] मै पू) मूको । ४. °वाधिकादिद° मूको । ५. च वाम्नाताः मूको । ६-६. नास्ति मै । ७. चैकेन ब[1,2] पू । ८. समानार्थम् मूको । ९-९. पूर्वोक्तार्षं च (°क्तावचन मै) समानम् ब[1,2] मै; त्रुटितम् पू । १०-१०. नास्ति मूको । ११. समानार्थः मै । १२-१२. नास्ति ब[1] मै पू । †. °मानार्थः ब[2] ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

[तेषां शस्त्रविधानम्]

आ नो मित्रावरुणाऽऽनो गन्तं रिशादसा प्र वो मित्राय प्र मित्रयोर्वरुणयोरिति नवाऽऽयातं मित्रावरुणेति याज्या । आ याहि सुषुमा हि त इति षट् स्तोत्रियानुरूपावनन्तराः सप्तेन्द्र त्वा वृषभमुद्वेदभीति तिस्र इन्द्र क्रतुविदं सुतमिति याज्या । इन्द्राग्नी आगतं सुतमिन्द्राग्नी अपसस्परि । तोशा वृत्रहणा हुव इति तिस्र इहेन्द्राग्नी उपेयं वामस्य मन्मन इति नवेन्द्राग्नी आगतं सुतमिति याज्या ॥ २८ ॥

उक्तं शस्त्रिणो[1] होत्रका इति । इदानीं तेषां शस्त्राणि वक्ष्यन्ते । 'आ नो मित्रावरुणा' (ऋ ३,६२,१६-१८), 'आ नो गन्तं रिशादसा' (ऋ ५,७१,१-३) इति स्तोत्रियानुरूपौ तृचौ । 'प्र वो मित्राय' (ऋ ५, ६८, १), 'प्र मित्रयोर्वरुणयोः' (ऋ ७, ६६, १-९) इति नव ऋचः । 'आ यातं मित्रावरुणा' (ऋ ७,६६,१९) इति याज्या अर्थाद्, 'याज्यान्तानि शस्त्राणि' (आश्रौ ५, १०, २१) इत्युक्तम् ।

'आ याहि सुषुमा हि ते' (ऋ ८, १७, १-६) इति एताः षड् ऋचः स्तोत्रियश्च अनुरूपश्च स्तोत्रियानुरूपौ भवतः । 'तृचाः स्तोत्रियानुरूपाः' (आश्रौ ५, १०,१८) इति वचनाद् आद्यास्तिस्रः स्तोत्रियोऽनन्तरास्तिस्रोऽनुरूपः । 'शस्त्रादिषु' (आश्रौ ५, १०, १८) इति वचनादेकस्मिन् प्रतीके स एव तृचः स्तोत्रियः स एवानुरूप इति प्राप्ते षळित्याह । तस्मादिह दर्शनादन्यत्रापि यत्र एकस्मिन् प्रतीके स्तोत्रियानुरूपावित्याह तत्र षळेव भवन्ति । यथा—" 'असावि सोम इन्द्र ते' (ऋ १, ८४, १-६) इति स्तोत्रियानुरूपौ" (आश्रौ ६, २, २) इति । अनन्तराः सप्त षड्भ्योऽनन्तराः सप्त ऋचः 'अयमु त्वा विचर्षण' (ऋ ८, १७, ७-१३) इत्येताः । सप्तग्रहणाद् 'वास्तोष्पते' (ऋ ८,१७,१४-१५) इत्येतस्य प्रगाथस्योद्धारः । 'इन्द्र त्वा वृषभम्' (ऋ ३, ४०, १) इति सूक्तम् । 'उद्वेदभि' (ऋ ८,९३,१-३) इति एतास्तिस्र ऋचः । 'इन्द्र क्रतुविदं सुतम्' (ऋ ३,४०,२) इति याज्या[2], याज्यान्तानि शस्त्राणि ।

'इन्द्राग्नी आ गतं सुतम्' (ऋ ३, १२, १) इति स्तोत्रियः । 'इन्द्राग्नी अपसस्परि' (ऋ ३,१२,७) इत्यनुरूपः । आगतमिति लिङ्गाभावात् समानार्थः[3] कल्पितः अह्नो रूपेण सम्पन्नः । एति च प्रेति च अह्नो रूपम्[4] । 'तोशा वृत्रहणा हुवे' (ऋ ३, १२, ४-६) इति एताः तिस्रः ऋचः । 'इहेन्द्राग्नी उप' (ऋ १,२१,१)

---

१. शस्त्रिणा (? णां) ब[1] मै पू । २. नास्ति मूको । ३. समानार्थः मूको । ४. तु. ऐब्रा ५, ४ ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

इत्येतत् सूक्तम्। इहेति विशेषणं शाखान्तरार्थं द्रष्टव्यम्। 'इयं वामस्य मन्मनः' (ऋ ७,९४,१-९) इति एता नव ऋचः। 'इन्द्राग्नी आ गतं सुतम्' (ऋ ३,१२,१) इति याज्या[1], याज्यान्तानि शस्त्राणि।

एवं रथन्तरपृष्ठे। बृहत्पृष्ठेऽपि एवमेव। स्तोत्रियास्तु छन्दोगवशादन्ये भवन्ति। ये षळहस्तोत्रियेषु द्वितीयाः आम्नातास् त[2] एवानुरूपाः। विलक्षणा अपि सन्तस्त एव भवन्ति। स्तोत्रियादन्यत् प्रकृतं यथाम्नातं भवति। प्रकृत्यर्थं हि लक्षणं[3] भवति। प्रकृतावपि प्राकृता द्रष्टव्याः। तदन्यत्र लाक्षणिको भवति। यथा पशुकामस्य 'त्वमङ्ग प्र शंसिषः' (ऋ १, ८४, १९) इति ब्रह्म भवति ॥ २८ ॥

॥ इति पञ्चमे दशमं खण्डम् ॥

---

१. नास्ति ब[1]। २. नास्ति मूको। ३. विलक्षणं ब[1] मं पू।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

अथ पञ्चमेऽध्याये एकादशः खण्डः

[अध्वर्युणा प्रेषितस्य प्रशास्तुरतिसर्जनमन्येषां चोत्तरां वेदिश्रोणीमभि सर्पणम्]

संस्थितेषु सवनेषु षोळशिनि चातिरात्रे प्रशास्तः प्र सुहीत्युक्तः सर्पतेति प्रशास्ताऽतिसृजेद्धोता दक्षिणेनौदुम्बरीमञ्जसेतरेऽपरया द्वारोत्तरां वेदिश्रोणीमभि निःसर्पन्ति ॥ १ ॥

सवनसंस्थासु यद् विधानं तदुच्यते। त्रिष्वपि सवनेषु संस्थितेषु **अतिरात्रे** क्रतौ यः षोडशी, तस्मिंश्च संस्थिते प्रशास्तः प्र सुहि इति **अध्वर्युणा** उक्तः सर्पतेति प्रशास्ता अतिसृजेद् अनुज्ञां कुर्यात्। **अतिरात्रग्रहणाद् वाजपेये षोळशिनि संस्थिते अयं विधिर्न क्रियते।** 'कर्मचोदनायाम्' (आश्रौ १, १, १४) इति होतुः प्राप्ते प्रशास्तेत्युच्यते। 'एषाऽऽवृत्सर्पतेतिवचने'[1] (आश्रौ ५, ११, ५) इत्येतेनैव प्राप्ते संस्थितेषु सवनेषु षोळशिनि चातिरात्रे[2] [3]इति न[†] वक्तव्यम्। प्राप्ते आरम्भादध्वर्युप्रेषसमनन्तरं भवति, अप्रेषेऽप्येवम्। तस्मात् संस्थितेषु सवनेषु षोळशिनि चातिरात्रे[3] प्रशास्तः प्र सुहीत्यनुक्ते सर्पतेति प्रशास्त्राऽतिसृष्टाः सर्पेयुरेव। नित्यायाः कृतायाः अनुज्ञायाः[4] स्वकालविहितायाः प्रसवकालव्यपदेशार्थो[5] भवति, यथा संप्रेषः। दृश्यते च छन्दोगानां पर्यायेषु अप्रसूता अपि सर्पन्ति।

प्रशास्त्रा अतिसृष्टा येन विधिना सर्पन्ति, तदुच्यते—होता दक्षिणेन औदुम्बरीं गच्छति। अञ्जसा[6] ऋजुना मार्गेण इतरे मैत्रावरुणादयो गच्छन्ति। यो यस्य ऋजुः पन्था न स तेन गच्छति[7] अपरया द्वारा निःसृप्य उत्तरां वेदिश्रोणीम् अभिमुखाः सर्पन्ति गच्छन्ति ॥ १ ॥

[उत्तराया वेदिश्रोणेर्मृगतीर्थसंज्ञाकरणम्]

मृगतीर्थमित्येतदाचक्षते ॥ २ ॥

उत्तरां वेदिश्रोणीमभि यो देशः, एतत् स्थानं मृगतीर्थमित्याचक्षते ब्रुवते ब्रह्मवादिनः। 'एतेन निष्क्रम्य यथार्थम्' (आश्रौ ५, ११, ३) इत्युक्ते एतत् तीर्थं प्रत्येतव्यम् ॥ २ ॥

---

१. वचनात् मूको। २. °रात्रः ब[1] मै पू। ३-३. नास्ति ब[1] मै पू। †. नास्ति ब[2]। ४. नास्ति मूको। ५. °शार्थे ब[1] मै पू। ६. अञ्जुलिना ब[1] मै पू; अञ्जसीरे ब[2]; अञ्जलिना मै। ७. व्रजति ब[2] पू।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

[मूत्रोत्सर्गादिप्रयोजने एतत्तीर्थस्य प्रयोज्यत्वम्]

एतेन निष्क्रम्य यथार्थम् । न त्वेवान्यन्मूत्रेभ्यः ॥ ३ ॥

एतेन तीर्थेन निष्क्रम्य एतेन मार्गेण गत्वा वेदिश्रोणीसमीपे[1] परिसृते देशे यथार्थं मूत्रपुरीषादि [2]यद्युपपद्यते तत कुर्यात्[2] । एतेन निष्क्रम्य मूत्रादीनि[3] कुर्यादिति लघुना सिद्धे सूत्रद्वयारम्भोऽनर्थकः । इदं प्रयोजनम् । यथार्थवचनात् संस्थितेऽपि सवने एतेन निष्क्रम्य मूत्रादि कुर्यात् । संस्थितेऽपि अविद्यमाने अर्थे न कुर्यात् ।

न त्वेवान्यन्मूत्रेभ्यः । यथार्थवचनादेतेन निष्क्रम्य[3] स्नानादयो ह्यर्था अपि[4] प्राप्ताः[5] । तस्मादिदमुच्यते[6] । एतेन तीर्थेन निष्क्रम्य मूत्रादीन्येव कुर्यात्, न त्वेवान्यत् कुर्यादिति । तु-शब्दः प्राप्तव्यावृत्त्यर्थः । एव-शब्दः अन्यप्रतिषेधार्थः[7] । एतेन निष्क्रम्य कुर्यादिति । तस्मादारम्भादन्यानि कार्याणि[8] आचमनादीनि अन्यस्मिन् प्रदेशे गत्वा कुर्यादिति सिद्धम् । [9]मूत्रेभ्य इति बहुवचनान्मूत्रपुरीषाणि कुर्यादिति सिद्धम्[9] ॥ ३ ॥

[मूत्रोत्सर्गादिप्रयोजनेन मृगतीर्थेन निष्क्रान्तानामृत्विजां प्रतिप्रसर्पणविधिकथनम्]

एतेन निष्क्रम्य कृत्वोदकार्थं वेद्यां समस्तानुपस्थायापरया द्वारा नित्ययाऽऽवृता सदोद्वार्ये चाभिमृश्य तूष्णीं प्रतिप्रसर्पन्ति ॥ ४ ॥

एतेन ऋत्विजः सर्वे मृगतीर्थेन निष्क्रम्य उदकार्थं मूत्रपुरीषाणि कृत्वा आचमनादीनि अन्यत्र कृत्वा वेद्यां स्थित्वा वेद्यां समस्तान् धिष्ण्यान् उपस्थाय आदित्यादीनां सकृदेवोपस्थानं कृत्वा, अपरया द्वारा न पूर्वया, नित्ययाऽऽवृता नित्येन[10] विधिना सदोद्वार्ये चाभिमृश्य तूष्णीम् अमन्त्रं प्रतिप्रसर्पन्ति स्वमासनं प्रतिप्रसर्पन्ति[11] । 'उत्तरां वेदिश्रोणीमभि निःसर्पन्ति' (आश्रौ ५,११,१) इत्येतस्य कृत्वान्तस्य[12] परिभाषया[13] व्यवहितत्वात् पुनः कृत्वान्तादिकर्माणि विधीयन्ते । एतेन निष्क्रम्येति यदि न विधीयते 'एषाऽऽवृत्' (आश्रौ ५,११,५) इत्युक्ते सर्वाणि न प्राप्नुवन्ति । वेदेर्बहिरुदकार्थस्य वृत्तत्वाद् अन्तर्वेद्युपस्थानप्राप्त्यर्थं वेद्यामित्युच्यते । उपस्थायेत्युक्ते [14]पूर्ववद् व्यस्तसमस्तानामुपस्थाने प्राप्ते समस्तानित्याह । उपस्थायेत्युक्ते[14] पूर्ववत् पूर्वया द्वारा प्रपदने प्राप्ते अपरया

---

१. °श्रोणिस° ब[1]; त्रुटितम् पू । २-२. नास्ति मै । ३. निष्क्रम्य स्नानादेतेन निष्क्रम्य मूको । ४. नास्ति मूको । ५. प्राप्तात् मूको । ६. इदमु° मूको । ७. अन्यत्प्रतिषेधार्थम् मूको । ८. कार्याणीति मूको । ९-९. नास्ति ब[1] मै पू । १०. येन मूको । ११. प्रतिसर्पति ब[2] पू । १२. नास्ति ब[1] । १३. परिभाषाया ब[2] । १४-१४. नास्ति ब[1] मै पू ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

द्वारा इत्याह। उत्तरत्र तूष्णीं-ग्रहणात् सदसः द्वार्ययोश्च अभिमर्शनं तूष्णीमेव प्राप्तं, तस्मान्नित्ययाऽऽवृता इत्याह । सदोद्वार्ये चाभिमृश्येत्युपसन्तानाद् [1]"द्वार्ये संमृश्यैवमपरानुपतिष्ठन्ते"[1] (आश्रौ ५, ३, १९) इत्युपस्थानप्रतिषेधः। नित्ययाऽऽवृतेति वचनात् समन्त्रे प्रतिसर्पणे प्राप्ते तूष्णीमित्याह ॥ ४ ॥

[एतद्विधानस्य प्रशास्त्रा सर्पतेति वचनान्तमेव नियमितत्वम्]

एषाऽऽवृत् सर्पतेतिवचनें ॥ ५ ॥

एतद्विधानं 'होता दक्षिणेनौदुम्बरीम्' (आश्रौ ५,१ ,१) इत्येवमादि यद् [2]विधीयते तत्[2] सर्पतेति प्रशास्त्रा उक्ते प्रत्येतव्यम् 'संस्थितेषु सवनेषु षोळशिनि चातिरात्रे प्रशास्तः प्र सुहीत्युक्तः सर्पतेति प्रशास्ताऽतिसृजेत्' (आश्रौ ५, ११. १) इत्येतावदेव सवनान्तेषु प्राप्नोति[3], [4]परं सर्वं प्रातःसवने एव स्यादधिकारात्, सवनान्तेषु न† प्राप्नोति[4]। तस्मादिदमुच्यते—एषाऽऽवृत् सर्पतेतिवचने इति ॥ ५ ॥

[गृहपतेः पूर्वया द्वारा सर्पणम्]

पूर्वयैव गृहपतिः ॥ ६ ॥

संस्थितेषु सवनेषु सर्वे अपरया द्वारा निःसर्पन्ति प्रसर्पन्ति च, गृहपतिस्तु पूर्वया द्वारा एव निःसर्पति प्रसर्पति च। कस्मात्। येषामुदकार्थो विद्यते, ते अपरया द्वारा निःसर्पन्ति। गृहपतेस्तु उदकार्थो न विद्यते प्रतिषेधाद्—यजमानो मूत्रपुरीषे न कुर्यात्, आ ध्रुवस्यावनयाद्[5] इति। अस्मात् सूत्रारम्भादितरेषामपि सवनान्ते एव उदकार्थः प्रदर्शितो भवति ॥ ६ ॥

॥ इति पञ्चमे एकादशं खण्डम् ॥

१-१. द्वार्येऽभिमृ° ब[1,2]। २-२. विधीयत् ब[1]; विधायत् ब[2]; विधीयते मै; वुटितम् पू। ३. न प्राप्नोति ब[1] पू। ४-४. नास्ति ब[1] मै पू। †. नास्ति ब[2]। ५. तु. आपश्रौ १३, १५, १५।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

अथ पञ्चमेऽध्याये द्वादशः खण्डः

[ग्रावस्तुतः प्रपदनम्]

एतस्मिन् काले ग्रावस्तुत् प्रपद्यते ॥ १ ॥

प्रसृप्तेषु कर्तृषु[1] च एतस्मिन् काले ग्रावस्तुत् नाम ऋत्विक् प्रपद्यते। अस्मादारम्भात् प्रागुपस्थानकाले न[1] प्रपद्यते। दीक्षितस्तु याजमानाय प्रपद्यते। अनुपस्थाय सदोद्वार्यं च मन्त्रेणाभिमृश्य प्रपद्योपविश्य जपति भक्षयति च भक्षान् ॥ १ ॥

[उक्तवद् ग्रावस्तुत उपस्थानम्]

तस्योक्तमुपस्थानम् ॥ २ ॥

तस्य ग्रावस्तुत उक्तं[2] व्याख्यातम् उपस्थानम्, तदिह तस्य भवति। प्रकरणान्तरे तु अप्राप्तमारभ्यते। उक्तमुपस्थानमित्युक्ते सर्वेषां पुमः प्राप्नोति, तस्येतिवचनं तस्यैव भवति ॥ २ ॥

[हविर्धानप्रपदनादिराजानमभिमुखमवस्थानविधिकथनम्]

पूर्वया द्वारा हविर्धाने प्रपद्य दक्षिणस्य तु[3] हविर्धानस्य प्रागुदगुत्तरस्याक्षशिरसस्तृणं निरस्य राजानमभिमुखोऽवतिष्ठते ॥ ३ ॥

पूर्वया द्वारा नापरया। हविर्धाने प्रपद्य। दक्षिणस्य तु हविर्धानस्य, नोत्तरस्य। उत्तरस्याक्षशिरसस्तद् दक्षिणाक्षशिरसः। अक्षशिरः अक्षान्तो भवति। तस्य प्रागुदीच्यां दिशि देशे तृणं निरस्य इति[4] निरसनं कृत्वा राजानमभिमुखः अवतिष्ठते, नोपविशति। ग्रावस्तुतः सदसि अपरया द्वारा प्रपदनं दृष्टं, तस्मादिहापि अपरया एव प्राप्ते पूर्वया इत्याह। तत्र रराटीमभिमृश्य द्वार्यं चाभिमृश्य उपस्थायैव सदः प्रपद्यत[5] इति प्राप्ते अत्र हविर्धान इति। उभयोरधिकाराद् दक्षिणम्। तु-शब्दोऽधिकृतव्यावृत्त्यर्थः[6]। उपवेशनाभावादप्राप्तं[7]

---

१. नास्ति b^2। २. तु. आश्रौ देवव्रातभा० ५, ३, २५। ३. नास्ति BI आन। ४. निरस्यति b^1; निरस्यति b^2 मै पू। ५. तु. आश्रौ ४,१३,४-५। ६. °तव्यानत्यर्थः b^2। ७. °दप्राप्ते मूको।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

निरसनं विधीयते । प्राङ्मुखत्वे प्राप्ते राजानमभिमुख इत्युच्यते। निरस्येति-वचनादुपवेशने प्राप्ते अवतिष्ठते इत्युच्यते ॥ ३ ॥

[अत्रोपवेशनमन्त्राभावकथनम्]

नात्रोपवेशनः ॥ ४ ॥

अत्र अवस्थाने उपवेशनमन्त्रो न विद्यते । अस्मादारम्भान्निरसनोपवेशनयोः साहचर्यं दर्शयति । तस्मात् 'अनिरस्य तृणम्' (आश्रौ ४, ७, ४; ५, १, १९) इति 'निरसने निषिद्धे' उपवेशनमन्त्रो न विद्यते । अत्रेतिवचनादन्यत्रावस्थाने[२] [३]उपवेशनमन्त्रो विद्यते[३] । सदसि उभयो. स्थानासनयोरधिकारः क्रियत उत्तर-सूत्रार्थम् । 'यो अद्य सौम्यः' (आश्रौ ५, ३, २२) इत्ययं जपः उभयत्रापि भवति । धिष्ण्याभावान्न प्राप्तोऽस्मादारम्भात् सदस्यादीनामपि भवति ॥ ४ ॥

[अवस्थानमन्त्रकथनम्]

यो अद्य सौम्य इति तु ॥ ५ ॥

यो अद्य सौम्य इति एतं मन्त्रं जपति । आसनाभावाद् अप्राप्त आरभ्यते । आसनं[४] च सदसि धिष्ण्याभावादप्राप्तं[५] विधीयते । तु-शब्दः प्रतिषेधाधिकार-व्यावृत्त्यर्थः[६] ॥ ५ ॥

[ग्रावस्तोत्रेऽध्वर्युकर्तृकमुष्णीषप्रदानं तेन तद्ग्रहणं ग्राव्णोऽभिष्टवनं च]

अथास्मा अध्वर्युरुष्णीषं प्रयच्छति ॥ तदञ्जलिना प्रतिगृह्य त्रिः प्रदक्षिणं शिरः समुखं वेष्टयित्वा यदा सोमांशूनभिषवाय व्यपोहन्त्यथ ग्राव्णोऽभिष्टुयात् ॥ ६-७ ॥

अथ अवस्थानादनन्तरम् अस्मै ग्रावस्तोत्रे अध्वर्युरुष्णीषं प्रयच्छति । तद् उष्णीषम् अञ्जलिना ग्रावस्तोता प्रतिगृह्णाति प्रतिगृह्य प्रदक्षिणम् अपसव्यं शिरः सह मुखेन समुखं वेष्टयित्वा पर्यस्य[७] यदा यस्मिन् काले सोमांशून् सोमकाण्डान् अभिषवार्थे व्यपोहन्ति विगृह्य खरे अपोहन्ति स्थापयन्ति, अथ तस्मिन् काले अनभिहिङ्कृत्य ग्राव्णोऽभिष्टुयात् । तदभिष्टवनमित्युच्यते । [८]अस्मै इत्यनुच्यमाने[८] होतुः प्रतिग्रहः प्राप्नोति 'कर्मचोदनायाम्' (आश्रौ १,१,१४) इति ।

१-१. निरसनेतिषिद्धे ब[१]; वृटितम् पू । २. °नादादत्रावस्थाने ब[१,२] पू; °नादत्रा उत्थान मै । ३-३. न विद्यते मूको । ४. आसने मूको । ५. °दप्राप्तो (°प्ता ब[२]; °प्ते मै) मूको । ६. प्रतिषिद्धाधि° ब[२] । ७. पर्यवसित्वा ब[१] मै; पर्यसित्वा ब[२]; वृटितम् पू । ८-८. तस्मै इत्युच्य° ब[१,२] मै; वृटितम् पू ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

अध्वर्युग्रहणे चाक्रियमाणे होता प्रयच्छतीति स्यात् । 'तस्मादुष्णीषमेव पर्यस्य ग्राव्णोऽभिष्टुवन्ति' (ऐब्रा ६, १) इति श्रुतिः । तस्माद् वेष्टनं विधीयते । अथ ग्राव्णोऽभिष्टुयादिति वचनाद्[1] [2]असंप्रेषितः प्रतिपद्यते । 'तस्मादेष एतामसंप्रेषितः प्रतिपद्यते' (ऐब्रा ६, २) श्रुतिः[2] ॥ ६-७ ॥

[इतः परमभिष्टवनादौ मध्यमस्वरविधानम्]

मध्यमस्वरेणेदं सवनम् ॥ ८ ॥

मध्यमस्वरेण मध्यमया वाचा इदं सवनम् अभिष्टवनादि यद् वक्ष्यते। कण्ठे मध्यमः स्वरः । अनियमे प्राप्ते मध्यमो नियम्यते । इदं सवनमित्यनुच्यमाने अभिष्टवनस्यैव स्वरः स्यात् ॥ ८ ॥

[अभिष्टवनमन्त्रकथनम्]

अभि त्वा देव सवितर्युञ्जते मन उत युञ्जते धिय आ तू न इन्द्र क्षुमन्तं मा चिदन्यद् विशंसत प्रैते वदन्त्वित्यर्बुदम् ॥ ९ ॥

'अभि त्वा देव सवितः' (ऋ १, २४, ३), 'युञ्जते मन उत युञ्जते धियः' (ऋ ५,८१,१), 'आ तू न इन्द्र क्षुमन्तम्' (ऋ ८,८१,१), 'मा चिदन्यद् विशंसत' (ऋ ८,१,१) इत्येकपातिन्यश्चतस्रः । 'प्रैते वदन्तु' (ऋ १०, ९४, १) इति एतत् सूक्तम्, अर्बुदो नाम सर्पर्षिः, तेन दृष्टम् अर्बुदम् । ऋषिग्रहणं विशेषणार्थम् । नूनं शाखान्तरे[3] अन्यदपि समाम्नातं प्रतीकमस्ति द्वितीयम् "'प्र द्यावा' (ऋ १, १५९, १) इति दैर्घतमसम्" (आश्रौ ५, १८, ५) इति ॥ ९ ॥

[उत्तमाया ऋचः पूर्वमावपनविधानम्]

प्रागुत्तमाया आ व ऋञ्जसे प्र वो ग्रावाण इति ॥ १० ॥

अर्बुदस्य सूक्तस्य उत्तमाया ऋचः[4] [?प्राग्] 'आ व ऋञ्जसे' (ऋ १०, ७६, १), 'प्र वो ग्रावाणः' (ऋ १०, १७५, १) इति एते सूक्ते आवपेत् ॥ १० ॥

[पावमानीनामावपनमुष्णीषग्रहणविधिकथनं च]

सूक्तयोरन्तरोपरिष्टात् पुरस्ताद् वा पावमानीरोप्य यथार्थमा वा ग्रहग्रहणाच्छिष्टया परिधाय वेद्यं यजमानस्योष्णीषम् ॥ ११ ॥

---

१. वचनादि ब[1] । २-२. नास्ति ब[1] । ३. स्थानान्तरे इति सम्यक् ।
४. तु. ऋ १०, ९४, १४ ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

एतयोः सूक्तयोरन्तरा मध्ये अथ चोभयोः उपरिष्टाद् अथवोभयोः पुरस्ताद् वा त्रीणि स्थानानि । अन्यतमस्मिन् स्थाने [1]पावमानीसूक्तानि ओप्यन्ते†[1] । यथार्थं यावदर्थं यावदभिषवम् इत्यर्थः । [2]तयोरिति लघुना सिद्धे[2] सूक्तग्रहणात् पावमान्योऽपि सूक्तान्येव भवन्ति । पवमानदेवताका ऋचः पावमान्यः । [3]पावमान्य ऋचस्तस्मात्[3] 'तस्य ह ··· ··· अन्याभिर्ऋग्भिर्मन्त्रमा-पृञ्चन्ति' (तु० ऐआ ६ १) इति श्रुतिः । 'यदा सोमांशून् अभिषवाय व्यपोहन्ति' (आश्रौ ५, १२, ७) इत्यधिकृतम्, तस्माद् यथार्थं यावदभिषवमिति भवति । पावमान्य इति श्रौतो संज्ञा मण्डलस्य रहस्यब्राह्मणे[4] । तस्मात् कृत्स्नं मण्डलं चोदितम् । [5]यथार्थग्रहणेऽवमस्यावापो भवति । ग्रहग्रहणे[5] अहर्गणे[6] मण्डल-चोदनायाः[7] सार्थकत्वाय अहरहःक्रमेण कृत्स्नस्यावापो भवति[8] । ओप्येति साकाङ्क्षं वाक्यं सूक्ते सूक्तं परिधानीयां वा काङ्क्षति । आ वा ग्रहग्रहणाद् यावदभिषवस्तावत्पावमानीरोप्यन्ते इत्युक्तम्[9] । अथ आ वा ग्रहग्रहणाद् आ ग्रहग्रहणपरिसमाप्तेः[10] पावमानीरोप्यन्त इति विकल्पः । अस्मिन् पक्षे [11]सूक्तयो-रुपरिष्टादावापो भवति । तस्मादावापादनन्तरमुक्तं शिष्टया परिधाय इति । यावदभिषवमित्येतस्मिन् पक्षे[11] सूक्तयोरन्तरा पुरस्ताद् वा पावमानीरोप्यन्ते, तस्मात् पावमानीरोप्येति साकाङ्क्षं वाक्यं सूक्तं काङ्क्षति । पावमानीरोप्य सूक्ते ब्रूयात्, सूक्तावशिष्टया[12] परिधाय । सूक्तयोः सूक्तस्य[13] वा[14] पावमानीनां वा अनन्तरम् अर्बुदस्य या शिष्टा ऋक् तया शिष्टया ऋचा[15] परिधाय परिधानं कृत्वा वेद्यं [16]यजमानस्योष्णीषं वेद्यं[16] वेदयितव्यं यजमानस्य इदमुष्णीषमिति । ततस्तेनानुज्ञातं गृह्णीयात् ॥ ११ ॥

[अन्त्येष्वहःसु उष्णीषमादाय यथार्थं क्रियाकरणम्]

आदाय यथार्थमन्त्येष्वहःसु ॥ १२ ॥

आदाय गृहीत्वा यथार्थं कुर्याद् अन्त्येष्वहस्सु । परिधानादिः[17] यो योऽर्थः[18] तं[19] यथार्थं कुर्यादहर्गणानाम् अन्त्येष्वहस्सु । एकाहेऽपि स एवान्त्यो भवति ।

१-१. °नीसूक्त···ते मै । †. उप्यन्ते ब[1,2] पू । २-२. पाठोऽयं भवन्ति पदात् परतः मूको । ३-३. °मान्यस्तस्मात् मूको । ४. तु. ऐआ २,२,२ । ५-५. °वममस्या° ब[1]; °वयस्या° ब[2] मै पू । ६. अहर्ग्रहणे ब[1]; अहर्गहणे मै; अह···पू । ७. °लाचो° मै । ८. न भवति ब[1] मै पू । ९. इत्युक्ते मूको । १०. आ-ग्रहणपरि° मूको । ११-११. नास्ति ब[1] । १२. सूक्तवशिष्टया ब[1]; सूक्तवाशि° ब[2] मै । १३. सूक्तयः ब[1,2] पू । १४. च मै । १५. ऋचाया ब[1]; ऋचया ब[2] मै; वृटितम् पू । १६-१६. नास्ति ब[2] । १७. °नादि मूको । १८. यार्थो ब[1] पू; यथार्थो मै । १९. नास्ति मूको ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

परिधानीयायाः पूर्वेण सह सम्बन्धाभावात् सूक्तान्ते पावमान्यन्ते वा परिधानं भवति ॥ १२ ॥

[अनन्त्येष्वहःसूष्णीषं गृहीतं प्रतिदद्यात्]

प्रतिप्रयच्छेदितरेषु ॥ १३ ॥

परिधाय अध्वर्युणा पूर्वमुष्णीषं प्रदत्तं, तस्मा एव प्रतिप्रयच्छेदितरेष्वहस्सु अहर्गणान्त्येभ्यो[1] यानि इतराणि अनन्त्यानि[2] ॥ १३ ॥

[तदनन्तरं गाणगारेराचार्यस्य मतेनाऽभिरूपकरणम्]

अथापरमभिरूपं कुर्यादिति गाणगारिः ॥ १४ ॥

अथ-शब्दः पूर्वप्रकृतापेक्षार्थः[3] । किं प्रकृतम् । आवस्तोत्रम् । अथ प्रकृतस्यैवापरं विधानं वक्ष्यते । एवमनुच्यमाने वक्ष्यमाणस्य अभिष्टवनसंज्ञा न प्राप्नोति । न च आवस्तोत्राकर्तृत्वं प्राप्नोति । अभिरूपं कुर्यादिति गाणगारिः । यदपरं विधानं वक्ष्यते तदभिरूपं कुर्यात् । रूपं लिङ्गं भवति । यत् कर्मणो लिङ्गं तल्लिङ्गो मन्त्रस्तस्मिन् कर्मणि क्रियमाणे युज्यते, तदभिरूपं भवति । 'आप्याय्यमाने प्रथमम्' (आश्रौ ५, १२. १६) इति, एवमभिरूपं कर्म[4] गाणगारिराचार्यो मन्यते । तथा चेद्[5] वक्ष्यते । इदं न वक्तव्यम्, यस्मादभिरूपमेव वक्ष्यते । अस्यारम्भे प्रयोजनम् । अभिरूपं कुर्याद् इति गाणगारिः । अनभिरूप आचार्य इत्यर्थः । तस्मादाचार्यपक्षे आप्यायनादीत्यपेक्ष्यैव[6] तृचा विहृताः[7] प्रयुज्यन्ते । 'तस्य हान्याभिर्ऋग्भिर्मन्त्रमापपृचुः' (ऐब्रा ६, १) इति श्रुतिः । एवं शाङ्खायनिके समाम्नातादिति[8] एतत् प्रयुज्यते । कर्मभेदादेवाविद्यमाने [9]निमित्ते न[9] प्रयुज्यत इति धर्मभेदः ॥ १४ ॥

[ऋचामवधानमर्बुदस्य चतुर्थ्या ऋच उद्धारश्च]

आ प्यायस्व समेतु त इति तिस्रो मृजन्ति त्वा दश क्षिप एतमु त्यं दश क्षिपो मृज्यमानः सुहस्त्याऽऽदशभिर्विवस्वतो दुहन्ति सप्तैकामधुक्षत् पिप्युषीमिषमा कलशेषु धावति पवित्रे परिषिच्यत इत्येकाऽऽकलशेषु धावति श्येनो वर्म वि गाहते द्वे । एतासामर्बुदस्य चतुर्थीमुद्धृत्य तृचान्तेषु तृचानवदध्यात् ॥ १५ ॥

---

१. °णान्तेभ्यो मूको । २. अनन्तानि ब[1] । ३. पूर्वकृतापेक्षः ब[1]; पूर्वकृता° ब[2] मै पू । ४. कर्मणा ब[1] । ५. च मूको । ६. °नादित्यतपक्षैव ब[1]; °नादीत्ये (°त्यं मै) तत्पक्षै(°क्ष्ये मै)व ब[2] मै; °दीत्यतत्प··· पू । ७. विहृता ब[1/2]; विहिता मै ; वृटितम् पू । ८. तु. शांश्रौ ७,१५,३ । ९-९. निमित्तेन मूको ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

'आ प्यायस्व समेतु ते' (ऋ १, ९१, १६-१८) इत्येतास्तिस्र ऋचः। 'मृजन्ति त्वा दश क्षिपः' (ऋ ९, ८, ४) इत्येका । 'एतमु त्यं दश क्षिपः' (ऋ ९, १५, ८) इति समानं प्रतीकम् । 'एतस्य समाम्नायस्य' (आश्रौ १.१,१) इति या प्रथमा सा[1] भवति द्वितीया, 'मृज्यमानः सुहस्त्य' (ऋ ९, १०७, २१) इति तृतीया । 'आ दशभिर्विवस्वतः' (ऋ ८, ७२, ८), 'दुहन्ति सप्तैकाम्' (ऋ ८, ७२, ७), 'अधुक्षत् पिप्युषीमिषम्' (ऋ ८,७२,१६), 'आ कलशेषु धावति पवित्रे परिषिच्यते' (ऋ ९, १७. ४) इत्येका ऋक्। द्वितीयपादो विशेषणार्थः। एवं चेदेकं पदमधिकं वक्तव्यम् । अथवा नूनं शाखान्तरे विधानविशेषणेन प्रयोजनमस्ति। 'अधिके तृचम्' (आश्रौ १. १, १९) इति प्राप्ते एका इत्याह। 'आ कलशेषु धावति हृयेनो वर्म वि गाहते' (ऋ ९, ६७, १४-१५) इति द्वे ऋचौ। अत्रापि 'अधिके तृचम्' (आश्रौ १.१,१९) इति प्राप्ते द्वे इत्याह। एतासामर्बुदस्य [2]ऋचां चतुर्थीम्[2] ऋचम् उद्धृत्य तस्य सूक्तस्य तृचानामन्तेषु एतासामृचां ये तृचाः 'आ प्यायस्व समेतु ते' (ऋ १,९१,१६-१८) इत्येवमादयः, तानवदध्यात्। अर्बुदस्य तृचाः प्रथमा भवन्ति अनन्तरा इतरे। एवं विहृता[3](:?) तृचा आचार्येण प्रयुज्यन्ते । उभयत्र तृचेषु बृहच्छब्दे चतुर्थ्याः प्रयोगे प्राप्ते उद्धारो विधीयते ॥ १५ ॥

[आप्यायमाने सोमे प्रथमतृचस्यानुवचनम्]

आप्यायमाने प्रथमम् ॥ १६ ॥

इदानीं गाणगारिपक्षे आभिरूप्यं वक्ष्यते। तृचानवदध्यादित्यधिकारः। तेषां तृचानाम् आप्यायमाने प्रथमम्। 'आ प्यायस्व समेतु ते' (ऋ १,९१,१६) इत्येतयर्चा अद्भिः सोमस्याप्यायनं कुर्वन्ति अध्वर्यवः। तेन विधिना आप्यायमाने सोमे प्रथमं तृचमनुब्रूयात् 'आ प्यायस्व समेतु ते' (ऋ १,९१,१६-१८) इति 'तिस्रः' (आश्रौ ५, १२, १५) इत्येतम्। अर्बुदतृचस्य अर्धर्चं शिष्ट्वाऽऽरमेद् यावदाप्याययन्ति ।

अत्र अर्धर्चं आरमेद् इति वचनं न कृतम्, न च परिभाषा कृता। 'पूर्वेष्वासामर्द्धर्चेषु लिङ्गानि काङ्क्षेत्' (आश्रौ ५, १, ७) इति अपोनप्त्रीयासु। एवं वचनाभावादर्धर्चारमणं न प्राप्नोति। अर्धर्चारमणे चाक्रियमाण[4] आभिरूप्यं न सम्पद्यते, अवश्यं च सम्पादयितव्यम्, तस्मादर्थादर्धर्चारमणं कर्तव्यमित्युपदेशः। अपरे अन्यथा उपदिशन्ति। पूर्वत्र[5] आचार्येण अर्धर्चारमणं कृतम्, इह न कृतम्। तस्मादिह वचनाद् ऋते अर्धर्चारमणमन्याय्यं[6] कर्तुम्। अवश्यं चाभिरूप्यं सम्पाद्यम्।

---

१. नास्ति ब[2]; त्रुटितम् पू। २-२. ऋचा चतुर्थम् मै। ३. विहता मूको। ४. चक्रिय° मै। ५. सर्वकर्म मूको। तु. आश्रौ २,१६,२; ५,१,७ (?)। ६. °मनाज्यं मूको।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

तस्मादृते न कर्तव्यम्। आभिरूप्यसन्दर्शनार्थं यत्र यत्र अविरमणमिष्टं, तत्र तत्र ऋगावानमेव कृतं प्रवर्ग्ये अपोनप्त्रियासु च। तस्मादिहापि ऋगावानमेव कर्तव्यम्। दृष्टं च ब्राह्मणे—अर्धर्चश ऋक्श[1] इति। उत्तरपक्षश्च[2] ॥ १६ ॥

[मृज्यमाने सोमे द्वितीयतृचस्यानुवचनम्]

मृज्यमाने द्वितीयम् ॥ १७ ॥

[सोमस्योदञ्चने तृतीयस्य तृचस्यानुवचनम्]

दुह्यमाने तृतीयम् ॥ १८ ॥

उदञ्चने[3] सर्वं सोममानयन्ति तद्दोहनमित्युच्यते। तस्मिन् दुह्यमाने तृचमनुब्रूयात्—'आ दशभिर्विवस्वतः' (ऋ ८, ७२, ८-१०) इत्येतम् ॥ १८ ॥

[आसिच्यमाने सोमे चतुर्थस्य तृचस्यानुवचनम्]

आसिच्यमाने चतुर्थम् ॥ १९ ॥

तेन उदञ्चनेन आधवनीये सोममासिञ्चन्ति, यत्तदासेचनम्। तस्मिन् आसिच्यमाने चतुर्थं ब्रूयात्—'आ कलशेषु' (ऋ ९, ६७, १४-१६) इति। एवमेतदभिरूपं प्रथमे एव पर्याये। एवमुत्तरेष्वपि पर्यायेष्विति वचनं न विद्यते। यथा चतुर्थ्या वचनादभ्यावृत्तिः ॥ १९ ॥

[बृहच्छब्दे प्रयुज्यमाने चतुर्थ्या ऋचोऽनुवचनम्]

बृहच्छब्दे बृहच्छब्दे चतुर्थीम् ॥ २० ॥

बृहद्बृहदिति बृहच्छब्दे प्रयुज्यमाने अर्बुदस्य चतुर्थीम् ऋचमनुब्रूयाद् 'बृहद् वदन्ति' (ऋ १०, ९४, ४) इति। उत्तरस्याभिषवस्य मध्यमे पर्याये बृहच्छब्दं कुर्यात्। किमर्थं वीप्सा क्रियत इति। नूनं केषाञ्चिदध्वर्यूणां सर्वेष्वभिसवेषु बृहच्छब्दो विद्यते, तदपेक्षा वीप्सा[4] कृता द्रष्टव्या। अस्मादारम्भात् तृचाः सकृदेव प्रयुज्यन्ते ॥ २० ॥

[ग्रावणां मिथः संस्पर्शेऽनुवचनमन्त्रकथनम्]

मा चिदन्यद् वि शंसतेति यदि ग्रावाणः संह्रादेरन् ॥ २१ ॥

---

१. तु. ऐब्रा ६,२८; आश्रौ ८,२,६। २. °पक्षस्य मै। ३. उदञ्चते मूको। ४. नास्ति ब[1]।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

'मा चिदन्यद् वि शंसत' (ऋ ८, १, १) इति एतामृचम् अनुब्रूयात् । यदि अभिषवे क्रियमाणे ग्रावाणः अन्योऽन्यं सह संह्रादेरन् अनुगच्छेरन् संस्पृशेरन् । यदीत्यनित्यभावे । यदि संह्रादो न भवति, नैनां ब्रूयात् ॥ २१ ॥

[अन्यासामृचां ग्रावस्तोत्रेण तुल्यत्वम्]

समानमन्यत् ॥ २२ ॥

अस्मादभिरूपविधानाद् अन्यत् प्राकृतेन ग्रावस्तोत्रेण समानं तुल्यम् 'अभि त्वा देव सवितः' (ऋ १, २४, ३) इत्येवमादि च यत्परं 'मा चिदन्यद् वि शंसत' (ऋ ८, १, १) इति । 'यदि ग्रावाणः संह्रादेरन्' (आश्रौ ५, १२, २१) इत्युक्त्वा आह—समानमन्यदिति । तस्मादस्या ऋचो यदन्यत् तत्[1] समानं सर्वम् । तस्मात् 'अभि त्वा देव सवितः' (ऋ १,२४,३-५) इत्येवमाद्याः[2] तिस्र एव ऋचः प्रयुज्यन्ते । एवमेतदभिरूपविधानं समाप्तम् ।

अध्वर्युभिः सह समवायं कृत्वा एवं प्रयोक्तव्यम् । विरम्य विरम्याध्वर्युणा आप्यायनादीनि कर्माणि कर्तव्यानि, ग्रावस्तोत्राणि विरम्य विरम्य तृचाभिरूपे यथा सम्पद्यन्ते कर्माणि ॥ २२ ॥

[एकेषां मतेनार्बुदस्यैवाभिष्टवनम्]

अर्बुदमेवेत्येके ॥ २३ ॥

अर्बुदमेव केवलम् अविहृतम् अभिष्टुयाद् इत्येके शाखिनो मन्यन्ते । अस्मिन् कल्पे अर्बुदात् पूर्वं न विद्यते । 'अर्बुदं वा शुद्धमभिष्टुयात्' इति [3]कौषीतके ब्राह्मणे[3] ॥ २३ ॥

[एकेषां मते प्र वो ग्रावाण इत्यस्याभिष्टवनम्]

प्र वो ग्रावाण इत्येके ॥ २४ ॥

"[4]एके† शाखिनः 'प्र वो ग्रावाणः'" (ऋ १०, १७५, १) इति एतदेव सूक्तमभिष्टुयाद् इति[4] मन्यन्ते । शुद्धमेतदेव सूक्तं, न पूर्वं, नापरमिति । साद्यस्क्रे एतद् विधानं[5] प्रयोक्तव्यम् । अग्निष्टुति च सर्वाग्नये[6] ऊहेन प्रयोक्तव्यम् ॥ २४ ॥

[सर्पणस्योक्तवत् कर्तव्यत्वम्]

उक्तं सर्पणम् ॥ २५ ॥

---

१. नास्ति ब[1]। २. °मादि मूको। ३-३. नास्ति मै। ४-४. नास्ति मै। †. नास्ति व[2]। ५. °नं प्रयोजनं ब[1] मै पू। ६. सर्वाग्नेये मै; सर्वाग्ने° पू।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

व्याख्यातं प्रातःसवने सर्पणं च। अत अभिषवादनन्तरम् उपविश्यते। उक्तं प्रसर्पणे विधानं 'पवमानाय सर्पणे' (आश्रौ ५, २, ४) इति वचनात्। प्राप्तमपि[1] पुनरुच्यते कर्मणामनुक्रमविधानार्थम् ॥ २५ ॥

[माध्यन्दिने पवमाने स्तुतेऽङ्गाराणां विहरणम्]

स्तुते माध्यन्दिने पवमाने विहृत्याङ्गारान् ॥ २६ ॥

प्रसर्पणादनन्तरं माध्यन्दिनः पवमानो भवति। तस्मिन् माध्यन्दिने पवमाने स्तुते अनन्तरम् अङ्गारविहरणं भवति विहृत्य अङ्गारान् ॥ २६ ॥

॥ इति पञ्चमे द्वादशं खण्डम् ॥

---

१. प्राप्तमिति ब[1,2] मै ; वृटितम् पू।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

अथ पञ्चमेऽध्याये त्रयोदशः खण्डः

[प्रवर्ग्यवति क्रतौ दधिघर्मेण प्रचरणविधानम्]

दधिघर्मेण चरन्ति प्रवर्ग्यवांश्चेत् ॥ १ ॥

दधिघर्म इति कर्मणः संज्ञा। तेन चरन्ति अध्वर्यवः प्रवर्ग्यवांश्चेत् क्रतुर्भवति। प्रवर्ग्यो यस्मिन् क्रतौ विद्यते स प्रवर्ग्यवान्। अप्रवर्ग्ये दधिघर्मो न क्रियते[1]। प्रथमयज्ञे उक्थे च अप्रवर्ग्ये च[2] दधिघर्ममेके मन्यन्ते। अङ्गारविहरणं विधीयते। तस्मात् तस्मिन् काले धिष्ण्येषु संनिहिता भवन्ति ॥ १ ॥

[दधिघर्मस्य घर्मोक्तवदृगावानविधानम्]

तस्योक्तमृगावानं घर्मेण ॥ २ ॥

तस्य दधिघर्मस्य उक्तं व्याख्यातम् ऋगावानं घर्मेण[3]। यथा घर्मे[4] ऋगावानमेकश्रुत्यं च तथेह भवति। तस्येति पुनरुच्यत अधिकारार्थम्। बहून्यधिकृतानि यस्मात्। तस्य ऋगावानमित्येतावता सिद्धे उक्तमिति वचनाद् ऐकश्रुत्यं यथा घर्मे उक्तं, तथा भवतीत्यर्थः। अनुवचनचोदनाभावादैकश्रुत्यं न प्राप्नोति घर्मेण ॥ २ ॥

[घर्मोक्तवदिज्यायाः भक्षिणां च कर्मविधानम्]

इज्या भक्षिणश्च ॥ ३ ॥

तस्य दधिघर्मस्य घर्मेण इज्या व्याख्याता। अनवानं भवति यथा घर्मे[5]। भक्षिणश्च भक्षो येषां विद्यते ते भक्षिणः। भक्षिणश्च घर्मे व्याख्याताः। तेनैव विधानेन भक्षिषु उपदिष्टेषु[6] भक्षोपायोऽपि उपदिष्टो[7] भवति। तज्[8] ज्ञापयति—'षोळशिपात्रेण भक्षिणः' (आश्रौ ७, ३, २४) इत्युक्ते भक्षोपायोऽपि प्राप्तः, तस्मादाह—'नित्यो भक्षजपः' (आश्रौ ७, ३, २३) इति। च-शब्दः अतिदेशसमुच्चयार्थः ॥ ३ ॥

---

१. विद्यते ब[2]। २. नास्ति ब[1]। ३. घर्म° ब[1/2] पू; घर्म मै। ४. तु. आश्रौ ४, ६, १। ५. तु. आश्रौ ४, ६, २। ६. उपविष्टेषु ब[1] मै। ७. उपविष्टो मूको। ८. नास्ति ब[2]।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

[अध्वर्युणा प्रेषितस्य होतुर्मन्त्रवचनम्]

होतर्वदस्वेत्युक्त उत्तिष्ठताव पश्यतेत्याह ॥ ४ ॥

'होतर्वदस्व' (शांश्रौ ७,१६,२; काश्रौ १०,१,२२; आपश्रौ १३,३,३) एवमध्वर्युणा उक्तो होता 'उत्तिष्ठताव पश्यत' (ऋ १०,१७९,१) इति एतामृचम् आह। अत्र आहेति चोदितत्वाद् ऋगावानमैकश्रुत्यं भवति ॥ ४ ॥

[पुनरध्वर्युणा प्रेषितस्य होतुर्मन्त्रविशेषवचनम्]

श्रातं हविरित्युक्तः श्रातं हविरित्यन्वाह ॥ ५ ॥

श्रातं हविः इत्येवमध्वर्युणा उक्तः 'श्रातं हविः' (ऋ १०,१७९,२) इति एताम् ऋचम् अन्वाह ऋगावानमैकश्रुत्यात् ॥ ५ ॥

[यजनानुवषट्कारभक्षजपादिविधानम्]

श्रातं मन्य ऊधनि श्रातमग्नाविति यजति। अग्ने वीहीत्यनुवषट्कारो दधिघर्मस्याग्ने वीहीति वा मयि त्यदिन्द्रियं बृहन्मयि द्युम्नमुत क्रतुः। त्रिश्रुद्घर्मो विमातुं म आकूत्या मनसा सह विराजा ज्योतिषा सह तस्य दोहमशीय ते तस्य त इन्द्रपीतस्य त्रिष्टुप्छन्दस उपहूतस्योपहूतो भक्षयामीति भक्षजपो यं धिष्ण्यवतां प्राञ्चमङ्गारैरभिविहरेयुः। पश्चात् स्वस्य धिष्ण्यस्योपविश्योपहवमिष्ट्वा परि त्वाऽग्ने पुरं वयमिति जपेत् ॥ ६ ॥

'श्रातं मन्य ऊधनि श्रातमग्नौ' (ऋ १०,१७९,३) इति यजति एतयर्चा अनवानं यजति। 'अग्ने वीहि' (ऐब्रा १, २२) इति अयम् अनुवषट्कारो[1] भवति। घर्मेण इज्या व्याख्याता। अनुवषट्कारः अप्राप्तो विधीयते। 'दधिघर्मस्य अग्ने वीहि' (ऐब्रा १, २२) इति अयं वा अनुवषट्कारो भवति विकल्पः। मयि त्यदिन्द्रियं बृहद्[2] इति यथाम्नातो भक्षजपः घर्मेण प्राप्तस्य प्रत्याम्नायः। यं धिष्ण्यवताम् धिष्ण्या येषां विद्यन्ते ते धिष्ण्यवन्तः, [3]तेषां धिष्ण्यवतां[3] कर्तॄणां यं कञ्चन प्राच्यां दिशि विसंस्थितसञ्चरेण[4] निष्क्रान्तम् अङ्गारैर् अध्वर्यवोऽभिविहरेयुः। तमभ्यन्तरीकृत्य विहरेयुः। स तेनैव सञ्चरेण प्रविश्य पश्चात् स्वस्य धिष्ण्यस्योपविश्य उपहवमिष्ट्वा यजमानाय उपह्वयध्वमित्युक्त्वा 'परि त्वाऽग्ने पुरं वयम्' (ऋ १०, ८७, २२) इति एतामृचं जपेत्। 'कर्मचोदनायाम्' (आश्रौ १, १, १४) इति

---

१. °षट्कर्तारो ब[2]। २. तु. मासं ३८, २७-२८; मैसं ४, ९, १३; शांश्रौ ७,१६,७। ३-३. नास्ति ब[2]। ४. संस्थि° ब[1]।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

होतुः प्राप्तो, यमित्याह । यं कञ्चन कर्तारम् धिष्ण्यवताम्[1] इति वचनाद-धिष्ण्यवतान्न भवति प्रावस्तोत्रादीनां प्राञ्चमिति वचनात् प्रत्यञ्चं निसृतस्यैतन्न भवति ॥ ६ ॥

[अदीक्षितस्योपहवयजनप्रतिषेधविधानम्]

अनिष्ट्वाऽदीक्षितः ॥ ७ ॥

'उपहवमिष्ट्वा' (आश्रौ ५, १३, ६) इति वचनाद् दीक्षितानामेव एष विधिः प्राप्तः । अदीक्षितानामपि प्राप्त्यर्थमिदमुच्यते । पश्चात् स्वस्य धिष्ण्यस्योप-विश्य उपहवमनिष्ट्वा 'परि त्वाऽग्ने' (ऋ १०,८७,२२) इति जपेत् । उपहवस्य प्राप्तस्य प्रतिषेधः ॥ ७ ॥

[सवनीयानां पूर्वं पश्चाद् वा पशुपुरोळाशेन प्रचरणविधानम्]

सवनीयानां पुरस्तादुपरिष्टाद् वा पशुपुरोळाशेन चरन्ति ॥ ८ ॥

अनुसवनम् ऐन्द्राः पुरोळाशाः । सवने भवाः सवनीयाः । तेषां सवनीयानां पुरस्तादुपरिष्टाद् वा प्राक् स्विष्टकृतः पशुपुरोळाशेन चरन्ति । सवनीयस्य पशोर्यः पुरोळाशस्तस्यानुवाक्या प्रैषो याज्येति व्याख्यातानि[2] । आवाहनक्रमेण पुरस्तात् पशुपुरोळाशो भवति । तथा सति पुरोळाशानां[3] स्विष्टकृदाह । पक्षयोः समानं प्राप्तं यथा देवसुवानाम्, एवं प्राप्ते सवनीयानां[4] स्विष्टकृदिह न विधीयते श्रुतिसामर्थ्याद् यथा नानादेवत्यानि[5] हवींषि इन्द्राय हूयन्ते, पुरोळाशाश्च । तत्र सवनीयानां सतां स्विष्टकृदिह[6] दृष्टं, तस्मात् ते प्रधानाः प्रधानत्वात् । तेषामुपरिष्टात् पशुपुरोळाशो भवतीत्युक्तम् ॥ ८ ॥

[एकेषां मतेन पशुपुरोळाशस्याकरणम्]

अक्रियामेकेऽन्यत्र तदर्थवादवदनात् ॥ ९ ॥

पशुपुरोळाशस्य अक्रियाम् अकरणम् एके आचार्या मन्यन्ते । कस्माद्धेतोः, अन्यत्र तदर्थवादवदनात्[7] पशुपरोळाशादन्यत्र अन्येषु अपशुपुरोळाशेषु[8] सवनीयेषु, [9]तस्य अर्थवादः[9] तदर्थवादः । तस्य पुरोळाशस्य अर्थवादः । यज्ञस्य[10] छिद्रमपिदधाति

---

१. धिष्ण्यं वचनाम् मूको । २. तु. आश्रौ ५,४,२-५ । ३. पुरोळाशान् मूको । ४. °यानां याः ब[1]; °यानां या ब[2] मै पू । ५. °दवत्यानि ब[1] । ६. °कृति ह मूको । ७. °वादवचनात् ब[1]; तदर्थत्वादवचनात् ब[2] मै पू । ८. पशु-पुरो° मूको । ९-९. तस्य वादः मूको । १०. यज्ञस्यैव तैसं १,७,३,१ ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

इति तदर्थवादं[1] शाखान्तरे सवनीयेषु वदति[2], [3]छिद्रापिधानार्थो भवति[3] इति। अत्रान्तैः[4] सवनीयैः छिद्रमपिहितं, तस्मात् पुरोळाशस्य अक्रियां[5] मन्यन्ते ॥ ९ ॥

[आश्मरथ्यमतेन पशुपुरोळाशविधानम्]

क्रियामाश्मरथ्योऽन्विताप्रतिषेधात् ॥ १० ॥

पशुपुरोळाशस्य क्रियामाश्मरथ्य आचार्यो मन्यते। कस्माद्धेतोः[6]। अन्विताप्रतिषेधात्, 'पशुमालभ्य पुरोळाशं निर्वपति' (तैसं ६,३,१०,१) इति पशुमन्वितः अनुगतः, अन्यत्र सवनीयादिति प्रतिषेधश्च न विद्यते, अन्वितश्चाप्रतिषिद्धश्च यस्मात् तस्मादन्विताप्रतिषेधाद्धेतोः क्रियामाश्मरथ्यो मन्यते ॥ १० ॥

[पुनः पशुपुरोळाशस्य कालविधानम्]

पुरोळाशाद्युक्तमा नाराशंससादनात्। न त्विह द्विदेवत्याः। एतस्मिन् काले दक्षिणा नीयन्तेऽहीनैकाहेषु ॥ ११ ॥

दधिघर्मादनन्तरं सवनीयान्[7] पुरोळाशानादिं कृत्वा उक्तं कर्म प्रातःसवने, आ अभिविधौ, आ नाराशंसानां सादनात्। न त्विह द्विदेवत्याः। पुरोळाशाद्युक्तम् इत्युक्ते द्विदेवत्या अपि प्राप्ताः। प्राप्तप्रतिषेधार्थमिदमुच्यते न त्विह द्विदेवत्याः[8]। इह तु द्विदेवत्या न[8] विद्यन्ते। तु-शब्दः प्राप्तव्यावृत्त्यर्थः। इह वचनादिह प्रभृति द्विदेवत्या न विद्यन्ते। तृतीयेऽपि प्रतिषेधः। द्विदेवत्येषु प्रतिषिद्धेषु होतृचमसस्य ग्रहणं न[8] प्राप्तम्। क्रियते तु भक्षस्य पूजार्थम्। 'प्रतिख्याय भक्षमवरोहेत्' (ऐआ १,२,४) इति च[10] पूजा श्रूयते। दृश्यते च छन्दोगानामनुसवनं चमसस्य "ऊरौ सादनं" च[12]। इह तु दक्षिणे न ग्रहणम्, दक्षिणे ऊरौ सादने सम्भवान्मन्त्रस्तु न प्रयुज्यते। प्रातःसवनलिङ्गत्वात् प्रातःसवनसोमा वसूनां भक्षाः सवन इत्युच्यन्ते वसूनां प्रातः होतृचमसो भवति। तस्मात् प्रातःसवन एव भवति मन्त्रः। न वा चमसस्य ग्रहणं द्विदेवत्याङ्गत्वात्। यथा 'तस्योक्तमुपस्थानम्' (आश्रौ ५,१२,२) इत्युक्ते द्वार्ययोः संमर्शनादीन्यपि तदङ्गत्वात् क्रियन्ते। एवमिह द्विदेवत्येषु प्रतिषिद्धेषु तदङ्गस्य तस्यापि प्रतिषेधः। मन्त्रलिङ्गसामान्यादूरौ सादनादि-क्रियासामान्यात् तदभावाद् द्विदेवत्याङ्गसवनसम्प्राप्तानां ग्रहण-सादनजपानाम्

---

१. तमर्थवाद ब[1] पू; तदर्थवाद ब[2] मै। २. वदिति ब[1,2] मै; त्रुटितम् पू। ३-३. °धानार्था भवन्ति मूको। ४. यस्यान्तैः (°न्तेः मै) मूको। ५. अक्रिया मूको। ६. तस्मादधेतोः मै। ७. सवनीयाः मूको। ८. नास्ति ब[1,2] मै; त्रुटितम् पू। ९. नास्ति मै। १०. नास्ति ब[1] मै पू। ११-११. मूरा (मूता मै) चम (च ब[1]) सादनं मूको। १२. लाश्रौ २,५,१ (?)।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

अर्थान्निवृत्तिः शक्यते[1] कर्तुम्। यदि वाऽर्थान्निवृत्तिर्भवति। पङ्क्तिशंसन्त्विहाप्रणवान्तश्च (?)। प्रतिगर इति न वक्तव्यं द्विदेवत्यप्रतिषेधो हि चमसप्रतिषेधार्थ एव। न हि माध्यन्दिने द्विदेवत्या[2] उपपद्यन्ते।

एतस्मिन् काले सन्नेषु नाराशंसेषु एतस्मिन् काले क्रतुदक्षिणा 'द्वादशशतदक्षिणः' (आश्रौ ९, १, ३) इत्येवमाम्नाता यास्ता दक्षिणापथेन नीयन्ते[3] ह्रियन्ते अहीनेषु एकाहेषु। तासु नीयमानासु यद् विधानं तदुच्यते। उत्तरत्र सत्रेष्विति[4] वचनादिदं[5] विधानं वक्ष्यमाणं सर्वं[6] सत्रेष्वेव स्यात्। तस्मादस्माद् अहीनैकाहेष्विति उच्यते ॥ ११ ॥

[आत्मदक्षिणादानविधिकथनम्]

कृष्णाजिनानि धून्वन्तः स्वयमेव दक्षिणापथं यन्ति दीक्षिताः सत्रेष्विदमहं मां कल्याण्यै कीर्त्यै तेजसे यशसेऽमृतत्वायाऽऽत्मानं दक्षिणां नयानीति जपन्तः ॥ १२ ॥

एतस्मिन् काले कृष्णाजिनानि धून्वन्तः स्वयमेव यन्ति, न दक्षिणा नीयन्ते। दक्षिणानां पन्थाः तं दक्षिणापथं यन्ति गच्छन्ति। दक्षिणेनाग्नीध्रीयं यन्ति दीक्षिताः सर्वे सत्रेषु द्वादशाहादिषु इदमहं माम् इति एतं[7] यथासमाम्नातं मन्त्रं जपन्तः। स्वयमेवेति वचनात् स्वयमेव यन्ति न दक्षिणा नीयन्ते। [8]आत्मदक्षिणा नीयन्ते[8]। 'आत्मदक्षिणं वै सत्रम्' (शांब्रा १५, १)। 'आत्मानं दक्षिणां नयानि' इति मन्त्रः। एव-शब्दोऽवधारणार्थः। आत्मानमेव दक्षिणां[9] नयति। 'दक्षिणा नीयन्ते' (आश्रौ ५,१३,११) इत्युक्तम्। तत्र यः स्वामी ततो दक्षिणा नयन्ति[10], ऋत्विजः प्रतिगृह्णन्ति। तेनैव न्यायेन सत्रेष्वपि ये यजमाने पदार्थे दीक्षिता गृहपतिप्रभृतयस्त एव दक्षिणापथं गच्छेयुः। होत्रादीनामार्त्विज्यनियुक्तानामदीक्षितानां गमनं न स्यात्। दक्षिणाग्रहणात्[11] तु होत्रादयोऽपि गच्छन्ति। अहीनैकाहेष्वधिकारादयमपि[12] विधिस्तत्रैव स्यात्। तत्रापि बहवो दीक्षन्ते, तस्मात् सत्रेष्वित्याह। जपन्त इति वचनान्मन्त्रान्तेन कर्म न क्रियते। जपन्त एव गच्छन्ति ॥ १२ ॥

[दक्षिणासून्नेष्यमाणास्वाग्नीध्रीये आहुतिद्वयहवनम्]

उन्नेष्यमाणास्वाग्नीध्रीय आहुती जुह्वति ॥ १३ ॥

---

१. शस्यते मूको। २. देवत्या मूको। ३. उन्नी° मूको। ४. सूत्रे° मूको। ५. नास्ति ब[2]। ६. सर्वे मूको। ७. इत्येवं ब[1]। ८-८. नास्ति ब[1] मे पू। ९. दक्षिणा मूको। १०. नयति मूको। ११. दक्षिणग्र° ब[1]; दीक्षणग्र° ब[2] मे पू। १२. तु. आश्रौ ५,१३,११।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

ददानीत्यग्निर्वदति वायुराह तथेति तत् । हन्तेति चन्द्रमाः सत्यमादित्यः सत्यमोमापस्तत्सत्यमाभरन् ॥ दिशो यज्ञस्य दक्षिणा दक्षिणानां प्रियो भूयासं स्वाहा । प्राचि ह्येधि प्राचि जुषाणा प्राच्याज्यस्य वेतु स्वाहेति द्वितीयाम् ॥ १४ ॥

अहीनैकाहेषु दक्षिणा नीयन्ते । तासु उन्नेष्यमाणासु आग्नीध्रीये अग्नौ द्वे आहुती जुह्वति सर्वे ऋत्विजः । ददानीति एताभ्यां यथासमाम्नाताभ्याम्[1] । अव्यक्तहोमा इत्याहवनीये प्राप्त आग्नीध्रीय इत्याह । जुह्वतीति वचनात् सर्वेषां होमः, ये दक्षिणाः[2] प्रतिगृह्णन्ति । द्वितीयामिति वचनाद् द्वौ मन्त्रौ भवतः । एक एवायं प्राप्तः, मध्ये मन्त्रस्य स्वाहाकारो भवति ॥ १३-१४ ॥

[गवाश्वादिदक्षिणानामनुमन्त्रणम्]

क इदं कस्मा अदात् कामः कामायादात् कामो दाता कामः प्रतिग्रहीता कामं समुद्रमाविश कामेन त्वा प्रतिगृह्णामि कामैतत्ते वृष्टिरसि द्यौस्त्वा ददातु पृथिवी प्रतिगृह्णात्वित्यतीतास्वनुमन्त्रयेत प्राणि ॥ १५ ॥

आहुती हुत्वा 'क इदम्' (शौ ३, २६, ७; तैआ ३, १०, १-२) इति एतेन मन्त्रेण आग्नीध्रदेशम् अतीतासु दक्षिणासु अनुमन्त्रयेत यत् प्राणिरूपं द्रव्यं गवाश्वादि ॥ १५ ॥

[निर्जीवद्रव्यरूपाणां दक्षिणानामभिमर्शनविधानम्]

अभिमृशेदप्राणि ॥ १६ ॥

अभिमृशेद् अप्राणि यत् द्रव्यं हिरण्यं वासो रथश्च तद्[3] अभिमृशेदेव । तत्र ये युक्ताः, ते अविवक्षिताः, न तेषामनुमन्त्रणं क्रियते ॥ १६ ॥

[दक्षिणारूपायाः कन्याया अभिमर्शनम्]

कन्यां च ॥ १७ ॥

कन्यां च दक्षिणाकाले दत्ताम् एतेन मन्त्रेण अभिमृशेत् । न तां दक्षिणापथेन निनयेत् । न हि सा क्रतौ दक्षिणार्था भवति । तस्मात् साधारणा दक्षिणा भवति ॥ १७ ॥

[एतस्य विधेः सर्वत्र कर्तव्यत्वम्]

सर्वत्र चैवम् ॥ १८ ॥

---

१. नास्ति ब[1] । २. दक्षिणा मूको । ३. नास्ति मूको ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

दक्षिणाकाले एवमनेन मन्त्रेण प्राणिद्रव्यमनुमन्त्रयेत् सर्वत्र[1] । सर्वत्र-ग्रहणं[2] हविर्यज्ञेषु च। एवम् इत्यतिदेशात् सर्वो विधिः प्रातः, आहुतिस्तु न विद्यते। आग्नीध्राभावान्नयनमपि न विद्यते। दक्षिणापथस्याभावात् शेषः सर्वो विधिः, 'दक्षिणादानम् उर्वरां दद्यात्' (आश्रौ ३, १४, ९) इति उर्वराया अप्यनुमन्त्रणमेव असामीप्यात्, यथा गवादीनाम् ॥ १८ ॥

[हविरुच्छिष्टप्राशनम्]

प्रतिगृह्याग्नीध्रीयं प्राप्य हविरुच्छिष्टं सर्वे प्राश्नीयुः प्राश्य प्रतिसृप्य ॥ १९ ॥

प्रतिगृह्य सोमप्रतिग्रहं[3] कृत्वा आग्नीध्रीयं प्राप्य गत्वा हविरुच्छिष्टम् उपयुक्तं शिष्टं सर्वे ब्राह्मणाच्छंस्यादयोऽपि प्राश्नीयुः। प्रतिगृह्येति पुनरुच्यते। सर्वत्रेति क्रतूनामधिकारात् पुनः सौमिककर्माधिक्रियते। प्रतिगृह्येति सर्वे प्राश्नीयुरिति सर्वग्रहणात् सवनीयानां भक्षे अनधिकृतानां ब्राह्मणाच्छंस्यादीनाम् अभक्षे प्राप्ते प्राप्त्यर्थम्। प्राश्य हविरुच्छिष्टं प्राश्य सर्वे सदः प्रतिसृप्य ॥ १९ ॥

॥ इति पञ्चमे त्रयोदशं खण्डम् ॥

---

१. नास्ति मूको। २. सर्वग्र° ब[1,2] मै; त्रुटितम् पू। ३. सोमे प्रति° ब[1] पू।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

अथ पञ्चमेऽध्याये चतुर्दशः खण्डः

[मरुत्वतीयेन ग्रहेण चरणम्]

[प्राश्य प्रतिसृप्य] मरुत्वतीयेन ग्रहेण चरन्ति ॥ १ ॥

मरुत्वतीयो ग्रहस्तेन मरुत्वतीयेन ग्रहेण चरन्ति । तस्यानुवाक्या प्रैषो याज्येति वक्ष्यन्ते[1] ॥ १ ॥

[मरुत्वतीयग्रहभक्षणानन्तरमेतस्य शस्त्रस्य शंसनम्]

इन्द्र मरुत्व इह पाहि सोमं होता यक्षदिन्द्रं मरुत्वन्तं सजोषा इन्द्र सगणो मरुद्भिरिति भक्षयित्वैतत् पात्रं मरुत्वतीयं शस्त्रं शंसेत् ॥२॥

'इन्द्र मरुत्व इह पाहि सोमम्' (ऋ ३,५१,७), 'होता यक्षदिन्द्रं मरुत्वन्तम्' (ऋखि ५, ७, ४, १२), 'सजोषा इन्द्र सगणो मरुद्भिः' (ऋ ३, ४७, २) इति । प्राश्येति पुनरुच्यते प्रसर्पणस्य कालव्यपदेशार्थम् । प्रतिसृप्येत्यनुच्यमाने तत्रैव याज्या प्राप्नोति[2] । भक्षयित्वा एतद् ग्रहपात्रं भक्षयित्वा अनन्तरं मरुत्वतीयं नाम शस्त्रं शंसेत् । सिद्धमपि भक्षणं पुनरुच्यते शस्त्रस्य शंसनकालव्यपदेशार्थम्[3] । अन्येषु शस्त्रेषु हिङ्कारादीनि निमित्तानि सन्ति । एतदिति अन्यदपि मरुत्वतीयं पात्रमस्ति, तद् भक्षयित्वा मरुत्वतीयं शंसेद् इति । मरुत्वतीयमिति संज्ञा । 'मरुत्वतीयस्य प्रतिपदनुचरौ' (आश्रौ ५,१४,४) इत्युक्त एतस्य ग्रहणम् ॥ २ ॥

[माध्यन्दिने सवने शस्त्राविष्वाहावविधानम्]

अध्वर्यो शोंसावोमिति माध्यन्दिने शस्त्रादिष्वाहावः ॥ ३ ॥

'अध्वर्यो शोंसावोम्' (ऐब्रा ३,१२) इति अयम् आहावः माध्यन्दिने सवने सर्वशस्त्राणामादिषु अप्राप्तो विधीयते । मरुत्वतीयाधिकारान्माध्यन्दिनग्रहणम् । शस्त्रादिग्रहणम् अन्तःशस्त्रप्रतिषेधार्थम् ॥ ३ ॥

[प्रतिपदनुचरसंज्ञयोस्तृचयोः कथनम्]

आ त्वा रथं यथोतय इदं वसो सुतमन्ध इति मरुत्वतीयस्य प्रतिपदनुचरौ ॥ ४ ॥

---

१. वक्ष्यते ब[1] । २. याज्याप्राति ब[1]; वाज्या (याज्या मै पू) प्राश्येति (प्रास्येति मै) ब[2] मै पू । ३. °कालपदे° ब[1,2] पू ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

'आ त्वा रथं यथोतये' (ऋ ८, ६८, १-३), 'इदं वसो सुतमन्धः' (ऋ ८,२,१-३) इति एतौ तृचौ मरुत्वतीयस्य शस्त्रस्य[1] प्रतिपदनुचरसंज्ञौ[2] भवतः माध्यन्दिने[3]। शस्त्राणामधिकारात् पुनर्मरुत्वतीयस्य ग्रहणम्। तृचौ प्रतिपदनुचरौ इत्युक्त एतयोर्ग्रहणम् ॥ ४ ॥

[इन्द्रनिहवस्य प्रगाथसंज्ञाकरणम्]

इन्द्र नेदीय एदिहीतीन्द्रनिहवः प्रगाथः ॥ ५ ॥

'इन्द्र नेदीय एदिहि' (ऋ ८,५३,५-६) इति अयं प्रगाथः इन्द्रनिहवसंज्ञो वेदितव्यः। स अनुचरादनन्तरो भवति। 'ध्रुव इन्द्रनिहवः' (आश्रौ ७, ३, ७) इत्युक्त एतस्य ग्रहणम्। पादग्रहणाद् ऋक् प्राप्ता। प्रगाथग्रहणाद् द्वयृचो भवति। 'द्वयृचाः प्रगाथाः' (आश्रौ ५, १४, ७) इति वचनात् ॥ ५ ॥

[ब्राह्मणस्पत्यप्रगाथसंज्ञाकरणम्]

प्र नूनं ब्रह्मणस्पतिरिति ब्राह्मणस्पत्यः ॥ ६ ॥

'प्र नूनं ब्रह्मणस्पतिः' (ऋ १,४०,५) इति अयं प्रगाथः ब्राह्मणस्पत्यसंज्ञः। स इन्द्रनिहवादनन्तरम्। 'ब्राह्मणस्पत्यावावपते पूर्वौ नित्यात्' (आश्रौ ७, ३, १) इत्युक्त एतस्य ग्रहणम्। प्रगाथ इत्यनुवर्तते ॥ ६ ॥

[प्रतिपदनुचरप्रगाथाविषु ऋक्संख्याविधानम्]

तृचाः प्रतिपदनुचरा द्वयृचाः प्रगाथा आऽतोऽर्धर्चं सर्वम् ॥ ७ ॥

मरुत्वतीये वैश्वदेवे च प्रतिपदनुचरास्तृचा भवन्ति। पादग्रहणाद् ऋचः प्राप्ताः। द्वयृचाः प्रगाथाः [4]प्रगाथा द्वयृचा भवन्ति[4]। पादग्रहणाद् ऋचः प्राप्ताः। आऽतोऽर्धर्चं सर्वम्। आ एतस्माद् ब्राह्मणस्पत्यात् प्रगाथादतः[5] यदनुज्ञातं प्रातरनुवाकादि, तत्सर्वम्[6] अर्धर्चशस्यं[7] वेदितव्यम्। अस्मादारम्भात् त्रिष्टुब्-जगतीनामप्यर्धर्चम्। यथा पृष्ठचस्य पञ्चमे अहन्याज्यं विषुवति च[1] शस्त्राधिकार उक्तो विधिः अनुवचनस्य न प्राप्नोति। सर्वग्रहणात् प्रातरनुवाकेऽपि अर्धर्चं भवति। तत्र हि पच्छः प्राप्तम्। 'पच्छोऽनूच्यः प्रातरनुवाकः' (ऐब्रा २,१८) इति श्रुतिः ॥ ७ ॥

[स्तोत्रियानुरूपप्रतिपदनुचरप्रगाथेषु अर्धर्चविधानम्]

स्तोत्रियानुरूपाः प्रतिपदनुचराः प्रगाथाः सर्वत्र ॥ ८ ॥

---

१. नास्ति ब[2]। २. °दनुचरौ ब[2]। ३. मध्यन्दि° ब[2]।
४-४. यदि (ष्यादिता ब[2] मै पू) द्वयृचा भवतः मूको। ५. °थादृचः ब[2]।
६. सर्वम् ब[2]। ७. अर्धर्चो शंस्य ते ब[2] मै पू।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

स्तोत्रियाश्च अनुरूपाश्च [1]प्रतिपदनुचराश्च[1] प्रगाथाः च सर्वत्र अर्धर्चा भवन्ति । त्रैष्टुभजागताः स्तोत्रियानुरूपा भवन्ति, तेषां पच्छःशस्यं प्राप्तम् । यथा[2] 'तदिदास भुवनेषु ज्येष्ठम्' (ऋ १०,१२०,१), 'विभ्राड् बृहत् पिबतु सोम्यं मधु' (ऋ १०, १७०, १) इति । प्रतिपदनुचराः त्रिकद्रुकेषु इति प्रतिपत् । 'पच्छः पूर्वम्' (आश्रौ ६, २, ७) इति सिद्धमेव शस्यं प्राप्तम् । 'त्रिकद्रुकेष्विति प्रतिपदेका तृचस्थाने । ऐकाहिकोऽनुचरः' (आश्रौ १०,१०,४) । प्रतिपद्वशादनुचरस्याप्येकवद्भावे प्राप्ते अर्धर्चम्[3] । 'बृहतीकारं चेत् तावेव द्विः' (आश्रौ ५,१५,७) इत्यत्र 'उत्तरयोरवस्येत्' (आश्रौ ५, १५, ६) इति प्राप्तम् । प्रगाथा अर्धचा[4] इत्यनेन तस्या अर्धर्चं विधीयते । सर्वत्र-ग्रहणम् आतो[5] विषयादूर्ध्वमप्यर्धर्च-प्राप्त्यर्थम्[6] ॥ ८ ॥

[त्रैष्टुभात् पूर्ववर्तिषुच्छन्दःस्वर्धर्चविधानम्]

प्राक् च छन्दांसि त्रैष्टुभात् ॥ ९ ॥

त्रैष्टुभात् प्राग् यानि छन्दांसि गायत्र्यादीनि[7] पञ्च[8] [9]तानि च[9] अर्धर्चानि भवन्ति । छन्दसामित्यतिदेशात् प्राप्ते न वक्तव्यम् । अनुच्यमाने[10] 'पच्छोऽन्यत्' (आश्रौ ५, १४, १५) इति पच्छःशस्यं प्राप्नोति, तस्मात् "प्राप्तस्यार्धर्चं पुनर्विधीयते" ॥ ९ ॥

[चतुष्पदारहितासु सर्वासु ऋक्षु अर्धर्चविधानम्]

सर्वाश्चैवाचतुष्पदाः ॥ १० ॥

चतुष्पदाः वर्जयित्वा या[12] अन्यास्ता अचतुष्पदा एकपद-द्विपद-त्रिपद-पञ्चपद-षट्पद-सप्तपदाः । 'त्रैष्टुभाद्' (आश्रौ ५,१४,९) इति वर्तते । त्रैष्टुभात् प्राक् याश्च ऊर्ध्वं सर्वाश्चैवाचतुष्पदाः अर्धर्चा भवन्ति । यथा 'अग्निं नरो' (ऋ ७; १, १) इत्येवमाविविराजः । नान्यदुदाहरणमस्ति । सर्वाश्चग्रहणमनर्थकं[11] बहूदाहरणाभावात् । एव-शब्दश्चानर्थकः । विराट्-छन्दः अनुष्टुब्विकार एव । तस्मादनुदाहरणम् । उदाहरणाभावात् प्रतिज्ञासूत्रमेतदित्युपदिशन्ति । सर्वाश्चैवाचतुष्पदाः यथा शंसितव्याः, तथा वक्ष्याम इति । त्रैष्टुभाद् याः प्राक् याश्च उपरिष्टात्

१-१. °पदनुच° मूको । २. तथा मूको । ३. अर्धर्चं मूको । ४. आर्थिकमेतत् । ५. आते ब[1] मै; वृटितम् पू । ६. °मप्यर्चं (°र्च्यं मै) प्रा° मूको । ७. गायत्रादीनि ब[2] मै पू । ८. च ब[1] । ९-९. नास्ति ब[1]; कानि च मै; त्रैष्टुभात् पू । १०. अनूच्य° मूको । ११-११. °र्द्धर्चं (°र्चं मै पू) वि (व ब[1]) पुनर्विधीय (°यं ब[1]) ते मूको । १२. नास्ति मूको । १३. सर्वत्रग्र° मूको ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

सर्वाः। च-शब्दः सर्वाधिकारसमुच्चयार्थः। आऽतो विषयादूर्ध्वम्। एवशब्दोऽवधारणार्थः। चतुष्पदा यत्र यत्र आदिश्यन्ते, तासां तत्र तत्रैव शस्यं वक्ष्यमाणमिति। इहैव पङ्क्तीनां वक्ष्यति[1]। नानाऽऽकारादीनां सप्तपदानामपि वक्ष्यति[1] 'प्रो ष्वस्मै' (ऋ १०, १३३, १) इत्येवमादीनां च। 'पच्छोऽन्यत्' (आश्रौ ५,१४,१५) इति पच्छःशस्यं प्राप्तं तदपवादार्थमिदमुच्यते। अस्मात् सूत्रारम्भादचतुष्पदानां यच्छस्यं[2] वक्ष्यते, तदेव शस्यं तस्य छन्दसः अन्यत्रापि प्रयुज्यमानस्य भवति। यथा महाव्रतस्यावापे। तत्र हि [3]सर्वं छन्दः[3] ऐन्द्रं शस्यते, बृहती सम्पन्ना वा[4]। वाचस्तोमेषु च त्रिषु[5] त्रिष्वपि सवनेषु [6]सर्वं छन्दः शस्यते[6]। तत्र षट्पदानां सप्तपदानां[7] च यद् दृष्टं तदेव भवति।

अपरो मार्गः—सर्वाश्चैवाचतुष्पदाः। 'प्राक् छन्दांसि त्रैष्टुभाद्' (आश्रौ ५, १४, ९) इत्यधिकारः। अनधिकृताश्च सर्वा अर्धर्चशस्या भवन्ति। 'पच्छोऽन्यत्' (आश्रौ ५,१४,१५) इति प्राप्ते सूत्रारम्भः। च-शब्दः अर्धर्चाधिकारसमुच्चयार्थः। एवशब्दोऽवधारणार्थः। यासामुत्तरत्र[8] षट्पदानां च सप्तपदानां च शस्यं वक्ष्यामः, तासामपि उक्तादन्यत्रार्धर्चाः चतुष्पदाः वर्जयित्वा अन्या अचतुष्पदाः त्रिपदाः पञ्चपदाः षट्पदाः सप्तपदा इत्युदाहरणानि। त्रिपदा विराजः 'अग्निं नरः' (ऋ ७, १, १), 'न ते गिरो अपि मृष्ये तुरस्य' (ऋ ७, २२, ५) इत्येवमादि। अतिजगत्यः पञ्चपदाः 'कथा दाशेम नमसा सुदानून्' (ऋ ५, ४१,१६-१७) इति द्वे, [9]एवयामरुत ऋचः[9] षट्पदा नाभाकाः[10]। तासां गायत्रीकारमुक्तम्[11]। सप्तपदाः 'प्रो ष्वस्मै' (ऋ १०, १३३, १) इति, तासामनुष्टुब्गायत्रीकारमुक्तम्[12], तस्मादन्यत्र। 'अथो पञ्चवीर्यं वा एतच्छन्दो यद् विराट्' (ऐब्रा १, ६) इति श्रुतिः। 'यदस्या एकादशाक्षराणि पदानि, तेन त्रिष्टुब्, यत् त्रयस्त्रिंशदक्षरा, तेनानुष्टुप्' (ऐब्रा १,६) इति च। तस्मादनुष्टुप्स्थान आज्यं भवति। विश्वजिति तासामर्धर्चं प्राप्तम्। 'आऽतोऽर्धर्चम्' (आश्रौ ५,१४,७) इति वचनाद् व्यूळ्हस्य चतुर्थेऽहनि त्रिष्टुप्स्थाने विराजः शस्यन्ते, तासां त्रिष्टुप्त्वात् पच्छःशस्ये प्राप्तेऽचतुष्पदा इति वचनाद् अर्धर्चं विधीयते। [13]एवयामरुद् अतिजागतः[13] पञ्चपदत्वाद् अर्धर्चो भवति। अत एव प्रतिगरः प्रणवान्त आम्नातः[14],

---

१. तु. आश्रौ ५,१४,११; ६,२,६। २. प पछं शस्यं (? यत् पच्छःशस्यं) ब[2]। ३-३. सर्वंच्छन्दः मूको। ४. नास्ति ब[2] मै पू। ५. त्रि च मूको। ६-६. सर्वच्छन्दाः (°न्दः मै) शस्यन्ते मूको। ७. नास्ति ब[1]। ८. यस्यामु° ब[1] मै; यास्यमु° ब[2]; यास्यामु° पू। ९-९. एवयामभ(°भु ब[1])व मूको; तु. ऋ ५, ८७। १०. नाभावाः मूको; तु. ऋ ८,३९-४२। ११. °मुक्तः मूको; तु. आश्रौ ७,२,१६। १२. तु. आश्रौ ६, २, ८। १३-१३. °मरुत इति जा° ब[2]; °मरुद्वती जा° मै; °मरुति जा° पू; तु. आश्रौ ८, ४, २। १४. आत्मा(°त्म मै)तः मूको।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

अजागतोऽनतिजागतो[1] वाऽतिष्टुतिः[2], वचनसामर्थ्यात् । पच्छःशस्यापि भवति[3]। [4]अग्निमारुते तु[4] द्विरवस्येत् 'अर्धर्चशस्ये' (वैताश्रौ २१, ४) इति प्राप्ते इदमुच्यते ॥ १० ॥

[पङ्क्तिषु द्वयोर्द्वयोः पादयोरवसानविधानम्]

पङ्क्तिषु द्विरवस्येद् द्वयोर्द्वयोः पादयोः ॥ ११ ॥

पञ्चपदाः पङ्क्तयस्तासु पङ्क्तिषु द्विरवस्येद् द्वयोर्द्वयोः अवसानं भवति। द्विरवस्येदिति न वक्तव्यम्। पङ्क्तिषु द्वयोर्द्वयोः पादयोः अवस्येदिति वक्तव्यम्। एवमुच्यमाने पञ्चमेनापि पदेन समासः प्राप्नोति । द्विरवस्येदिति वचनान्न भवति समासः ॥ ११ ॥

[आश्विने शस्त्रेऽर्धर्चशंसनविकल्पः]

अर्द्धर्चशो वाऽऽश्विने ॥ १२ ॥

आश्विने[5] अर्द्धर्चशो वा पङ्क्तिशंसनम् । विनिवेशोऽयम्[6] । पाङ्क्तेषु पङ्क्तिशंसनमेव, विच्छन्दा तु या पङ्क्तिः, तामर्धर्चशः शंसेत् । 'बृहद् वयः' (ऋ ५, १६) इति दशानामुत्तमा पङ्क्तिः[7] । तस्मादुद्धारन्यायेन[8] वा इति विकल्पे प्राप्ते अनुद्धारार्थः सूत्रारम्भः । आश्विन इत्ययं विकल्पकरणाभावाद् विनिवेशः कल्प्यते[9] ॥ १२ ॥

[पच्छःशस्यगतायाः पङ्क्त्याः पच्छःशंसनमुत्तमयोः पदयोः समासकरणं च]

पच्छःशस्यगतां तु पच्छः ॥ १३ ॥

समासमुत्तमे पदे ॥ १४ ॥

पच्छःशस्यं प्राप्ता या पङ्क्तिः सा पच्छःशस्यगता इत्युच्यते। तां पङ्क्तिं पच्छः शंसेत् । उत्तमे द्वे पदे, तयोः समासं कुर्यात् । पङ्क्तिशंसे प्राप्त इदमुच्यते। यथा 'नमोवाके प्रस्थिते' (ऋ ८, ३५, २३) इति अक्षरैः त्रिष्टुप् । [10]पादैः पङ्क्तिः पच्छःशस्यं प्राप्ता पच्छःशस्यगता[10], तां पच्छ एव[11] शंसेत् 'पङ्क्तिशंसम्' (आश्रौ ८,३,५) इति । तु-शब्दः पङ्क्तिशंसव्यावृत्त्यर्थः । 'नमोवाके'

---

१. °ननिजा° ब[2] मै पू। २. वेतिष्ट(°ष्ठु ब[1])ति ब[1,2] पू; वतिष्ठति मै। ३. तु. आश्रौ ८, ४, १२। ४-४. आ(अ ब[1,2])ग्निमारुतेषु मूको। ५. नास्ति मूको। ६. विशोयं ब[1,2]; विशोधे यां (°यं मै) मै पू। ७. तु. आश्रौ ४,१३,७। ८. तु. आश्रौ ६,५,१४-१५। ९. कल्पते मूको। १०-१०. स्व-स्व पच्छःशस्य पच्छस्यगता ब[1]; पादैः पङ्क्तिः सति अक्षरैः उष्टुं ह्य पच्छः शस्यं प्राप्ता पच्छः शस्य गता ब[2]; पादैः पङ्क्ति. सति अक्षरैः त्रिष्टुत्पद्यच्छस्यं प्राप्ता पच्छःशस्यगता मै; पादैः·····प्ता पच्छःशस्यगता पू। ११. एवं मूको।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

(ऋ ८, ३५, २३) इत्येका एवोदाहरणम्। 'नमोवाके' इति पच्छ इत्युच्यमानेऽपि तावन्त्येवाक्षराणि। 'पादैरवसायार्द्धर्चान्तैः सन्तानः' इति वचनादुत्तरेऽर्द्धर्चे पादे पादे द्विरवसाय अर्द्धर्चान्तेन सन्तानः प्राप्तः, तस्मात् 'समासमुत्तमे पदे' इत्याह ॥ १३-१४ ॥

[पूर्वोक्ताद् भिन्नानां छन्दसां पच्छःशंसनम्]

पच्छोऽन्यत् ॥ १५ ॥

उक्ताद् अन्यच्छन्दः पच्छः शंसेत्। त्रैष्टुभात् प्राक् यानि, तेषामर्द्धर्चमुक्तम्[२]। अचतुष्पदानां शस्यं वक्ष्याम इत्युक्तम्[३]। त्रैष्टुभाद्याः[४] याः चतुष्पदास्ता[५] अवशिष्टास्तासां पच्छोऽन्यद् इति वचनात् पच्छःशस्यं [५]विधीयते। त्रिष्टुब्जगतीनामेव अतिच्छन्दसामपि चतुष्पदानां पच्छोऽन्यद् इति वचनात् पच्छःशस्यं[५] प्राप्तं[६] 'न तु पच्छोऽन्याः त्रिष्टुब्जगतीभ्यः' (आश्रौ ६, ५, १६) इति प्रतिषिद्धं, तस्मात् त्रिकद्रुकीयासु पच्छःशस्यं विधीयते। पच्छ इत्युक्ते पादशः अवसानम् 'अर्धर्चान्तैः[७] सन्तानः' इत्येवमिदमुच्यते शंसनलक्षणम् ॥ १५ ॥

[पच्छःशंसनविधिः]

पादैरवसायार्धर्चान्तैः सन्तानः ॥ १६ ॥

पादैरवसाय सर्वासु ऋक्षु अर्धर्चाद्यैः[८] पादैरवसानं कृत्वा अर्द्धर्चान्तैः पादैः उत्तरेण सह सन्तानः, एतत्पादशस्यलक्षणम् ॥ १६ ॥

[धाय्यासंज्ञानामृचां निर्देशः]

अग्निर्नेता त्वं सोम क्रतुभिः पिन्वन्त्यप इति धाय्याः ॥ १७ ॥

'अग्निर्नेता' (ऋ ३,२०,४), 'त्वं सोम क्रतुभिः' (ऋ १,९१,२), 'पिन्वन्त्यपः' (ऋ १,६४,६) इति एतास्तिस्रः ऋचः[९] धाय्यासंज्ञा भवन्ति ब्राह्मणस्पत्यादनन्तराः। 'धाय्याः' (आश्रौ ५,१८,११) इत्युक्ते एताः प्रत्येतव्याः ॥ १७ ॥

[मरुत्वतीयप्रगाथकथनम्]

प्र व इन्द्राय बृहत इति मरुत्वतीयः प्रगाथः ॥ १८ ॥

१-१. समास उत्तमेन मूको। २. तु. आश्रौ ५,१४,९; १०। ३. त्रैष्टुभादि मूको। ४. चतुष्पदान्ता मै। ५-५. नास्ति ब[1]। ६. प्राप्तं न तु शस्यं प्राप्तं ब[1,2] मै; वृटितम् पू। ७. ऋगन्ते ब[2] मै; ऋगन्तो ब[1]; वृटितम् पू। ८. °चाद्याः मै। ९. नास्ति ब[1]।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

'प्र व इन्द्राय बृहते' (ऋ ८,८९,३-४) इति अयं प्रगाथः 'मरुत्वतीयसंज्ञः धाय्याभ्योऽनन्तरो भवति'। मरुत्वतीय इत्युक्त एतस्य ग्रहणम्। प्रगाथवचनाद् द्वचृचो भवति ॥ १८ ॥

[शस्यसूक्तकथनं तन्मध्ये च मरुत्वतीयाया निविदः परिधानम्]

जनिष्ठा उग्र इति ॥ १९ ॥

एकभूयसीः शस्त्वा मरुत्वतीयां निविदं दध्यात् सर्वत्र ॥ २० ॥

'जनिष्ठा उग्रः' (ऋ १०, ७३) इति एतस्य सूक्तस्य एकयर्चा भूयसीः एकयाऽधिकाः [२]शस्त्वा। 'अर्द्धाः परिशिष्य मध्ये निविदं दधाति' (ऐब्रा ३,१९) इति श्रुतिः। एकादशर्चस्य सूक्तस्य षट् शस्त्वा[३] निविदं दध्यात् सर्वत्र एवं सर्वत्र सर्वक्रतुषु ॥ १९-२० ॥

[माध्यन्दिने सवने विषमसङ्ख्यकऋक्षु मरुत्वतीयसूक्तेषु पूर्वोक्तव्यवस्थाया विधानम्]

एवमयुजासु माध्यन्दिने ॥ २१ ॥

यथा इह एकभूयसीः[१] शस्त्वा, एवम् अन्यत्रापि सर्वत्र[४]। अयुजासु यत्र विशेषमर्द्धर्चं सूक्तं भवति, एकादशर्चे वा तत्रैकभूयसीरेवं[५] शस्त्वा निविदं दध्यात्। माध्यन्दिने मरुत्वतीय एव। प्रकृतेरग्निष्टोमस्याधिकाराद् सर्वत्रेति [६]सर्वक्रत्वं (?क्रतुषु) एकम्[६] इति एकभूयस्त्वं न विद्यते। [७]सर्वत्रैवम्† इत्यविशेषवचनादयुजासु युजासु च एकभूयसीरिति प्राप्ते एवमयुजासु इत्युच्यते[७] सर्वत्रैवम्। मरुत्वतीय एव प्राप्ते निष्केवल्येऽपि प्राप्त्यर्थं माध्यन्दिन इत्याह ॥ २१ ॥

[तृच एकां युग्मासु चार्धसंख्यां शस्त्वा निविद्धानम्]

एकां तृचे। अर्धा युग्मासु ॥ २२ ॥

तृचे निविद्धानीय एकां शस्त्वा निविदं दध्यात्, यथा [८]बृहस्पतिसवे। 'एवमयुजासु'[८] (आश्रौ ५, १४, २१) इति प्राप्ते इदमुच्यते। युग्मासु समासु अर्द्धाः शस्त्वा निविदं दध्यादष्टर्चे दशर्चे वा ॥ २२ ॥

[तृतीयसवन एकामृचं शिष्ट्वा निविद्धानम्]

एकां शिष्ट्वा तृतीयसवने ॥ २३ ॥

१-१. नास्ति मै। २-२. नास्ति ब[1]। ३. भूयसी मै। ४. यत्र मूको। ५. तत्रैव भू° मूको। ६-६. सर्वक्रतत्वा एकाम् मै। ७-७. नास्ति मै। †. तु. आश्रौ ५,१४,२०; २१। ८-८. °तिसत्व एव यु° ब[2] मै पू।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

सूक्तस्य एकाम् ऋचं शिष्ट्वा तृतीयसवने निविदं दध्यात् । माध्यन्दिनाधिकारात् तृतीयसवन इत्युच्यते । 'पुरस्तादुक्थानां प्रातःसवने धीयन्ते, मध्यतो मध्यन्दिने, अन्ततस्तृतीयसवने' (ऐब्रा ३, १०) इति ब्राह्मणम् ॥ २३ ॥

[निविद्धानविधिकथनम्]

अक्षिणी मजानः परिदध्याद् ध्यायन्नेन आत्मनः ॥ २४ ॥

अक्षि च अक्षि च अक्षिणी मृजानः अङ्गुष्ठेन अङ्गुलीभिः परिमृजानः[1] परिदध्याद् उत्तमयर्चा ध्यायन्नेन आत्मनः होता आत्मन एनः पापं ध्यायन् परिदध्यात् । कर्मकरणेषु मन्त्रान्ते च कर्म क्रियते । शस्त्रादिषु तु यत्र कर्मोपदिश्यते मन्त्रलिङ्गमुपलक्ष्य कर्म क्रियते मन्त्रस्याकर्मार्थत्वात् । तस्माद् अक्षिणी मृजानः परिदध्याद् इत्युक्ते कृत्स्नायामृचि शस्यमानायां परिमार्जनं क्रियते । लिङ्गमुपलक्ष्यैव क्रियते । 'पूर्धि चक्षुः' (ऋ १०, ७३, ११) इत्युपलक्ष्य परिमार्जनं कुर्यात् । 'अप ध्वान्तमूर्णुहि' (ऋ १०, ७३, ११) इत्युपलक्ष्य एनो ध्यायेत् । एवं हि ब्राह्मणे 'अप ध्वान्तमूर्णुहीति येन तमसा प्रावृतो मन्येत, तन्मनसा गच्छेत्' इति । 'पूर्धि चक्षुरिति चक्षुषी मरीमृज्येत' (ऐब्रा ३, १९) इति । यदुक्तं मृजानः परिदध्यादिति, तत्त्रिष्वपि वचनेषु प्राप्त्यर्थम् । न[2] [3]कृत्स्नां तामुपदिशति[3] । आत्मानुपूर्ववचने प्रयोजनम्—'मुमुग्ध्यस्मान्निधयेव बद्धान्' (ऋ १०, ७३, ११) इत्यत्रापि आत्मानं मन्त्रेण यदुपदिष्टं तद्[4] ध्यायेत् । अपध्वान्तमिति वचनाद् आत्मसंस्कारोऽयं न यजमानस्य ॥ २४ ॥

[पूर्वोक्तनिविद्धानविधेरन्यत्रापि प्रयोज्यत्वम्]

अन्यत्राप्येतया परिदधदेवम् ॥ २५ ॥

अन्यत्रापि अन्येष्वपि क्रतुषु एतया ऋचा परिध्यानं कुर्वन् परिदधदेवम् अक्षिणी परिमृज्येत[5], आत्मन एनश्च ध्यायेत् । प्रकृतौ परिधानीयानां यो धर्मः विकृतौ परिधानीयान्यत्वेऽपि स प्राप्तस्तस्मादाह—एतया परिदधदेवं कुर्यान्नान्यया[6] इति । कस्मात् ? अन्यास्वेतानि लिङ्गानि न[7] विद्यन्ते । अपि-शब्दः समुच्चयार्थः । प्रकृतौ विकृतौ[8] च । एतया परिदधदिति वचनाद् अन्यया[9] परिधाने अयं धर्मो न क्रियते ॥ २५ ॥

---

१. प्रपरिमृजानः (°जन् ब[2]; °जान् मै) मूको । २. नास्ति ब[2] । ३-३ कृत्स्नायामुप° मूको । ४. नास्ति मूको । ५. मृज्येत मूको । ६. नान्यथा मूको । ७. नास्ति ब[1] । ८. नास्ति पू । ९. अन्यथा ब[1] ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

[शस्त्रं शस्त्वा जपकरणं याज्याविधानं च]

उक्थं वाचीन्द्राय शृण्वते त्वेति शस्त्वा जपेत् । ये त्वाहिहत्ये मघवन्नवर्धन्निति याज्या ॥ २६ ॥

उक्थं वाचीन्द्राय शृण्वते त्वा इति एतं जपं शस्त्रं शस्त्वा जपेत् । शस्त्वावचने उक्तं[1] प्रयोजनम् । 'ये त्वाऽहिहत्ये मघवन्नवर्धन्' (ऋ ३,४७,४) इति इयम् ऋक् याज्या ॥ २६ ॥

॥ इति पञ्चमे चतुर्दशं खण्डम् ॥

---

१. तृ. आश्रौ ५, ९, २६ ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

अथ पञ्चमेऽध्याये पञ्चदशः खण्डः

[निष्केवल्यशस्त्रविध्युपक्रमः]

निष्केवल्यस्य ॥ १ ॥

मरुत्वतीयादनन्तरं निष्केवल्यं नाम शस्त्रम् । तस्य विधिर्वक्ष्यते । 'आ न इन्द्र इति निष्केवल्यम्' (आश्रौ ७,५ १८) इत्युक्ते एतत् प्रत्येतव्यम् ॥ १ ॥

[रथन्तरपृष्ठे साम्नि सति स्तोत्रियानुरूपसंज्ञयोः प्रगाथयोः कथनम्]

अभि त्वा शूर नोनुमोऽभि त्वा पूर्वपीतय इति प्रगाथौ स्तोत्रियानुरूपौ यदि रथन्तरं पृष्ठम् ॥ २ ॥

'अभि त्वा शूर नोनुमः' (ऋ ७, ३२, २२-२३), 'अभि त्वा पूर्वपीतये' (ऋ ८,३,७-८) इति एतौ प्रगाथौ स्तोत्रियानुरूपसंज्ञौ भवतः, यदि रथन्तरं साम पृष्ठं भवति । 'निष्केवल्यं यत् साम, तत् पृष्ठसंज्ञं भवति । पादग्रहणाद् ऋचौ प्राप्ते प्रगाथग्रहणाद् द्वयृचौ भवतः स्तोत्रियानुरूपसंज्ञाकरणादाहावादीनां प्राप्तिः । यदीति वचनादन्यदपि साम पृष्ठं भवति बृहद्' ॥ २ ॥

[बृहत्पृष्ठे साम्नि स्तोत्रियानुरूपसंज्ञयोः प्रगाथयोः कथनम्]

यद्यु वै बृहत् त्वामिद्धि हवामहे त्वं ह्येहि चेरव इति ॥ ३ ॥

[1]यदि वै यदि प्रकृतौ ज्योतिष्टोमे बृहत् साम पृष्ठं भवति[1] । 'त्वामिद्धि हवामहे' (ऋ ६, ४६, १-२), 'त्वं ह्येहि चेरवे' (ऋ ८,६१,७-८) इति प्रगाथौ, स्तोत्रियानुरूपसंज्ञौ भवत इत्येतदनुवर्तते । यदीति वचनाद् बृहत्पृष्ठो वा भवति रथन्तरपृष्ठो वा । [2]उ वै इत्येतद्[2] ब्राह्मणवाक्यमेतत्, तस्माद् वाक्यपूरणार्थावेतौ । उभयत्र यदीति वचनं विकृत्यर्थम्, यथाम्नातं तथैव भवति । बृहत्पृष्ठे बार्हतं द्रष्टव्यम् । बार्हतस्य ज्योतिः, श्यैतं ब्रह्म साम, यथा अभिप्लवस्य द्वितीये ॥ ३ ॥

[प्रगाथानां शंसनविधिकथनम्]

प्रगाथा एते भवन्ति ॥ ४ ॥

१-१. नास्ति ब[1] । २-२. उवैरित्येव ब[1]; उवैरित्यते° ब[2] मै; वृटितम् पू ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

[1]स्तोत्रियानुरूपा इत्यधिकृताः, तान्निर्दिशति। एते य अधिकृताः स्तोत्रियाश्च अनुरूपाश्च[†]। एते प्रगाथाः च यत्र भवन्ति[1], तेषां शस्योपायं वक्ष्याम उत्तरैः सूत्रैः। प्रगाथाधिकारात् प्रगाथानां शस्योपायो वक्ष्यते। [2]तृचानामपि तृचाधिकारे शस्योपायं वक्ष्यते[2] पर्यायेषु। एत इति स्तोत्रियानुरूपान्[3] प्रगाथान्निर्दिशति। तस्मात् सामप्रगाथादिषु वक्ष्यमाणः शस्योपायो[4] न भवति। एत इति वचनाद् अधिकृतानामेव प्राप्तो भवतीत्याह। तस्मान्निष्केवल्यादन्यत्रापि यत्र भवन्ति, तत्र वक्ष्यमाणः शस्योपायो भवति यज्ञायज्ञीयादिषु[5] ॥ ४ ॥

[प्रगाथानां द्वे ऋचौ तिस्रस्कृत्वा शंसनम्]

तान् द्वे तिस्रस्कारं शंसेत् ॥ ५ ॥

तान् प्रगाथान्[6] द्वे सत्यौ[7] तिस्रस्कृत्वा[8] तिस्रस्कारं शंसेत्। यथाम्नातानाम् ऋचां शंसने प्राप्ते इदमुच्यते। कथं तिस्रः क्रियन्ते इति तदुत्तरैः सूत्रैर्वक्ष्यते। कस्मात् तिस्रः क्रियन्ते। 'तृचाः स्तोत्रियानुरूपाः' (आश्रौ ५, १०, १८) इति सर्वत्र वचनम्। उत्तरैरेव सूत्रैः सिद्ध इदं न वक्तव्यम्। यत्र पादाभ्यासो न विद्यते तदर्थमिदं द्रष्टव्यम्। द्विपदोत्तराकारे द्वे तिस्रस्कारम् इति वचनाद् एकां बृहतीं कुर्यात्, द्वे च द्विपदे। द्वे तिस्रस्कारमिति वचनाद् आनुष्टुभानां प्रगाथानाम् इह अनधिकारः। विशोविशीये[9] काले वाश्वरथमिति[10] तेषां वाधिकारे शस्योपायं वक्ष्यति 'पान्तमा वः' (ऋ ८, ९२, १) इत्येवमादीनाम्। द्वे[11] तिस्रस्कारमित्यत्र प्रगाथे[12] अनन्तरस्यां द्विर्वचने प्राप्ते इदमुच्यते ॥ ५ ॥

[बार्हते प्रगाथे चतुर्थषष्ठयोः पादयोर्द्विरभ्यासकरणम्]

चतुर्थषष्ठौ पादौ बार्हते प्रगाथे पुनरभ्यसित्वोत्तरयोरवस्येत् ॥ ६ ॥

चतुर्थश्च षष्ठश्च चतुर्थषष्ठौ पादौ बार्हते प्रगाथे, न काकुभे[13], पुनरभ्यसित्वा पुनरुक्त्वाऽनन्तरयोः पञ्चमसप्तमयोः पादयोः अवस्येत्। एवं कृते एका बृहती द्वे च ककुभौ संपद्यन्ते। तत् ककुबुत्तराकारम् इत्युच्यते। उत्तरे 'काकुभेषु' (आश्रौ ५, १५, ८) इति वचनात् सर्वमिदं विधानं काकुभेष्वेव प्राप्तम्, तस्मादाह—बार्हत इति। प्रगाथग्रहणाद् बार्हते तृचेऽभ्यासो न क्रियते। पुनरिति वचनाद् द्विरभ्यासः। प्रगाथा अर्धर्चाः (द्र० आश्रौ ५, १४, ८) इति

१-१. नास्ति मै। †. नास्ति मूको। २-२. नास्ति मै। ३. स्तोत्रियाभूतान् मूको। ४. तस्योपायो मूको। ५. यज्ञायज्ञियादिषु ब[1]; यज्ञीयादिषु मै। ६. नास्ति ब[1]। ७. ततः ब[1]; सतः ब[2] मै पू। ८. तिस्रकृत् (°कृ ब[1]; °वृत् मै) मूको। ९. विशे विशे ये मै। १०. चाश्वर° ब[2] मै पू। ११. ते द्वे ब[1] मै पू। १२. प्रागाथे ब[1]। १३. ककुभे ब[1] मै पू; ककुभो ब[2]।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

वचनादर्धर्चविसाने[1] प्राप्ते उत्तरयोरवस्येद् इत्युच्यते । 'यथास्तुतम्' (आश्रौ ५, १५, १४) इति वचनात् प्राप्ते सूत्रारम्भोऽवसानान्तरोपदेशार्थः ॥ ६ ॥

[बृहतीकरणे चतुर्थषष्ठयोः पादयोर्द्विरभ्यासकरणम्]

बृहतीकारं चेत् तावेव द्विः ॥ ७ ॥

बृहतीकारं चेत् सर्वा [2]बृहत्यः क्रियन्ते बृहतीकारं चेत्, †छन्दोगाथासु यः†। तावेव चतुर्थषष्ठौ पादौ पुनर्द्विरभ्यसित्वा तयोरेवावस्येन्नोत्तरयोः[2]। 'बृहतीकारमितरेषु पृष्ठेषु' (आश्रौ ५,१५ ११) इत्युक्ते एतत् प्रत्येतव्यम् । चेदिति वचनादनित्यं काकुभोत्तर्यमेव[3] बृहद्रथन्तरयोः नित्यम् । अस्मादारम्भात् छन्दोगवशादेतौ कल्पौ, न स्ववशादिति दर्शयति[4]। तावेवेति एवकारकरणात् तयोरेव द्विरभ्यासो, नोत्तरस्मिन् सूत्रे द्विरभ्यासोऽनुवर्तते। 'उत्तरयोरवस्येत्' (आश्रौ ५,१५,६) इत्यधिकारोऽनुवर्तते । प्रगाथा अर्धर्चाः (द्र० आश्रौ ५,१४,८) इति वचनाद्[5] बृहतीकारे उत्तरयोरवसानं क्रियते ॥ ७ ॥

[काकुभेषु तृतीयपञ्चमयोः पादयोः पुनरभ्यासकरणम्]

तृतीयपञ्चमौ तु काकुभेषु ॥ ८ ॥

तृतीयश्च पञ्चमश्च तृतीयपञ्चमौ तु[6] पादौ काकुभेषु, पुनरभ्यसित्वा उत्तरयोरवस्येत् । एवं कृते सर्वाः ककुभो भवन्ति । तु-शब्दः चतुर्थषष्ठयोर्व्यावृत्त्यर्थः । 'पुनरभ्यसित्वोत्तरयोरवस्येत्' (आश्रौ ५, १५, ६) इत्यनुवर्तमाने बृहतीकारविधानं तु एवकारकरणात् तत्रैव भवति, नानुवर्तते । बार्हताधिकारात् काकुभेष्वित्याह । 'वयमु त्वा' (ऋ ८, २१, १) इत्येवमादिकाकुभाः । एवं[7] प्रगाथाभ्यास इत्युच्यते । अस्मादन्यथाभ्यासः प्रगाथेषु क्रियते, यथा वैखानसे[8] ॥ ८ ॥

[प्रत्यादानादेरुत्तरायामृचि गणनीयत्वम्]

प्रत्यादानाद्युत्तरा ॥ ९ ॥

प्रत्यादानाच्चोत्तरायां[9] पादयोः आम्नायवचनं प्रति पुनरादानं प्रत्यादानम् । प्रत्यादानमादिं[9] कृत्वा प्रत्यादानादि उत्तरा ऋग् भवति । 'द्वे तिस्रस्कारम्'

---

१. आर्थिकवचनमेतत्; तु. आश्रौ देवव्रातभाष्य ५,१४,८ । २-२. नास्ति ब[1] । †-†. छन्दोगा यास्तु यः मै पू । ३. काकुमो भू(°र्भू ब[2])र्यमेव मूको । ४. नास्ति ब[2] । ५. तु. आश्रौ देवव्रातभाष्य ५,१४,८ । ६. नास्ति मूको । ७. वैश्वानसे(°स मै) ब[2] मै; त्रुटितम् पू । ८. °नाच्चतरां ब[1] मै पू । ९. °दानमादि ब[1] मै पू ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

(आश्रौ ५, १५, ५) इत्युक्तम्। तासामाद्यन्तप्रज्ञानार्थमिदम्[1] उच्यते[2]। एवं ज्ञाने ऋगन्ते[3] प्रणवो भवति। प्रत्यादाने ऋगादौ पुनर् अवस्थिते[4] 'ईशानमिन्द्र तस्थुषोऽम्'[5] (ऋ ७,३२,२२) इति। यद्युत्तरा ऋगादिर्न भवति प्रणवो न प्राप्नोति। 'त्रिमात्रं मकारान्तं कृत्वोत्तरस्या अर्द्धर्चेऽवस्येत्' (आश्रौ १, २, १०) इति वचनात् प्रत्यादानस्य ऋगादित्वात् पुनः पादान्ते प्रणवः न[6] क्रियते। अनृगन्तत्वात् 'ईशानम्[7] इन्द्र तस्थुषो न त्वा वाँ' (ऋ ७,३२,२२-२३) इति। अन्यथा प्रणवः पुनः प्राप्नोति 'ऋगन्तमोङ्कारम्' (आश्रौ १,२,१०) इति वचनात्। एवं ककुबुत्तराकारं वाऽधिकृतमुपदिशति ॥ ९ ॥

[बृहद्रथन्तरपृष्ठेष्वहःस्विन्द्रनिहवब्राह्मणस्पत्यानां पूर्ववत् शंसनम्]

एवमेतत्पृष्ठेष्वहःस्विन्द्रनिहवब्राह्मणस्पत्यान् ॥ १० ॥

एवम् इत्येतेषु बृहद्रथन्तरपृष्ठेषु अहःसु [8]एतानि पृष्ठानि एषु[9] एतत्पृष्ठानि तेषु एतत्पृष्ठेष्वहःसु[10]। यथा पृष्ठस्य शस्यं ककुबुत्तराकारं बृहतीकारं [8]वा एवम् इन्द्रनिहवब्राह्मणस्पत्यान् प्रगाथान् छन्दोगानां ककुबुत्तराकारे ककुबुत्तराकारं बृहतीकारं[8] इन्द्रनिहवश्च ब्राह्मणस्पत्यश्च प्रगाथः। इन्द्रनिहवब्राह्मणस्पत्यान् प्रगाथानेवं पृष्ठयोनिन्यायेन शंसेत् ज्योतिष्टोमे चतुर्विंशे अभिप्लवे च। 'कस्माद्[10] एतौ प्रगाथावस्तुतौ सन्तौ पुनरादायं शस्येते' (ऐब्रा ३, १७) इति श्रुतिः। एतत्पृष्ठेष्विति वचनात् [11]पृष्ठवशात् शस्यन्ते, बहुवचनं विकृत्यपेक्षम्[11]। यत्र पृष्ठे ककुबुत्तराकारं बृहतीकारं वा न विद्यते तत्र कथं प्रगाथौ शंस्तव्याविति 'एकत्रिकेण'[12] (आश्रौ ९, ५, १३) इत्येतेन अभ्यासः कार्यः। 'पुनरादायं शस्येते' (ऐब्रा ३, १७) इति श्रुतिः। तत्र बृहतीकारमेव शंस्तव्यौ, यथा 'बृहद्रथन्तरयोस्तृचयोः' (आश्रौ ५, १५, १२)। पृष्ठस्य ककुबुत्तरीये सति प्रगाथा अपि ककुबुत्तरीया भवन्ति। अन्यत्र बृहतीकारमेवोपदिष्टम्। एवमेतत् पृष्ठेष्विति[13] पृष्ठवशाच्छस्यमुक्तम्। अन्येषु पृष्ठेषु बृहतीकारं ककुबुत्तराकारं वा विकल्पे इदमुच्यते ॥ १० ॥

[वंरूपादीनां पृष्ठानां बृहतीकारशंसनम्]

बृहतीकारमितरेषु पृष्ठेषु ॥ ११ ॥

---

१. °ज्ञापनार्थं मै पू। २. अनूच्यते ब[2]। ३. ज्ञानं गते मै। ४. व्यवस्थिते (°ता मै) ब[2] मै पू। ५. तस्थुषमीशानम् मूको। ६. नास्ति मूको। ७-७. तानि मूको। ८. तेष्वेव पृ° मूको। ९-९. नास्ति ब[1] मै। १०. तस्मात् मूको। ११-११. पृष्ठे वंशस्यं तस्य वंशबहुवचनविवृत्यपेक्षम् मै; पृ···कृत्यपेक्षम् पू। १२. एकत्रि(°तृ मै)केत्ये° मूको। १३. एवं पृष्ठे° मूको।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

बृहद्रथन्तराभ्यामितराणि वैरूपादीनि पृष्ठानि, तेषु [1]पृष्ठस्थाने क्रियमाणेषु[1] इन्द्रनिहवब्राह्मणस्पत्यान् प्रगाथान् बृहतीकारमेव शंसेत्, न विकल्पः, पृष्ठ्ये तृतीयादिषु[2] विश्वजिति स्वरसामसु विषुवति । पुनः पृष्ठग्रहणात् षड्भ्योऽन्येष्वपि महाविवाकीर्त्यादिषु इति प्राप्ते समासेन वक्तव्यम् इतरपृष्ठेषु इति । न[3] समासः कृतः । इतरेषां समासो न दृश्यते वैरूपपृष्ठे[4] वैराजः[5] इति । तस्मादितरेषु पृष्ठेषु इति समासो न कृतः । यत्र बृहद्रथन्तरे इतराणि च पृष्ठानि भवन्ति, तत्र कथम् । यथा महाव्रते, 'चतस्रः सतीः षड् बृहतीः करोति' (ऐआ ५,२,२) इति वचनात् ॥ ११ ॥

[तृचस्थयोर्बृहद्रथन्तरयोर्बृहतीकारं शंसनम्]

बृहद्रथन्तरयोश्च तृचस्थयोः ॥ १२ ॥

बृहतीकारं बृहद्रथन्तरयोः भवति । बृहदिन्द्रनिहवब्राह्मणस्पत्यानामपि बृहतीकारमेव । अप्तोर्यामे तु ककुबुत्तराकारम् । बृहद्रथन्तरवशात् प्रगाथानां बृहतीकारं पृष्ठकारितं न भवति । कस्मात्[6] । सर्वपृष्ठेषु बृहतीकारोपदेशाद् । बृहद्रथन्तरयोरपि तृचस्थयोः ककुबुत्तर्यं तु पृष्ठकारितम् । बृहद्रथन्तरयोः ककुबुत्तर्यमेव भवति । नाभ्यासमेव[7]···न्विते होतुर्होत्रकाणां च प्रगाथेषु समानशस्यं[8] कथं स्यादिति । तस्मादप्तोर्यामे ककुबुत्तराकारमेव बृहतीकारं, वैराजस्य प्रधानत्वाद् । विश्वजिदतिदेशाद् वैराजं प्रधानम्, यद्यत्र ऐकाहिकमपि वासवस्तूयमाने (?) शिल्पानि न प्राप्नुवन्ति । तस्माद् वैश्वजितमेवात्र ष्टव्यं प्रधानम् । ऐकाहिकं तु[9] गर्भार्थमुपादीयते । अगर्भाकारे[10] तन्न प्रयुज्यते । बृहद्रथन्तरयोश्च यथा बृहद्रथन्तरे पृष्ठस्थे तृचस्थाने भवतः । तयोश्च तृचस्थयोः सतोः इन्द्रनिहवब्राह्मणस्पत्यानां ककुबुत्तराकारं वा । यत्र पुनः बृहद्रथन्तरे तृचस्थे भवतः स्वरसामसु दशमेऽहनि च ॥ १२ ॥

[होत्रकाणां शंसने विशेषविधिकथनम्]

होत्रकाश्च येषां प्रगाथाः स्तोत्रियानुरूपाः ॥ १३ ॥

होत्रा यथा इन्द्रनिहवादयः कृताः, तथा होत्रकाः कुर्युः । प्रगाथाः स्तोत्रियानुरूपाः । येषां तृचास्ते यथास्तुतं शंसेयुः । प्रगाथास्तु अयथास्तुतं शस्यन्ते । अस्मादारम्भान्न होतुः स्तोत्रियादधिका होत्रकाः (?) इति शांवव्यश्रुतिः[11] । तस्मात्

१-१. पृष्ठ(पृष्ठे पृष्ठे मै)स्थानक्रिय° मूको । २. पृष्ठे मूको । ३. नास्ति मूको । ४. वैराजपृष्ठो ब[2] मै पू । ५. तु. शांश्रौ १६,६,१९ वैरूपपृष्ठे वैराजात् । ६. तस्मात् मै । ७. पाठः सर्वमातृकासु त्रुटितः । ८. °नशंस्यं ब[2] मै पू । ९. नास्ति ब[1] । १०. °कारं ब[1]; °का··· पू । ११. शावाकश्रुतिः ब[1] मै पू; शावकश्रुतिः ब[2] ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

समानविधानं[1] कल्पते—होतुश्च होत्रकाणां च प्रगाथेषु यथास्तुतमिति। होतुरधिकाराद् होत्रका इत्याह। च-शब्दः अधिकारसमुच्चयार्थः। 'एवमेतत्-पृष्ठेष्वहःसु' (आश्रौ ५, १५, १०), 'बृहतीकारमितरेषु' (आश्रौ ५, १५, ११), 'बृहद्रथन्तरयोश्च तृचस्थयोः' (आश्रौ ५, १५, १२) इति। 'येषां प्रगाथाः' (आश्रौ ५,१५,१३) इति वचनात् प्रगाथा एव अयथास्तुतं शस्यन्ते। येषां तु तृचास्ते यथास्तुतमेव। तृचानां शस्योपायविधानार्थं प्रगाथग्रहणादन्येषां प्रगाथानामेष विधिर्भवति, प्राप्तं तु यथा इन्द्रनिहवादीनाम्। अनुरूपग्रहणात् स्तोत्रियवदनुरूप-शस्यमुपदिष्टं[2] भवति, अप्राप्तं च। 'यथास्तुतम्' (आश्रौ ५, १५, १४) इति वचनात् स्तोत्रियेणानुरूपश्च छन्दआदीनि व्याख्यातानि च, शस्योपायः॥ १३॥

[अन्येषां प्रगाथानां स्वस्वच्छन्दोऽनुरूपं शंसनम्]

सर्वमन्यद् यथास्तुतम्॥ १४॥

होत्रकाणां प्रगाथाः स्तोत्रियानुरूपाः पृष्ठवशादयथास्तुतं शस्यन्ते। तेभ्यः अन्यत् सर्वं यद्धोतुर्द्रव्यं यच्च होत्रकाणां, सत्सर्वं यथास्तुतं [3]यथा तत्[3] छन्दोगैः स्तुतं, तथा शंसेत्। यच्छन्दः सम्पादितं तैस्तदेव संपाद्यं, यथा—यज्ञायज्ञीयं वारवन्तीयम्। 'त्वं नश्चित्र' (ऋ ६,४८,९; कौ ४१; १६२३) इति बृहतीकारं वा। 'सुरूपकृत्स्नुमूतये' (ऋ १, ४, १) इति जगतीकारम्। 'य एक इद् विदयते' (ऋ १,८४,७; कौ ३८९, १३४१, शौ २०, ६३, ४; या ४,१७) इति बृहत्यः क्रियन्ते। [4]'गायन्ति त्वा' (ऋ १,१०,१) इति[4] पङ्क्त्यः क्रियन्ते। यथास्तुतोपदेशस्त्वधिकारमपेक्षते[5]। छन्दोऽन्यत्वमधिकृतं बृहतीकारं ककुबुत्तराकारम् इति। तस्माद् यत्रान्यच्छन्दः न संपद्यते, [6]तत्रैव †स्तुतं यत्राऽन्यच्छन्दः-सम्पादनार्थः†[6]। [7]त्रिकद्रुकीयासु यत्राभ्यासे क्रियमाणे अन्यच्छन्दः न सम्पद्यते[7], न तत्र यथास्तुतमिति। यथा अक्षरं [8]सप्तस्वनु द्विचिपादासु[8] (?) 'अग्ने त्वं नः' (ऋ ५,२४,१) इति[9] इहैव छन्दस्याधिकारः स्यात्। ऋचामानुपूर्व्यमनधिकृतम्। 'एतस्य समाम्नायस्य' (आश्रौ १, १, १) इति वचनाद् यथासमाम्नातमेव। दृष्टश्चाम्नायानुग्रहः 'प्र तत्ते अद्य' (ऋ ७,१००,१५) इति महानाम्नीष्वनुशंसति ऊनाधिकानि। तासु यथानिशान्तवचनाद्[10] यथाम्नातं शस्यन्ते। तृचेनानुकर्तव्या[11]। स्तोत्रियस्य छन्दोगप्रत्ययत्वाद् यथा 'इन्द्रमिद् गाथिनो बृहत्' (ऋ १, ७, १) इति

---

१. °विधानकं ब[1]; समानं वि° मै। २. °नुरूपाश° मूको। ३-३. तथास्तु सत् मूको। ४-४. गायतृते ब[1]; गायत्रतेति ब[2]; गायतृतेति मै पू। ५. °मवेक्षते ब[1]'[2] मै; वृत्तिम् पू। ६-६. नास्ति ब[2] मै। †-†. स्तुतयावान्य° ब[1]। ७-७. नास्ति ब[2] मै। ८-८. सप्त(स ब[2]; सम मै)स्वनु द्विचि (°चि ब[1]) पादासु मूको। ९. नास्ति ब[1]। १०. तु. आश्रौ ७,१२,१०-१४। ११. तृचानाद्यानु° ब[1]; तृचेनाह्यानु° ब[2] पू।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

चतुर्थी तृतीया। एवमनेन न्यायेन यत्र छन्दोन्यत्वम् उपपद्यते तत्र[1] तथा[2] शंसेद् होता चेति[3] होत्रकाणाम् अधिकारात्। सर्वग्रहणं होतुरपि प्राप्त्यर्थम्। अन्यदिति वचनाद् माध्यन्दिने होत्रकाणां प्रगाथाः यथास्तुतं[4] शस्यन्ते। वैश्वानसी[5](?) 'नकिष्टं कर्मणा नशत्' (ऋ ८,७०,३) इति जगतीकारं न शस्यते। पृष्ठवशात् ककुबुत्तराकारमेव[6]। प्रगाथानामुक्ते सर्वमन्यद्(?) यथास्तुतमिति। तस्मान्माध्यन्दिने होत्रकाणां प्रगाथेऽन्यत् सर्वं प्रगाथजातं[7] यथास्तुतमिति मत्वा तृचेष्वभ्यासं न कुर्वन्ति 'सुरूपकृत्नुम्' (ऋ १, ४, १) इत्येवमादिषु पर्यायेषु चाभ्यासविधानात्। अथवा प्रगाथा अधिकृतास् तृचा अप्यधिकृताः। पूर्वस्मिन् सूत्रे 'येषां प्रगाथाः' (आश्रौ ५, १५. १३) इति न वक्तव्यं, तृचेषु प्रगाथधर्मस्यासंभवात्। येषां प्रगाथास्तेऽयथास्तुतं[8] शस्यन्ते, येषां तृचास्ते यथास्तुतमिति। तस्मात् पृथग् जागतं [9]तृचजातं च समधिकृतम्। एवं व्याख्यायमाने श्रुत्यविरोधः। तत्सुस्तुतं[†] यदनुशस्तमिति। पाणिनीयो 'वत्सोक्षाश्वर्षभेभ्यश्च तनुत्वे' (पा ५, ३, ९१)। यदि च त्रिषु[9] यथा सोपदेशो न स्यात्। 'चतुरक्षराणि त्वच्छावाकः' (आश्रौ ६,४,६) इति वचनादष्टाक्षराभ्यासो न प्राप्नोति 'आ त्वा विशन्त्विन्दवः' (ऋ ८,९२,२२) इत्यत्र[10]। यत्तु पर्यायेष्वभ्यासविधानं तन्न[11] तृचेषु शस्योपायविधानार्थम्। यथा प्रगाथेषूक्तः शस्योपाय एवं तृचेष्वपि वक्तव्यः, परं नोच्यते[12]। अर्द्धर्चान्त एवावसानं स्यात्। पर्याये तु विधानं प्राकृततृचेष्वभ्यासस्यानधिकारात् ॥ १४ ॥

[अग्निष्टोमस्यैकाहस्य परिमितशस्यसंज्ञाकरणम्]

परिमितशस्य एकाहः ॥ १५ ॥

परिमितं परिसंख्यातं[13] शस्यं यस्य सोऽयं परिमितशस्यः, तस्य एकाहसंज्ञा। स···अग्निष्टोमः इति श्रुतिः[14]। त्रीणि च शतानि षष्टिश्च संवत्सराहानि, तावन्त्य ऋचः अग्निष्टोमशस्त्राणां, तस्मात् परिमितशस्य इत्युच्यते। आज्यादीनि द्वादश शस्त्राणि सहाभ्यासैः त्रीणि च शतानि षष्टिश्च ऋचो भवन्ति। तत्र पुरोरुचो न गण्यन्ते। [15]निविद एव ता[15] भवन्ति। 'तद् यत् पुरस्तादुक्थानां प्रातःसवने धीयन्ते' (ऐब्रा ३,१०) इति ब्राह्मणम्। अग्निष्टोम एव परिमितशस्यं भवति, नोक्थे[16], नातिरात्रे, तयोरपरिमितशस्यत्वात्। अभिव्युष्टिप्रायश्चित्ते

---

१. यत्र मै। २. यथा मूको। ३. ये चेति मै। ४. °स्तुतं तं (त ब[1]) मूको। ५. वैनसी ब[1]; व्रुटितम् पू। ६. °बुत्तरामेव मूको। ७. °थाजातं मूको। ८. °स्ते यथास्तुतं (°था श्रुतं मै) मूको। ९-९. तृचजाषु ब[1]। †. तत्सुतं ब[2] मै पू। तु. स्तुतमेव तदनुशंसति नहि तत् स्तुतं यदनुशस्तम् तांब्रा ४, ९,१३; शब्रा १२,८,३,२७। १०. शांश्रौ ९,१९,३। ११. तत्र मै; व्रुटितम् पू। १२. चोद्यते ब[1]; चोच्यते ब[1] मै पू। १३. °ख्यानं मूको। १४. तु. ऐब्रा ३,४१; शांब्रा १६,९। १५-१५. नविद एता मै। १६. नोक्ते मै; व्रुटितम् पू।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

निर्हासो विधीयते। सन्न आश्विने 'सहस्रावममोदेतोः शंसेत्' (आश्रौ ६, ५, ८) इति सहस्रादधिकमप्याश्विनं भवति। तस्मादग्निष्टोमः परिमितशस्यः। आचार्योऽपि दर्शयति—'वैकल्पिकान्यग्निष्टोमेऽहर्गणमध्यगते' (आश्रौ ७, १, १७) इति। [1]अग्निष्टोमस्य परिमितशस्यत्वात् तायमानरूपाणाम् अक्रिया† मन्यन्ते। तस्मात्[1] अग्निष्टोमस्य परिमितशस्यत्वाद् निविदतिपाते समानसंख्यानि सूक्तानि प्रयोक्तव्यानि नित्यानां स्थाने चोदितत्वात्। यानि तु प्रायश्चित्तिकानि 'मा प्र गाम' (ऋ १०,५७,१; शौ १३, १, ५९) इत्येवमादीनि, तैः परिमितशस्यविघातो भवति। श्रुतिवचनसामर्थ्यात् परिमितशस्य [2]इत्यत्र शस्यग्रहणाच्छस्त्राण्येव[2] परिमितानि भवन्ति, न प्रातरनुवाकादीनि। एकाहग्रहणात् प्राकृतः परिमितशस्यो भवति [3]न तद्विकारः[3]। प्रकृतावुक्तो विधिस्तद्विकारेष्वपि प्राप्तस्तस्मादाह—एकाह एव परिमितशस्यो न तद्विकार इति। इह एकाहग्रहणाद् विकृतावेकाह इत्युक्ते ज्योतिष्टोमस्य ग्रहणम्। 'एकाहेन शस्यं राथन्तराणाम्' (आश्रौ १०,५,२०) इति, 'अयमेवैकाहोऽतिरात्रः' (आश्रौ ११,१,२) इति च ॥१५॥

[बृहद्रथन्तरोभयसाम्नि परिमितशस्येऽनुरूपविधानम्]

स यद्युभयसामा यत्पवमाने तस्य योनिरनुरूपः ॥ १६ ॥

यः परिमितशस्यः, स यद्युभयसामा भवति, बृहच्च रथन्तरं च एकं निष्केवल्ये भवति[4], द्वितीयं[5] माध्यन्दिने पवमाने। तथा सति यत् पावमानं[6] तस्य साम्नो योनिः स्तोत्रियः 'अभि त्वा' (ऋ ७,३२,२२) इति स निष्केवल्ये अनुरूपो भवति। परिमितशस्यत्वाद् यदि योनिस्थाने शस्यपरिमाणं विहन्येत तदानुरूपमुद्धृत्य[7] योनिः शस्यते। 'त्वामिद्धि हवामहे' (ऋ ६, ४६, १) इति स्तोत्रियः[8], 'अभि त्वा शूर' (ऋ ७,३२,२२; मासं २७,३५) इत्यनुरूप इत्येवं प्रयोगो भवति। एतदपरिमितं रथन्तरे। स इत्यनुच्यमाने [9]परिमितशस्यो न[9] संबध्यते। यदीत्यनित्यभावे[10]। "य एकसामा, स नित्यः। सामनिमित्ताद्[11] उभयसामा वा भवति। क्षत्रियस्तु उभयसामा एव। अपरिमितशस्योऽपि योन्यनुरूप एव श्रुतिवचनसामर्थ्यात्। यत्पवमान इति वचनादेकपवमाने भवतीति दर्शयति। तस्य योनिरनुरूप इत्यप्राप्तं विधीयते। साम पूर्वं यासु ऋक्षु गीयमानं, सा योनिरित्युच्यते ॥ १६ ॥

१-१. नास्ति ब[1]; ···ता यजमानरू···पू। †. ता(त्वा ब[2]) यजमानरूपणाम् ब[2] मै। तु. आश्रौ ७,१,११-१५। २-२. इत्यत्र ग्रह° मूको। ३-३. न तद्विकारः ब[2] मै; तदविकारः ब[1] पू। ४. भवन्ति मूको। ५. द्वितीये मूको। ६. पव° मै। ७. तस्मादनु° मूको। ८. स्तोत्रियम् ब[1/2] मै; त्रुटितम् पू। ९-९. °शस्येन ब[1/2] पू; °मित रथन्तरे शस्येन मै। १०. °त्याभावे ब[1/2] मै; त्रुटितम् पू। ११-११. एकसमासनित्यः तामनिमित्ताद् वा ब[1/2] मै; ···निमित्ताद् वा पू।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

[अपरिमितशस्यैकाहे योनिस्थान एव योनिशंसनम्]

योनिस्थान एवैनामन्यत्र शंसेत् ॥ १७ ॥

वक्ष्यति 'ऊर्ध्वं धाय्याया योनिस्थानम्' (आश्रौ ५,१५,१८) इति। तस्मिन् योनिस्थाने एव[1] एनामिति अवधारयन्ते। एतामिति वचनादेनामिति। उभयोरपि बृहद्रथन्तरयोः पवमानगतयोः [2]सतोः योनिशंसनप्राप्तिः यतो नोपपद्यते। परिमितशस्यस्याधिकाराबन्यत्रेत्युच्यते[2] ॥ १७ ॥

[योनिस्थानकथनम्]

ऊर्ध्वं धाय्याया योनिस्थानम् ॥ १८ ॥

'योनिस्थान एवैनाम्' इत्युक्तं योनिस्थानं वक्ष्यते। 'यद् वावान' (ऋ १०,७४,६) इति धाय्या। तस्या धाय्याया ऊर्ध्वं योनिस्थानं वेदितव्यम्। पुनर्योनिग्रहणे अक्रियमाणे उभयसामलक्षणा या[3] योनिस्तस्या एवैतत् स्थानं[4] स्यात्, चतुर्विंशादिषु या योनयस्तासां स्थानम् अनुपदिष्टं स्यात्, तस्मात्, योनिस्थानमित्युच्यते ॥ १८ ॥

[अनेकयोनिशंसने सकृत् पृथग् वाऽऽह्वानविकल्पः]

अनेकानन्तर्ये सकृत् पृथग् वाऽऽह्वानम् ॥ १९ ॥

अनन्तरभाव आनन्तर्यम्। अनेकानन्तर्ये सति सकृदाह्वानं कर्तव्यं[5], पृथग् वा। यथा चतुर्विंशे सकृदाहूय स्तोत्रियाः इति सकृदाहावे प्राप्ते वैकल्पिकं पृथगाह्वानं विधीयते। सकृदाह्वानं तु प्राप्तमपि विधीयते उत्तरसूत्रहेतोः। आनन्तर्यग्रहणं च प्रगाथार्थमेव। प्रगाथानामानन्तर्ये एव सकृदाह्वानं वैकल्पिकं भवति, धाय्याव्यवाये मा भून्मरुत्वतीयेषु ॥ १९ ॥

[इन्द्रनिहवादूर्ध्वं प्रगाथानां योनिवत् सकृत् पृथग् वाऽऽह्वानम्]

एवमूर्ध्वमिन्द्रनिहवात् प्रगाथानाम् ॥ २० ॥

यथा योनीनां सकृत् पृथगाह्वानमुक्तम्, एवं प्रगाथानाम् अपि सकृत् पृथगाह्वानं भवति। ये इन्द्रनिहवादूर्ध्वं प्रगाथा वर्तन्ते। 'प्रगाथेभ्यः' (आश्रौ ५, १०, १३) इति पृथगाह्वाने सकृदाह्वानं वैकल्पिकं विधीयते। ऊर्ध्वमिन्द्रनिहवाद् इति वचनात् सकृदाह्वानपक्षे इन्द्रनिहवस्य पृथगाहावो भवति। प्रगाथग्रहणात्

---

१. नास्ति मूको। २-२. नास्ति मै। ३. नास्ति ब[1]। ४. स्थानं न मूको। ५. न क० ब[2]।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

प्रगाथेष्वेव विकल्पो, न धाय्यासु । निष्केवल्याधिकारे उक्तेषु सामप्रगाथेष्वपि भवति ॥ २० ॥

[धाय्यासामप्रगाथयोः शंसनम्]

यद् वावानेति धाय्या पिबा सुतस्य रसिन इति सामप्रगाथः ॥ २१ ॥

'यद् वावान' (ऋ १०,७४,६) इति इयमृग् धाय्यासंज्ञा अनुरूपादनन्तरा भवति । धाय्यां शंसति[1] इत्युक्ते एतां प्रतीयात् । 'पिबा सुतस्य रसिनः' (ऋ ८, ३, १-२) इति अयं प्रगाथः । द्व्यृचः सामप्रगाथसंज्ञो वेदितव्यः । धाय्याया ऊर्ध्वं भवति । 'ताभ्य ऊर्ध्वं सामप्रगाथान्' (आश्रौ ७,३,१६) इत्युक्ते एवमादयः प्रगाथा वेदितव्याः । अविशेषवचनात् सर्वसाम्नां पृष्ठस्थाने क्रियमाणानामयं सामप्रगाथो भवति । प्रकृतौ विकृतौ च यथा स्वरसामसु स्वरपृष्ठेषु[2] । 'तस्य मध्यमस्याह्नो वामदेव्यं पृष्ठम्' (आश्रौ १०,२,७) इत्यत्र वचनादन्योऽपि प्रगाथो भवति । 'उभयं शृणवच्च नः' (ऋ ८, ६१, १ ; आश्रौ ७, ३, १८) इत्येवमादि-प्रगाथा आम्नाता एतेषां साम्नां भवन्ति । तस्माद् बृहत्पृष्ठे बृहत् । ज्योतिष्टोमे अयं बार्हतः सामप्रगाथो भवति ॥ २१ ॥

[इन्द्रस्य नु वीर्याणीत्येतस्मिन् सूक्ते ऐन्द्र्या निविदो धानम्]

इन्द्रस्य नु वीर्याणीत्येतस्मिन्नैन्द्रीं निविदं दध्यात् ॥ २२ ॥

'इन्द्रस्य नु वीर्याणि' (ऋ १, ३२) इत्येतस्मिन् सूक्ते ऐन्द्रीं निविदं दध्यात् । इन्द्रो देवता अस्याः सा ऐन्द्री निवित्, सा खिलेषु[3] आम्नाता । एतस्मिन्नित्यनुच्यमाने[4] सूक्तानन्तरं स्यात् । ऐन्द्रीमित्यनुच्यमाने अधिकारान्मरुत्वतीया प्राप्नोति ॥ २२ ॥

[निष्केवल्यस्यानुब्राह्मणं स्वरविधानं स्तोत्रियस्य शस्त्वा जपो याज्या च]

अनुब्राह्मणं वा स्वर उक्थं वाचीन्द्रायोपश्रृण्वते त्वेति शस्त्वा जपेत् । पिबा सोममिन्द्र मन्दतु त्वेति याज्या ॥ २३ ॥

ब्राह्मणमनु विहितः स्वरोऽनुब्राह्मणः । ब्राह्मणमनु विहितो यः स्वरः, [5]स वा[5] भवति निष्केवल्यस्य 'स्तोत्रियं शंसति' (ऐब्रा ३, २४) इत्येवमादि यथाप्राप्तं[6] प्रयोग इति । तदुच्यते—'स्तोत्रियं शंसति [7]तं मध्यमया वाचा शंसति[7]'

---

१. तु. ऐब्रा ३, २४ । २. स्वरे पृष्ठेषु मूको । ३. तु. ऋखि ५,५,३ । ४. °स्मिन्नित्युच्य° मूको । ५-५. ऋचा मै । ६. यथाक्लृप्तं ब[1] मै; वृटितम् पू । ७-७. नास्ति ब[1]; तन्मध्य° ब[2] मै पू ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

(ऐब्रा ३, २४) मध्यमस्वरस्य मध्यमेन यमेन[1] चतुर्थेन । एवं सति नीचैः उच्चैर्नीचैस्तरामुपपद्यते । 'अनुरूपं शंसति । स उच्चैस्तरामिवानुरूपः शंस्तव्यः (ऐब्रा ३, २४) । मध्यमस्वरस्य षष्ठेन यमेन [2]तरशब्दवचनात् । 'धाय्यां शंसति । सा नीचैस्तरामिव धाय्या शंस्तव्या' (ऐब्रा ३, २४) । मध्यमस्वरस्य द्वितीयेन[2] तरशब्दवचनादपरिमितशस्ये[3] कृतौ योनिशंसनमूर्ध्वं[4] धाय्याया भवति । तस्य स्तोत्रियत्वान्मध्यमस्वर एव भवति । 'प्रगाथं शंसति । स स्वरवत्या वाचा शंस्तव्यः' (ऐब्रा ३,२४) । योनीति[5] मध्यमस्वर उच्यते अधिकारात् । उदात्तानुदात्तस्वरितानां स्वर इति सामान्यचोदना । स्वरोऽस्यां वाचि विद्यते स्वरवती वाक् । उदात्तानुदात्तस्वरितवत्या वाचा इति । शंस्तव्यः[6] ह्रस्वर्यतो यथाम्नातः[7] प्रगाथः शंस्तव्यः । केचिन्मध्यमस्वरेण एकश्रुत्या शंस्तव्य इत्याहुः । तथा सति प्रत्ययो नोपपद्यते । मध्यमया वाचा इति वक्तव्यम्, यथा स्तोत्रिये । कथं प्रयोगः । आहावं कृत्वा प्रगाथं ह्रस्वर्येण ब्रूयाद्, ऋगन्ते तु प्रणवः ऐकश्रुत्यो भवति स्वरेण । आम्नायाभावादाहावान्त्यः प्रणवः[8] अनुदात्तो भवति । प्रगाथादावनुदात्ते उदये नियुक्तं तूदात्तस्वरितोदयम् (तु० ऋप्रा ३,२१) इति वचनात् । दर्शयति च 'पूर्वमक्षरं निहन्यते न्यूङ्खयमाने' (आश्रौ ७,११,५) इति । तथा प्रगाथादौ प्रतिगरः सस्वरो भवति 'शस्त्रस्वरः प्रतिगरः' (आश्रौ ५, ९, ४) इति वचनात् । तस्य स्वरः ओ इत्याद्युदात्तम्, था इत्यनुदात्तम्, मो इत्यनुदात्तम्, दै इति स्वरितम्, व इति प्लावितम् । 'सूक्तं तत् प्रतिष्ठिततमया वाचा शंस्तव्यम्' (ऐब्रा ३, २४)। मध्यमस्वरस्य सप्तमेन यमेन शंस्तव्यम् । तत्र हि मध्यमायां प्रतिष्ठितं समाप्यते । अन्यस्मिन्नपि यमे प्रतितिष्ठति । तस्मात्तमग्रहणात् सप्तम एव भवति । याज्यायामपि सूक्तस्वर एवेति तदङ्गत्वात् 'याज्यान्तानि शस्त्राणि' (आश्रौ ५,१०,२१) इति वचनात् षष्ठेन तु यमेन याज्या वक्तव्या । वषट्कारस्य सप्तमो भवति 'उच्चैस्तराम्' (आश्रौ १, ५, ६) इति वचनात् । प्रतिष्ठिततमा इति चोपपन्नं भवति । एवं निष्केवल्ये उक्तः स्वरः प्रकृतौ विकृतावपि तद्व्याख्यातत्वात् । चतुर्विंशादिषु उक्थं वाचि इत्येतं मन्त्रं यथासमाम्नातं शस्त्वं शस्त्वा जपेत् । शस्त्वेति वचनाद् दीक्षितश्चेदस्मादनन्तरं याजमानं कुर्यात् । 'पिबा सोममिन्द्र मन्दतु त्वा' (ऋ ७, २२, १) इतीयमृग् याज्या भवति ॥ २३ ॥

॥ इति पञ्चमे पञ्चदशं खण्डम् ॥

---

१. नास्ति ब[2] । २-२. नास्ति ब[1] । ३. °मितवशस्ये मूको । ४. योनिशंसमू° मूको । तु. आश्रौ ५, १५, १८ । ५. यानीति मूको । ६. °व्यं मूको । ७. °तं मूको । ८. नास्ति ब[1] ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

अथ पञ्चमेऽध्याये षोडशः खण्डः

[माध्यन्दिने सवने होत्रकाणां शस्त्रकथनम्]

होत्रकाणां कया नश्चित्र आ भुवत् कया त्वं न ऊत्या कस्तमिन्द्र त्वावसुं सद्यो ह जात एवा त्वामिन्द्रोशन्नु षु णः सुमना उपाक इति याज्या ॥ १ ॥

तं वो दस्ममृतीषहं तत् त्वा यामि सुवीर्यमिति प्रगाथौ स्तोत्रियानुरूपौ ॥ उदु त्ये मधुमत्तमा इन्द्रः पूर्भिदुदु ब्रह्माण्यृजीषी वज्री वृषभस्तुराषाळिति याज्या ॥ २ ॥

तरोभिर्वो विदद्वसुं तरणिरित्सिषासतीति प्रगाथौ स्तोत्रियानुरूपौ । उदिन्नवस्य रिच्यते भूय इदिमामू ष्वित्युपोत्तमामुद्धरेत् सर्वत्र । पिबा वर्धस्व तव घा सुतास इति याज्या ॥ ३ ॥

माध्यन्दिने होतृकर्म समाप्तम् । इदानीं होत्रकाणां[1] शस्त्राणि वक्ष्यन्ते । ये [2]शस्त्रिणो होत्रकाः[2] तेषामेतदधिकृतं वेदितव्यम् । 'तेषां तृचाः स्तोत्रियानुरूपाः । शस्त्रादिषु माध्यन्दिने प्रगाथास्तृतीयाः । यथाग्रहणमन्यत्[3] । याज्यान्तानि शस्त्राणि' (आश्रौ ५, १०, १८-२१) ।

'कया नश्चित्र आ भुवत्' (ऋ ४,३१,१), 'कया त्वं न ऊत्या' (ऋ ८,९३,१९) इति स्तोत्रियानुरूपौ । 'कस्तमिन्द्र त्वावसुम्' (ऋ ७, ३२, १४) इति प्रगाथः । 'सद्यो ह जातः' (ऋ ३, ४८) [4]इति सूक्तम्[4] । 'एवा त्वां' (ऋ ४,१९) इति च सूक्तम् । 'उशन्नु षु णः' (ऋ ४,२०,४) इति [5]याज्या । याज्यान्तानि शस्त्राणि[5] ।

'तं वो दस्मम्' (ऋ ८,८८,१-३), 'तत् त्वा यामि' (ऋ ८,३,९-११) इति एतौ प्रगाथौ तृचौ स्तोत्रियानुरूपसंज्ञौ भवतः । 'तृचाः स्तोत्रियानुरूपाः' (आश्रौ ५, १०, १८) इति प्राप्ते प्रगाथौ स्तोत्रियानुरूपावित्याह । 'उदु त्ये' (ऋ ८,३,१५-१६) इति प्रगाथः । 'इन्द्रः पूर्भित्' (ऋ ३, ३४) इति सूक्तम्[6] ।

---

१. °काणां शस्त्राणां ब[1] मै पू । २-२. शस्तृणां मूको । ३. °न्यथा ब[2] । ४-४. नास्ति मूको । ५-५. याज्य (°ज्यं ब[2]) शस्त्राणि मूको । ६. उदुत्तमम् (ऋ १, २४, १५) इत्यधिकम् मूको ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

'उदु ब्रह्माणि' (ऋ ७, २३) इति सूक्तम्। 'ऋजीषी' (ऋ ५, ४०, ४) इति याज्या ब्राह्मणाच्छंसिनः।

'तरोभिर्वः' (ऋ ८, ६६, १-३), 'तरणिः' (ऋ ७, ३२, २०-२२) इति एतौ प्रगाथौ तृचौ स्तोत्रियानुरूपसंज्ञौ भवतः। प्रगाथग्रहणे उक्तं प्रयोजनम्। 'उदिन्वस्य' (ऋ ७, ३२, १२-१३) इति प्रगाथः। 'भूय इत्' (ऋ ६, ३०) इति सूक्तम्। 'इमामू षु' (ऋ ३, ३६) इति सूक्तम्। एतस्य उपोत्तमामुद्धरेत्। उत्तमाम् उप समीपे उपोत्तमाम् ऋचम् उद्धरेत् 'अस्मे प्र यन्धि' (ऋ ३,३६,१०) इत्येताम्। सर्वत्र यत्र संपातानाम् आवापे[७]। निर्दहेत् [१]शस्यमानेति श्रूयते†[१]। सा न शस्यते। 'पिबा वर्धस्व' (ऋ ३, ३६,३) इति याज्या। इत्यच्छावाकस्य। समाप्तं माध्यन्दिनं सवनम् ॥ १-३ ॥

॥ इति पञ्चमे षोडशं खण्डम् ॥

१-१. शस्यमानानुश्रूं° मूको। †. तु. ऋअ २, ३, ३६; षड्गुरुशिष्यवृत्तिश्च।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

अथ पञ्चमेऽध्याये सप्तदशः खण्डः

[तृतीयसवनोपक्रमस्तत्स्वरविधानञ्च]

अथ तृतीयसवनमुत्तमस्वरेण ॥ १ ॥

अथ इदानीं तृतीयसवनं वक्ष्यते। संज्ञा चेयम्। 'तृतीयसवन उत्तरोत्तराम्' (आश्रौ ६, ७, ७) इत्युक्ते एतस्य ग्रहणम्। उत्तमस्वरेण शिरसि तारेण तृतीयसवनं वक्ष्यते ॥ १ ॥

[आदित्यग्रहेण सह प्रचरणविधानम्]

आदित्यग्रहेण चरन्ति ॥ २ ॥

तृतीयसवनस्यादौ आदित्यग्रहो नाम, तेन चरन्ति। तस्य अनुवाक्या प्रैषो याज्येति वक्ष्यते। 'आदित्यग्रहसावित्रवर्जम्' (आश्रौ ५, ९, २८) इत्युक्ते एतस्य ग्रहणम् ॥ २ ॥

[आदित्यग्रहेण प्रचरणेऽनुवाक्या-प्रैष-याज्या-विधानं हूयमानस्याऽऽदित्यग्रहस्येक्षणनिषेधश्च]

आदित्यानामवसा नूतनेन होता यक्षदादित्यान् प्रियान् प्रियधाम्न आदित्यासो अदितिर्मादयन्तामिति। नैतं ग्रहमीक्षेत हूयमानम् ॥ ३ ॥

'आदित्यानामवसा नूतनेन' (ऋ ७, ५१, १), 'होता यक्षदादित्यान् प्रियान् प्रियधाम्नः' (ऋखि ५, ७, ४, १३), 'आदित्यासो अदितिर्मादयन्ताम्' (ऋ ७, ५१, २)। इत्यनुवाक्या प्रैषो याज्येति। नैतं ग्रहमीक्षेत हूयमानम्। एवमेतमादित्यग्रहं[1] हूयमानं न ईक्षेत होता। एतमिति वचनाद् अन्येषामीक्षण-प्रतिषेधो न भवति। हूयमानमिति वचनाद् हूयमानस्यैव ईक्षणप्रतिषेधः। अस्य न भक्षः ॥ ३ ॥

[आर्भवपवमानस्तुत्यादिनाराशंससादनान्तकर्मकथनम्]

स्तुत आर्भवे पवमाने विहृत्याङ्गारान् मनोतादिपश्विळान्तं पशुकर्म कृत्वा पुरोळाशाद्युक्तमा नाराशंससादनात् ॥ ४ ॥

---

१. °तदादित्य° मूको।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

आदित्यग्रहानन्तरं 'प्रसर्पणम् । प्रसर्पणादनन्तरम् आर्भवः पवमानः स्तूयते । तस्मिन् स्तुते अङ्गारान् विहृत्य मनोतामादिं कृत्वा, पशोः इळा †पश्विळा तदन्तं† पशुकर्म कृत्वा पशुकर्मानन्तरं' पुरोळाशादि उक्तं व्याख्यातं प्रातःसवने च कर्म आ नाराशंससादनात् । पवमाने चोदिते सर्पणमपि चोदितं भवति तदर्थत्वात् । 'पवमानाय सर्पणे' (आश्रौ ५,२,४) इति वचनात् पवमानार्थं सर्पणं भवति । विहृत्याङ्गारान् इति । तस्मिन् काले अङ्गारविहरणमिति दर्शयति । तस्मादस्मिन् काले धिष्ण्यवन्तः सन्निहिता भवन्ति । पश्विळान्तम् इति । अत्र पशुग्रहणात् प्रकृतौ पश्विळान्तं पशुकर्म क्रियते । विकृतौ तु साद्यस्क्रिये मनोतादि पशुपुरोळाशान्तं कर्म न क्रियते, पशुकर्मेति कुर्यात् । न त्विह द्विदेवत्याः ॥ ४ ॥

[पुरोळाशपिण्डीनामशनम्]

सन्नेषु आदिष्ठात् पुरोळाशस्य तिस्रस्तिस्रः पिण्डचो दक्षिणतः प्रतिस्वं चमसेभ्यः स्वेभ्यः पितृभ्य उपास्येयुरत्र पितरो मादयध्वं यथाभागमा वृषायध्वमिति ॥ ५ ॥

सन्नेषु नाराशंसेषु एतस्मिन् काले इदं कर्म क्रियते पुरोळाशस्य मृदुतमाद् देशात् तिस्रस्तिस्रः पुरोळाशपिण्डचः, एकैकं गृहीत्वा स्वं स्वं चमसं[2] प्रतिस्वं[3] चमसेभ्यो दक्षिणतः चमसाच्चमसाद् दक्षिणतः यज्ञोपवीती प्राङ्मुखः पिण्डीः[4] निधाय स्वेभ्य पितृभ्य इदं कर्मेति उपास्येयुः मनसि कुर्युर्न यजमानपितृभ्य इति मनसि कृत्वा अनुमन्त्रयेत—'अत्र पितरः' (मासं २, ३१) इति यथाम्नातेन मन्त्रेण । सदस्योऽप्येतत् कुर्यात् । अचमसा अपि कुर्युः, तस्मिन् भक्षयन्ति । स्वेभ्यः पितृभ्य उपास्येयुः इत्येवं[5] संस्कारः । स सर्वेषां भवितुमर्हति । व्यक्तं च छन्दोगानामध्वर्यूणां च । 'यज्ञोपवीतशौचे च' (आश्रौ १, १, १०) इत्यत्र नित्यवचनाद् यज्ञोपवीती एव कुर्याद् । वचनाभावात् प्राचीनावीतं न क्रियते । 'तस्य नित्याः' (आश्रौ १, १, ८) इत्यत्र नित्यवचनात् प्राङ्मुख एव कुर्यात् न[6] दक्षिणामुखः । जीवेभ्यः प्रेतेभ्यश्चेदं क्रियते, अविशेषवचनाद् यथाम्नातेषु भवति, न तादृशमिह ॥ ५ ॥

[सर्वेषामुच्छिष्टहविःप्राशनम्]

सव्यावृत आग्नीध्रीयं प्राप्य हविरुच्छिष्टं सर्वे प्राश्नीयुः । प्राश्य प्रतिप्रसृप्य ॥ ६ ॥

१-१. नास्ति ब[2] । †-†. पश्विलांतं ब[1] मै ; नास्ति पू । २. नास्ति ब[1] । ३. प्रति ब[2] पू । ४. पिण्डचौ मूको । ५. °रित्ययं ब[1] मै पू । ६. नास्ति मूको ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

एतत् पैतृकं कर्म कृत्वा तस्मादेव शेषात् सर्वे सव्यावृतः सव्यं बाहुम् अन्वावृत्य आग्नीध्रीयं प्राप्य गत्वा हविषां हुतशिष्टं सव ऐष्टिके कर्मणि अनधिकृता[1] अपि प्राश्नीयुः । सव्यावृत इति वचनात् तस्मादेव देशाद् गच्छन्ति । सदः प्रतिनिवृत्य सदसि[2] एव गमनं प्राप्तं, तथाहि प्रातःसवने कृतत्वात् । प्राप्येति वचनादाग्नीध्रसमीपे भक्षप्राप्तिः, नाग्नीध्रीय एव । सर्वग्रहणादैष्टिके कर्मणि अनधिकृतानामपि ब्राह्मणाच्छंस्यादीनां सहकारिवशादेतद् भवति । ऐष्टिकेऽपि सहकारिवशान्न भवति ।

प्राश्य हविरुच्छिष्टं प्राश्य ततः सदः प्रतिसृप्य ॥ ६ ॥

॥ इति पञ्चमे सप्तदशं खण्डम् ॥

---

१. अधिकृता ब[1,2] । २. सद मूको ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

अथ पञ्चमेऽध्याये अष्टादशः खण्डः

[सावित्रग्रहेण प्रचरणम्]

[प्राश्य प्रतिसृप्य] सावित्रेण ग्रहेण चरन्ति ॥ १ ॥

अनन्तरं सावित्रेण ग्रहेण चरन्ति । तस्य सावित्रस्य अनुवाक्या प्रैषो याज्येति वक्ष्यन्ते ॥ १ ॥

[सावित्रग्रहेण प्रचरणेऽनुवाक्याप्रैषयाज्याकथनं वषट्कृते होतुर्वैश्वदेवशस्त्रशंसनं च]

अभूद् देवः सविता वन्द्यो नु नो होता यक्षद् देवं सवितारं दमूना देवः सविता वरेण्यो दधद्रत्नादक्ष पितृभ्य आयुनि । पिबात्सोममदन्नेन-मिष्टयः परिज्मा चिद् रमते अस्य धर्मणीति वषट्कृते होता वैश्वदेवं शस्त्रं शंसेत् ॥ २ ॥

'अभूद् देवः' (ऋ ४, ५४, १), 'होता यक्षद् देवं सवितारम्' (ऋखि ५, ७, ४, १४), 'दमूनाः' (तु० शौ ७, १५, ४) इति यथासमाम्नाताः । प्राश्येति पुनरुच्यते अनुक्रमविवक्षार्थम् । प्रतिप्रसृप्येत्यनुच्यमाने तत्र सावित्रस्य चर्या प्राप्नोति । सावित्र इति संज्ञा । 'आदित्यग्रहसावित्रवर्जम्' (आश्रौ ५, ९, २८) इत्युक्ते एतस्य ग्रहणम् ।

वषट्कृते[1] वषट्कारे कृते होता वैश्वदेवं नाम शस्त्रं शंसेत् । सर्वत्र स्तोत्रं शस्त्रस्य निमित्तम् । इह तु वषट्कार एव निमित्तम् । वषट्कारादनन्तरमेव शस्त्रं शंसेत् । होतृग्रहणमधिकारार्थम् । अधिकारात् 'सर्वा दिशो ध्यायेत्' (आश्रौ ५,१८,३) इति वक्ष्यमाणा आशीर्होतुरेव भवति, न यजमानस्य । सर्वा आशिषस्तु यजमानार्था एव । वैश्वदेवमिति शस्त्रस्य संज्ञा । 'वैश्वदेवाग्निमारुतयोः' (आश्रौ ५, १८, ६) इत्युक्ते एतस्य ग्रहणम् । सूक्तमपि वैश्वदेवमस्ति, तस्मा-च्छस्त्रग्रहणम् ॥ २ ॥

[शंसनात् पूर्वं शत्रुदिशं वर्जयित्वा सर्वासां दिशां ध्यानम्]

सर्वा दिशो ध्यायेच्छंसिष्यन् । यस्यां द्वेष्यो न ताम् ॥ ३ ॥

---

१. नास्ति ब[१२२] ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

वैश्वदेवं शस्त्रं शंसिष्यन् होता सर्वा अष्टौ दिशो ध्यायेत् । प्रथमया विभक्त्या, 'प्राची प्राग्दक्षिणा प्रतीची प्रत्यगुदीची[1-1]'। तस्मात् सर्वग्रहणाद् अष्टौ दिशः । शंसिष्यन्निति वचनात् कृत्स्नेन ध्यायति शस्त्रादूर्ध्वमेवं[2] न ध्यायति । यस्यां द्वेष्यो, न ताम् । यस्यां दिशि होतुर्द्वेष्यो विद्यते, न तां ध्यायेत् । होतुरधिकाराद् होतुर्द्वेष्यो भवति, न यजमानस्य । 'अनुहायैवास्य तद् वीर्यमादत्ते' (ऐब्रा ३, ३१) इति श्रुतिः ॥ ३ ॥

[तृतीयसवने शस्त्राणामादिष्वाहावकरणम्]

अध्वर्यो शो शोंसावोमिति तृतीयसवने शस्त्रादिष्वाहावः ॥ ४ ॥

'अध्वर्यो शो शोंसावोम्' (ऐब्रा ३, १२) इति अयं यथास्नात आहावः तृतीयसवने शस्त्राणामादिषु भवति । 'स्तोत्रियानुरूपेभ्यः प्रतिपदनुचरेभ्यः' (आश्रौ ५,१०,१३) इति प्राप्तेऽप्युक्तं चाग्निमारुते आरम्भार्थे[3]। शस्त्रादिग्रहणम् अन्तःशस्त्रप्रतिषेधार्थम् । [4]बहुवचनाद् होतुः[4] शस्त्रेषु प्राप्तः तृतीयसवनग्रहणाद् होत्रकाणामपि भवति । आहावग्रहणं ज्ञापनार्थम् । 'प्रतिहार उत्तरयोः' (आश्रौ ५,१०,३) [5]इत्युक्त एतस्य[5] ग्रहणम् ॥ ४ ॥

[वैश्वदेवादिशस्त्राणां कथनम्]

तत्सवितुर्वृणीमहेऽद्या नो देव सवितरिति वैश्वदेवस्य प्रतिपदनुचरौ । अभूद् देव । एकया च दशभिश्च स्वभूते द्वाभ्यामिष्टये विंशत्या च । तिसृभिश्च वहसे त्रिंशता च नियुद्भिर्वायविह ता विमुञ्च ॥ प्र द्यावेति दैर्घतमसम्, सुरूपकृत्नुमूतये, तक्षत्रथमयं वेनश्चोदयत् पृश्निगर्भा, येभ्यो माता मधुमत् पिन्वते पयः, एवात्र पित्रे विश्वदेवाय वृष्णे, आ नो भद्राः क्रतवो यन्तु विश्वत इति नव, वैश्वदेवम् ॥ ५ ॥

'तत्सवितुः' (ऋ ५, ८२, १), 'अद्या नः' (ऋ ५, ८२, ४-६) इति एतौ वैश्वदेवस्य शस्त्रस्य प्रतिपदनुचरसंज्ञौ भवतः । आनन्तर्येणाऽऽद्यस्तृचः प्रतिपद्, द्वितीयोऽनुचरः । वैश्वदेवस्येति पुनरुच्यते । तृतीयसवनाधिकारात् सर्वशस्त्रेषु विकल्पे प्राप्ते वैश्वदेवस्येति नियमः । प्रतिपदनुचरसंज्ञायाम् आहावादिप्राप्तिः । 'अभूद् देवः' (ऋ ४, ५४) इति सावित्रं सूक्तम् अनुचरादनन्तरम् ।

१-१. 'प्राची, प्राग्दक्षिणा, दक्षिणा, दक्षिणप्रतीची, प्रतीची, प्रत्यगुदीची, उदीची, उदक्प्राची', एवं पाठः संभाव्यते । २. °मेव मूको । ३. °म्भार्थं ब[2] मै पू । ४-४. °वचन° (°न ब[2]) हो° मूको । ५-५. °क्तमेतस्य ब[1,2] पू ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

'एकया च' (ऋ ४, ५४) इति[1] यथासमाम्नाता धाय्या ऋक् सावित्रादनन्तरा। 'प्र द्यावा' (ऋ १,१५९) इति एतत् सूक्तम्। दीर्घतमसा ऋषिणा दृष्टं दैर्घतमसम्[2]। द्यावापृथिवीयं धाय्याया अनन्तरम्। दैर्घतमसमिति विशेषणं वासिष्ठमप्यस्ति। अधिकपादग्रहणे सति तृचः स्यादिति। ऋषिविशेषणं क्रियते। पूर्वत्वाज्जागतत्वाच्च[3] विशेषणं न[4] वक्तव्यम्। इदं प्रयोजनम्। सर्वेभ्यो हेतुभ्यो[5] वचनं च व्यापि भवति, व्यापित्वाद् वासिष्ठमपि प्राप्नोति। तस्माद् विशेषणं वक्तव्यम्। सर्वहेतुभ्यो[6] वचनं प्रमाणं यस्मात्, तस्मात् पौडमिनाय्याधिकारेष्वपि वचनात्। 'सुरूप' (ऋ १, ४, १) इति धाय्या द्यावापृथिवीयादनन्तरम्। 'तक्षन् रथम्' (ऋ १,१११) इत्यार्भवं सूक्तं धाय्याभ्योऽनन्तरम्[7]। 'अयं वेनः' (ऋ १०,१२३,१), 'येभ्यो माता' (ऋ १०, ६३, ३), 'एवा पित्रे' (ऋ ४, ५०, ६) इति तिस्रो धाय्या आर्भवादनन्तरम्। 'आ नो भद्रा' (ऋ १, ८९, १-९) इति नव ऋचः वैश्वदेवं सूक्तं धाय्याभ्योऽनन्तरम्। पादग्रहणादृक् प्राप्ता, तस्मादाह—न वेति। वैश्वदेवमिति वचनाद् ऋचां सूक्तसंज्ञा भवति। सूक्तत्वात् 'सूक्तेषु सावित्र्यादिनिविदो[7] दध्यात्' (आश्रौ ५, १८, ६) इति वचनाद् निविद् धीयते। अन्यद् न प्राप्नोति। विकृतौ च सूक्तागमे उद्धारः सिद्धो भवति। कृत्स्ने तु[8] सूक्ते[9] विधीयमाने 'एकां शिष्ट्वा' (आश्रौ ५, १४, २३) इति वचनात् सैव उत्तमा सैव परिधानीया। तस्मान्नवर्चं विधीयते। परिधानीयामुत्तरत्र वक्ष्यति॥ ५॥

[वैश्वदेवाग्निमारुतयोः सूक्तेषु सावित्र्यादिनिविद्याधानम्]

वैश्वदेवाग्निमारुतयोः सूक्तेषु सावित्र्यादिनिविदो[10] दध्यात्॥ ६॥

वैश्वदेवाग्निमारुतयोः शस्त्रयोः यानि सूक्तानि तेषु सूक्तेषु सावित्र्यादिर्यासां निविदां ताः सावित्र्यादिनिविदः दध्यात्। यथोक्तम्—'एकां शिष्ट्वा तृतीयसवने' (आश्रौ ५, १४, २३)। तत्र एकैकस्मिन् सूक्ते एकैकां निविदं दध्यात्। अप्राप्तमारभ्यते। सूक्तेष्वपीत्युक्ते सावित्र्यादिनिविद उच्यन्ते, न सूक्तानि। सावित्रादीति[11] वक्तव्ये सावित्र्यादीत्युक्तं द्रष्टव्यम्॥ ६॥

[वैश्वदेवे शस्त्रे चतसृणां निविदामाधानम्]

चतस्रो वैश्वदेवे॥ ७॥

---

१. तु. शौ ७, ४, १। २. दीर्घ° मूको। ३. °ष्वाज्जगत्वाच्च मूको। ४. नास्ति मूको। ५. होतु(°तृ?)भ्यो मै। ६. सर्वहोतु(°तृ?)भ्यो मूको। ७. सावित्रादि (°त्र्यादी मै) मूको आन. BI। ८. नास्ति पू। ९. सूक्ते ये ब[1,2] पू। १०. नास्ति मूको; सावत्रादि° आन. BI। ११. सावित्रादीनीति मूको।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

'सूक्तानां तद्धि दैवतम्' (आश्रौ ५, १८, ९) इति वचनाद् वैश्वदेवे त्रिषु सूक्तेषु तिस्रो निविदः। [1]'परिशिष्टाः अपि† सर्वा वैश्वदेवसूक्ते इति प्राप्ते इदमुच्यते। सावित्र्यादिचतस्र‡ एव निविदः[1] वैश्वदेवे शस्त्रे न सर्वा इति। चतस्र इति संख्यावचनाच्चतुर्षु सूक्तेषु समानसंख्यत्वादानन्तर्ययोगो[2] भवति। एकैकस्मिन्नेकैकां निविदं दध्यात्। वैश्वदेवग्रहणम् उभयोरधिकारात् ॥ ७ ॥

[उत्तरासां तिसृणां निविदामाग्निमारुते शस्त्रे आधानम्]

उत्तरास्तिस्र उत्तरे ॥ ८ ॥

[3]'चतुर्थ्या उत्तरा'[3] निविदः वैश्वानरीयाद्याः तिस्र उत्तरे शस्त्रे आग्निमारुते दध्यादेकैकस्मिन् एकैकाम्। 'सावित्र्यादिनिविदो[4] दध्यात्' (आश्रौ ५, १८, ६) इति प्राप्ते उत्तरा इत्याह। चतस्र इत्यधिकारनिवृत्त्यर्थं तिस्र इत्याह। 'सूक्तानां तद्धि दैवतम्' (आश्रौ ५, १८, ९) इति वचनादधिकारो नानुवर्तते। या ऐन्द्री निविदापोदेवते[5] तृचे सा[6] प्राप्नोति। 'तस्माच्छमयतेव शंस्तव्यम्' (ऐब्रा ३, ३६) इति। नपुंसकनिर्देशात् सूक्तसंज्ञायाम् 'आपो वं सर्वा देवता' (ऐब्रा २,१६) इति वचनादैन्द्रम्। तस्माच्चतस्र[7] इत्यधिकारनिवृत्त्यर्थं तिस्र इत्याह। वैश्वदेवाधिकारादुत्तर इत्याह ॥ ८ ॥

[यद्देवत्यं सूक्तं तद्देवत्याया एव निविद आधानम्]

सूक्तानां तद्धि दैवतम् ॥ ९ ॥

यदेव[8] [9]निविदो दैवतं[9] तद् एव सूक्तानां दैवतम्। अस्मादारम्भात् समानदेवत्ये निविदं दध्यात्, नान्यदेवत्ये। हि इत्यवधारणार्थे। समानदेवत्येषु सत्सु यन्निविदां दैवतं[10], तदेव सूक्तानामपीति। 'अस्य मे द्यावापृथिवी' (ऋ २, ३२, १) इत्यत्र निविदः प्राप्त्यर्थम् ॥ ९ ॥

[बहुषु समानदैवतेषु सूक्तेषु तद्दैवतनिवित्समाप्तौ सूक्तान्तकरणम्]

दैवतेन सूक्तान्तः ॥ १० ॥

१-१. नास्ति मै।
२. संख्यात्वा° मूको।
३-३. चतुर्थः या ब[1] मै; चतुर्थया ब[2]; त्रुटितम् पू।
४. सावित्रादिनि° ब[1] मै पू।
५. °वत्ये ब[2] मै; तु. ऋ १०,९,१-३।
६. ति ब[1]; नास्ति ब[2] मै पू।
७. कस्माच्च° मूको।
८. नास्ति ब[1]; यन्ति ब[2] मै पू।
९-९. नास्ति ब[1]।
१०. नास्ति ब[2]; दैवतं मै; त्रुटितम् पू।
†. नास्ति ब[1?2] पू।
‡. °त्रादि° पू।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

देवतेन[1] सूक्तानाम् अन्तो ज्ञेयः । विकृत्यर्थोऽयमारम्भः । षष्ठेऽह्नि दशमे च [2]सूक्तेषु सावित्र्यादिनिविदो[2] दध्यात् । 'सूक्तानां तद्धि देवतम्' (आश्रौ ५, १८, ९) इति वचनात् समानदेवत्यां निविदं सूक्ते दध्याद् इति प्राप्ते इदमुच्यते । यत्र बहूनि समानदैवत्यानि[3] सूक्तानि भवन्ति, तत्र दैवतसमाप्तौ सूक्तान्तो भवति । तस्माद् देवतान्ते एकां शिष्ट्वा निविदं दध्यात्' ॥ १० ॥

[सूक्तान्तेषु एकपातिनीनां धाय्यानामाधानम्]

धाय्याश्चात्रैकपातिनीः ॥ ११ ॥

धाय्याश्च, वैश्वदेवाग्निमारुतयोः सूक्तेषु सावित्र्यादिनिविदो[4] दध्यात्' (आश्रौ ५,१८,६) इति[5] चाधिकृतम् । अत्र सूक्तान्तेषु[6] या एकपातिन्य ऋचस्ताश्च धाय्याः[7] । 'धाय्याभ्यः' (आश्रौ ५,१०,१३) इत्याहावाप्राप्तिः । एकैका पतति एकपातिनीः । यथा 'एकया च' (आश्रौ ५, १८, ५), 'सुरूपकृत्नुम्' (ऋ १, ४, १), 'शं नः करति' (ऋ १, ४३, ६) इत्येवमाद्याः । च-शब्दः शस्त्रयोरधिकार-समुच्चयार्थः । सूक्तेषु निविदः इत्यधिकारात् सूक्तान्तेषु या ऋचस्ता उपदिशन्ति । अत्रेति सूक्तान्तेषु[8] यज्ञस्य छिद्रम् । छिद्रापिधानार्थाश्च धाय्याः । 'यत्र यत्र वै देवा यज्ञस्य च्छिद्रं निरजानंस्तद्धाय्याभिरपिदधुः' (ऐब्रा ३, १८) इति सूक्तान्तेभ्योऽन्यत्र या ऋचः, तासां धाय्यासंज्ञा न विद्यते । तस्मात् तासु पुनराहावो विधीयते 'इदमादि प्रतिप्रतीकमाह्वानम्' (आश्रौ ५, २०, ६) इति । अत्रेति वचनात् सूक्तस्थाने चोदितानामपि प्राप्तिः तृचचतुर्ऋचानाम् । तस्मादाह— एकपातिनीरिति ॥ ११ ॥

[वैश्वदेवे सूक्ते आधानमन्त्रकथनं भूम्युपस्पर्शनविधानञ्च]

अदितिर्द्यौरदितिरन्तरिक्षमिति परिदध्यात् सर्वत्र वैश्वदेवे द्विः पच्छोऽर्धर्चशः सकृद् भूमिमुपस्पृशन् ॥ १२ ॥

'अदितिर्द्यौः' (ऋ १,८९,१०) इति एतयर्चा परिदध्यात् । सर्वत्र प्रकृतौ विकृतौ च । वैश्वदेवे, नाग्निमारुते । द्विः पच्छः शंसेत्, अर्द्धर्चशः सकृत् । भूमिमुपस्पृशन् परिदध्यात् त्रिष्वपि वचनेषु । परिदध्याद् इति पुनरुच्यते । विकृतानामुत्तमया मा भूत् । एतया परिधानप्राप्त्यर्थम् इह नवर्चस्य सूक्तसंज्ञा कृता । विकृतौ तु यत् सूक्तं [9]नवर्चस्य स्थाने[9] । प्रकृतौ या परिधानीया सा विकृतावपि भविष्यति ।

---

१. देवतेन मै । २-२. सूक्ते सावित्रा (°त्र्या ब[2]) विनिवदं मूको ; तु. आश्रौ ५, १८, ६ । ३. °देव° मै । ४. तु. आश्रौ ५,१४,२३ । ५. निविदः मूको । ६. इदं मै । ७. सूत्रान्तेषु मूको । ८. सूक्तान्ते ब[1,2] पू । ९-९. नवर्चस्थाने मै पू ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

न वक्तव्यम् । सर्वत्रेति प्रयोजनम् । 'सूक्तान्तेन होता परिदधाति' इति श्रुतिः[1]। इह प्रकृतौ सूक्तान्तेनैव[2] परिधानम् । विकृतावपि सूक्तान्तेनैव प्राप्तम् । सर्वत्र वचनाद् विकृतौ सूक्तं समाप्य एतया परिदध्यात् । 'सदैव पञ्चजनीयया परिदध्यात्' (ऐब्रा ३, ३१) इति, विकृत्यपवादे श्रुतिः । 'वैश्वदेवाग्निमारुतयोः' (आश्रौ ५,१८,६) इत्यधिकाराद् आग्निमारुतनिवृत्त्यर्थं वैश्वदेवे इत्याह । अर्धर्चशः सकृद् इत्युक्ते त्रिर्वचनप्रतिषेधः स्यात् तस्माद् द्विः पच्छ इति प्राप्तमपि पुनरुच्यते। सकृदर्धर्चश इत्यप्राप्तमर्द्धर्चं विधीयते । भूमिमुपस्पृशन्निति वचनात् त्रिष्वपि वचनेषु उपस्पृशेत् । अदितिरिति कृत्स्नायां लिङ्गमस्ति, तस्मात् कृत्स्नायामुपस्पर्शनम् ॥ १२ ॥

[शस्त्वा जपो याज्या च]

उक्थं वाचीन्द्राय देवेभ्य आ श्रुत्यै त्वेति शस्त्वा जपेत् विश्वे देवाः शृणुतेमं हवं म इति याज्या ॥ १३ ॥

उक्थं वाचि इति[3] यथासमाम्नातं शस्त्वा जपेत् । शस्त्वेति उक्तं प्रयोजनम् ।

'विश्वे देवाः' (ऋ ६,५२,१३) इति याज्या ॥ १३ ॥

॥ इति पञ्चमेऽष्टादशं खण्डम् ॥

---

१. तु. ऐब्रा ६, ८ । २. सूत्रान्ते° मूको । ३. नास्ति मूको ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

अथ पञ्चमेऽध्याये एकोनविंशः खण्डः

[सौम्यस्य चरोर्याज्याकथनम्]

त्वं सोम पितृभिः संविदान इति सौम्यस्य याज्या ॥ १ ॥

समाप्तं वैश्वदेवम् । अनन्तरं सौम्यश्चरुः । तस्य सौम्यस्य, 'त्वं सोम पितृभिः संविदानः' (ऋ ८, ४८, १३) इति इयं याज्या ॥ १ ॥

[सौम्यस्य चरोर्घृतयाज्याभ्यामुभयतः परियजनम्]

तं घृतयाज्याभ्यामुपांशूभयतः परियजति[1] ॥ २ ॥

तं सौम्यम् । घृतयाज्याभ्याम् उपांशु ते घृतयाज्ये उपांशु भवतः । उच्चैः सौम्यम् । उभयतः पुरस्तादुपरिष्टाच्च, परि समन्ततो यजति । तमुभयत इति वचनात् क्रमश्चोदितो भवति । [2]घृतस्य याज्ये[2] ताभ्यां घृतयाज्याभ्याम् इति द्रव्येण [3]चोदना, न देवतया । तस्मात् सौम्यस्य घृतस्येति चोदितो यजति । उच्चैः प्राप्ते उपांशु[3] इत्याह । सौम्यादनन्तरं प्राप्ते अनन्तरं चोदितत्वात् तस्मादुभयत इत्याह । परि समन्तत[4] उपांशु यजति इति प्राप्ते यद्यध्वर्युः[5] उच्चैराश्रावयति । उत्तरत्र 'उपांश्वेव' (आश्रौ ५, १९, ३) इति एवकारकरणाद् उपांश्वेव यजेत् । घृतयाज्याभ्यामुभयत इति वचनात् पुरस्ताद् द्वे याज्ये उपरिष्टाद् द्वे इति प्राप्ते इदमुच्यते ॥ २ ॥

[घृतयाज्याकथनम्]

घृताहवनो घृतपृष्ठो अग्निर्घृते श्रितो घृतमस्य धाम । घृतप्रुषस्त्वा हरितो वहन्तु घृतं पिबन् यजसि देव देवानिति पुरस्तात् ॥ उरु विष्णो वि क्रमस्वोरुक्षयाय नस्कृधि । घृतं घृतयोने पिब प्र प्र यज्ञपतिं तिरेत्युपरिष्टात् ॥ अन्यतरतश्चेदग्नाविष्णू महि धाम प्रियं वामित्युपांश्वेव ॥ ३ ॥

---

१. यजन्ति आन. BI । २-२. घृतयाज्ये ब[1] । ३-३. नास्ति ब[1] । ४. सन्ततः ब[1] । ५. अध्व° ब[1]; यदध्व° पू ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

घृताहवन इति यथासमाम्नाता पुरस्ताद् घृतयाज्या एका । 'उरु विष्णो' इति यथासमाम्नाता घृतयाज्या उपरिष्टाद् एका । अन्यतरतश्चेत् सौम्यमुभयतो घृतयाज्ये इत्युक्तम्[1] । अन्यतरतो वा एका घृतयाज्या भवति । न उच्चैः क्रियते । 'अग्नाविष्णू' इति एतया आग्नावैष्णव्या उपांश्वेव यजति । अस्मिन् पक्षे उपरिष्टाद् घृतयाज्या भवति [2]शस्त्रयाज्या, अनन्तरं[2] सौम्यस्योपदेशः स्यात् । चेदित्यनित्यभावे, तस्मादितरः पक्षो नित्यः । नित्यत्वात् स एव पूर्वं व्याख्यातो[3] ब्राह्मणे चाम्नातः[4] 'आग्नेयी प्रथमा घृतयाज्या सौमी सौम्ययाज्या वैष्णवी घृतयाज्या' (ऐब्रा ३, ३२) इति । तस्मात् 'परियक्ष्यसि[5] सौम्यां३[6] न परियक्ष्यसी३'[7] (बौश्रौ ८,१४ : १) इत्युक्ते परियक्ष्यामीत्येव[8] वक्तव्यम् । अयं [9]मुख्यः कल्पः[9] । न यक्ष्यामीति[10] वक्तव्यम् । तथा सत्याग्नावैष्णव्या[11] यजति । अहर्गणेष्वेव विकल्पोऽयम् । उपांश्वेवेति पुनरुच्यते, अवधारणार्थम् । यद्यप्युच्चैराश्रावयति, उपांश्वेव यजतीति । कस्मात् । अत्राध्वर्युरग्निं सोमं देवतामादिशति । नान्यथाध्वर्युप्रत्ययः[12] स्वरः । "तद्देवत्या हि याज्या यस्मात् । यत्र सौम्यस्य यज घृतस्य यजेति द्रव्यमादिशति, न तत्राध्वर्युप्रत्ययः"[13-13] । अन्यदेवत्याया हि यजति यस्मात्, तस्मादुपांश्वेव वचनसामर्थ्यात् ॥ ३ ॥

[सौम्यस्य चरोरवेक्षणविधानम्]

आहृतं सौम्यं पूर्वमुद्गातृभ्यो गृहीत्वाऽवेक्षेत यत्ते चक्षुर्दिवि यत्सुपर्णे येनैकराज्यमजयोऽहिना । दीर्घं यच्चक्षुरदितेरनन्तं सोमो नृचक्षो मयि तद् दधात्विति ॥ ४ ॥

सौम्यं हुत्वा हरत्यध्वर्युः । तमाहृतं सौम्यमुद्गातृभ्यो हरन्ति, तं प्रति तस्मात् यत्नः क्रियते । पूर्वमुद्गातृभ्यो गृहीत्वा अवेक्षेत, यत्ते चक्षु इति एतेन यथासमाम्नातेन । कृत्स्नेनावेक्षणं न मन्त्रान्तेनेन्द्रियकर्मण्यनित्यत्वात् । आहृतमिति[14] वचनाद् गत्वा नावेक्षते । सौम्यमित्युच्यते घृतस्याप्यधिकारात् । उद्गातृभ्यः पूर्वमेवावेक्षणं[15] क्रियते । "[16]तं हैके पूर्वं छन्दोगेभ्यो हरन्ति तत्तथा न कुर्यात्[16] वषट्कर्ता प्रथमः सर्वभक्षान् भक्षयतीति ह स्माह तेनैव रूपेण तस्माद् वषट्कर्तैव पूर्वोऽवेक्षेताथैनं छन्दोगेभ्यो हरन्ति' (ऐब्रा ३,३२) इति श्रुतिः । गृहीत्वाऽवेक्षेत, नाध्वर्युहस्तगतम् ।

---

१. तु. आश्रौ ५,१९,२ । २-२. °याज्यानन्तरं ब[1] । ३. व्याख्यात मूको । ४. वाम्नातः मूको । ५. पर्यक्षसि ब[1]; पर्यक्षामि(°सि पू) ब[2] मै पू । ६. सौम्यं मूको । ७. पर्यक्ष्यसि ब[1]; प्रयक्षामि ब[2] मै पू । ८. पर्यक्षामी° मूको । ९-९. मुख्यकल्पः ब[2] मै पू । १०. यक्षामीति मूको । ११. °ष्णवी मूको । १२. तान्यथा° मूको । १३-१३. नास्ति मै । १४. आहूयते मूको । १५. °मेवेक्षणं मूको । १६-१६. नास्ति मूको ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

तत्र चरावाज्यं भवति । अस्मिन्नाज्ये आत्मानमवेक्षते, उत्तरत्र 'अपश्यन्' इति वचनात् ॥ ४ ॥

[तत्राऽऽत्मानमपश्यतो मन्त्रजपविधानम्]

अपश्यन् हृदि स्पृक् ऋतुस्पृग् वर्चोधा वर्चो अस्मासु धेहि । यन्मे मनो यमं गतं यद्वा मे अपरागतम् । राज्ञा सोमेन तद् वयमस्मासु धारयामसि भद्रं कर्णेभिः शृणुयाम देवा इति च ॥ ५ ॥

यदि तस्मिन्नाज्ये आत्मानं न पश्यति, तदा अपश्यन् हृदिस्पृक् इति यथासमाम्नातं मन्त्रं जपति । 'भद्रं कर्णेभिः' (ऋ १,८९.८) इति एताम् ऋचं च । निगदसंज्ञा प्राप्ता, उपांश्वधिकारान्मन्त्रसंज्ञा भवति ॥ ५ ॥

[तदाज्येनाक्ष्णोरभ्यञ्जनविधानमुद्गातृभ्यः प्रदानञ्च]

अङ्गुष्ठोपकनिष्ठिकाभ्यामाज्येनाक्षिणी अभ्यज्य च्छन्दोगेभ्यः प्रयच्छेत् ॥६॥

अवेक्षणादनन्तरम् अङ्गुष्ठेन उपकनिष्ठिकया च उभाभ्यां सौम्यादाज्यं गृहीत्वा तेन आज्येनाक्षिणी अभ्यज्य अञ्जयित्वा छन्दोगेभ्यः प्रयच्छेत् । अङ्गुष्ठेन दक्षिणम्, उपकनिष्ठिकया उत्तरम् । तूष्णीमेवाञ्जनं मन्त्राभावात् । अक्षिणी अभ्यज्य अध्वर्यवे प्रयच्छेद् इति प्राप्ते छन्दोगेभ्यः प्रयच्छेदित्यप्राप्तं विधीयते ॥ ६ ॥

[शालाकानामग्नीनां विहरणमाग्नीध्रस्य पात्नीवतग्रहयजनं च]

विहृतेषु शालाकेष्वाग्नीध्रः पात्नीवतस्य यजत्यैभिरग्ने सरथं याह्यर्वाङित्युपांश्वेव ॥ ७ ॥

एतस्मिन् काले दर्भशलाकादिभिः प्रदीप्ताभिः धिष्ण्यान् 'अग्निभिर्विहरन्ति । तेषु विहृतेषु शालाकेषु' अग्निषु अनन्तरम् आग्नीध्रः आग्नीध्रीये उपविश्य पात्नीवतस्य ग्रहस्य यजति, 'ऐभिरग्ने' (ऋ ३,६,९) इति एतया याज्यया उपांश्वेव । यद्यप्युच्चैराश्रावयति । उपांशु[२] 'पात्नीवतस्याग्नीध्रो यजति' (ऐब्रा ६,३) इति श्रुतिः । विहृतेष्वपि विहरणम् अस्मिन् काले इति दर्शयति । तस्मादस्मिन् काले धिष्ण्यवन्तः संनिहिता भवन्ति । होतुरधिकारादाग्नीध्रग्रहणम् ॥ ७ ॥

[आग्नीध्रस्य पात्नीवतग्रहभक्षणविधानम्]

नेष्टारं विसंस्थितसंचरेणानुप्रपद्य तस्योपस्थ उपविश्य भक्षयेत् ॥ ८ ॥

१-१. नास्ति ब[२] । २. नास्ति मूको ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

आग्नीध्र इष्ट्वा सद[1] एत्य नेष्टुः यो विसंस्थितसंचरः, तेन अनुप्रपद्य प्रविश्य तस्य नेष्टुः उपस्थे उत्सङ्गे उपविश्य अध्वर्यु उपह्वयस्वेत्युक्त्वा पात्नीवतं ग्रहं भक्षयेत्। 'नेष्टुरुपस्थ आसीनो भक्षयति' (ऐब्रा ६,३) इति श्रुतिः। तस्येत्यनुच्यमाने अन्यस्योपस्थे स्यात्। अत्र निरसनोपवेशने प्राप्ते आसनादनन्तरत्वान्न भवति। होतृषदने [2]दृष्टो धर्मः[2] अन्यत्र न प्राप्नोति। होतृषदनं दर्भमयं भवति। यदीदं नारभ्यते सदसि भक्षयेत्, यथाचमसम्। श्रुत्यन्तरे तु नेष्टुः समीपे उपविश्य भक्षयेद् इत्युक्तम्[3]। उपस्थे आसनं प्रतिषिद्धं[4] नोपस्थे आसीनः यद्युपस्थ आसीत यं(?)स्यादिति[4] ॥ ८ ॥

॥ इति पञ्चमे एकोनविंशं खण्डम् ॥

---

१. नास्ति ब[1]। २-२. दृष्टा धर्माः ब[1,2] मै। त्रुटितम् पू। ३. तु. ऐब्रा ६,३। ४-४. आसीनपक्षः स्यादिति ब[2] मै पू।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

अथ पञ्चमेऽध्याये विंशः खण्डः

[आग्नीध्रस्य यथागतमार्गेण परावर्तनम्]

अथ यथेतम् ॥ १ ॥

आग्नीध्रः पात्नीवतस्य भक्षं कृत्वा अथ अनन्तरं यथेतं यथागतं येन मार्गेणागतस्तेनैव प्रवर्तते। यदीदं[1] नारभ्यते। तदा तदेवायतनमाकर्मपरिसमाप्तेः स्यात्। वचनादागत्योपविष्टः। वचनमन्तरेणाग्नीध्रगमनं न स्यात् ॥ १ ॥

[आग्निमारुतशस्त्रवचनम्]

स्वभ्यग्रमाग्निमारुतम् ॥ २ ॥

अथेति वर्तते। अथानन्तरम् आग्निमारुतं नाम शस्त्रं वक्ष्यति। सुष्ठु अभ्यग्रं स्वभ्यग्रं कर्तव्यम्। स्वभ्यस्तमित्यर्थः। 'तमेव तत्सेतुं कृत्वा तरति तस्मादाग्निमारुते न व्युच्यम्' (ऐब्रा ३, ३५) इति श्रुतिः। तस्मात् स्वभ्यग्रं कर्तव्यम्। नेष्टोपस्थे पश्चाद् दक्षिणाभिरभ्यस्तः। 'आग्निमारुते पुरस्तात् परिधानीयायाः आवपेत' (आश्रौ ९, ६, २) इत्युक्ते एतस्य शस्त्रस्य ग्रहणम् ॥ २ ॥

[आग्निमारुतशस्त्रशंसनविधिकथनम्]

तस्याऽऽद्यां पच्छ ऋगावानं पच्छःशस्या चेत् ॥ ३ ॥

तस्य आग्निमारुतस्य आद्याम् ऋचं पच्छः शंसेद् ऋगावानं पादैरवस्येन्नोच्छ्वसेत्। 'ऋचमृचमनवानमुक्त्वा प्रणुत्यावस्येत्' (आश्रौ ४, ६, २)। पच्छःशस्या चेत्। पच्छःशस्या यदि भवति त्रिष्टुब् जगती वा, तां पच्छः ऋगावानं शंसेत्। 'स्वभ्यग्रम्' इत्युक्ते आग्निमारुतशब्दः अधिकारार्थे न स्यात्, स्वभ्यग्रविधानार्थ एव स्यात्, तस्मात् तस्येति पुनरुच्यते। आद्यामिति नियमाद् उत्तरासु पच्छः ऋगावानं न भवति। ऋगावानमित्युक्ते पच्छःशस्यं न प्राप्नोति। तस्मात् पच्छ इत्युक्ते तेन ऋगावानमनारभ्यमाणं न प्राप्नोति। प्रकृति-

---

१. यदा ब[२]।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

विकृत्यर्थोऽयमारम्भः । तस्माद् विकृतावर्द्धर्चशस्यान्यपि सूक्तानि विद्यन्ते । तस्मात् पच्छःशस्या चेदित्युच्यते ॥ ३ ॥

[पच्छःशस्याया इतराया ऋचोऽर्धर्चशः शंसनम्]

अर्धर्चश इतराम् ॥ ४ ॥

पच्छः शस्याया या इतरा गायत्री, ताम् अर्द्धर्चश ऋगावानं शंसेदित्यर्द्धर्चं अवस्येत्, नोच्छ्वसेत् । अनुच्छ्वस्य ऋगन्तेऽवस्येत् । तथा व्यूळ्हेषु छन्दोमेषु पच्छःशस्यायामुक्ते विधाने अर्धर्च(?शः)शस्यायां न प्राप्नोति, तस्मादिदमुच्यते ॥ ४ ॥

[प्रणवेनोत्तरया सह सन्तानविधानम्]

सन्तानमुत्तमेन वचनेन ॥ ५ ॥

[1]उत्तमेन तृतीयेन† वचनेन‡ प्रणवेनोत्तरयाϕ सह[1] सन्तानं कुर्यात् । अप्राप्तमारभ्यते । ऋगावानमित्युक्ते संतानो न प्राप्नोति । उत्तमेन वचनेनेत्युक्तत्वात् त्रिष्वपि वचनेषु ऋगावानम् ॥ ५ ॥

वैश्वानराय पृथुपाजसे, शं नः करत्यर्वते, प्रत्वक्षसः प्रतवसो, यज्ञा-यज्ञा वो अग्नये, देवो वो द्रविणोदा इति प्रगाथौ स्तोत्रियानुरूपौ । प्रतव्यसीं नव्यसीमापो हि ष्ठेति तिस्रो वियतमप उपस्पृशन्नन्वारब्धेष्व-पावृतशिरस्क इदमादि प्रतिप्रतीकमाह्वानमुत नोऽहिर्बुध्न्यः शृणोतु देवानां पत्नीरुशतीरवन्तु न इति द्वे राकामहमिति द्वे पावीरवी कन्या चित्रायुरिमं यम प्रस्तरमा हि सीद मातली कव्यैर्यमो अङ्गिरोभिरु-दीरतामवर उत्परास आहं पितृन्त्सुविदत्राँ अवित्सीदं पितृभ्यो नमो अस्त्वद्य स्वादुष्किलायमिति चतस्रो मध्ये चाह्वानं मदामो दैव मोदामो दैवोमित्यासां प्रतिगरौ ययोरोजसा स्कभिता रजांसि वीर्येभिर्वीरतमा शविष्ठा । या पत्येते अप्रतीता सहोभिर्विष्णू अगन् वरुणा पूर्वहूतौ । विष्णोर्नु कं वीर्याणि प्रवोचं तन्तुं तन्वन्रजसो भानुमनु इहेवा न इन्द्रो मघवा विरप्शीति परिदध्यात् । भूमिमुपस्पृशन् ॥ ६ ॥

१-१. नास्ति मे । †. नास्ति ब[1] । ‡. ? वगन्ते च तेन पू । ϕ. उत्तरया ब[2] ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

'वैश्वानरीयं सूक्तम्' (ऋ ३, ३) आग्निमारुताद्यम् । 'शं नः करति' (ऋ १,४३,६) इति रौद्री धाय्या । तस्या ऊर्ध्वं 'प्रत्वक्षसः' (ऋ १,८७) इति मारुतं सूक्तम् । मारुतादूर्ध्वं 'यज्ञायज्ञा वः' (ऋ ६,४८,१-२), 'देवो वो द्रविणोदाः' (ऋ ७, १६, ११-१२) इति एतौ प्रगाथौ स्तोत्रियानुरूपसंज्ञौ । पादग्रहणाद् ऋचौ प्राप्तौ तस्मात् प्रगाथाविति आह । स्तोत्रियानुरूपत्वादाहावप्राप्तिः । प्रगाथवच्छंसेत् बृहतीकारं [1]ककुबुत्तराकारं वा[1] ।

अनुरूपादनन्तरं 'प्र तव्यसीम्' (ऋ १, १४३, १) इति जातवेदस्यादूर्ध्वम् 'आपो हि ष्ठा' (ऋ १०,९,१; ३) इति तिस्र ऋचः वियतं व्यक्तम्, वृत्तौ यथा स्थानकालकरणानि पद्यन्ते । द्रुततरा वृत्तिः आग्निमारुते । वियतमिति वचनादस्मिंस्तृचे द्रुता वृत्तिर्भवति । अप उपस्पृशन् शंसेत् अन्वारब्धेषु कर्तृषु । 'तस्मात् तच्छमयतेव शंस्तव्यम्' (ऐब्रा ३, ३६) इति श्रुतिः । तस्माद् [2]वियतमप उपस्पृशन् शंसेत् द्रुता तृतीयसवने वृत्तिरस्मिंस्तृचे[2] । [3]वियतमित्युक्ते द्रुततराऽऽग्निमारुते विद्रुता स्यात्[3] । वियतमित्युक्ते मध्यमा वृत्तिः प्राप्नोति, न द्रुता । द्रुतोत्तमस्वरेणोपपद्यते । तस्मात् तृचे द्रुता वृत्तिः, द्रुततरा आग्निमारुते अप उपस्पृशन् होता शंसति । तमन्वारभन्ते अन्ये कर्तारः, यजमानश्च । ताभिरद्भिः प्रोक्षणं कुर्यात् । 'ता अद्भिरभिषिच्य' (ऐब्रा ३, ३६) इति श्रुतिः ।

अपावृतशिरस्क इदमादि । अब्दैवतं तृचमादि[4] कृत्वा सर्वे ऋत्विजः यजमानः पत्नी च अपावृतशिरस्का भवन्ति । अस्मादारम्भात् पूर्वं प्रावृतशिरस्का[5] भवन्ति । स्तोत्रे शस्त्रे च प्रावृतानि शिरांसि भवन्ति । अन्येषामप्युक्तम्—'सकर्णप्रावृता अवकर्ण-प्रावृता[6] वा' (आपश्रौ १३, १५, ५) इति । इह सूत्रे इदमादिग्रहणात् पूर्वसूत्रे यदुक्तं वियतमप उपस्पृशन् इति तत् सर्वं तृच एव भवति । इदमादिग्रहणाद् आ शस्त्रपरि-समाप्तेः[7] अपावृतशिरस्का भवन्ति । प्रतिप्रतीकमाह्वानम् उत नोऽहिर्बुध्न्यः । 'उत नोऽहिः' (ऋ ६, ५०, १४) इत्येवमादीनि यावन्ति प्रतीकानि, तेषु प्रति-प्रतीकम् आह्वानं भवति । अप्राप्त आहावो विधीयते । इदमादीत्यधिकारादापो-देवत्येऽपि[8] तृचे आहावः प्राप्तः । सूक्ताङ्गत्वान्न स्याद् इति तत्रोक्तम्— 'आपो-देवते च' (आश्रौ ५,१०,१७) इति । तृचादनन्तरम् 'उत नोऽहिः' (ऋ ६, ५०, १४) इति ऋग् भवति । तस्या ऊर्ध्वं 'देवानां पत्नीः' (ऋ ५, ४६, ७) इति द्वे । पादग्रहणादृक् प्राप्ता, तस्माद् द्वे इत्याह । 'राकामहम्' (ऋ २, ३२, ४) इति द्वे ऋचौ । पादग्रहणादेका प्राप्ता । 'पावीरवी' (ऋ ६, ४९, ७), 'इमं यम (ऋ १०,१४,४), 'मातली कव्यैः' (ऋ १०,१४,३), 'उदीरताम्' (ऋ १०,१५,१), 'आहं पितॄन्' (ऋ १०, १५, ३), 'इदं पितृभ्यः' (ऋ १०, १५; २) इत्येताः

१-१. नास्ति ब[1] । २-२. नास्ति ब[2] मै । ३-३. नास्ति मै । ४. °मादि ब[2] । ५. आवृत° ब[2] । ६. अकर्ण° मूको । ७. °समाप्य मूको । ८. °रादपोदे° मूको ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

षडेकपातिन्यः । 'स्वादुष्किलायम्' (ऋ ६,४७,१-४) इति चतस्रः । इत्येताः चतस्रः ऋचः । पादग्रहणाद् ऋचि प्राप्तायां चतस्र इत्याह । प्रतिप्रतीकम्[1] इत्यावौ । प्राप्तः मध्ये च आहावो भवति द्वे ऋचौ शस्त्वा । च- शब्दः समुच्चयार्थः । मदामो दैव मोदामो दैवोम् इति एतौ प्रतिगरौ आसाम् ऋचां भवतः । एकः अवसाने द्वितीयः प्रणवे व्यत्यासः । आसामिति वचनादुत्तरयोरेतौ[2] न भवतः । अतः प्लुतिः कार्या । यथैव 'प्लुतादिः प्रणवे' (आश्रौ ५, ९, ६) इति । 'ययोरोजसा' (ऐब्रा ३,३८) इति यथासमाम्नाता वैष्णावरुणी । 'विष्णोर्नु कम्' (ऋ १,१५४,१) इति वैष्णवी । 'तन्तुं तन्वन्' (ऋ १०, ५३, ६) इति प्राजापत्या । 'एवा नः' (ऋ ४, १७, २०) इति परिदध्याद् भूमिमुपस्पृशन् । परिदध्यादिति पुनरुच्यते- उपस्पृशन् विवक्षार्थम्[3] । तस्मात् त्रिष्वपि वचनेषूपस्पृशेत् ॥ ६ ॥

[उत्तमेन वचनेन ध्रुवग्रहावनयनम्]

उत्तमेन वचनेन ध्रुवावनयनं काङ्क्षेत् ॥ ७ ॥

उत्तमेन वचनेन[4] परिधानीयाया उत्तमं यद् वचनं तेन वचनेन, ध्रुवो नाम ग्रहः । तस्य ध्रुवस्य होतृचमसे अवनयनं कुर्वन्ति । तदवनयनमुत्तमेन वचनेन । अर्द्धर्चमुक्त्वा विरमेद् यावदवनयनं क्रियते । इति कृते[5] उत्तरं ब्रूयात् । 'तन्तुं तन्वन्' (ऋ १०, ५३, ६) इति । एतस्यामृचि ये अध्वर्यवः अवनयन्ति, तैः सह प्रयोगे उत्तमस्यां न काङ्क्षेत् ॥ ७ ॥

[शस्त्वा मन्त्रजपः याज्या च]

उक्थं वाचीन्द्राय देवेभ्य आ श्रुताय त्वेति शस्त्वा जपेत् । अग्ने मरुद्भिः शुभयद्भिर्ऋक्वभिरिति याज्या । इत्यन्तोऽग्निष्टोमोऽग्निष्टोमः ॥ ८ ॥

उक्थं वाचि इति यथासमाम्नातं शस्त्रं शस्त्वा जपेत् । शस्त्वेत्युक्तं प्रयोजनम् । 'अग्ने मरुद्भिः' (ऋ ५, ६०, ८) इति याज्या । समाप्तम् आग्निमारुतम् । इत्यन्तोऽग्निष्टोमः । इत्येतच्छस्त्रमन्तो यस्य क्रतोः स[6] क्रतुः इत्यन्तो भवति । इत्यन्तस्य क्रतोः अग्निष्टोम इति संज्ञा । प्रकृतौ विकृतौ च

---

१. प्रतीकं प्रतीकं मूको । २. °दुत्तरायामेतौ ब[1]; °दुत्तरसोमे तौ ब[2] मै पू । ३. विवक्षार्थम् इत्यारभ्य ६, १, १ सूत्रभाष्यस्थो विधिर्भवति इति पर्यन्तः पाठः ६, १, ३ सूत्रभाष्यस्थस्य इत्यन्तः क्रतुः इति घटक-इत्यन्तः-पदस्थमध्ये पतितः ब[1] । ४. वचनेन यं ब[1/2]; वृटितम् पू । ५. तृचे मै । ६. स ह मै; वृटितम् पू ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

अग्निष्टोमः[1] सः । 'तस्याग्निष्टोमावभितः' (आश्रौ ७, ७, १०) इत्युक्ते इत्यन्तः ऋतुः प्रत्येतव्य इति । अग्निष्टोम इति वक्तव्ये इत्यन्तवचनादपरिसमाप्ति दर्शयति । तस्मादुक्थ्ये[2] तु स विशेषः वक्ष्यते । तत्र एतदेव कर्म । तदुत्तरमुक्थ्यसंज्ञं[3] भवति । [4]अग्निष्टोम इत्युक्ते त्रीण्येव शस्त्राणि[4] उक्थ्यः[5] स्यात् । अग्निष्टोम इत्यध्यायान्तलक्षणोऽभ्यासः ॥ ८ ॥

॥ इत्याश्वलायनसूत्रव्याख्यायां [6]वाराहदेवव्रातकृतौ(?तायां)†[6]
पञ्चमोऽध्यायः[7] समाप्तः ॥

---

१. अग्निष्टोमोऽग्निष्टोमः मूको । २. °दुक्थे मूको । ३. °रमुक्थसंज्ञं मूको । ४-४. अन्यथा अग्नि° मै; अन्यथा·····शस्त्राणि पू । ५. उक्थः मूको । ६-६. वराहदेवकृतौ मै, वराहदेवव्रात·····पू । ७. वृटितम् पू । †. वाराहे देवव्रातकृतौ ब[1,2] ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

अथ षष्ठाध्याये प्रथमः खण्डः

(षष्ठाध्याये तृतीयसवनातिरात्र-प्रायश्चित्तादिवर्णनम्)

[तृतीयसवने उक्थे होत्रकाणां शस्त्रकथनोपक्रमः]

उक्थे[1] तु होत्रकाणाम् ॥ १ ॥

व्याख्यातोऽग्निष्टोमः । उक्थे तु उक्थसंस्थे तु क्रतोर्विधिर्वक्ष्यते । अधिकार-सूत्रमेतत् । तु-शब्द इत्यन्ततां व्यावर्तयति । आग्निमारुतादूर्ध्वं त्रीणि शस्त्राणि वक्ष्यन्ते । तदन्त उक्थो भवति । प्रातरनुवाकादि सर्वं समानम् । वक्ष्यति 'इत्यन्त उक्थः' (आश्रौ ६, १, ३) इति । तेनैव सिद्धे इदं न[2] वक्तव्यम् । अस्यारम्भे प्रयोजनम्- उक्थे तु क्रियमाणे [3]वक्ष्यमाणो विधिर्भवति† । अक्रियमाणे† तु अग्निष्टोमसंस्थ एव भवति । द्विसंस्था वा [4]त्रिसंस्था[4] वा चतुःसंस्था वा इति विकल्पाः ।

होत्रकाणाम् उक्थे तु क्रतौ आग्निमारुतादूर्ध्वं होत्रकाणामेव शस्त्राणि, न होतुः । ये शस्त्रिणो होत्रकास्ते व्याख्याताः[5] । तानि शस्त्राणि वक्ष्यन्ते ॥ १ ॥

[होत्रकाणां शस्त्राणि]

एह्यू षु ब्रवाणि त आग्निरगामि भारतश्चर्षणीधृतमस्तभ्नाद् द्यामसुर इति तृचाविन्द्रावरुणा युवमा वां राजानाविन्द्रावरुणा मधुमत्तमस्येति याज्या । वयमु त्वामपूर्व्य यो न इदमिदं पुरेति प्रगाथौ । सर्वाः ककुभः प्र मंहिष्ठायोदप्रुतोऽच्छा म इन्द्रं बृहस्पते

---

१. उक्थ्ये आन. । २. नास्ति मूको । ३-३. नास्ति मै । †. ५, २०, ५ सूत्रभाष्यस्थ—विवक्षार्थम् इत्यारभ्य विधिर्भवति इत्यन्तः पाठः ६, १, ३ सूत्रभाष्यस्थस्य इत्यन्तः क्रतुः इति-घटक- इत्यन्तः इति मध्ये पतितः ब १ । ४-४. नास्ति ब[1] । ५. तु आश्रौ ५, १०, १० ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

युवमिन्द्रश्च वस्व इति याज्या । अधा हीन्द्र गिर्वण इयं त इन्द्र गिर्वण ऋतुर्जनित्री नू मर्तो भवा मित्रः सं वां कर्मणेन्द्राविष्णू मदपती मदानामिति याज्या ॥ २ ॥

'तेषां तृचाः स्तोत्रियानुरूपाः शस्त्रादिषु सर्वत्र' (आश्रौ ५, १०, १८)। 'यथा ग्रहणमन्यत्' (आश्रौ ५, १०, २०), 'याज्यान्तानि शस्त्राणि' (आश्रौ ५, १०, २१)। 'एहचू षु' (ऋ ६. १६, १६-१८) 'आग्निरगामि भारतः' (ऋ ६, १६, १९-२१) इति स्तोत्रियानुरूपौ । 'चर्षणीधृतम्' (ऋ ३, ५१, १-३), 'अस्तभ्नाद् द्यामसुरः' (ऋ ८, ४२, १-३) इति **एतौ द्वौ** तृचौ । **पादग्रहणाद् ऋचौ प्राप्ते । तस्मात् तृचावित्याह ।** 'इन्द्रावरुणा युवम्' (ऋ ७, ८२) **इति सूक्तम् । युवम् इति विशेषवचनात् सूक्तम् । अन्यथा ऋक् प्राप्नोति—** 'इन्द्रावरुणा सुतपौ' (ऋ ६, ६८, १०) इति । [1]'आ वां राजानौ' (ऋ ७, ८४) **इति सूक्तम् ।** 'इन्द्रावरुणा मधुमत्तमस्य' (ऋ ६, ६८, ११) इति याज्येति ।

'वयमु त्वामपूर्व्य' (ऋ ८. २१, १-२), 'यो न इदमिदं पुरा' (ऋ ८, २१, ९-१०) इति[1] । 'तेषां तृचाः स्तोत्रियानुरूपाः शस्त्रादिषु' (आश्रौ ५, १०, १८) **इति तृचौ प्राप्तौ । तस्मात् प्रगाथावित्याह । संपत्तृचौ भवतः ।** सर्वाः ककुभो **भवन्ति, न बृहत्यः । काकुभे प्रगाथे एका ककुप् सतोबृहती च ।** 'तां द्वे तिस्रस्कारम्' **(आश्रौ ५, १५, ५) इत्युक्ते तिस्रः ककुभः तिस्रो वा बृहत्य इति प्राप्तम् ।** 'तृतीयपञ्चमौ तु काकुभेषु' (आश्रौ ५, १५, ८) **इत्यत्र** बृहतीकारं चेत् तावेव द्विः' **(आश्रौ ५, १५, ७) इत्यनुवर्तमाने तत्प्रतिषेधार्थं सर्वाः ककुभः इत्युच्यते ।** 'प्र मंहिष्ठाय' (ऋ १, ५७) **इति सूक्तम् ।** 'उदप्रुतः' (ऋ १०, ६८) **इति सूक्तम् ।** 'अच्छा म इन्द्रम्' (ऋ १०, ४३) **इति सूक्तम् ।** 'बृहस्पते युवमिन्द्रश्च वस्वः' (ऋ ७, ९७, १०) इति याज्या ।

'अधा होन्द्र' (ऋ ८, ९८, ७-९), 'इयं त इन्द्र' (ऋ ८, १३, ४-६) **इति तृचौ स्तोत्रियानुरूपौ ।** 'ऋतुर्जनित्री' (ऋ २, १३), 'नू मर्तः' (ऋ ७, १००), 'भवा मित्रः' (ऋ १, १५६), सं वां कर्मणा (ऋ ६, ६९) **इति चत्वारि सूक्तानि ।** 'इन्द्राविष्णू मदपती मदानाम्' (ऋ ६, ६९, ३) इति याज्या ॥ २ ॥

[उक्थोपसंहारः]

इत्यन्त उक्थः[2] ॥ ३ ॥

१-१. नास्ति मै । २. उक्थ्यः आन ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

इत्येतानि शस्त्राणि अन्तो यस्य क्रतोः, स इत्यन्तः[1] क्रतुः। 'उक्थ्या मध्ये' (आश्रौ ७, ७, १०) इत्युक्ते इत्यन्त क्रतुर्वेदितव्यः। इत्यन्त इत्यनुच्यमाने इत उत्तरं यद् वक्ष्यते, तस्य सर्वस्य उक्थसंज्ञा प्राप्नोति ॥ ३ ॥

॥ इति षष्ठे प्रथमं खण्डम् ॥

---

१. ५, २०, ५; ६ सूत्रभाष्यस्थ– विवक्षार्थम् इत्यारभ्य ६, १, १ सूत्रभाष्यस्थ-विधिर्भवति इत्यन्तः पाठः इत्यन्तः इति पञ्चमध्ये पतितः ब[1] ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

अथ षष्ठेऽध्याये द्वितीयः खण्डः

[षोडशीक्रतोः शस्त्रकथनोपक्रमः]

अथ षोळशी ॥ १ ॥

अथ इदानीम् उक्थ्यादनन्तरं[1] षोळशी शस्त्रं वक्ष्यते। पृष्ठ्यस्य चतुर्थेऽहनि [2]षोळशी भवति। तदुक्तं †ब्राह्मणे— 'तस्माच्चतुर्थेऽहन्†[2] षोळशिनं शंसति'[3] (ऐब्रा ४, १)। तत्सूत्रकारेणाऽप्युक्तम् चतुर्थेऽहनि षोळशी इति[4]। प्रकृतौ तु ज्योतिष्टोमे षोळशी ब्राह्मणे नाम्नातः। छन्दोगानामप्येवम्। तस्मादिह प्रकृतौ षोळशी संस्था न चोदिता। यथान्यायं संस्था। यथा 'इत्यन्तोऽग्निष्टोमः' (आश्रौ ५, २०, ८)। 'इत्यन्तः उक्थः' (आश्रौ ६, १, ३)। एवमित्यन्तःषोळशीति[5] न चोदितः। तस्मात् त्रिसंस्थ एव ज्योतिष्टोमः। षोळशी शस्त्रम् उक्थेभ्योऽनन्तरं चोदितं विकृत्यर्थम्। प्रकृतावपि श्रुत्यन्तरे षोळशी विद्यते। तथा सति चतुःसंस्थो भवति ॥ १ ॥

[षोडशीशस्त्रम्]

असावि सोम इन्द्र त इति स्तोत्रियानुरूपौ ॥ २ ॥

'असावि सोम इन्द्र ते' (ऋ १, ८४, १-६) इति एताः षड् ऋचः स्तोत्रियानुरूपौ भवतः। एकं प्रतीकं गृहीत्वा स्तोत्रियानुरूपाविति यत्र प्राह ताः षड् भवन्तीत्युक्तं ब्राह्मणाच्छंसिनः शस्त्रे[6] ॥ २ ॥

[अन्येषां शस्त्राणां कथनम्]

आ त्वा वहन्तु हरय इति तिस्रो गायत्र्यः ॥ ३ ॥

उपो षु शृणुही गिरः (ऋ १,८२,१), सुसंदृशं त्वा वयं मघवन्न् (ऋ १, ८२, ३-४) इत्येका द्वे च पङ्क्ती ॥ ४ ॥

---

१. उक्थाद° मै। २-२. नास्ति ब[2] मै। †-†. ब्राह्मणे–चतुर्थेऽहनि षोळशी भवति ब[1]। ३. शस्त्रं मूको। ४. तु. आश्रौ ८, ४, २०। ५. °ळशी ब[1]। ६. तु. आश्रौ ५, १०, २८।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

यदिन्द्र पृतनाज्ये (ऋ ८, १२, २५-२७), अयं ते अस्तु हर्यत (ऋ ३,४४,१-३) इत्यौष्णिहबार्हतौ तृचौ । आ धूर्ष्वस्मा (ऋ ७,३४,४) इति द्विपदा ॥ ५ ॥

ब्रह्मन् वीर ब्रह्मकृतिं जुषाण (ऋ ७, २९, २) इति त्रिष्टुप् । एष ब्रह्मा य ऋत्विय इन्द्रो नाम श्रुतो गणे । विस्रुतयो यथा पथ इन्द्र त्वद्यन्ति रातयः (कौ १, ४३८) । त्वामिच्छवसस्पते (ऋ ८, ६, २१), यन्ति गिरो न संयत (कौ २, १११९) इति तिस्रो द्विपदाः । प्र ते महे विदथे शंसिषं हरी (ऋ १०, ९६, १) इति तिस्रो जगत्यः । त्रिकद्रुकेषु महिषो यवाशिरम् (ऋ २, २२, १) । प्रो ष्वस्मै पुरोरथम् (ऋ १०, १३३, १) इति तृचावातिच्छन्दसौ ॥ ६ ॥

पच्छः पूर्वं द्वेधाकारम् ॥ ७ ॥

उत्तरमनुष्टुब्गायत्रीकारम् ॥ ८ ॥

प्रचेतन प्रचेतयाऽऽहि पिब मत्स्व । ऋतुश्छन्द ऋतं बृहत् सुम्न आ धेहि नो वसवित्यनुष्टुप् । प्रप्र वस्त्रिष्टुभमिषमर्चतं प्रार्चत यो व्यतीरँफाणयदिति तृचा आनुष्टुभाः ॥ ९ ॥

'आ त्वा वहन्तु हरयः' (ऋ १, १६, १-३) इति तिस्रो गायत्र्यः । पादग्रहणादृक् प्राप्नोति तस्मात्[1] तिस्र इत्याह । षोळशिनि अनुष्टुप्[2], सर्वाणि च च्छन्दांसि अनुष्टुभः संपद्यन्ते । 'षोळशः शस्त्राणां षोळशभिरक्षरैरादत्ते' (ऐब्रा ४, १) ॥ ३-८ ॥

'प्रचेतन' (कौ ४, २, ३; ६; ८; ऐआ ४, १, १) इत्यनुष्टुब्ग्रहणाद् 'अर्धर्चाः' (आश्रौ ७, ३, १४) । महानाम्नीनामुपसर्गाणाम् अर्द्धर्चाः न प्राप्नुवन्ति[3] । 'प्रप्र वः' (ऋ ८, ६९, १-३), 'अर्चत' (ऋ ८, ६९, ८-१०), 'यो व्यतीन्' (ऋ ८, ६९, १३-१५) इति तृचाः । पादग्रहणात् तृचा इत्याह । आनुष्टुभाः इति वचनाद्

---

१ नास्ति मूको । २. नास्ति ब[1] मै । ३. प्राप्नोति मूको ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

एतावदेव षोळशिनि प्रज्ञाता[1] अनुष्टुभः । अन्याः संपदा अनुष्टुभो भवन्ति । 'प्रज्ञाता[2] अनुष्टुभः शंसति' (ऐब्रा ४, ४) इति ब्राह्मणम् ॥ ९ ॥

[उत्तमस्य तृचस्योत्तमाया ऋचः पूर्वमुत्तमाया निविद आधानम्]

उत्तमस्योत्तमां शिष्ट्वोत्तमां निविदं दध्यात् ॥ १० ॥

आनुष्टुभानाम् उत्तमस्य तृचस्य उत्तमाम् ऋचं शिष्ट्वा 'अर्भकः' (ऋ ८, ६९, १५) इत्येताम् उत्तमां निविदं दध्यात्, [3]'अस्य मदे' (ऋखि ५, ५, ११) इत्येतामुत्तमां निविदं दध्यात्[3], 'अस्य मदे' (ऋ ६, ४४, १४) इत्येताम् एकां शिष्ट्वा 'तृतीयसवने' (आश्रौ ५, १८, ४) इत्यनेन[4] वचनात् परिधानीयायाः प्राक् निविदः स्थाने प्राप्ते उत्तमस्योत्तमां शिष्ट्वेत्याह । परिधानीयामपि सूक्तमेव 'दैवतेन सूक्तान्तः' (आश्रौ ५, १८, १०) इति वचनात् । [5]'सूक्तान्तैः होता परिदधदेति'[5] (ऐब्रा ६, ८) इति श्रुतिः ॥ १० ॥

[निविदानां लिङ्गपदानां कथनम्]

लिङ्गैः पदानुपूर्व्यं[6] व्याख्यास्यामो मत्सदहिं वृत्रमपां जिन्वदुदार्य-मुद्यां दिवि समुद्रं पर्वताँ इह ॥ ११ ॥

लिङ्गैः [7]शब्दविशेषैर्निविदः पदानाम्[7] आनुपूर्व्यम् अनुक्रमं व्याख्यास्यामः । पाठस्यासंशयार्थम् । अनुक्रमपाठबहुत्वाद् दृष्टपदपाठलिङ्गैः[8] आनुपूर्व्यं विधीयते । तानि लिङ्गानि वक्ष्यन्ते । मत्सत्, अहिम्, वृत्रम्, अपाम्, जिन्वत्, उदार्यम्, उद्याम्, दिवि, समुद्रान्,[9] पर्वतान्,[10] इह, इत्येतानि लिङ्गानि ॥ ११ ॥

[परिधानीयामृचं जपित्वा यजनम्]

उद्यद् ब्रध्नस्य विष्टपमिति परिधानीया । एवाह्येवैवाहीन्द्रम् । एवा हि शक्रो वशी हि शक्र इति जपित्वाऽपाः पूर्वेषां हरिवः सुतानामिति यजति ॥ १२ ॥

---

१. प्रतिज्ञाता ब[1]; प्राकृता मै । २. प्राकृता मै । ३–३. नास्ति मै । ४. इत्यता ब[2]; इत्येता मै । ५–५. सूक्तान्ते होता परिदधाति मूको । ६. °पूर्वं आन. BI । ७–७. °शेषै निविदातां मै; °विदानाम् ब[1]; °विदनाम् ब[2] । ८. °लिङ्गै न ब[1]; लिङ्गे ब[2] । ९. समुद्रं (°द्रे मै) मूको । १०. पर्वतं ब[2] मै ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

'उद्यद् ब्रध्नस्य विष्टपम्' (ऋ ८,६९,७) इति इयं परिधानीया[1] । परिधानीये-त्यनुच्यमाने उत्तरत्र जपित्वेति वचनादस्या ऋचः जपसंज्ञा स्यात् । 'एवाह्येवैवाहीन्द्रम्' इति एतं यथासमाम्नातं[2] जपित्वा 'अपाः पूर्वेषाम्' (ऋ १०,९६,१३) इति यजति । जपित्वेति वचनाद् याज्याङ्गं जपः । 'याज्यां जपेनोपसृजेत्' (आश्रौ ६, ३, १६) इति वचनात् । तस्मात् संप्रेषितो[3] जपित्वा यजति । शस्त्रान्ते शस्त्रजपो जप्तो भवतीति । अयमविहृतः षोळशी व्याख्यातः । अविहृतासु स्तूयमानो भवति प्रकृतौ विकृतौ च ॥ १२ ॥

॥ इति षष्ठे द्वितीयं खण्डम् ॥

---

१. नास्ति ब[2] मै । २. यथाम्नातं ब[2] । ३. स प्रेषितो मै ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

षष्ठेऽध्याये तृतीयः खण्डः

[विहृतानामृचां कथनम्]

विहृतस्येन्द्र[1] जुषस्व प्र वहाऽऽयाहि शूर हरी इह । पिबा सुतस्य मतिर्न मध्वश्चकानश्चारुर्मदाय । इन्द्र जठरं नव्यं न पृणस्व मधोर्दिवो न । अस्य सुतस्य स्वर्णोप त्वा मदाः सुवाचो अस्थुः । इन्द्रस्तुषाराण्मित्रो न जघान वृत्रं यतिर्न । बिभेद बलं भृगुर्न ससाहे शत्रून् मदे सोमस्य ॥ श्रुधी हवं न इन्द्रो न गिरो जुषस्व वज्री न । इन्द्र सयुग्भिर्दिद्युं नमत्स्वा मदाय महे रणाय । आ त्वा विशन्तु कविर्न सुतास इन्द्र त्वष्टा न । पृणस्व कुक्षी सोमो नाविड्ढि शूर धिया हि या नः साधुर्न गृध्नुर्ऋभुर्नास्तेव शूरश्चमसो न । यातेव भीमो विष्णुर्न त्वेषः समत्सुक्रतुर्नेति स्तोत्रियानुरूपौ ॥ १ ॥

विहृतासु स्तूयमानो[2] विहृतो भवति 'इन्द्र जुषस्व' (तु० शौ २, ५, १) इत्येतासु । एता ऋच आथर्वणिकानामविहृताः पठ्यन्ते । अस्माकं तु विहृताः[3] । महानाम्नीषु च[4] स्तूयमानो[5] विहृतो भवति, ता अविहृताः शक्वर्यः अशाक्वरैः पादैर्विहृताः । [6]'पादादूर्ध्ववत् सः'[6] (कौ ४, ६४-४८) इत्येते शाक्वराः पादाः, तस्माद् वज्रादिषु माहानाम्नीषु[7] गौरिवीतं [8]भवति । 'यदि गौरिवीतं विहृतः षोळशी शंस्तव्यो विहृतासु हि तासु[8] स्तुवते' (ऐब्रा ४, २) इति ब्राह्मणम् । महानाम्न्यः सपुरीषपदा यथाविधानं शस्यन्ते । तासां च त्रयस्तृचा अनुरूपः । विहृतस्य षोळशिनो विधानं वक्ष्यते । 'इन्द्र जुषस्व' (तु० शौ २, ५, १-६) इति यथासमाम्नाताः षळृचः स्तोत्रियानुरूपौ । तिस्रः स्तोत्रियः, तिस्रोऽनुरूपः 'तृचाः स्तोत्रियानुरूपाः' (आश्रौ ५, १०, १८) इति वचनात् ॥ १ ॥

[इतोऽनन्तरमविहृतस्य षोडशिनः शंसनम्]

ऊर्ध्वं स्तोत्रियानुरूपाभ्यां तदेव शस्यं विहरेत् ॥ २ ॥

---

१. विहृत–, °ता– स्थाने सर्वत्र विकृत–, °ता– इति पाठः मै । २. स्तूयमानेषु मूको । ३. अवि° ब[2] मै । ४. नास्ति ब[1] । ५. °माने मूको । ६-६. °ध्वंवत्यः ब[1]; °ध्वं वत्सः मै । ७. नास्ति ब[1]; महानाम्नी ब[2] मै; तु. लाश्रौ १०,२,१; ४ । ८-८. विहृतः हितासु ब[1] ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

ऊर्ध्वं स्तोत्रियानुरूपाभ्यां यत् प्रागुक्तम् अविहृतस्य षोळशिनः शस्यं, तदेव विहरेत् । [1]कथं विहरेद्[1] इति तद्विधा न वक्ष्यते । ऊर्ध्वमनुरूपादिति वक्तव्ये स्तोत्रियानुरूपाभ्याम् इति वचनाद् अन्याभ्यामपि स्तोत्रियानुरूपाभ्यां विहृतः षोडशी यथा स्यादिति महानाम्नीषु प्राप्त्यर्थम् । अन्यथा आम्नाताभ्यामेव विहृतः स्यात् । 'गायत्र्यः पङ्क्तिभिः' (आश्रौ ६, ३, ५) [1]इत्युक्ते याः काश्चन गायत्र्यः पङ्क्तिभिरिति प्राप्ते तदेव शस्यं विहरेदित्याह[1] ॥ २ ॥

[अर्धर्चशः शंसनम्]

पादान् व्यवधायार्धर्चशः शंसेत् ॥ ३ ॥

[2]विहारविधिर्वक्ष्यते । पादानन्यान्यैः व्यवधाय अर्धर्चशः शंसेत् । द्वाभ्यां पादाभ्यामवस्येत् । द्वाभ्यां प्रणुयात् । प्रकृते अर्धर्चावसाने प्राप्ते पुनरर्द्धर्चशो ग्रहणम् । द्वाभ्यां च प्रणवः ॥ ३ ॥

[पाठक्रमकथनम्]

पूर्वासां पूर्वाणि पदानि ॥ ४ ॥

पूर्वंचोदितानि ऋचां पूर्वाणि पदानि उत्तरासाम् उत्तराणि पदानीत्वर्थादापन्नम् । पूर्वासां पूर्वाणि उत्तरासां वा पूर्वाणीत्येवमाद्यनियमे प्राप्ते नियमः क्रियते ॥ ४ ॥

[गायत्रीणां विहरणनियमः]

गायत्र्यः पङ्क्तिभिः ॥ ५ ॥

गायत्रीः† पङ्क्तिभिः[2] सह विहरेत् 'तदेव शस्यम्' (आश्रौ ६, ३, २) इति वचनात् । 'आ त्वा वहन्तु' (ऋ १, १६, १-३) इति गायत्रीः[1] । 'उपो षु' (ऋ १, ८२, १) इति पङ्क्तिभिः सह विहरेत् । गायत्रीणां पूर्वाणि पदानि, पङ्क्तीनामुत्तराणि ॥ ५ ॥

[पङ्क्तीनां द्वयोर्द्वयोः पदयोर्विहरणम्]

पङ्क्तीनां तु द्वे द्वे पदे शिष्येते ताभ्यां प्रणुयात् ॥ ६ ॥

१-१. नास्ति ब[1] । २-२. नास्ति ब[1] । † गायत्र्यः ब[2] मै । ३. गायत्र्यः ब[1]; प्रगाथः ब[2] मै ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

पङ्क्तीनां तु द्वे द्वे पदे शिष्येते। त्रिभिः पदैस्त्रीणि पदानि विहृतानि। द्वे द्वे पदे च[1] शिष्येते, ताभ्यां प्रणुयात्। तु-शब्दो गायत्र्यधिकारव्यावृत्त्यर्थः। 'गायत्र्यः[2] पङ्क्तिभिः' (आश्रौ ६, ३, ५) इति वचनाद् गायत्रीपदानामभ्यावृत्तिः प्राप्ता, तत्प्रतिषेधार्थमिदमुच्यते। ताभ्यां प्रणुयाद् इति वचनाच् चतुर्थे यत्पङ्क्त्यवसानम्, तस्य प्रतिषेधः ॥ ६ ॥

[उष्णिहां बृहतीभिः सह विहरणनियमः]

उष्णिहो बृहतीभिरुष्णिहां तूत्तमान् पादान् द्वौ कुर्यात् ॥ ७ ॥

उष्णिहो बृहतीभिः सह विहरेत्। 'यदिन्द्र पृतनाज्ये' (ऋ ८, १२, २५) इत्युष्णिहः। 'अयं तु अस्तु' (ऋ ३, ४४, १) इति बृहत्यः। उष्णिहां पदानि पूर्वाणि, बृहतीनाम् उत्तराणि। उष्णिहां तु [3]उत्तमान् पादान्[3] द्वादशाक्षरान् द्वौ द्वौ कुर्यात् ॥ ७ ॥

षट् षडक्षराणि प्राप्तानि[4]। तस्मादिदमुच्यते—

[आद्यपादस्य चतुरक्षरत्वविधानम्]

चतुरक्षरमाद्यम् ॥ ८ ॥

प्रथमं[5] चतुरक्षरं भवति, द्वितीयमष्टाक्षरम्। तानि चत्वारि चतुर्भिः सह विहरेत् ॥ ८ ॥

[द्विपदानामृचां विहरणनियमः]

द्विपदाश्चतुर्धा कृत्वा प्रथमां त्रिष्टुभोत्तरा जगतीभिः ॥ ९ ॥

[6]या अत्र द्विपदास्ताश्चतुर्धा क्रियन्ते[6]। चत्वारि खण्डानि कृत्वा प्रथमां द्विपदां त्रिष्टुभा सह विहरेत्। 'आ धूर्ष्वस्मै' (ऋ ७, ३४, ४; आश्रौ ६, २, ५) इति पञ्चाक्षरैः खण्डैः 'ब्रह्मन् वीर' (ऋ ७, २९, २; आश्रौ ६, २, ६) इति त्रिष्टुभा सह विहरेत्। उत्तरा जगतीभिः। उत्तरा द्विपदा जगतीभिः सह विहरेत्। 'एष ब्रह्मा' (आश्रौ ६, २, ६) इति तिस्रो द्विपदाः चतुर्धा कृत्वा[7] चतुरक्षराणि खण्डानि भवन्ति। ता द्विपदा जगतीभिः सह विहरेत्। 'प्र ते महे' (ऋ १०, ९६, १; आश्रौ ६, २, ६) इति जगत्यः। तत्र मध्यमया[8] द्विपदया 'इन्द्र त्वद् य

---

१. व मूको। २. गायत्री मूको। ३-३. उत्तमानि पदानि ब[2]। ४. प्राप्नोतीति मूको। ५. षडंगं ब[1]; षडं ब[2] मै। ६-६. नास्ति ब[2]। ७. कृतानि ब[2] मै। ८. तु. आश्रौ ६, २, ६।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

इति चत्वार्यक्षराण्येव, [1]°न्ति रातयः[1] इति नकारादीनि चत्वार्युत्तरं खण्डम् । तत्र नकारं पूर्वाङ्गमेके मन्यन्ते 'संयोगादिर्वा' (ऋप्रा १, २५) इति वचनात्। तन्न[2] । कस्मात् । स्वरार्थम् । संयोगादिः पूर्वाङ्गं भवति । इह तु[3] उत्तरादिः । स्वराणामभावादुत्तराङ्गमेव संयोगादिर्भवति । संहितायां पूर्वाङ्गमुत्तराङ्गम्[4] इत्येष धर्मः । स चाक्षरावसाने न प्राप्नोति । तस्मान्नकार उत्तराङ्गमेव । यदा अक्षराणि लिख्यन्ते, तदा संयोगादिषु उत्तरेण सह लिख्यन्ते ॥ ९ ॥

[द्विपदायाः पादनियमः]

उत्तमायाश्चतुर्थमक्षरमन्त्यं पूर्वस्याऽऽद्यमुत्तरस्य ॥ १० ॥

उत्तमाया द्विपदाया 'त्वामिच्छवसस्पते' (आश्रौ ६, २, ६) इति [5]†सप्ताक्षरः पादः†। तस्य विभागे क्रियमाणे चतुर्थमक्षरम् अन्त्यं पूर्वस्य खण्डस्य 'त्वामिच्छव°' (आश्रौ ६, २, ६) इति[5] । तदेवाक्षरमाद्यम् उत्तरस्य खण्डस्य °वसस्पते इति। एवं कृते उभे अपि चतुरक्षरे भवतः । विकर्षस्यासंभवादिदमुच्यते । एकीभावस्य संयोगस्य च क्षिप्रवर्णस्य[6] विकर्षः अत्र न विद्यते ॥ १० ॥

[अनुष्टुभोऽतिच्छन्दःस्ववधानम्]

अनुष्टुभमतिच्छन्दःस्ववदध्यात् ॥ ११ ॥

'प्रचेतन' (आश्रौ ६,२,९) इति अनुष्टुभम् ऋचं 'त्रिकद्रुकेषु' (ऋ २,२२,१) इत्येतासु अतिच्छन्दःसु अवदध्याद् अनुष्टुप्-संपदर्थम् ॥ ११ ॥

कथमवदध्यादिति तदुच्यते—

[अनुष्टुभोऽतिच्छन्दःस्ववधानविधिः]

द्वितीयतृतीययोस्तृतीययोः पादयोरवसानत उपदध्यात् । प्रचेतनेति पूर्वस्यां प्रचेतयेत्युत्तरस्याम् ॥ १२ ॥

द्वितीयतृतीययोर्ऋचो 'अध त्विषीमान्' (ऋ २, २२, २), 'साकं जाताः' (ऋ २, २२, ३) इत्येतयोः, 'तृतीययोः[7] पादयोः 'अघत्तान्यं जठरे' (ऋ २,२२,२), 'दाता राधः' (ऋ २, २२, ३) इत्येतयोः पादयोरन्तेऽवदध्यात्[8] । 'प्र चेतन'

१-१. अन्तियत् मूको । २. तत्र मूको । ३. नास्ति ब[1] । ४. पूर्वोगमुत्तगम् ब[1]; पूर्वगमुत्तरागम् ब[2]; पूर्वात्तमुत्तराङ्गाम् मैं । ५-५. नास्ति ब[2] । †-†. °रपादः ब[1] मैं । ६. त्वेषव° ब[1] । ७. नास्ति मूको । ८. पादान्ते° मूको ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

(आश्रौ ६, २, ९) इति पूर्वस्यामृचि तृतीयपादान्ते, '"प्रचेतय' (आश्रौ ६, २, ९) इत्युत्तरस्यां तृतीयपादान्ते[1] । होता स्वानामुपसर्गानुपसृजति[2] इति श्रुतिः[3] । 'पूर्वासां पूर्वाणि पदानि' (आश्रौ ६, ३, ४) इति वचनादादितः प्राप्ते अवसानत इत्याह ॥ १२ ॥

[उत्तरास्वतिच्छन्दःसु अनुष्टुप्कारं शंसनम्]

उत्तरास्वितरान् पादान् षष्ठान् कृत्वाऽनुष्टुप्कारं शंसेत् ॥ १३ ॥

उत्तरासु अतिच्छन्दःसु 'प्रो ष्वस्मै' (ऋ १०, १३३, १-३) इत्येतासु अनुष्टुभः ये इतरे पादास्त्रयः[4], तान् पादान् सप्तपदासु तिसृषु षष्ठान् कृत्वा । तथाकृते अष्टौ पादाः संपद्यन्ते । ता अनुष्टुप्कारं शंसेत् । अनुष्टुभः कृत्वा अनुष्टुप्कारम् । चतुष्पदा अनुष्टुभो भवन्ति ॥ १३ ॥

[स्तोत्रियानुरूपाभ्यामनन्तरं विहृतप्रतिगरद्वयशंसनम्]

ऊर्ध्वं स्तोत्रियानुरूपाभ्यामाऽतो विहृतः ॥ १४ ॥

तत्र प्रतिगर ओथामो दैवमदे मदामो दैवोमथेति ॥ १५ ॥

ऊर्ध्वं स्तोत्रियानुरूपाभ्याम् आऽतः अतिच्छन्दसां समाप्तेः अतो यदनुक्रान्तं, तत्र तस्मिन् विषये अधिकृतः[5] प्रतिगरः ओथामो दैवमदे, मदामो दैवोमथेति अयं विहृतः प्रतिगरः । अन्यत्रापि विहृत इति स्तोत्रियानुरूपौ अविहृतौ । तस्मादाह— ऊर्ध्वं स्तोत्रियानुरूपाभ्यामिति । कृत्रिमाकृत्रिमयोः कृत्रिमे संप्रत्ययः (पाम १, १, २३) इति । [6]विहृतासु स्तुवते[7] इति स्तूयते, न क्रियते [8]विहारः । तस्मात् क्रियते[8] । विहारे विहृतः प्रतिगर उपदिश्यते । ऊर्ध्वमनुरूपादिति तत्र सिद्धं भवति इति वचनात् 'प्रप्र वः' (ऋ ८, ६९, १; आश्रौ ६, २, ९) इत्येवमादि यत् परं, तत्रापि विहृतः[8] प्रतिगरः । आम्नायाद्[9] एव सिद्धे विहृत[10] इति न वक्तव्यम् । विहृतः इति वचनाद् विहृतेऽपि[11] विहृतः क्रियते । त्रिकद्रुकीयायां

१-१. नास्ति ब[1] । २. स्वानुप° ब[1] । ३. तु. ऐब्रा ४,४ । ४. तु. आश्रौ ६,२,९ । ५. अविहृतः ब[1] । ६-६. विहृतासु हि तासु स्तुवते ऐब्रा ४, २ । ७-७. नास्ति ब[1] । ८. विहितः ब[1]; विहृत एव ब[2] मै । ९. आम्नाया मूको । १०. विहितः ब[2] । ११. विहृतोऽपि ब[1]; विहितेऽपि ब[2] ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

पङ्क्तिषु चोत्तमयोः पादयोः । आत इत्युक्ते तत्रेति न[1] वक्तव्यम् । तत्रेति वचनाद् यत्रोपदिष्टस्तत्रैव भवति । विहृतावपि ऋचां विहारे उक्तस्तत्रैव भवति, न सूक्तविहारे । 'विपरिहरेदेवोत्तमे सूक्ते' (आश्रौ ८, २, १२) इत्यत्र द्वौ प्रतिगरावुक्तौ[2] एकवचनेनाह—प्रतिगर इति । तस्माज्जातिनिर्देशोऽयम् । मदामो देवोम्[3] इत्यत्र प्लुतिः प्रणव इति[4] वचनात् ॥ १४–१५ ॥

[याज्यायां जपेन मिश्रणम्]

याज्यां जपेनोपसृजेत् ॥ १६ ॥

याज्यां जपेन सह उपसृजेत् विहरेत् याज्याङ्गभूतेन जपेन । 'महानाम्नीनां पञ्चाक्षरानुपसर्गानुपसृजत्येकादशाक्षरेषु पादेषु' (ऐब्रा ४, ४) इति श्रुतिः । आम्नायादेव याज्याविहारे सिद्धे सूत्रारम्भो याज्यायाः [5]पूर्वं जपप्रतिषेधार्थः[5] । 'जपित्वा° यजति' (आश्रौ ६, २, १२) इत्युक्तत्वाज्जपश्च प्राप्नोति । पुनस्तेन च विहार आम्नायादेव सिद्धः ॥ १६ ॥

[विहृतयाज्याकथनम्]

एवा ह्येवापाः पूर्वेषां हरिवः सुतानामेवाहीन्द्रम् । अथो इदं सवनं केवलं ते । एवा हि शक्रो ममद्धि सोमं मधुमन्तमिन्द्र वशी हि शक्रः सत्रावृषं जठर आ वृषस्वेति ॥ १७ ॥

'एवा ह्येवापाः' (तु० ऋ १०, ९६, १३) इति यथासमाम्नाता विहृता याज्या ॥ १७ ॥

[अन्यकर्मणामविहृतेन समानत्वम्]

समानमन्यत् ॥ १८ ॥

विहृत्य[6] यदुक्तं तस्माद् अन्यत् पूर्वेणाविहृतेन समानम् ॥ १८ ॥

[आहावविशेषकथनम्]

स्तोत्रियाय निविदे परिधानीयाया इत्याहावः ॥ १९ ॥

---

१. नास्ति मूको । २. °गरानुक्ता मूको । ३. देवौ मूको । ४. तु. आश्रौ ५, ९, ६-१० । ५-५. पूर्वजपः प्रतिषेधः मूको । ६. विहृत्य विकृत्य ब[2] में ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

'प्रप्र वः' (ऋ ८, ६९, १-३) इत्येवमादितृचा निवित् परिधानीया च[1]। 'पादान् व्यवधायार्धर्चशः शंसेत्' (आश्रौ ६, ३, ३) इत्युक्तम्। यत्र पादे व्यवधानं न विद्यते, तत्र पूर्वेण समानं पच्छःशस्यमेव। विहारार्था एते उपसर्गा न भवन्ति। पादपूरणार्थाः। अनुष्टुप्सम्पदर्थम् अव्यवधायानुचोदिताः[2], तस्मात् पादपूरणा वा[3] भवन्ति। पादपूरणार्थत्वात् तत्र स्तोत्रिया भवन्ति। तत्राप्युपसर्गौ[4] भवतः, छन्दोगप्रत्ययत्वाच्च स्तोत्रियस्य।

'समानमन्यत्' (आश्रौ ६, ३, १८) इत्यनुच्यमाने 'विहृतस्य' (आश्रौ ६, ३, १) इत्यधिकृत्य यावदुक्तं तावत्प्राप्नोति[5]। स्तोत्रियाय आहावः क्रियते नानुरूपाय। निविदे एव न निविद्धानीयस्यादौ परिधानीयाया एवाहावो भवति, नान्यत्र। 'अथ षोळशी' (आश्रौ ६, २, १) इत्यधिकृत्य अविशेषेण य उक्तो विधिः, स अविहृतस्य च षोळशिनो भवत्येव। आहावादिभक्षविधिश्च। स्तोत्रियाय निविदे परिधानीयाया अन्यत्र[6] आहावो न क्रियते। अनुरूपानन्तरे[7] निविद्धानीयादौ च। आहाव इति जातिनिर्देशः, यथा 'प्रतिगरः' (आश्रौ ६, ३, १५) इति ॥ १९ ॥

[षोडशिपात्रभक्षणम्]

आहृतं षोळशिपात्रं समुपहावं भक्षयन्ति ॥ २० ॥

हुत्वा[8] अध्वर्युराहरति षोळशिपात्रम्, आहृतं षोळशिपात्रम्। येषां तस्मिन् पात्रे समानो भक्षः, ते[9] सर्वे[10] समवेताः[11] [12]समुपहावं समुपहूय[12] भक्षयन्ति[13]। 'वषट्कर्तैकपात्राणि' (आश्रौ ५, ९, २८) इति वषट्कर्तुः प्राप्ते तेषां सर्वेषां विधीयते। आहाववचनाच्छस्त्वमधिकृतं, न याज्या। तस्माद् भक्षकालस्याधिकारार्थमाहृतमित्युच्यते। आहृतमित्युक्ते चमसभक्षेष्वपि अयं विधिः प्राप्नोति। तस्मात् षोळशिपात्रमित्युच्यते। 'यथासभक्षं त्वदीक्षिताः' (आश्रौ ५, ६, १९) इति[14]। समुपहूय भक्षे प्राप्ते समुपहावमिति न वक्तव्यम्। तस्यारम्भे[15] प्रयोजनम्। ये भक्षिणो वक्ष्यन्ते, तेषु भक्षिषु[16] अप्युपहवप्राप्त्यर्थम्। छन्दोगा एकाहेऽहीने च[17]

---

१. वा मूको। २. अधायानचो° ब[1]; श्रद्धाया न चो° ब[2]; अवधाया न चो° मै। ३. नास्ति ब[2]। ४. °सर्गे मूको। ५. यावत्प्रा° मूको। ६. अन्यः ब[1] मै। ७. अनुरूपे अनन्तरे ब[1] मै; °पानन्तरं ब[1]। ८. आहुत्वा ब[2] मै। ९. ता ब[1]; त् ब[2]; तत् मै। १०. सर्वान् ब[1/2]; सर्वा मै। ११. °वेतान् ब[1/2] °वेता मै। १२-१२. समुपहूय समुपहावं मूको। १३. °यन्ते मूको। १४. नास्ति मूको। १५. तस्मादार° मूको। १६. भक्षेषु मूको। १७. च न ब[1] मै।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

भक्षयन्ति[1]। अध्वर्यवोऽपि कथं न भक्षयन्ति। भक्षयन्तीति वचनात् सर्वऋत्विजां भक्षे प्राप्ते इष्टपरिग्रहः क्रियते उत्तरेण सूत्रेण ॥ २० ॥

[दशानां भक्षिणां परिगणनम्]

घर्मे च भक्षिणः ॥ २१ ॥

मैत्रावरुणस्त्रयश्छन्दोगाः ॥ २२ ॥

घर्मे च भक्षिणः ये च भक्षयन्ति[2]। मैत्रावरुणस्त्रयश्छन्दोगा इत्येते भक्षयन्ति। तेषां परिसंख्यानाद् ब्राह्मणाच्छंस्यादयो न भवन्ति। च-शब्दः समुच्चयार्थः। घर्मे भक्षिणः षट्[3], मैत्रावरुणः, छन्दोगास्त्रय इत्येते दश। त्रयः छन्दोगाः इति वचनात् सुब्रह्मण्यस्य निवृत्तिः। भक्षिषु उपदिष्टेषु भक्षविधानमप्युपहवादि प्राप्नोति। दधिघर्मे व्याख्यातम्[4]। तस्माद् घर्मे यद्विधानं, तदिह भवति। घर्मे तु वाजिनात्[5]। 'प्रतिप्रस्थाता वाजिने तृतीयः' (आश्रौ २, १७, १५) इति वचनान्न मुख्याः, न तु क्रमेणोपहूयन्ते, नैवात्र द्वितीयतृतीयचतुर्थमुपहूयन्ते[6]। गृहपतिम् इति। [7]एवमनेनानुक्रमेण सर्वे उपहूय[7] भक्षयेयुः।

कथं प्रयोगः। होता भक्षयति अध्वर्यु उपह्वयस्व, ब्रह्मन्नुपह्वयस्व, उद्गातरुपह्वयस्व, मैत्रावरुण उपह्वयस्व प्रशास्तरिति वा, प्रतिप्रस्थातरुपह्वयस्व, प्रस्तोतरुपह्वयस्व, अग्नीदुपह्वयस्व, प्रतिहर्तरुपह्वयस्व, यजमानोपह्वयस्वेति। एवं सर्वे। 'इळामिव प्रतिगृह्य' (आश्रौ २, १६, १७) इति प्राप्तम्, प्राणभक्षश्च द्रव्यान्यत्वान्न भवति। यत्सोमे विधानं दृष्टं[8], तदेव भवति 'उत्तरेऽर्द्धे गृहीत्वा' (आश्रौ ५, ६, १) इति। 'भक्षयेत् सर्वत्र' (आश्रौ ५, ६, २) इति। सर्वत्रग्रहणात् प्राप्तः प्रतिषेधः। एवमेकाहाहीनेषु भक्षविधिः सत्रेषु घर्मे दीक्षितानां यत् तदेव भवति। 'सर्वे तु दीक्षिताः सर्वेषु दीक्षितेषु गृहपतेस्तृतीयोत्तमौ भक्षौ' (आश्रौ ४, ७, ४) इति स क्रम उक्तो घर्मप्रकरणे ॥ २१-२२ ॥

[भक्षजपमन्त्रविधानम्]

इन्द्र षोळशिन्नोजस्विस्त्वं देवेष्वस्योजस्वन्तं मामायुष्मन्तं

---

१. भवन्ति मूको। २. भक्ष्यन्ते मूको। ३. तु. होत्रध्वर्युब्रह्मप्रस्तोतृप्रतिप्रस्थात्राग्नीध्यजमानाः (मासं. [महीधरः] ३८, १६)। ४. तु. आश्रौ ५, १३, १-३। ५. तु. आश्रौ ४, ७, ४। ६. °हूयते ब[2]। ७-७. नास्ति मै। ८. इष्टं ब[2] मै।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

वर्चस्वन्तं मनुष्येषु कुरु । तस्य त इन्द्रपीतस्यानुष्टुप्छन्दस उपहूतस्योपहूतो भक्षयामीति भक्षजपः ॥ २३ ॥

'इन्द्र षोळशिन्नोजस्विन्' इति यथा समाम्नातो भक्षजपः । 'वाग्देवी' (आश्रौ ५, ६, २) इति च भवति सर्वत्रग्रहणात् ॥ २३ ॥

॥ इति षष्ठे तृतीयं खण्डम् ॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

अथ षष्ठेऽध्याये चतुर्थः खण्डः

[अतिरात्रोपक्रमस्तत्र होत्रकाणामिव होतुः शस्यकथनम्]

अतिरात्रे । पर्यायाणामुक्तः शस्योपायो होतुरपि यथा होत्रकाणाम् ॥१॥

व्याख्यातः उक्थ्यः षोळशी च । इदानीमतिरात्रसंस्था च वक्ष्यते । अतिरात्रे इत्यधिकारसूत्रम् । यदित ऊर्ध्वं वक्ष्यामस्तदतिरात्रस्य विधानम् आऽऽश्विन-समाप्तेः । संज्ञा चेयमिति । अतिरात्र इत्युक्ते एतस्य ग्रहणम् । पर्याया नाम अतिरात्रे भवन्ति । वक्ष्यन्ते 'चतुःशस्त्राः पर्यायाः' (आश्रौ ६, ४, ७) इति । तेषां पर्यायाणाम् उक्तः शस्योपायः व्याख्यातः शस्यविधिः— 'एष आहावः° पर्याय-प्रभृतीनां च' (आश्रौ ५, ९, २) इत्याहावो व्याख्यातः । 'तेषां चतुराहावानि शस्त्राणि° । पर्यायेषु' (आश्रौ ५, १०, ११) इति । चतुराहावान्तत्वम्' । 'उक्थं वाचि' (आश्रौ ५, २०, ८) [२]इत्येष उक्थजपः[२] । 'ऊर्ध्वं च षोळशिनः सर्वेषाम्' (आश्रौ ५, १०, २३) इति शस्त्रजपो व्याख्यातः । एवमुक्तः शस्योपायः । सिद्धमपि तत्पुनरुच्यते उत्तरसूत्रविवक्षार्थम् । होतुरपि यथा होत्रकाणामित्युक्ते होत्रकाणां यः शस्योपायः, स एव होतुः प्राप्नोति । अस्मादारम्भाद्यस्तु सामान्यविहितः होत्रकाणामेव प्राप्नोति । 'एष आहावः प्रातःसवने शस्त्रादिषु पर्यायप्रभृतीनां च' (आश्रौ ५, ९, २) इति । संज्ञा चेयम् । 'यदि पर्यायानभिव्युच्छेत्' (आश्रौ ६.६,१) इत्युक्ते एते पर्यायाः प्रत्येतव्याः । होतुरपि यथा होत्रकाणाम् । होतुरपि शस्यं भवति यथा होत्रकाणाम्— 'तेषां तृचाः स्तोत्रियानुरूपाः शस्त्रादिषु सर्वत्र' (आश्रौ ५, १०, १८), 'यथाग्रहणमन्यद् (आश्रौ ५, १०, २०), 'याज्यान्तानि शस्त्राणि' (आश्रौ ५, १०, २१) इति । एतद्धोत्रकाणाम् उक्तं, [३]होतुरप्राप्तम् इह विधीयते । अपि– शब्दः समुच्चयार्थः । होतुश्च भवति ॥ १ ॥

[प्रथमे पर्याये शस्त्वा विरामकरणम्, शिष्टे द्वे पदे समस्य]

प्रथमे पर्याये होतुराद्यां वर्जयित्वा प्रत्यृचं स्तोत्रियानुरूपेषु प्रथमानि पदानि द्विरुक्त्वाऽवस्यन्ति ॥ २ ॥

१, °हावंतं मूको । २-२. इत्येव (इत्ये ब[२] मै) (उक्थः (°क्थं मै) जपः मूको ।
३. होतुरपि मूको ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

शिष्टे समसित्वा प्रणुवन्ति ॥ ३ ॥

त्रयः पर्यायाः । तेषां प्रथमे पर्याये होतुः शस्त्रस्य आद्याम् ऋचं वर्जयित्वा ऋचमृचं प्रत्यृचं स्तोत्रियेषु अनुरूपेषु च प्रथमानि पदानि प्रथमान् पादान् द्विरुक्त्वा अवस्यन्ति विरमन्ति ।

शिष्टे द्वे पदे समसित्वा द्वयोः पादयोः[1] समासं कृत्वा ऋगन्तेन प्रणुवन्ति । सर्वेषामधिकारात् प्रथमे पर्याये[2] इति पुनरधिकारः क्रियते । होतृग्रहणाद्ध्वोत्रकाणाम् आद्याया अभ्यासप्रतिषेधो न भवति । प्रत्यृचमभ्यासे प्राप्ते होतुराद्यायाः प्रतिषेधः । अनुष्टुबिव[3] सा । अनुष्टुप्संपदर्थोऽभ्यासः । 'आनुष्टुभी वै रात्रिः' (ऐब्रा ४, ६) इति श्रुतिः । 'स्तोत्रियानुरूपेषु प्रथमानि पदानि' (आश्रौ ६, ४, २) इत्युक्ते स्तोत्रियाणामनुरूपाणां च यानि प्रथमानि पदानि तेषामेवाभ्यासे प्राप्ते [4]प्रत्यृचमित्याह । प्रथमे पर्याय इति वचनात् कृत्स्नेषु शस्त्रेषु प्रत्यृचमभ्यासे[4] स्तोत्रियानुरूपेष्वित्याह । अभ्यासस्यार्द्धर्चान्तेऽवसाने प्राप्ते 'द्विरुक्त्वाऽवस्यन्ति' इत्याह । पुनरर्धर्चान्तेऽवसाने प्राप्ते शिष्टे समसित्वेत्याह । शिष्टे समसित्वेति वचनाद् ऋगन्तेऽपि समासे प्राप्ते प्रणुवन्तीत्याह ।

'सर्वमन्यद् यथास्तुतम्' (आश्रौ ५, १५, १४) इति प्राप्ते इदं न वक्तव्यम् । अस्यारम्भे प्रयोजनम् । प्रगाथेषूक्तः शस्योपायस्तृचेषु न प्राप्नोति, तस्मात् तृचेषु शस्योपायो वक्ष्यते । तस्मादनेन न्यायेन सर्वत्र तृचेष्वभ्यासः कर्तव्यः 'सुरूपकृत्नुमूतये' (ऋ १, ४, १) इत्येवमादिषु । यदि तु शस्योपायो नोच्यते, यथास्तुतमिति वचनात् प्रथमानि पदानि द्विरुक्त्वा अर्धर्चान्तेऽवसानं कुर्यात् । तथा सत्यनुष्टुभो नार्द्धर्चं विधीयते । [4]एवं स्वरूपे नात्रापि जगतीनामर्द्धर्चं विधीयते[4] । तथा मध्यमे[5] मध्यमानि प्रत्यादायावस्येत्[6] । एवमसमाप्तं[6] कुर्यात् । तथा 'उत्तमान्युत्तमे' (आश्रौ ६, ४, ५) इत्यत्र प्रत्यादाय ऋगन्ते प्रणवो न प्राप्नोति । [7]ऋगन्तस्य वैकृतत्वात् । प्राकृते तु ऋगन्ते प्रणवो† न प्राप्नोति[7], ऋगादीनां सह सन्तानाभावात् । एवं चतुरक्षराभ्यासेऽपि । तस्माच्छस्योपायो वक्तव्यः ।

यदि च यथास्तुतमिति तृचेषु न प्राप्नोति, यथाम्नातमेवाभ्यासो भवतीति । तथा सति 'चतुरक्षराणि त्वच्छावाकः' (आश्रौ ६, ४, ६) इत्युक्ते अष्टाक्षराभ्यासो न प्राप्नोति । 'आ त्वा विशन्त्विन्दवः' (ऋ ८, ९२, २२) इत्येतासु ऋगन्ते

---

१. नास्ति ब[1] । २. पदे ब[1]; नास्ति ब[2] मै । ३. °ष्टुबेव ब[1]; °ष्टुभैव मै । ४-४. नास्ति ब[2] । ५. मध्यमेन ब[2] मै । ६-६. °स्येदेव समाप्तं ब[2] मै । ७-७. नास्ति मै । † प्रणवे ब[1,2] ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

चाऽभ्यासो[1] न प्राप्नोति, श्रौत्ये वाथर्वणे क (? य) आम्नातः, न तत् श्रुतम् यदभिशस्तम् (?) इति च श्रुतिविरोधः। तस्मात् सर्वत्र 'यथास्तुतम्' (आश्रौ ५, १५,१४) इति प्राप्ते शस्योपायो विधीयते प्रगाथेषु तृचेषु[2]। एवं चेत् 'आद्यां वर्जयित्वा' (आश्रौ ६, ४, २) इति न वक्तव्यम्। [3]प्रत्यृचमिति प्राप्ते वक्तव्यम्[3]॥ ३॥

[मध्यमे पर्याये सर्वेषां सर्वासामृचां प्रणुवनम्]

सर्वे सर्वासां मध्यमे मध्यमानि प्रत्यादाय ऋगन्तैः प्रणुवन्ति ॥ ४॥

सर्वे होता होत्रकाश्च सर्वासाम् ऋचां मध्यमे पर्याये यानि च मध्यमानि पदानि[4] तानि[5] प्रत्यादाय पुनरादाय समसित्वा ऋगन्तैः प्रणुवन्ति। होतुराद्यां वर्जयित्वा' (आश्रौ ६, ४, २) इत्यधिकृतं प्राप्तम्, तस्माद् होतुराद्याया अनभ्यास-प्राप्त्यर्थं सर्वे सर्वासाम् इत्याह। [6]प्रथमे इत्यधिकारान्मध्यमे इत्याह। प्रत्यृचं स्तोत्रियानुरूपेष्विति अनुवर्तमाने प्रथमानि पदानि इत्यधिकारान्मध्यमानीत्याह[6]। 'द्विरुक्त्वाऽवस्यन्ति' (आश्रौ ६, ४, २) इति प्राप्ते समासो विधीयते। प्रत्यादाय ऋगन्तैः प्रणुवन्ति इति [7]वचनादवसानम्॥ ४॥

[उत्तमे पर्याये उत्तमानि पदानि प्रत्यादाय प्रणुवनम्]

उत्तमान्युत्तमे ॥ ५॥

उत्तमे पर्याये प्रत्यृचं स्तोत्रियानुरूपेषु उत्तमानि पदानि प्रत्यादाय प्रणुवन्ति। मध्यमाधिकारादुत्तमानीत्याह। 'प्रत्यादाय प्रणुवन्ति' (आश्रौ ६, ४, ४) इति[8] वर्तते। मध्यमाधिकारादुत्तम इत्याह। एवं श्रुतावपि 'प्रथमान्येव पदानि पुनरा-ददते' (ऐब्रा ४, ६) इत्येवमादि॥ ५॥

[उत्तमे पर्यायेऽच्छावाककर्तृकस्य प्रणुवनस्य विधानम्]

चतुरक्षराणि त्वच्छावाकः ॥ ६॥

उत्तमानि चतुरक्षराणि[9] प्रत्यादाय प्रत्यादाय प्रणौत्यच्छावाकः। 'उत्तमान्युत्तमे' (आश्रौ ६,४,५) इत्यधिकारः। तस्माच्चतुरक्षराणीत्याह। तु-शब्दः पदाधिकार-व्यावृत्त्यर्थः[9]। उष्णिक्षु चतुरक्षराभ्यासे कृते अनुष्टुभः सम्पद्यन्ते। गायत्रीषु तु

---

१. वाभ्या° मूको। २, तृचेषु च ब[1] मै। ३-३, नास्ति ब[1]। ४. नास्ति ब[1] मै। ५. नास्ति मूको। ६-६, प्रथमेत्यधिकारान्मध्यमानीत्याह ब[1,2]। ७-७. नास्ति ब[2]। ८. °राणि तु ब[2] मै। ९. पादाधि° ब[2]।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

अष्टाक्षरम्, 'यथास्तुतम्' (आश्रौ ५, १५, १४) इति वचनात्। अच्छावाक-ग्रहणादन्येषां पादाभ्यास एव ॥ ६ ॥

[पर्यायपरिमाणकथनम्]

चतुःशस्त्राः पर्यायाः ॥ ७ ॥

चत्वारि चत्वारि शस्त्राणि येषां ते चतुःशस्त्राः पर्यायाः। परिमाणमुच्यते। प्रथमे पर्याये अभ्यासो विधीयमानश्चतुर्षु शस्त्रेषु भवति। एवं मध्यमे च उत्तमे च। परिमाणे अक्रियमाणे पर्यायविभागो न ज्ञायते ॥ ७ ॥

[पर्याये होतुराद्यं शस्त्रम्]

होतुराद्यम् ॥ ८ ॥

पर्याये आद्यं शस्त्रं होतुर्भवति, उत्तराणि होत्रकाणाम्। 'त्रिसंस्थो ज्योतिष्टोमः'(?) इति प्रकृतिः, एवं हि ब्राह्मणम्[1]। तत्र [2]उक्थ्ये होत्रकाधिकारादनन्तरे[2] विकृतावतिरात्रे [3]होत्रका अधिकारात्[3] प्राप्ताः,[4] तस्मादाह— होतुराद्यमिति। तस्माद् वचनाद् अनन्तराणि होत्रकाणामर्थाद् भवन्ति। यद्येवं न वर्ण्यते होतुराद्यमित्युक्ते अनन्तराणि होत्रकाणां न प्राप्नुवन्ति अनधिकारात्[5]। तस्मादुक्थ्येऽधिकृतः[6] अतिरात्रे अनुवर्तते।

अथवा इदं सूत्रमेव न वक्तव्यं लिङ्गात् सिद्धत्वात्। होतुराद्यां वर्जयित्वा' (आश्रौ ६, ४, २) इति अस्माल्लिङ्गाद्धोतुराद्यं च भविष्यति। '[7]चतुरक्षराणि त्वच्छावाकः' (आश्रौ ६, ४, ६) इति लिङ्गादुत्तराणि होत्रकाणां सिद्धानि, 'होतुरपि यथा होत्रकाणाम्' (आश्रौ ६, ४, १) इति वचनाच्च। तस्मादिदं सूत्रं न वक्तव्यम्। अस्यारम्भे प्रयोजनम्। अतिरात्रमुक्तं वचनमकृतार्थमनन्तरं विधानादित्यतिरात्रे कृतार्थं भविष्यति[7]। अतिरात्रोक्थ्येषु[8] स चापि पर्याय एव, यदि [9]पर्यायसंज्ञाऽस्य न[9] स्याद् यः शस्योपाय उक्तः 'होतुरपि यथा होत्रकाणाम्' (आश्रौ ६, ४, १) इति स न प्राप्नोति। इष्यते च 'तेषां तृचाः स्तोत्रियानुरूपाः'

---

१. तु. तैसं ६,६,११,१; ऐब्रा ४,१; तांब्रा ९,३,१। २-२. उक्थे होत्राधि° ब[1]। ३-३. होत्रकाधि° ब[1]। ४. नास्ति मूको। ५. अधिकारात् ब[1]। ६. °दुक्थो-ऽ(°क्थेऽमै)धि° ब[1] मै। ७-७. नास्ति ब[1]। ८. °त्रोक्थेषु ब[1]; अतिरिक्तोल्पे (°क्तोथे ?)षु मै। ९-९. संज्ञा ब[1]।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

(आश्रौ ५, १०, १८) इत्येवमादि पूर्वम् । तस्मादस्ति पर्यायसंज्ञा 'अतिरात्रे पर्यायाणाम्' (आश्रौ ६, ४, १) इत्यतिरात्रवचनं सामान्यम् अतिरात्रे अतिरिक्ते[1] च वर्तते । यथा संस्तवने प्राप्ता[2] सामिधेनी धर्मस्तवनेऽपि भवति । 'एकादशभिः स्तौति' (आश्रौ १०, ८, ५ ?) इति । अध्वर्यूणां व्यक्तं वचनम् । मन्त्राश्च तथा आम्नाताः 'होतुश्चमसमनून्नयध्वम्' (बौश्रौ ७, १३ : ५-६) । 'मैत्रावरुणस्य चमसमनून्नयध्वम्' (बौश्रौ ७, १८ : १) इति । [3]तस्मादतिरिक्तानि च पर्याया[3] भवन्ति ॥ ८ ॥

[याज्याभ्यः पूर्वेषां प्रतीकानां पर्यासंज्ञाकरणम्]

याज्याभ्यः पूर्वे पर्यासाः ॥ ९ ॥

याज्याभ्यः पूर्वे प्रतीके पर्यासा इत्येतेषां संज्ञा वेदितव्या । 'पर्यासवर्जं गायत्राः' (आश्रौ ६, ४, १२) इत्युक्ते एते पर्यासा ग्राह्याः । एकमेव साध्यं महाविषया[4] च[5] परिभाषा भवति । तस्मादियं परिभाषा भवति । तस्मादियं परिभाषा पर्यासार्थं भवति, प्रातःसवनार्था च विकृतौ । प्रातःसवने होत्रकाणां चतुर्विंशादिषु 'एतेनाह्ना सुत्यानि' (आश्रौ ७,१,३) इत्यैकाहिकानि शस्त्राणि प्राप्तानि[6] । तत्र तृचागमे तृचस्योद्धारः (?) इति वचनात्[7] । 'यस्मिन् स्तुवीरन् स स्तोत्रियः' (आश्रौ ७,२,५) । 'यस्मिञ्छ्वः-सोऽनुरूपः' (आश्रौ ७,२,६) । ऊर्ध्वमनुरूपेभ्य[8] आरम्भणीयाः, ऊर्ध्वमारम्भणीयाभ्यः परिशिष्टावापः, ऊर्ध्वमावापात् पर्यासाः[8], पर्यासेभ्योऽनन्तरम् ऐकाहिकशस्त्रं प्राप्तं, तत् प्रतिषिध्यते याज्याभ्यः पूर्वे पर्यासाः इति वचनात् । एवं वर्ण्यमाने प्रकृति-विकृत्यर्था परिभाषा भवति ॥ ९ ॥

[पर्यायशस्त्राणां कथनम्]

पान्तमा वो अन्धसोऽपादु शिप्रचन्धसस्त्यमु वः सत्रासाहमिति सूक्तशेषोऽभि त्यं मेषमध्वर्यवो भरतेन्द्राय सोममिति याज्या प्र व इन्द्राय मादनं प्र कृतान्यृजीषिणः प्रति श्रुताय वो धृषदिति पञ्चदश दिवश्चिदस्येति पर्यासः स नो नव्येभिरिति चास्य मदे पुरु वर्पांसि विद्वानिति याज्या । वयमु त्वा तदिदर्था वयमिन्द्र त्वायवोऽभि वार्त्रहत्यायेत्युत्तमामुद्धरेदिन्द्रो अङ्ग महद् भयमभि न्यूषु वाचमप्सु

---

१. अत्यतिरात्रे मूको । २. प्रातः ब[1]; प्राप्तः ब[2] मै । ३-३. °क्तानि पर्यायो मूको । ४. °यी मूको । ५. नास्ति मै । ६. प्राप्नोति मूको । ७. तु. आश्रौ ७, १। २२ । ८. तु. आश्रौ ७,२,१०;१२ ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

धूतस्य हरिवः पिबेहेति याज्येन्द्राय मद्वने सुतमिन्द्रमिद् गाथिनो बृहदेन्द्र सानसिमेतो न्विन्द्रं स्तवामेशानं मा नो अस्मिन्मघवन्निन्द्र पिब तुभ्यं सुतो मदायेति याज्याऽयं त इन्द्र सोमोऽयं ते मानुषे जन उद्घेदभीत्युत्तमामुद्धरेदहं भुवमपाय्यस्यान्धसो मदायेति याज्याऽऽतू न इन्द्र क्षुमन्तमा प्र द्रव परावतो न ह्यन्यं बळाकरमित्यष्टावीङ्खयन्तीरहं वां पाता सुतमिन्द्रो अस्तु सोमं हन्ता वृत्रमिति याज्याऽभि त्वा वृषभा सुतेऽभि प्र गोपतिं गिराऽऽ तू न इन्द्र मद्रचगिति सूक्ते अश्वावति प्रोग्रां पीतिं वृष्ण इर्यमि सत्यामिति याज्या । इदं वसो सुतमन्ध इन्द्रेहि मत्स्यन्धसः प्र सम्राजमुप क्रमस्वा भर धृषता तदस्मै नव्यमस्य पिब यस्य जज्ञान इन्द्रेति याज्येदं ह्यन्वोजसा महाँ इन्द्रो य ओजसा समस्य मन्यवे विश इति द्विचत्वारिंशद्विश्वजिते तिष्ठा हरी रथ आयुज्यमानेति याज्याऽऽ त्वेता नि षीदताऽऽ त्वशत्रवा गहि नकिरिन्द्र त्वदुत्तर इत्युत्तमामुद्धरेच्छ्रुत्ते दधामीदं त्यत्पात्रमिन्द्रपानमिति याज्या योगेयोगे तवस्तरं युञ्जन्ति ब्रध्नमरुषं यदिन्द्राहं प्र ते मह ऊती शचीवस्तव वीर्येणेति याज्येन्द्रः सुतेषु सोमेषु य इन्द्र सोमपातम आ घा ये अग्निमिन्धत इति सप्तदश य इन्द्र चमसेष्वा सोमः प्र वः सतां प्रो द्रोणे हरयः कर्माग्मन्निति याज्या ॥ १० ॥

इदानीं पर्यायशस्त्राणि वक्ष्यन्ते । 'तेषां तृचाः स्तोत्रियानुरूपाः शस्त्रादिषु सर्वत्र । यथाग्रहणमन्यत् । याज्यान्तानि शस्त्राणि' (आश्रौ ५,१०,१८; २०; २१) ।

'पान्तमा वो' (ऋ ८, ९२, १-३), 'अपादु शिप्रयन्धसः' (ऋ ८,९२,४-६) स्तोत्रियानुरूपौ । 'त्यमु वः सत्रासाहम्' इत्येवमाविसूक्तशेषः (ऋ ८, ९२, ७-३३) । 'अभि त्यं मेषम्' (ऋ १, ५१) इति पर्यासः । 'अध्वर्यवः' (ऋ २, १४, १) इति याज्या । होतुः शस्त्रम् ।

'प्र व इन्द्राय मादनम्' (ऋ ७, ३१, १), 'प्र कृतान्यृजीषिणः' (ऋ ८, ३२, १-३) स्तोत्रियानुरूपौ । 'प्रति श्रुताय वः' (ऋ ८, ३२, ४-१८) इति पञ्चदश ऋचः[1] । 'दिवश्चिदस्य' (ऋ १,५५) इति पर्यासः । [2]अप्राप्ता पर्याससंज्ञा[2]

---

१. नास्ति ब[1] । २-२. अप्राप्तपर्यासः० ब[1,2] ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

विधीयते। 'स नो नव्येभिः' (ऋ १, १३०, १०) इति च पर्याससंज्ञा भवति। अप्राप्ताऽपि पुनरुच्यते समुच्चयप्राप्त्यर्थम्। अन्यथा विकल्पः स्यात्। 'याज्याभ्यः पूर्वे' (आश्रौ ६, ४, ९) इति वचनादेक एव पर्यासः प्राप्नोति, न द्वौ। 'अस्य मदे' (ऋ ६, ४४, १४) याज्या मैत्रावरुणस्य।

'वयमु त्वा तदिदर्थाः' (ऋ ८, २, १६-१८), 'वयमिन्द्र त्वायवोऽभि' (ऋ ७, ३१, ४-६) एतौ स्तोत्रियानुरूपौ। अधीति विशेषणं 'हविष्मन्तो जरामहे' (ऋ ३, ४१, ७) इति [2]मा भूदिति[2]। 'वार्त्रहत्याय' (ऋ ३, ३७) इति एतस्य सूक्तस्योत्तमामुद्धरेत्। अनुष्टुबुद्धियते[3]। 'इन्द्रो अङ्ग महद् भयमभि' (ऋ २, ४१, १०-१२) इति अधिकपादान्तत्वात् तृचो भवति। 'न्यू षु वाचम्' (ऋ १,५३) इति पर्यासः। 'अप्सु धूतस्य' (ऋ १०, १०४, २) इति याज्या ब्राह्मणाच्छंसिनः।

'इन्द्राय मद्वने सुतम्' (ऋ ८, ९२, १९-२१), 'इन्द्रमिद् गाथिनो बृहत्' (ऋ १, ७, १-३) इति स्तोत्रियानुरूपौ। [2]'एन्द्र सानसिम्' (ऋ १, ८) इति सूक्तम्[2]। 'एतो न्विन्द्रं स्तवामेशानम्' (ऋ ८, ८१, ४-६) इति[4] अधिकपादत्वात् तृचो भवति। 'मा नो अस्मिन्' (ऋ १, ५४) इति पर्यासः। 'इन्द्र पिब तुभ्यम्' (ऋ ६, ४०, १) इति याज्या। इत्यच्छावाकस्य। प्रथमः पर्यायः समाप्तः।

अथ द्वितीयः। 'अयं त इन्द्र सोमः' (ऋ ८, १७, ११-१३), 'अयं ते मानुषे जने' (ऋ ८, ६४, १०-१२) इति स्तोत्रियानुरूपौ। 'उद्घेदभि' (ऋ ८, ९३, १-३३) इति एतस्य सूक्तस्य[5] उत्तमामृचमुद्धरेत्[6]। 'इन्द्र इषे ददातु नः' (ऋ ८, ९३, ३४) इत्येषा[7] उद्धियते। 'अहं भुवम्' (ऋ १०, ४८) इति पर्यासः। 'अपाय्यस्यान्धसः' (ऋ २, १९, १) इति याज्या। इति[8] होतुः शस्त्रम्[5]।

'आ तू न इन्द्र क्षुमन्तम्' (ऋ ८, ८१, १-३), 'आ प्र द्रव परावतः' (ऋ ८, ८२, १-३) इति स्तोत्रियानुरूपौ। 'न ह्यन्यं बळाकरम्' (ऋ ८, ८०, १-८) इत्यष्टौ ऋचः। [9]'ईङ्खयन्तीरपस्युवः' (ऋ १०, १५३) इति सूक्तम्[9]। 'अहं दाम्' (ऋ १०, ४९) इति पर्यासः। [10]'पाता सुतम्' (ऋ ६, ४४, १५) इति[10] याज्या। हन्तेति विशेषणं 'प्रणेनीः' (ऋ ६, २३, ३) इति मा भूदिति। याज्येति वचनादेका भवति, न तृचः। इति मैत्रावरुणस्य।

'अभि त्वा वृषभा सुते (ऋ ८, ४५, २२-२४), 'अभि प्र गोपतिं गिरा' (ऋ ८, ६९, ४-६) इति स्तोत्रियानुरूपौ। [10]'आ तू न इन्द्र मद्रयक्' (ऋ ३, ४१; ४२)[10]

---

१. नास्ति ब[2] मै। २-२. नास्ति ब[1]। ३. तु. ऋ ३, ३७, ११। ४. नास्ति मूको। ५. नास्ति ब[1]। ६. °मृचं समु° ब[2]। ७. इत्येता ब[1]; इत्यन्ता भवति ब[2] मै। ८. नास्ति ब[2] मै। ९-९. ईङ्खयन्ती सूक्तम् ब[2] मै। १०-१०. नास्ति ब[1]।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

इति द्वे सूक्ते । 'अश्वावति' (ऋ १,८३) इति पर्यासः । 'प्रोग्रां पीतिम्' (ऋ १०, १०४, ३) इति याज्या । ब्राह्मणाच्छंसिनः ।

'इदं वसो सुतमन्धः' (ऋ ८,२,१-३), '†इन्द्रेहि मत्स्यन्धसः' (ऋ १,९,१-३)† इति स्तोत्रियानुरूपौ[1] । 'प्र[2] सम्राजम्' (ऋ ८,१६) इति[2] सूक्तम् । 'उप क्रमस्वा भर धृषता' (ऋ ८,८१,७-९) अधिकपादत्वात्[3] तृचः । 'तदस्मै नव्यम्' (ऋ २,१७) इति पर्यासः । 'अस्य पिब यस्य [4]जज्ञान इन्द्र[4]' (ऋ ६,४०,२) इति याज्या । इत्यच्छावाकस्य[5] । [6]समाप्तो द्वितीयः †पर्यायः[1] ।

[7]अथ तृतीयः[7] । 'इदं ह्यन्वोजसा' (ऋ ३, ५१, १०-१२), 'महाँ इन्द्रो य ओजसा' (ऋ ८, ६, १-३) इति स्तोत्रियानुरूपौ । 'समस्य मन्यवे' (ऋ ८, ६; ४-४२) इति एवमादि द्विचत्वारिंशदृचः । 'विश्वजिते' (ऋ २, २१, १) इति[8] पर्यासः । 'तिष्ठा हरी' (ऋ ३, ३५, १) इति याज्या । होतुः शस्त्रम् ।

'आ त्वेता नि षीदत' (ऋ १,५,१-३), 'आ त्वशत्रवा गहि' (ऋ ८,८२,४-६) इति स्तोत्रियानुरूपौ । 'नकिरिन्द्र त्वदुत्तरः' (ऋ ४, ३०, १-२३) इति एतस्य सूक्तस्योत्तमामुद्धरेत् । 'वामंवामं त आदुरे' (ऋ ४, ३०, २४) इत्यनुष्टुबन्यदेवत्या च उद्ध्रियते ।

[9]'एतद्धेदुत वीर्यम्' (ऋ ४, ३०, ८) इति अनुष्टुब् नोद्ध्रियते विच्छेदापि सती समानशस्या समानदेवत्या च[9] । [10]उत्तमा तु[10] [11]समानशस्यापि सती अन्यदेवत्यत्वादुद्धृता[11] । सूक्तादौ तु पादग्रहणं स्तुतिपरिसमाप्त्यर्थम् । नकिरिन्द्र इत्युक्ते न स्तुतो भवति । प्रतिषिद्धो भवति, नैव त्वमिन्द्र इति । 'श्रत्ते दधामि' (ऋ १०, १४७, १) इति पर्यासः । 'इदं त्यत् पात्रम्' (ऋ ६,४४,१६) इति याज्या । मैत्रावरुणस्य ।

'योगेयोगे तवस्तरम्' (ऋ १, ३०, ७-९), 'युञ्जन्ति ब्रध्नमरुषम्' (ऋ १, ६, १-३) इति स्तोत्रियानुरूपौ । 'यदिन्द्राहम्' (ऋ ८, १४) इति सूक्तम् । 'प्र ते महे' (ऋ १०,९६) इति पर्यासः । 'ऊती शचीवः' (ऋ १०,१०४,४) इति याज्या । ब्राह्मणाच्छंसिनः ।

'इन्द्रः सुतेषु सोमेषु' (ऋ ८, १३, १-३), 'य इन्द्र सोमपातमः' (ऋ ८, १२, १-३) इति स्तोत्रियानुरूपौ । 'आ घा ये' (ऋ ८, ४५, १-१७) इति सप्तदश

१-१. नास्ति ब[1] । †-†. नास्ति मूको । २. नास्ति मै । ३. नास्ति ब[1] । ४-४. नास्ति ब[2] मै । ५ अच्छा° ब[2] मै । ६-६. द्वितीयः पादः समाप्तः । †. पादः ब[2] । ७-७. नास्ति ब[2]; °तीयः पादः मै । ८. नास्ति मूको । ९-९. नास्ति ब[1,2] । १०-१०. मानु ब[2]; नास्ति ब[1] । ११-११. नास्ति ब[1] ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

ऋचः। पावग्रहणादेका प्राप्ता। 'य इन्द्र चमसेषु' (ऋ ८, ८२, ७-९) इत्यधिकपादत्वात् तृचः[1]। 'प्र वः सताम्' (ऋ २, १६) इति पर्यासः। 'प्रो द्रोणे' (ऋ ६, ३७, २) इति याज्या। इत्यच्छावाकस्य[2]। [3]समाप्तः तृतीयः †पर्यायः[3] ॥१०॥

[पर्यायोपसंहारः]

इति पर्यायाः ॥ ११ ॥

इति एते त्रयः[4] पर्यायाः व्याख्याताः। 'चतुःशस्त्राः पर्यायाः' (आश्रौ ६, ४, ७) इत्युक्ते द्वादशसु शस्त्रेषु ते समाप्ता भवन्ति। तस्मादिति[5] पर्याया इति न वक्तव्यम्। उत्तरसूत्रविवक्षार्थं पुनरधिक्रियन्ते। अधिकारे अक्रियमाणे पर्यासवर्जं गायत्राः' (आश्रौ ६,४,१२) इतीत्युक्ते पर्याया इति न प्राप्नोति, अधिकाराभावात्। तस्मादधिकारार्थम् इति पर्याया इत्युच्यते ॥ ११ ॥

[पर्यायेषु पर्यासं वर्जयित्वाऽन्येषां मन्त्राणां गायत्रच्छन्दस्त्वम्]

पर्यासवर्जं गायत्राः ॥ १२ ॥

पर्याया[6] इत्युक्तोऽधिकारः[7]। तेषु पर्यायेषु पर्यासान् वर्जयित्वा शिष्टाः पर्यायाः ऊर्ध्वमनुरूपेभ्यो गायत्राः वेदितव्याः। गायत्रं छन्दो येषां ते गायत्राः। इह पर्यायेषु गायत्रस्य छन्दसः अनुष्टुप्संपदर्थोऽभ्यासो[8] दृष्टः। स्तोत्रियानुरूपयोः छन्दोगवशात् पादाभ्यासोऽन्यत्रानुष्टुप्कारं प्राप्तं, तस्मादाह— गायत्रा इति गायत्रन्यायप्राप्त्यर्थम् ॥ १२ ॥

॥ इति षष्ठाध्याये चतुर्थं खण्डम् ॥

---

१. तु. आश्रौ १, १, १९। २. अच्छावा° ब[1]। ३-३. तृतीयः पर्यायः समाप्तः ब[1]। †. पर्यायः, त्रयः पर्यायाः ब[2] मै। ४. नास्ति ब[1]। ५. तस्मादिह मूको। ६. पर्याय मूको। ७. इत्युक्तेऽधि° मूको। ८. °प्संपादार्थोऽ° ब[1][2], °प्संपदार्थोऽ° मै।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

अथ षष्ठेऽध्याये पञ्चमः खण्डः

[पर्यायेषु समाप्तेषु आश्विनशस्त्रशंसनोपक्रमः]

संस्थितेष्वाश्विनाय स्तुवते ॥ १ ॥

संस्थितेषु पर्यायेषु परिसमाप्तेष्वनन्तरम् आश्विनाय शस्त्रार्थं स्तुवते छन्दोगाः । तस्य विधिर्वक्ष्यते । 'इति पर्यायाः' (आश्रौ ६, ४, ११) इत्युक्ते [1]संस्थिता भवन्ति । किमर्थं पुनरुच्यते संस्थितेष्विति । †सम्बन्धार्थम् । सति सम्बन्धे 'अतिरात्रे पर्यायाणाम्' (आश्रौ ६, ४, १) इत्युक्ते[1] पर्यायान्त एवातिरात्रः स्यात् । अस्मात् सम्बन्धवचनादतिरात्र आश्विनान्तः सिद्धो भवति । आश्विनायेत्यधिकारः क्रियते । तस्मादित ऊर्ध्वं यद्[2] वक्ष्यते तदाश्विनस्य विधानं वेदितव्यम् । अवधिसंज्ञा[3] चेयम् । 'ऊर्ध्वम्[4] आश्विनादतिरिक्तोक्थानि' (आश्रौ ९, ११, १३) इत्युक्ते एतस्य ग्रहणम् । स्तुवते स्तोत्राधिकारात् । [5]उपाकृते स्तोत्रे आश्विनकर्म प्रारभते होता[5] ॥ १ ॥

[आश्विनशस्त्रशंसनात् पूर्वं हवनविधिकथनम्]

शंसिष्यन् विसंस्थितसंचरेण निष्क्रम्याग्नीध्रीये जान्वाच्याऽऽहुतीर्जुहुयादग्निरज्वी गायत्रेण च्छन्दसा तमश्यां तमन्वारभे तस्मै मामवतु तस्मै स्वाहा । उषा अज्विनी त्रैष्टुभेन च्छन्दसा तामश्यां तामन्वारभे तस्यै मामवतु तस्यै स्वाहा । अश्विनावज्विनौ जागतेन च्छन्दसा तावश्यां तावन्वारभे ताभ्यां मामवतु ताभ्यां स्वाहा । बण्महाँ असि सूर्येति द्वाभ्यामिन्द्रं वो विश्वतस्परीति च ॥ २ ॥

उपाकृते स्तोत्रे होता आश्विनशस्त्रं शंसिष्यन् उत्तरकालं शंसिष्यन् । अथ[1] होता एव[6] विसंस्थितसंचरेण निष्क्रम्याग्नीध्रीये दक्षिणं जानु आच्य नीचं कृत्वा स्रुवेण आज्याहुतीर्जुहुयात्— अग्निरज्वी इत्येवमादियथासमाम्नातैः

१-१. नास्ति मै । † °न्धार्थे ब[2] । २. नास्ति ब[2] । ३. अत्र विधिसंज्ञा ब[2] । ४. नास्ति मूको । ५-५. नास्ति मै । ६. न ब[1/3]; यत्र मै । ७. नास्ति मै ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

स्वाहाकारान्तैर्मन्त्रैः 'बण्महाँ असि' (ऋ ८, १०१, ११-१२) इति द्वाभ्यामृग्भ्यां द्वे आहुती । 'इन्द्रं वो विश्वतस्परि' (ऋ १, ७, १०) इति च एतयर्चा च जुहुयात् ।

स्तुवते इति छन्दोगानामधिकारात् शंसिष्यन्निति होतुरधिकारार्थमुच्यते । उत्तरेण सर्वान् धिष्ण्यान् गत्वा आग्नीध्रीये [1]होमाः प्राप्ताः[1] । तस्मादाह— [2]विसंस्थितसंचरेण निष्क्रम्येति । एतस्मादिहारम्भादन्यत्रापि दक्षिणादिषु[3] विसंस्थित-संचरेणैव निष्क्रम्य जुहुयात् । आहवनीये[4] प्राप्ते विप्रुड्ढोमवदाग्नीध्रीये[5] इत्याह । अवस्थाय प्राप्ते जान्वाच्येत्याह । आहुतीरिति बहुवचनाद् बह्वृचो भवन्ति । 'बण्महाँ असि सूर्य' (ऋ ८,१०१,११-१२) इति पादग्रहणादेका प्राप्ता, तस्मादाह— द्वाभ्यामिति । 'इन्द्रं वो विश्वतस्परि' (ऋ १,७,१०) इति च । चकारः समुच्चयार्थः । द्वाभ्यामेकया[6] च ॥ २ ॥

[आहुतिदानानन्तरकर्मकथनम्]

प्राश्याज्यशेषमप उपस्पृशेन्नाचामेद् विज्ञायते देवरथो वा एष यद्धोता नाक्षमद्भिः करवाणीति ॥ ३ ॥

हुत्वा आज्यशेषं पाणौ गृहीत्वा प्राश्य अप उपस्पृशेत्, नाचामेत् । कस्मात्[1] । विज्ञायते श्रूयते— देवरथो वा एष यद्धोता । सर्वा देवता यस्मिन्नधिष्ठिताः, सर्वा देवताः शंसति । तस्माद् देवरथः इत्युच्यते । नाक्षमद्भिः करवाणीति । अक्षः आज्येनाज्यते, नाद्भिः क्रियते नाद्भिः प्रक्षाल्यते, तस्मान्नाचामेत् । विज्ञायते च[7]— 'प्राश्य घृतं शंसेद् यथा ह वा इदमनो वा रथो वाऽक्तो वर्तत एवं हैवाक्तो वर्तते' (ऐब्रा ४, ७) इति । हुत्वा तत्रैवाग्नीध्रीये प्राश्नीयात् । शेषग्रहणात् सर्वं प्राश्नीयात् । अप[8] उपस्पृशेदिति वचनात् पाणिना प्राशनं, न पात्रेण । 'यज्ञोपवीतशौचे च' (आश्रौ १, १, १०) इति वचनादाचमनं प्राप्तं, तस्मान्नाचामे-दित्याह । अनाचमनसाधनार्थं[9] श्रुतिप्रदर्शनम् ॥ ३ ॥

[आज्यशेषप्राशनानन्तरं प्रतिप्रसृप्योपवेशनविधिकथनम्]

प्राश्य प्रतिप्रसृप्य पश्चात् स्वस्य धिष्ण्यस्योपविशेत् समस्तजङ्घो-रुररत्निभ्यां जानुभ्यां चोपस्थं कृत्वा यथा शकुनिरुत्पतिष्यन् ॥ ४ ॥

१-१. होमः प्राप्तः ब[1], होम (°मः मै) प्राप्ताः ब[2] मै । २-२. नास्ति मै । ३. आग्नीध्रीये ब[1] । ४. विप्र होम° मै । ५. °भेतया मूको । ६. तस्मात् ब[2] मै । ७. नास्ति ब[2] । ८. आचमनसाध° ब[1], अनाचमेन साध° मै ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

[1]स्वस्य धिष्ण्यस्योपविशेत्[1] । समस्तजङ्घोरुः समस्ते संहिते संश्लिष्टे जङ्घे ऊरू च यस्य, सोऽयं समस्तजङ्घोरुः । ऊर्ध्वजानुक[2] उपविशेदित्यर्थः । यथा ऊर्ध्वजानुरुपविशेदिति, अरत्निभ्यां जानुभ्यां च उपस्थं[3] कृत्वा दक्षिणमरत्निं सव्यस्यारत्नेः उपरि निदध्यात्, दक्षिणं जानु सव्यस्योपरि निदध्यात् । उपस्थं[3] कृत्वा इति वचनात् जानुभ्यामुपरि अरत्नी निदध्यात् । यथा शकुनिरुत्पतिष्यन् उपस्थं कृत्वा शकुनिरुत्पतिष्यन् उद्गच्छन् आत्मानं नियोजयति, तथा आत्मानं नियोज्याहावं कुर्यात् । पुरस्तात् कायमीषन्नीचं कुर्यात्, पश्चात्कायमीषदुच्चं कुर्यात् । एवं शकुनिरुत्पतिष्यन्नात्मानं प्रयोजयति इति सूत्रार्थः ।

तत्र प्राश्येति पुनरुच्यते श्रुतिवाक्येन[4] व्यवधानादनुक्रमाव्यवधानार्थम्[5] । पश्चात् स्वस्य धिष्ण्यस्योपविशेदिति वचनाद् होतैव शंसतीति[6], नान्यः । यद्यन्यः शंसति, तस्य यो धिष्ण्यस्तस्य पश्चादुपविशेदिति[7] प्राप्नोति उत्तरत्र 'उपस्थकृतस्त्वेवाऽऽश्विनं शंसेत्' (आश्रौ ६, ५, ५) इति वचनात् । वैकृत उपस्थ आहावमात्रमेव भवति । आश्विनमन्यत् । आहावोऽन्य 'एष आहावः प्रातःसवने शस्त्रादिषु' (आश्रौ ५, ९, २) इति चोदितः । यथा 'आगूर्याज्यादिः' (आश्रौ १, ५, ४) इति । तस्मादाहावमात्रमेव वैकृत उपस्थो भवति । तथा हि ब्राह्मणम्—'शकुनिरिवोत्पतिष्यन्नाह्वयीत' (ऐब्रा ४, ७) इति ॥ ४ ॥

[उपस्थकृतेन होत्राऽऽश्विनशस्त्रशंसनम्]

उपस्थकृतस्त्वेवाऽऽश्विनं शंसेत् ॥ ५ ॥

प्राकृत उपस्थः कृतो येन स उपस्थकृतः । उपस्थकृतस्त्वेवाश्विनं शस्त्रं शंसेत् । वैकृतेनोपस्थेनाहावः कृतो भवति । आश्विनं शंसेदिति पुनरधिकारार्थम् । प्रत्येन[8] कर्मणा व्यवधानाद् । यदित ऊर्ध्वं वक्ष्यते तदाश्विनम् ॥ ५ ॥

[एकपातिन्याः प्रतिपदृचः शंसनम्]

अग्निर्होता गृहपतिः स राजेति प्रतिपदेकपातिनो पच्छः ॥ ६ ॥

'अग्निर्होता गृहपतिः स राजा' (ऋ ६, १५, १३) इति प्रतिपत्[9] ।

१-१. स्वधि° मै । २. उद्बाहुक ब[1] मै; ऊर्ध्वबाहुः ब[2] । ३. उपस्थे मै । ४. तु. आश्रौ ६, ५, ३ । ५. °क्रमव्यव° मूको । ६. शंसेदिति ब[1] । ७. °दुपविश्येति ब[1,2], °दुपविश्येदिति मै । ८. अन्त्येन ब[2] मै । ९. नास्ति ब[1] ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

प्रतिपद्यते अनया प्रतिपत् । एका पतति एकपातिनी[1] । पच्छः एतां प्रतिपदं[2] शंसेत्, नार्धर्चशः । प्रतिपदिति ब्राह्मणोक्ता संज्ञा । तस्या ज्ञाने[3] धर्मा भवन्ति, संव्यवहारो न विद्यते । 'तेऽग्नेरेवाधि गृहपतेरादित्यं काष्ठामकुर्वत तस्मादाग्नेयी प्रतिपद् भवत्याश्विनस्याग्निर्होता गृहपतिः स राजेति' (ऐब्रा ४, ७) । तस्मात् [4]प्रतिपदित्युच्यते । प्रतिपदित्युक्ते तृचः प्राप्तः 'तृचाः प्रतिपदनुचराः' (आश्रौ ५, १४, ७) इति । तस्मादाह एकपातिनीति[4] । 'प्रतिपदनुचराः[5] अर्द्धर्चम्' (आश्रौ ५, १४, ७) इति [5]अर्धर्चशः प्राप्तौ[5] पच्छ इत्याह ॥ ६ ॥

[आग्नेयगायत्रस्योपसन्धानं प्रातरनुवाकस्योदयपर्यन्तं शंसनम्]

एतयाऽऽग्नेयं गायत्रमुपसन्तनुयात् ॥ ७ ॥

प्रातरनुवाकन्यायेन तस्यैव समाम्नायस्य सहस्रावमसोदेतोः शंसेत् ॥ ८ ॥

एतयर्चाऽऽग्नेयं[6] गायत्रम् उपसन्तनुयात् उपसन्दध्यात् । [7]प्रातरनुवाकस्य यो न्यायस्तेन[7] प्रातरनुवाकन्यायेन । 'एतेषां छन्दसां पृथक् [8]सूक्तानि' (आश्रौ ४, १५, २) इत्येवमादि[8] 'इळेद्यावीयमावर्तयेदा तमसोपघातात्' (आश्रौ ४, १५, ९) इत्यन्तः प्रातरनुवाकस्य न्यायो व्याख्यातः । तस्यैव प्रातरनुवाकस्य समाम्नायस्य सहस्रावमं सहस्रादूनं भवति, सहस्रं वा[9] अधिकं वा भवति । आ उदेतोः शंसेत् । आ आदित्योदयात्[10] शंसेदिति सूत्रार्थः ।

तत्र एतया इत्यधिकृताऽपि पुनरुच्यते नियमार्थम्—एतयैव नान्यया इति । श्रुतौ अन्यापि प्रतिपदस्ति—"'अग्निं मन्ये पितरमग्निमापिम्' (ऋ १०, ७, ३) इत्येतया प्रतिपद्येत" (ऐब्रा ४, ७) इति । गायत्रमुपसन्तनुयात् (आश्रौ ६, ५, ७), [11]इत्युक्ते उषस्यमाश्विनं च गायत्रमस्ति । तस्मादाग्नेयमित्याह । प्रतिपत् त्रिष्टुप् । 'एतयाग्नेयमुपसन्तनुयात्' (आश्रौ ६,५,७) इत्युक्ते त्रैष्टुभमेवोपसन्तनुयाद्[11] इति प्राप्ते [12]गायत्रमित्याह । आग्नेयं गायत्रमेव शस्त्रं भवतीति प्राप्ते† ϕप्रातरनुवाकन्यायेनेत्याह । तस्मादेकविंशतिश्छन्दांसि प्रातरनुवाकन्यायेन शस्यन्ते, तेनैव विधिना यदित्याद्यन्त उपरिष्टात्ϕ[12] ।

---

१. नास्ति मै । २. प्रतिपत् मूको । ३. नास्ति ब[2] । ४-४. नास्ति मै । ५-५. अर्धर्चः प्राप्तौ ब[1]; अर्धर्चप्राप्तौ ब[2] मै । ६. तु. उप प्रयन्तः ऋ १, ७४; आश्रौ ४, ३, ७ । ७-७. नास्ति ब[2] मै । ८-८. नास्ति मै । ९. नास्ति मै । १०. आदित्यस्योद° ब[2] । ११-११. नास्ति मै । १२-१२. नास्ति मै । †. नास्ति ब[1] । ϕ-ϕ. नास्ति ब[2] ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

[1]प्रातरनुवाकन्यायेनेति वचनात् शतप्रभृतयः‡ †संख्याः प्राप्ताः†, तस्मादाह— सहस्रावमिति । अवमग्रहणादधिकमपि भवति[1] । प्रातरनुवाकन्यायाच्च यथा प्रातरनुवाकः समोऽधिको वा एवमाश्विनमपि भवति । विज्ञायते च— 'आश्विनं हैव तद् यदर्वाक् सहस्रं तस्मात् तत् सहस्रं वैव शंसेद् भूयो वा' (ऐब्रा ४, ७) इति । प्रातरनुवाकन्यायेन 'आ तमसोपघातात्' (तु० आश्रौ ४, १५, ९) शंसेदिति प्राप्ते[2] ओदेतोरित्याह[3] ।

प्रातरनुवाकः शतं भवति, अपरिमितो वा इत्युक्तम्[4] । यदा शतं भवति, तदा ईळेद्यावीयमित्युक्तम्[5] । यदा आ तमसोपघातात्, यदा अपरिमितस्तदा प्रातरनुवाकमेव वर्धयेद् [6]ईळेद्यावीयमावर्तयेत् । तेनैव न्यायेन यदाऽऽश्विनं सहस्रं भवति, तदा ईळेद्यावीयमावर्तयेद् ओदयात्[6] । उदिते पाङ्क्तेन सौर्याणि प्रतिपद्यते । [7]यदा सहस्रादपरिमितमाश्विनं भवति, तदा पूर्णमावर्तयेत् । आश्विनमेवं वर्धयेद् ओदयात् । उदिते पाङ्क्तेन सौर्याणि† प्रतिपद्यते[7] । तत्र प्रातरनुवाकः शतं भवति । प्रतिपद्ध्रुवाण्यधिकानि[8] प्रयुज्यन्ते । तेनैव न्यायेन आश्विनं सहस्रं भवति । प्रतिपद्ध्रुवसौर्यादीनामशीतिरधिका प्रयुज्यते । [9]तस्मादभिव्युष्टे व्युष्टि-प्रायश्चित्ते[9] स्तोत्रतिभागे अधिकृतस्य सहस्रस्य त्रीणि षष्टिशतानि आश्विने भवन्ति ॥ ७–८ ॥

[सन्धिसामस्तोत्रियाशंसनम्]

बार्हतास्त्रयस्तृचाः स्तोत्रियाः प्रगाथा वा तान् पुरस्तादनुदैवतं स्वस्यच्छन्दसो यथास्तुतं शंसेत् ॥ ९ ॥

[10]बार्हतास्त्रयोऽननुरूपाः स्तोत्रियास्तृचाः[10] प्रगाथा वा । यथा[11] 'प्रत्यु' (ऋ ७, ८१, १; आश्रौ ४, १४, २), 'इमा उ वाम्' (ऋ ७, ७४, १; आश्रौ ४, १५, २); तान् पुरस्तादनुदैवतं दैवतं दैवतमनुदैवतम् आग्नेये क्रतौ उषस्ये आश्विने च स्वस्यच्छन्दसः पुरस्ताद् बार्हतस्य पुरस्तादेकैकस्मिन्नेकैकं यथास्तुतं शंसेत् । यथा छन्दोगैः स्तुतं बृहतीकारं ककुबुत्तराकारं वा, तथा शंसेत् । 'प्रातरनुवाक-न्यायेन' (आश्रौ ६, ५, ८) इति वचनात् स्तोत्रियशंसमप्राप्तं विधीयते । [12]तेषां तत्स्थानं विधीयते[12] । अत्र यावदुक्तं भवति । परिभाषाप्राप्तं सर्वत्र क्रियते ।

१-१. नास्ति मै । ‡. तु. आश्रौ ४,१५,३ । †-†. संख्या प्राप्ता ब[1,2] । २. प्राप्तेः मै; तु. आश्रौ ४,१५,९ । ३. ओदेतोः शंसेदित्याह ब[1,2] । ४. तु. आश्रौ ४,१५,३ । ५. ईळेद्यावापृथिवीय° ब[2] मै । ६. ईळेद्यावापृथिवीय° मै । ७-७. नास्ति ब[2] मै । †. तु. आश्रौ ६,५,१७ । ८. °ण्येकानि मै । ९-९. तस्मादभिव्युष्टिप्रायश्चित्ते ब[2] मै । १०-१०. °स्त्रयोनुरूपास्तृचाः ब[1,2]; °स्त्रयोऽनुरूपाः मै । ११. एवा ब[1]; एना ब[2] मै । १२-१२. नास्ति मै ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

कथं ज्ञायते। प्राप्तस्यारम्भात् 'सर्वमन्यद् यथास्तुतम्' (आश्रौ ५, १५, १४) इति यथास्तुतं शंसेदित्याह। ज्ञापयति यावदुक्तमेव भवतीति। तस्मात् 'स्तोत्रियेणानुरूपस्य' (आश्रौ ५, १०, २६) इति लक्षणेनानुरूपा न क्रियन्ते ॥ ९ ॥

[अन्यच्छन्दःसु स्तोत्रियादीनां शंसनम्]

येषु वाऽन्येषु ॥ १० ॥

'बार्हताः' (आश्रौ ६, ५, ९) इत्युक्तम्। येषु वाऽन्येषु अन्यच्छन्दःसु स्तुवीरन्। गायत्रादयः जागतान्ता इत्येवमादयोऽन्योन्येन [1]छन्दसाऽन्ये 'त्वमग्ने वसूँरिह' (ऋ १, ४५, १) इत्येवमादयः[1]। तानपि 'अनुदैवतं स्वस्यच्छन्दसः' (आश्रौ ६, ५, ९) शंसेत्। तदेतद् 'विकृतौ' (आश्रौ ७, १, १९) विकृतिषु[2] भवति। गायत्रादिषु तिसृषु एकच्छन्दःसु तृचेष्वन(न्व ?)हमेतानि। 'जराबोध' (ऋ १, २७, १०) इति प्रथमः, अन्योन्यच्छन्दसा नान्यः। यदा 'जराबोध' इति स्तोत्रियस्तदा प्रतिपदोऽनन्तरं 'जराबोध' (ऋ १,२७, १०-१२) इति तृचं शस्त्वा अनन्तरं 'उपप्रयन्तः' (ऋ १, ७४, १) इति गायत्रं शंसेत् ॥ १० ॥

[द्विपदानां पच्छः शंसनम्]

पच्छो द्विपदाः ॥ ११ ॥

अत्र समाम्नाये द्विपदाः पच्छः शंसेत्। 'प्रातरनुवाकन्यायेन' (आश्रौ ६, ५, ८) इति। अध्यासशंसे प्राप्ते पच्छःशस्त्रं विधीयते। बहुवचननिर्देशादिह प्रभृति या वक्ष्यन्ते परिभाषाः, ताः[3] [4]सर्वत्र शस्त्रेषु[4] भवन्ति ॥ ११ ॥

[एकपदानां प्रणवेनोपसन्तननम्]

उपसन्तनुयादेकपदाः ॥ १२ ॥

[5]प्रकृतौ विकृतौ[5] च उपसन्तनुयादेकपदाः [4]सर्वत्र शस्त्रेषु[4]। ताः[6] पूर्वेण ऋगन्तेन प्रणवेनोपसन्तनुयात्। अध्यासशंसे[7] प्राप्ते आरम्भः ॥ १२ ॥

१-१. °साऽन्यत्वमग्ने वसुभिरि (वसुरभि मै)त्येव° मूको। २. विकृतीषु ब[2]; विकृतेषु मै। ३. नास्ति मूको। ४-४. सर्वशास्त्रेषु मै। ५-५. प्रकृतिवि° ब[1]; प्रकृतौ (°ता मै) ब[2]। ६. तां मूको। ७. अपदान्ते अध्याशंसे मै।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

[एकपदाभ्य उत्तरासामृचाञ्चोपसन्तानम्]

ताभ्यश्चोत्तराः ॥ १३ ॥

ताभ्य एकपदाभ्यः या उत्तरा ऋचस्ताश्च[1]। एकपदान्तेन प्रणवेनोपसन्तनुयात्। एकपदान्ते अवसाने प्राप्ते उपसन्तनुयादित्याह ॥ १३ ॥

[विच्छन्दसामृचामुद्धारः]

विच्छन्दस उद्धरेत् ॥ १४ ॥

[2]प्रातरनुवाकसमाम्नाये या अनुद्धृता विच्छन्दसस्ता आश्विने उद्धरेत्। शंसस्य असमानत्वात्[2] प्रातरनुवाके नोद्धृताः। शंसस्य समानत्वात् या [3]अर्धर्चशस्ये च पच्छःशस्याः,[3] पच्छःशस्ये च या अर्धर्चशस्याः, ता विच्छन्दस उद्धरेत्। यथा बार्हते 'त्रीणि शता त्री सहस्राण्यग्निम्' (ऋ ३, ९, ९) इति त्रिष्टुप्। त्रैष्टुभे 'पुरीष्यासो अग्नयः' (ऋ ३, २२, ४) इत्यनुष्टुप्। आनुष्टुभानां सूक्तानामुत्तमाः पङ्क्त्यः[4] इत्येवमादि विच्छन्दसः असमानशस्याः[5] एताः। यासां तु समानशस्यं, ता नोद्ध्रियन्ते ॥ १४ ॥

[विच्छन्दसामृचामुद्धारनिषेधविकल्पकथनम्]

अपि वा तन्न्यायेन शंसनम् ॥ १५ ॥

अपि वा विच्छन्दसो नोद्ध्रियन्ते। यस्मिंश्छन्दसि ताः तन्न्यायेन तस्य छन्दसः यो न्यायः, तेनैव शंसेत्। प्रातरनुवाके पच्छःशस्या पङ्क्तिर्वा, अर्धर्चशस्यविशेषे[6] एताः[7] छन्दोन्यायेन अर्धर्चशः शंसेत्। अपि–शब्देन उक्तो विधिरिष्टपक्षो भवति। यथा न्यूङ्खेषु[8] ॥ १५ ॥

[त्रिष्टुब्जगतीभ्योऽन्यासामृचां पच्छःशस्यतानिषेधः]

न तु पच्छोऽन्यास्त्रिष्टुब्जगतीभ्यः ॥ १६ ॥

पच्छःशस्यविषये या अर्धर्चशस्या विच्छन्दा भवति, तस्या उद्धारो भवति, तन्न्यायेन वा पच्छःशस्ये प्राप्ते इदमुच्यते। त्रिष्टुब्जगत्य एव पच्छः शस्यन्ते, अन्यास्तु पच्छो न शस्यन्ते इति। तु–शब्दः प्राप्तव्यावृत्त्यर्थः। त्रैष्टुभे जागते

---

१. ऋचश्च मूको। २-२. नास्ति मै। ३-३. °शस्या अपच्छःशस्या मूको। ४. तु. आश्रौ ४, १३, ७ उद्धरेदुत्तमामुत्तमाञ्चादितस्त्रयाणाम्। ५. अवसान° मै। ६. °विषये मै। ७. ता ब² मै। ८. न्यायेषु ब²।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

या [1]विच्छन्दसः, तासाम्[1] उद्धार एव। न तु पच्छः शस्यन्ते। तासां न क्वचिदपि पच्छःशस्यं विद्यते। तस्मान्न[2] तु पच्छः इत्येतावता सिद्धे अन्यास्त्रिष्टुब्जगतीभ्यः इति न वक्तव्यम्। इदं प्रयोजनम्। विच्छन्दसोऽधिकृताः तन्न्यायेनेति त्रिष्टुब्जगत्योऽप्यधिकृताः। उभयमधिकृत्य न तु पच्छ इत्युच्यते। उभयोनां पच्छः प्रतिषेधः स्यात् त्रिष्टुब्जगतीनां विच्छन्दसां च। तस्मादन्यास्त्रिष्टुब्जगतीभ्य इत्युच्यते ॥ १६ ॥

[उदयकाले पङ्क्तिच्छन्दसि सौर्याणां सूक्तानां शंसनम्]

पाङ्क्तेनोदिते सौर्याणि प्रतिपद्यते ॥ १७ ॥

उदित आदित्ये 'पाङ्क्तेन सौर्याणि प्रतिपद्यते 'सूर्यो नो दिवः' (ऋ १०, १५८, १) इत्येवमादीनि[3]। प्रातरनुवाकस्य उक्तः काल 'आ तमसोऽपघातात्' (आश्रौ ४, १५, ९) इति अपहते तमसि, "काले उत्तमया° 'प्रति प्रियतमम्' (ऋ ५, ७५, १) इति उपसन्तनुयात्" (आश्रौ ४, १५, १०) इति।

आश्विने तु[4] उदयः कालः। तस्मिन् काले तेनैव न्यायेन "'प्रति प्रियतमम्' (ऋ ५, ७५, १) इत्युपसन्तनुयात्" (आश्रौ ४, १५, १०)। 'उत्तमयोत्तमस्थानेन परिदध्यात्' (आश्रौ ४, १५, ११) इति प्राप्ते परिधानप्रतिषेधार्थं सौर्याणि प्रतिपद्यते इत्याह। तत्र[5] 'ईळेद्यावीयमावर्तयेत्' (आश्रौ ४, १५, ९) इति प्राप्ते 'न तृचं सूक्तं वाऽनन्तर्हितमेकासने द्विः शंसेत्' (आश्रौ ७, २, १५) इति प्रतिषेधः प्राप्तः। सर्वशस्त्राणां सामान्यविधिरयम्। अभ्यासस्तु प्रातरनुवाके एव सामान्यविधानात्। विशेषविधेर्बलीयस्त्वादीळेद्यावीयस्य भवत्यभ्यासः। तन्न्यायादर्धर्चमपि छन्दसां प्राप्तम्। नैतदर्धर्चं प्रातरनुवाकन्यायः, [6]किं तर्हि सर्वानुवचनानामयं न्यायः। यस्तु प्रातरनुवाकन्यायः,[6] स एव प्राप्तः नानुवचनानां न्यायः। [7]"उत्सृप्याऽऽसनान्मध्यमस्थानेन' (आश्रौ ४, १५, १०) इत्येतदुत्सर्पणं तु[7] न प्राप्नोति। पुरुषधर्मोऽयं न[8] प्रातरनुवाकन्यायः। [9]शस्त्रस्वरेणायं बाध्यते[9], यथा[10] हविषां स्वरो बाध्यते"। उत्तमया परिधानम्। परिधानीया बाध्यते, सौर्याणि[12] वक्ष्यन्ते ॥ १७ ॥

[सौर्याणां सूक्तानां कथनम्]

सूर्यो नो दिव उदु त्यं जातवेदसमिति नव चित्रं देवानां नमो

१-१. विच्छन्दा तस्या मूको। २. यस्मान्न ब[2] मैं। ३. तु. आश्रौ ६.५.१८। ४. नास्ति मैं। ५. नास्ति ब[2]। ६-६. नास्ति ब[2]। ७-७. उत्सृप्त्या मैं। ८. नास्ति ब[1] मैं। ९-९. °रेणापबाध्यते (°बाधते मैं) मूको। १०. तथा ब[2]। ११. बाध्यते। सनान्मध्यमस्थानेत्येतदुपसर्पणं तु मैं। १२. सूर्याणि मूको।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

मित्रस्य । इन्द्र क्रतुं न आभराभि त्वा शूर नोनुमो बहवः सूरचक्षस इति प्रगाथाः । मही द्यौः पृथिवी च नस्ते हि द्यावापृथिवी विश्वशंभुवा । विश्वस्य देवी मृचयस्य जन्मनो न या रोषाति न ग्रभदिति द्विपदा ॥ १८ ॥

'सूर्यो नो दिवः' (ऋ १०, १५८) इति सूक्तम् । 'उदु त्यम्' (१, ५०, १-९) इति नवर्चः । पादग्रहणादृक् प्राप्ता । 'चित्रं देवानाम्' (ऋ १, ११५) इति सूक्तम् । 'नमो मित्रस्य' (ऋ १०, ३७) सूक्तम् । 'इन्द्र क्रतुं नः' (ऋ ७, ३२, २६-२७), 'अभि त्वा' (ऋ ७, ३२, २२-२३), 'बहवः' (ऋ ७, ६६, १०-११) इति एते त्रयः प्रगाथाः । पादग्रहणादृक् प्राप्ता । प्रगाथग्रहणाद् द्वयृचो भवति । 'मही द्यौः' (ऋ १, २२, १३) इत्येका । 'ते हि द्यावापृथिवी' (ऋ १, १६०, १) इत्येका । 'विश्वस्य देवी' (ऐब्रा ४, १०) इति । यथा समाम्नाता[1] द्विपदा । कल्पजायाः छन्दोविज्ञानार्थं द्विपदाग्रहणम् ॥ १८ ॥

[परिधानीयाया ऋचः कथनम्]

बृहस्पते अति यदर्यो अर्हादिति परिधानीया ॥ १९ ॥

'बृहस्पते अति' (ऋ २, २३, १५) इति [2]परिधानीया । 'सर्वत्रोत्तमाम्' (आश्रौ २, १६, ८) इति प्राप्ते[3] परिधानीयाग्रहणादियमेव परिधानीया भवति, नान्येति । अन्याऽपि[3] परिधानीया श्रुतौ विद्यते 'एवा पित्रे' (ऋ ४, ५०, ६; ऐब्रा ४, ११) इति ॥ १९ ॥

[प्रतिपदः परिधानीयायाश्चाऽऽहावनियम.]

प्रतिपदे परिधानीयाया इत्याहावः ॥ २० ॥

प्रतिपत्[4] [5]आद्या ऋक्[5] तस्यै प्रतिपदे । शस्त्रादावित्यर्थः । परिधानीया [5]उत्तमा ऋक्[5] । तस्याः परिधानीयायाश्च[6] । इति एतयोरेव आहावः, नान्यत्र आहावो विद्यते । प्राप्तप्रतिषेधः प्रतिपदोऽनन्तरे प्राप्तः, स्तोत्रियेभ्यः 'तेभ्यश्चान्यदनन्तरम्' (आश्रौ ५, १०, १५) इति च प्राप्तः प्रतिषिध्यते[7] ॥ २० ॥

---

१. यथाम्नाता ब[1] मैं । २-२. नास्ति ब[2] । ३. अन्यानि मूको ।
४. प्रतिपदे प्रतिपत् ब[1] मैं । ५-५. नास्ति मूको । ६. °नीयाश्च मूको ।
७. प्रतिषिध्येते मूको ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

[बृहत्साम्नो योनेः शंसनम्]

बृहत्साम चेत्तस्य योनिं प्रगाथेषु द्वितीयां तृतीयां वा ॥ २१ ॥

'एना' (ऋ ७, १६, १-२), 'प्रत्यु' (ऋ ७, ८१, १; २), 'इमा उ वाम्', (ऋ ७, ७४, १; कौ ३०४, ७५३; आश्रौ ४, १५, २) इत्येतेषु प्रगाथेषु रथन्तरं सन्धिसाम भवति। एतेष्वेव प्रगाथेषु [1]बृहच्चेत् साम भवति। तस्य बृहतो योनिं, 'त्वामिद्धि' (ऋ ६, ४६, १) इतीमं† प्रगाथम् प्रगाथेषु‡[1] द्वितीयां[2] शंसेत् 'अभि त्वा' (ऋ ७, ३२, २२) इत्येतस्य पुरस्तात्। तृतीयां वा शंसेत् 'बहवः' (ऋ ७, ६६, १०) इत्येतस्य पुरस्तात्। एवं सति चत्वारः प्रगाथा भवन्ति ॥ २१ ॥

[बृहत्साम्नो योनेः शंसननिषेधविकल्पः]

न वा ॥ २२ ॥

न वा बृहतो योनिं शंसेत्। त्रय एव प्रगाथा भवन्ति कृते परिधाने ॥ २२ ॥

[आश्विनग्रहे प्रचरणम्]

आश्विनेन ग्रहेण सपुरोळाशेन चरन्ति ॥ २३ ॥

आश्विनेन ग्रहेण सपुरोळाशेन[3] चरन्ति ऋत्विजः। तस्यानुवाक्या प्रैषो याज्या इति वक्ष्यन्ते ॥ २३ ॥

[आश्विनपुरोळाशस्यानुवाक्याप्रैषयाज्याकथनम्]

इमे सोमासस्तिरो अह्न्यासस्तीव्रास्तिष्ठन्ति पीतये युवभ्याम्। हविष्मता नासत्या रथेनाऽऽयातमुपभूषतं पिबध्या इत्यनुवाक्या। होता यक्षदश्विना सोमानां तिरो अह्न्यामिति प्रैषः। प्र वामन्धांसि मद्यान्यस्थुरुभा पिबतमश्विनेति याज्ये अध्यर्धमनवानम् ॥ २४ ॥

इमे सोमासः इति यथासमाम्नाता अनुवाक्या शस्त्रयाज्यानामनुवाक्याभावात्[4] पुरोळाशस्य [5]भवति 'होता यक्षदश्विना' (ऋखि ५, ७, ४, ८) इति प्रैषः। †शस्त्रयाज्यानां प्रैषाभावात्† पुरोळाशस्य[5] प्रैषः। उत्तरत्र याज्यावचनादस्यापि

१-१. नास्ति ब[2]। †. द्वितीयं ब[1] मै। ‡. तु. आश्रौ ६, ५, १८।
२. द्वितीयं मूको। ३ पुरोळाशेन (°शे मै) मूको। ४. °याज्यामनु° मूको।
५-५. नास्ति मै। †-†. °याज्याप्रैषा° ब[1,2]।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

याज्यासंज्ञा प्राप्नोति। तस्मात् प्रैषग्रहणम्। 'प्र वामन्धांसि' (ऋ ७, ६८, २); 'उभा पिबतमश्विना' (ऋ १, ४६, १५) इति याज्ये द्वे भवतः। अघ्यर्द्धमृचमनवानं ब्रूयात्। त्रीनर्द्धर्चाननवानमुक्त्वाऽवस्येत्। उत्तरेण वषट्कुर्यादनवानम्। याज्याया मध्ये अवसानाभावादाद्यन्तोपदिष्टा आगूर्वषट्कारौ न स्तः ॥ २४ ॥

[पुरोडाशस्य स्विष्टकृता प्रचरणे संयाज्याकथनम्]

यद्येतस्य पुरोळाशस्य स्विष्टकृता चरेयुः पुरोळा अग्ने पचतोऽग्ने वृधान आहुतिमिति संयाज्ये ॥ २५ ॥

यदि इत्यनित्यभावे[1]। एतस्य पुरोळाशस्य यदि स्विष्टकृता चरेयुः, तस्य याज्यानुवाक्ये वक्ष्येते[2]। ग्रहस्यानुवषट्कार एव स्विष्टकृत्, पुरोळाशस्यापि तदेव भवति, यदि 'सर्वहुतः'[3] (तु० काश्रौ १, ९, १२), समानतन्त्रत्वात्। यदि [4]असर्वहुतः शेषात्[4] स्विष्टकृत् पृथग् भवति। 'पुरोळा अग्ने पचतः' (ऋ ३, २८, २), 'अग्ने वृधान आहुतिम्' (ऋ ३, २८, ६) इति एते ऋचौ संयाज्ये भवतः। यदि संप्रैषे भवतः, प्रैषोऽपि वक्तव्यः। पशुपुरोळाशस्विष्टकृति क्रियमाणे इळाऽपि भवति। तथा सति इळामुपहूयावान्तरेळां प्राश्याचम्य ग्रहं भक्षयित्वा चमसं भक्षयेत् ॥ २५ ॥

॥ इति षष्ठे पञ्चमं खण्डम् ॥

---

१. यद्यनि° ब²; यदि मै। २. °ते इति ब¹। ३. हुतः ब¹। ४-४. सर्वहुत-शेषात् ब¹ मै; अर्थसर्वहुतशेषात् ब²।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

अथ षष्ठेऽध्याये षष्ठः खण्डः

[पर्यायेष्वस्तुतेषु प्रभाते जाते सर्वेभ्य एकस्य पर्यायस्य संभरणम्]

यदि पर्यायानभिव्युच्छेत्, सर्वेभ्य एकं संभरेयुः ॥ १ ॥

अथ सोमेन इत्यधिकृत्य चतुःसंस्थो ज्योतिष्टोमः उक्तः[1] । इदानीम् 'विध्यपराधे प्रायश्चित्तिः' (आश्वौ ३, १०, १) इति विध्यपराधे सति तत्कर्मसमृद्धयर्थं तानि सोमप्रायश्चित्तानि वक्ष्यन्ते । यदि पर्यायानस्तुतान् रात्रिरभिव्युच्छेत्, प्रभातीत्यर्थः । तथा सति यद् विधानं तदुच्यते । सर्वेभ्यः पर्यायेभ्य एकं पर्यायं संभरेयुः । [2]त्रिभ्योऽपि पर्यायेभ्य[2] एकं पर्यायं संकल्पयेयुः ॥ १ ॥

कथं संकल्पयेयुरिति तदुच्यते—

[पर्यायसंभरणविधिक्रमनियमः]

प्रथमाद्धोता द्वितीयान्मैत्रावरुणो ब्राह्मणाच्छंसी चोत्तमादच्छावाकः ॥ २ ॥

होता स्वं शस्त्रं शंसेत् प्रथमात् पर्यायात् । द्वितीयान्मैत्रावरुणः स्वं शस्त्रं शंसेत् [2]ब्राह्मणाच्छंसी च स्वं[2] [3]शस्त्रं शंसेत् । उत्तमादच्छावाकः †उत्तमात् पर्यायादच्छावाकः† स्वं शस्त्रं शंसेत्[3] । एवं कृते सर्वेभ्यः एकः पर्यायः संभृतो भवति । एवमनेनैव विधानेन कल्पितः । अतो न वक्तव्यं सर्वेभ्य एकं संभरेयुरिति । यस्मात् सूत्रारम्भः एकस्मिन्[4] पर्यायकालेऽविशिष्टे अस्मिन् काले एतत् प्रायश्चित्तं क्रियते ॥ २ ॥

[द्वयोः पर्याययोरस्तुतयोः सत्योः प्रभाते जाते द्वाभ्यामेकपर्यायसंभरणम्]

द्वौ चेद् द्वौ प्रथमाद् वा उत्तमात् ॥ ३ ॥

द्वौ चेत् पर्यायौ अस्तुतौ रात्रिरभिव्युच्छेत्, तथा सत्येकं पर्यायं संभरेयुः । येन

१, नास्ति मूको । २-२. नास्ति मै । ३-३. नास्ति मै । †-†. नास्ति ब[1] । ४. एतस्मिन् मै ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

विधानेन, तदुच्यते। प्रथमाद् द्वौ होतृमैत्रावरुणौ, तयोर्द्वयोः यः प्रथमः पर्यायः, तस्मात् प्रथमात् पर्यायाद्धोता स्वं शस्त्रं शंसति, मैत्रावरुणश्च स्वं शस्त्रम्। द्वावुत्तमाद् द्वौ ब्राह्मणाच्छंस्यच्छावाकौ। उत्तमात् पर्यायाद् ब्राह्मणाच्छंसी स्वं शस्त्रं शंसति, अच्छावाकश्च स्वं शस्त्रं शंसति। एवं द्वयोः पर्याययोः एकपर्यायः संततो भवति। अयमेकः कल्पः समाप्तः ॥ ३ ॥

[सर्वेषां पर्यायाणां स्तोमेन निर्ह्रासकरणम्]

अपि वा सर्वे स्युः स्तोमनिर्ह्रस्ताः ॥ ४ ॥

अपि वा अयं कल्पो भवति। यदि सर्वे पर्यायाः अभिव्युष्टाः, यदि द्वौ अभिव्युष्टौ। सर्वे पर्यायाः स्युः, त्रयोऽपि च पर्याया भवन्ति स्तोमेन निर्ह्रस्ताः। स्तोमस्य ह्रासः कर्तव्यः। कथम्। 'पञ्चदशी रात्रिः' (माश १३, ५, ३, १०) इति प्रकृतिः। निर्ह्रासे क्रियमाणे पञ्चभिः पञ्चभिः स्तुयुः। एवं स्तोमा निर्ह्रस्ता भवन्ति ॥ ४ ॥

[1]सर्वेष्वभिव्युष्टेषु द्वयोः व्युष्टयोः सतोः प्रायश्चित्तस्य द्वौ कल्पावुक्तौ। इदानीमेकस्मिन् पर्यायेऽभिव्युष्टे तदुच्यते—

[एकस्मिन् पर्यायेऽस्तुते प्रभाते जाते पर्यायसंभरणं तत्र विकल्पविधिकथनं च]

ऊर्ध्वं स्तोत्रियानुरूपेभ्यः प्रथमोत्तमांस्तृचाञ्शंसेयुः ॥ ५ ॥

*निर्ह्रास एवैकस्मिन् ॥ ६ ॥

होतृवर्जमित्येके ॥ ७ ॥

निर्ह्रास एव कर्तव्यः। एवशब्दोऽवधारणार्थः। निर्ह्रास एव, नान्यः कल्पः। पञ्चभिः पञ्चभिः[2] स्तुयुः। 'ऊर्ध्वं स्तोत्रियानुरूपेभ्यः प्रथमोत्तमांस्तृचान्

---

१. °ष्वपिव्यु° ब[2]। २. नास्ति ब[2]।

* देवव्रातमतेन— 'निर्ह्रास एवैकस्मिन्' इति सूत्रं पूर्ववर्ति। अतः 'ऊर्ध्वं स्तोत्रियानुरूपेभ्यः प्रथमोत्तमांस्तृचाञ्शंसेयुः। होतृवर्जमित्येके ॥' इति समुच्चितमेकं सूत्रम्। तत्र सः 'निर्ह्रा.....स्मिन्' इति सूत्रं व्याख्याय 'ऊर्ध्वं.....मित्येके' इति सूत्रस्थं 'होतृवर्जमित्येके' इत्यंशं पूर्वं व्याख्याति, पश्चात् 'ऊर्ध्वं.....संशेयुः' इत्यंशम्। इति देवव्रातव्याख्यादर्शनात् प्रतिभाति ॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

शंसेयुः[1] । होतृवर्जमित्येके' । होतारं वर्जयित्वाऽन्ये होत्रकास्तेषां निर्ह्रासो भवतीत्येके शाखिनो मन्यन्ते । निर्ह्रासपक्षे होतुः कृत्स्नानि शस्त्राणि भवन्ति । होत्रकाणाम् ऊर्ध्वं स्तोत्रियानुरूपेभ्यः प्रथमोत्तमांस्तृचान् शंसेयुः । 'पञ्चदशभिर्होत्रे स्तुयुः । पञ्चभिः पञ्चभिरितरेभ्यः'[2] इति छन्दोगानाम् ॥ ५-७ ॥

[आश्विनार्यैकस्तोत्रियशंसनम्]

आश्विनार्यैकस्तोत्रियोऽग्ने विवस्वदुषस इति ॥ ८ ॥

आश्विनायार्थे एकस्तोत्रियः एक एव स्तोत्रियः 'अग्ने विवस्वदुषसः' (ऋ १, ४४, १-२) इति । एकग्रहणादेक एव भवति—[3]एक एव[3] त्रिषु स्थानेषु शस्यत इत्यर्थः । त्रय[4] एव त्रिषु स्थानेषु प्राप्ताः[5] । त्रीणि [3]स्थानानि । 'पुरस्तादनुदैवतं स्वस्य च्छन्दसः' (आश्रौ ६, ५, ९) इत्यत्र[3] पुरस्ताद् इति वचनात् प्रकृतौ त्रयः स्तोत्रियाः, इह त्वेक एव भवति । यथा प्रयाजेषु तृतीयो भागः कृतः, एवमिहापि तृतीयो भागः क्रियते ॥ ८ ॥

[तस्य स्तोत्रियस्यानुदैवतं यथास्तुतं शंसनम्]

तं पुरस्तादनुदैवतं स्वस्य च्छन्दसो यथास्तुतं शंसेत् ॥ ९ ॥

तं स्तोत्रियम् । पुरस्तात् स्वस्य छन्दस इत्याह । त्रिष्वपि क्रतुषु शंसने प्राप्ते अनुदैवतमिति वचनादाग्नेये क्रतौ बार्हतस्य पुरस्ताच्छंस्तव्यः । दैवतमनु अनुदैवतम् । आग्नेयस्तृचः । आग्नेय एव क्रतावनुशंसेत्[6] । यानि लिङ्गानि अप्रधानानि, तानि निपातभूतानि । यथास्तुतं शंसेत् इति वचनात् प्राप्तस्य पुनरारम्भाद् यावदुक्तमेव[7] भवति । तल्लक्षणानुरूपो न क्रियते । यथास्तुतमेव शंसेत् । ककुबुत्तराकारं बृहतीकारं वा ॥ ९ ॥

[आश्विनशस्त्रविभागपरिमाणकथनम्]

त्रीणि षष्टिशतान्याश्विनम् ॥ १० ॥

सहस्रं प्रकृतौ प्रतिपद्ध्रुवसूर्यादीनाम् अशीतिवचनानि संख्याबाह्यानि प्रातरनुवाकन्यायात् । यथा प्रातरनुवाके संख्यायन्ते तथा आश्विनेऽपि संख्यायन्ते । तस्मादशीतिसहस्रमाश्विनं प्रकृतौ । तस्य त्रिभागः । त्रीणि शतानि षष्टिश्च

---

१. स्तोमः मूको । २. °भिरितरा मूको ; तु. आपश्रौ १४,२३,१४ । ३-३. नास्ति मूको । ४. एक मूको । ५. प्राप्तः ब[1] मै, प्राप्ता ब[2] । ६. क्रतुमनुशं° मूको । ७. °क्तमेवमेव ब[1] ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

भवति [1]स्तोत्रत्रिभागः† स्तोत्रत्रिभागात् शस्त्रत्रिभागो भवति त्रीणि[1] षष्टिशतानि। आश्विन इत्यधिकारे पुनराश्विनग्रहणं प्रतिपद्ध्रुवसौर्यादिभिः सह त्रीणि शतान्याश्विनं सर्वं भवतीति। तस्य षष्टिः प्रतिपदुत्तरमाग्नेयस्यादितो[2] दश सूक्तानि, ततश्छन्दसाभिसूक्तानि, 'प्रति स्तोमेभिः' (ऋ ७, ८०) इत्यधिकम्, माङ्गलानि सौर्यादीनि च। आग्नेये बार्हतस्यादौ 'अग्ने विवस्वत्' (ऋ १, ४४, १; आश्रौ ६,६,८) इति प्रगाथः स्तोत्रियः। एतत् सर्वं त्रीणि च शतानि षष्टिश्च प्रसंख्यानमाश्विनम्[3]।

'ऊर्ध्वमाश्विनादतिरिक्तोक्थ्यानि' (आश्रौ ९, ११, १३), 'त्रिकद्रुकेषु' (ऋ २,२२,१-३) इति सोपसर्गः स्तोत्रियः। 'एन्द्र याह्युप नः' (ऋ १, १३०, १), 'इन्द्राय हि' (ऋ १, १३१, १), 'प्रो ष्वस्मै' (ऋ १०, १३३, ३) इति समाहार्योऽनुरूपः। ऊर्ध्वमाश्विनानुरूपात्[4] 'महाँ इन्द्रो नृवत्' (ऋ ६, १९, १) इति त्रीणि सूक्तानि। 'विष्णोर्नु कम्' (ऋ १, १५४) इति सूक्ते अन्त्या[5] परिधानीया। 'त्वेषमित्था समरणम्' (ऋ १, १५५, २) इति याज्या। 'उक्थं वाचि' (आश्रौ ५, २०, ८) इति शक्त्वा जपः। चतुराहावांस्तु[6] होता शंसेत्[7]। आश्विने एव सोममतिरिक्तं कुर्वन्ति। तस्मादतिरिक्तस्य सोमस्य यो न्यायः, स भवति प्रकारः। सोमातिरिक्ते शस्त्रे पूर्वकश्चतुरधिकपूर्व[8] इति[9]॥ १०॥

[संसवप्रायश्चित्तोपक्रमः]

व्याख्यातमभिव्युष्टिप्रायश्चित्तम्। इदानीं संसवप्रायश्चित्तं वक्ष्यते—

विमतानां प्रसवसंनिपाते संसवोऽनन्तर्हितेषु नद्या वा पर्वतेन वा॥ ११॥

विमता विरुद्धा नानामता वैरिणस्तेषां विमतानां प्रसवसन्निपाते प्रसवः सुत्यं, प्रसवस्य[10] सन्निपातः, प्रसवसन्निपाते। द्वयोर्बहूनां वा यजमानानां वैरिणां सुत्यानि यदि समानेऽहनि भवन्ति, [11]तथा सति संसवो नाम प्रायश्चित्तं भवति। नद्या वा पर्वतेन वा अनन्तर्हितेषु† यज्ञेषु संसवो भवति[11]। नद्या वा पर्वतेन वा व्यवहितेषु संसवो न विद्यते। [12]द्विर्वाशब्दवचनादन्येनापि केनचिद् व्यवहिते ग्रामेण[12]

१-१. नास्ति मै। †. °त्रिभागं ब[1]; °त्रिभागौ ब[2]। २. प्रतिपदोत्त° मूको। ३. °नमाश्विनाश्विनम् मूको। ४. ऊर्ध्वमनुरूपात् ब[2] मै। ५, तु. ऋ १, १५४, ६। ६. चतुराहावस्तु (°हवस्तु मै) मूको। ७. तु. आश्रौ ५,१०,११। ८. °रधिपूर्व ब[1] मै। ९. इतर (°रः मै) मूको। १०. प्रसवः सुत्या सह (सहस्र मै) प्रसवस्य मूको। ११-११. नास्ति ब[2]। †. °हिषू ब[1]; °हिते मै। १२-१२. °चनादन्यै ..... ब[2]।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

[1]वा †संसवो न विद्यते। मृशकव्यवायेऽपि संसवो न विद्यते†[1] इत्येकेषाम्[2] ॥ ११ ॥

[नद्या वा पर्वतेन वाऽन्तर्हितेष्वपि वैरिषु संसवप्रायश्चित्तकरणमतान्तरम्]

अप्येकेऽन्तर्हितेष्वपि ॥ १२ ॥

[3]नद्या वा[3] पर्वतेन वा अन्तर्हितेष्वपि एके शाखिनः संसवम् इच्छन्ति। अपि-शब्दः संसवाधिकारसमुच्चयार्थः। अप्येके आचार्या इच्छन्तीति[4] ॥ १२ ॥

[संसवे कर्तव्ये सति तदहनि प्रातरनुवाकादिदेवताऽऽवाहनपर्यन्तं कर्मणः सत्वरं कर्तव्यत्वम्]

तथा सति संत्वराऽऽ देवताऽऽवाहनात् ॥ १३ ॥

तथा सति संसवे सति संत्वरा कर्तव्या। सुत्येऽहनि[5] प्रातरनुवाकादि त्वरितं कर्म कर्तव्यम्। आ देवताऽऽवाहनात् यावत् देवता आवाह्यन्ते, तावत् त्वरितं कर्म कर्तव्यम्। येन यजमानेन पूर्वं देवता आवाहिताः[6], तस्य हविरवन्ति देवताः, नेतरस्य। अन्तर्हितेषु संसवो भवति, न वा द्वौ कल्पौ। तथा सति इत्यनुच्यमाने[7] उभयोरपि कल्पयोः संत्वरा[8] प्राप्नोति, तस्मादाह— तथा सतीति संसवे सति। [9]असंसवे सति[9] संत्वरा[10] न कर्तव्या[11] ॥ १३ ॥

[मरुत्वतीये शस्त्रे नित्यसूक्तस्य पुरस्तात् कया शुभेति सूक्तस्य शंसनम्]

कया शुभेति च मरुत्वतीये पुरस्तात् सूक्तस्य शंसेत् ॥ १४ ॥

'कया शुभा' (ऋ १, १६५, १) इति च सूक्तं शंसति मरुत्वतीये नित्यस्य सूक्तस्य[12] पुरस्तात्। च-शब्दः समुच्चयार्थः। नित्यं भवति कयाशुभीयम्। मरुत्वतीयग्रहणम् [13]उत्तरत्र निष्केवल्ये[13] अनुच्यमाने इदमपि निष्केवल्ये च स्यात्। अनन्तरवचनादनन्तरं प्राप्तं पुरस्तादित्याह ॥ १४ ॥

[निष्केवल्ये शस्त्रे नित्यसूक्तस्य पुरस्तात् यो जात एव इति सूक्तस्य शंसनम्]

यो जात एवेति निष्केवल्ये ॥ १५ ॥

१-१. °.....विद्यते ब[2]। †-†. नास्ति मै। २. नास्ति मै। ३-३. नास्ति मै। ४. इच्छन्ति मै। ५. अन्येऽ° मूको। ६. नास्ति ब[2]। ७. इत्यनुमाने मूको। ८. सत्वरं मूको। ९-९. नास्ति ब[2]। १०. स (सं ब[1]) त्वसो मूको। ११. °व्याः मूको। १२. नास्ति ब[1]। १३-१३. उत्तरनिष्के° मूको।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

'यो जात एव' (ऋ २, १२) इति एतत् सूक्तं निष्केवल्ये शस्त्रे 'इन्द्रस्य नु वीर्याणि' (ऋ १, ३२,) इत्यस्य पुरस्ताच्छंसेत् । द्वे द्वे[1] सूक्ते भवतः ॥ १५ ॥

[वैश्वदेवे शस्त्रे वैश्वदेवसूक्तस्य पुरस्तान् ममाग्ने वर्च इति सूक्तस्य शंसनम्]

ममाग्ने वर्च इति वैश्वदेवसूक्तस्य ॥ १६ ॥

'ममाग्ने वर्चः' (ऋ १०, १२८) इति सूक्तं वैश्वदेवशस्त्रे वैश्वदेवस्य सूक्तस्य पुरस्ताच्छंशेत् । द्वे सूक्ते भवतः ॥ १६ ॥

[पूर्वोक्तकयाशुभीयादिसूक्तेषु निविदामाधानविकल्पोऽन्येषामुद्धारश्च]

अपि वैतेष्वेव निविदो दध्यादुद्धरेदितराणि ॥ १७ ॥

अपि वा कयाशुभीयादीनि यानि सूक्तानि, एतेष्वेव निविदं दध्यात्, उद्धरेदितराणि यानि 'जनिष्ठा उग्रः' (ऋ १०, ७३, १) इत्येवमादीनि । परिमितशस्येऽप्येवमेव[2] । नहि प्रायश्चित्तेन कर्मणा[3] परिमितशस्याविघातो[4] भवति ॥ १७ ॥

[निविदां शंसनस्थानातिक्रमे इतिकर्तव्यताकथनम्]

स्थानं चेन्निविदोऽतिहरेन्मा प्र गामेति पुरस्तात् सूक्तं शस्त्वाऽन्यस्मिंस्तद्दैवते दध्यात् ॥ १८ ॥

सूक्तेषु निविदो यत् स्थानं, तच् चेदतिहरेदतिक्रम्य शंसेत् । तथा सति सूक्तशेषं[5] परित्यज्य 'मा प्र गाम' (ऋ १०, ५७) इति पूर्वेण असंहितं सूक्तं पुरस्तात् पूर्वं शस्त्वा अनाहृय अन्यस्मिंस्तद्दैवते छन्दसि तल्लिङ्गे सूक्ते निविदं दध्यात् कृतेऽप्याहावे उदघे गृहीते निविद्[6] अतिपन्ना । एवं स्थानम् । निविदोऽतिहरेदिति[7] वचनादुदये गृहीते निविदः स्थानम् अतिपन्नं भवति । चेदित्यनित्यभावे[8] । 'मा प्र गाम' (ऋ १०, ५७) इति सूक्तं शस्त्वेति सिद्धे पुरस्तादिति वचनान्निविदतिपाते[9] सति एतदेव सूक्तं पुरस्ताच्छस्यते नान्यदिति ।

सूक्तशेषस्याऽशंसनं दर्शयति; विज्ञायते च—'येन सूक्तेन निविदमतिपद्येत, न तत्पुनरुपनिवर्तेत वास्तुहमेव तत्' (ऐब्रा ३, ११) इति । उपसन्तानश्च पूर्वेण

---

१. नास्ति मै । २. परिहित° मूको । ३. कर्मणि मै । ४. °शस्यविधानो मै । ५. सूक्तं शेषं ब[1]; सूक्ते शेषं मै । ६. नास्ति मूको । ७. °दोह° मूको । ८. चेदित्यभावे मूको । ९. °दनिपाते ब[2] मै ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

संहितः[1] कर्तव्यः, [2]'न तत्पुनरुपनिवर्तते' (ऐब्रा ३, ११) इति[2] श्रुतिवचनात्[3]। [4]पुरस्ताद्ग्रहणाच्च एतदेव[4] पुरस्ताच्छस्यते, नान्यदिति। यदि पूर्वेण [5]संतानं न[5] क्रियते, तच्छस्तं भवति। सूक्तग्रहणं तृचोक्तावपि[6] सूक्तमेव, तत्तृचं[7] कुर्याद् बृहस्पतिसवे[8] तद्दैवते दध्यात् इति सिद्धे अन्यस्मिन्निति वचनादधिकृतादन्यस्मिन्नित्यधिकृतेन सूक्तेन अन्यत्[9] तुल्यं दर्शयति। तस्मात् तद्दैवतं तच्छन्दसं तल्लिङ्गमेति च प्रैति चेत्येवमादि अभिरूपं लिङ्गं[10] भवति। तत्प्रमाणमपि भवति परिमितशस्यः।

अन्यस्मिन् दध्यादित्युक्तेऽपि सर्वमेतत् सिध्यति। न वक्तव्यं तद्दैवत इति। इदं प्रयोजनम्। यथा 'क ईं व्यक्ताः' (ऋ ७, ५६, १) इति मारुतम्, 'अग्निं नरः' (७, १, १) इति जातवेदस्यं वैराजम्। तत्र निविदतिपाते तच्छन्दसि[10] अविद्यमानेऽपि तद्दैवते त्रैष्टुभे निविदं दध्यात् दैवतप्रधानत्वात्। 'त्रैष्टुभान्येषां तृतीयसवनानि' (आश्रौ ८, ८, ३) इति वचनात् त्रैष्टुभं भवति। तद्दैवते दध्यादिति वचनान्माध्यन्दिने तृतीयसवने एतत् प्रायश्चित्तं प्राप्नोति। सवनेन हि तत्र सूक्तानि विधीयन्ते[11]। षोळशिनि तु निविदः[12] अतिपाते अन्यस्मिन् यत्रानुष्टुभे[13] तृचे ऐन्द्रे निविदं दध्यात् 'तृचा आनुष्टुभाः' (आश्रौ ६, २, ९) इति वचनात्। विषुवति तु निविदतिपाते पञ्चदशर्चे एव निविदं दध्यादेकपञ्चाशतं वा शस्त्वा मध्ये निविदं दधातीति। महाव्रते तु निविदतिपाते एकादशर्चे एव निविदं दध्यात्। अग्निष्टुति तु सर्वाग्नेये 'मा प्र गाम' (ऋ १०, ५७, १) इति। [14]'महाव्रते तु'[14] तस्मिन्नाग्नेये निविदं दध्यात्। असर्वाग्नेये तु अग्निलिङ्गे सूक्ते निविदं दध्याद् निष्केवल्यमरुत्वतीययोः। अभिजिति तु अग्निलिङ्गे[15] निविदं दध्यात्, उद्भिद्बलभिदोश्च। एवमनेन न्यायेन सर्वत्र [16]यत्न आधेयः[16]। छन्दसा लिङ्गेन क्वचित् प्रमाणं देवतया[17] च। तुल्ये निविदं दध्यात्। यस्मिन्निविद् धीयते[18], न तत्र पुनराह्वयीत कृतार्थत्वात्। तत्सन्धानार्थं ह्येतत्। सूतमुखीया चेत्। पुनर्न शस्यते। सन्ततं सूक्ततया सूक्तं, तत्समाप्त्यर्थमेवेदं[19] सूक्तम्॥ १८॥

॥ इति षष्ठे षष्ठं खण्डम्॥

---

१. सहितः मूको। २-२. तत्पुनरुच्यते निवर्तेति मूको। ३. श्रुतिः वचनात् मूको। ४-४. °णादेव ब[1]। ५-५. संतानं ब[1]; संतानता मै। ६. तु. आश्रौ ९, ५, ४। ७. तृचं ब[2]। ८. अन्यं मूको। ९. तु. ऐब्रा ३, ११; ४, २९। १०. °न्दस मूको। ११. विधीयते ब[1]। १२. नास्ति मूको। १३. मत्रानुष्टुभे ब[1]; यात्रानुष्टुभे मै। १४-१४. उह्य ब[1]; जह्य ब[2]। १५. अभिलिंगे मूको। १६-१६. यत्तमानावेक्ष ब[1]; यत्नमावेक्ष्य ब[2]; मवेमां वेक्ष मै। १७. देवताया मूको। १८. अस्मि° मै। १९. समाप्या (°प्य मै)र्थ° मूको।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

अथ षष्ठेऽध्याये सप्तमः खण्डः

[सोमहवनातिक्रमे स्तुतशस्त्रवृद्धिविधानम्]

सोमातिरेके स्तुतशस्त्रोपजनः ॥ १ ॥

सवनाय अर्थे अभिषुतः[1] सोमः तस्मिन्नेव सवने हूयते, नोत्तरस्मिन् सवने। तस्मात् सवनान्ते शस्त्रे उन्नयने कृते यद्यतिरिक्तः सोमोऽवशिष्यते, तस्य हवनार्थं स्तुतशस्त्रमुपजायते। तदर्थमिदमुच्यते। सोमातिरेके सोमस्य अतिरेकः सोमातिरेकः, तस्मिन् सोमातिरेके सति स्तुतं च शस्त्रं च स्तुतशस्त्रे स्तुतशस्त्रयोरुपजनः स्तुतशस्त्रोपजनो भवति। उपजनो वृद्धिः उपचयः। प्रमादादतिरिच्य अर्थादप्यतिरिक्तं कुर्वन्ति प्रायश्चित्तकर्मण्यभिव्युष्टिप्रायश्चित्ते। तस्मात् सोमातिरेक इत्यविशेषवचनादुभयत्रापि [2]समानं विधानं[2] भवति। सोमातिरेक इत्युक्तौ वक्ष्यमाणो विधिः यथा समानो भविष्यति। न वक्तव्यं स्तुतशस्त्रोपजन इति। अनाम्नातार्थम् इदं द्रष्टव्यम्। यत्र स्तोत्रमुपजायते, तत्र शस्त्रमुपजायत इत्यर्थः। [3]अभिव्युष्टौ 'ऊर्ध्वमाश्विनात्'[3] (आश्रौ ९, ११, १३) [? इति] व्याख्यातम् ॥ १ ॥

[प्रातःसवने सोमातिरेके विधानम्]

प्रातःसवनेऽस्ति सोमो अयं सुतो गौर्धयति मरुतामिति स्तोत्रियानुरूपौ। महाँ इन्द्रो य ओजसाऽतो देवा अवन्तु न इत्यैन्द्रीभिर्वैष्णवीभिश्च स्तोममतिशस्यैन्द्र्या यजेत् ॥ २ ॥

प्रातःसवने सोमातिरेके सति स्तुते यच्छस्त्रं, तद् वक्ष्यते—'अस्ति सोमो अयं सुतः' (ऋ ८,९४,४-६), 'गौर्धयति मरुताम्' (ऋ ८, ९४, १-३) इति शस्त्रस्य स्तोत्रियानुरूपौ। पादग्रहणात् तृचप्राप्त्यर्थं स्तोत्रियानुरूपग्रहणम्। परिभाषाभावात् स्तोत्रियस्य प्रमाणं छन्दोगवशम्। 'महाँ इन्द्रो य ओजसा' (ऋ ८, ६, १), 'अतो देवा अवन्तु नः' (ऋ १, २२, १६) इति एवमादिभिः ऐन्द्रीभिश्च वैष्णवीभिश्च

---

१. अभिष्टुतः मूको। मूको। २-२. समानविधानं ब[2]। ३-३. °व्युष्टादूर्ध्वं°

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

स्तोमस्य अतिशंसनं कृत्वा एकया द्वाभ्यां वा अतिरिक्तं कृत्वा ऐन्द्रघर्चा[1] यजेत्[2]। ऐन्द्रीभिर्वैष्णवीभिश्चेत्येतावता सिद्धे प्रतीकादेशानियमार्थम्। एता ओप्यन्ते। एताभिरनभिशस्ते अन्याभिरपि ऐन्द्रीभिर्वैष्णवीभिश्च स्तोममतिशंसेदिति। च-शब्दः [3]समुच्चयार्थः। भिश्रा ओप्यन्ते नैकदेवत्या इति। एकया द्वाभ्यां वा प्रातःसवने †शंसेत्। प्रातःसवने† आवापो दृष्टः[3]। पञ्चदशस्तोमे सप्त आवापाः। ऊर्ध्वमनुरूपात् 'महान्' (ऋ ८, ६, १-४) इति चतस्रः। 'अतो देवाः' (ऋ १, २२, १६-१८) इति तिस्रः। [4]सर्वशस्त्रे सप्त ऋचो[4] भवन्त्यपरिधानीयाः। ऐन्द्रघा यजेत्। 'आ नो याहि परावतः' (ऋ ८, ६. ३६) इति याज्या। होतुः शस्त्रं चतुराहावम्। अच्छावाकेन शस्त्रजपः ॥ २ ॥

[वैष्णव्यर्चा यजनविकल्पः]

वैष्णव्या वा ॥ ३ ॥

वैष्णव्या वा ऋचा यजेत्। विकल्पः 'त्रीणि पदा' (ऋ १, २२, १८) इत्येतया। 'विष्णोः कर्माणि पश्यत' (ऋ १, २२, १९) इति वा याज्या। [5]इन्द्रोऽस्यां हि[5] निपातभूतः ॥ ३ ॥

[गाणगारिमते ऐन्द्रावैष्णव्यर्चा यजनविधानम्]

ऐन्द्रावैष्णव्येति गाणगारिर्दैवतप्रधानत्वात् ॥ ४ ॥

ऐन्द्रावैष्णव्या[6] यजेत इति गाणगारिराचार्यो मन्यते। दैवतप्रधानत्वाच्छन्दः[7] प्रधानं न भवति, देवता प्रधाना ॥ ४ ॥

[ऐन्द्रावैष्णव्या ऋचः कथनम्]

सं वां कर्मणा समिषा हिनोमीति ॥ ५ ॥

[8]'सं वां कर्मणा' (ऋ ६,६९,१) इति त्रिष्टुप्† भवति[8]। [9]†छन्दसो दैवत-प्रधानत्वात्†। छन्दः प्रधानं न भवति, देवता प्रधाना। ‡सं वां कर्मणेति त्रिष्टुप्‡[9]

---

१. ऐन्द्रर्चा (°र्चं ब[1]) ब[1] मै; ऐन्द्रयर्चा ब[2]। २. यजेत मै। ३-३. नास्ति मै। †-†. नास्ति ब[1]। तु. आप्री ७, १२, ४। ४-४. सर्व (°र्वं ब[2]) शस्त्र सप्तऋचः (स ऋचः ब[2] मै) मूको। ५-५. इन्द्रोऽस्यास्ति ब[1] मै; इन्द्रोऽस्ति ब[2]। ६. °वैष्णव्या वा ब[1]। ७. होतुर्देवता (°त मै) प्र° मूको। ८-८. नास्ति मै। †. जगती ब[1][2]। ९-९. नास्ति मै। †-†. छन्दस्तदेव प्रधानत्वात् ब[1]; छन्दः प्रधानत्वात् ब[2]। ‡-‡. सर्वकर्मणे जगती ब[2]; नास्ति ब[1]।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

[1]भवति छन्दः[1] । तत्प्रधानत्वाद्[2] ऐन्द्रावैष्णवी गायत्री न विद्यते, तस्मात् त्रिष्टुभा[3] यजेदिति गाणगारिः दैवतप्रधानत्वात् ॥ ५ ॥

प्रातःसवने उक्तो विधिः । माध्यन्दिने सोमातिरेके सति शस्त्रं वक्ष्यते—

[माध्यन्दिने सवने सोमातिरेके शस्त्रकथनम्]

माध्यन्दिने बण्महाँ असि सूर्योदु त्यद्दर्शतं वपुरिति प्रगाथौ स्तोत्रियानुरूपौ । महाँ इन्द्रो नृवद् विष्णोर्नु कं या विश्वासां जनितारा मतीनामिति याज्या ॥ ६ ॥

'बण्महाँ' (ऋ ८, १०१, ११-१३) इति, 'उदु त्यत्' (ऋ ७, ६६, १४-१६) इति प्रगाथौ स्तोत्रियानुरूपौ । पादग्रहणात् तृचप्राप्त्यर्थं प्रगाथावित्याह । स्तोत्रियानुरूपग्रहणादाहावादिप्राप्तिः । यथा स्तुतौ भवतः । 'महाँ इन्द्रो नृवत्' (ऋ ६, १९) सूक्तं [4]"विष्णोर्नु कम्"[4] (ऋ १, १४५) सूक्तमिति । आ परिधानीया 'ऐन्द्रीभिर्वैष्णवीभिश्च स्तोममतिशस्य' (आश्रौ ६, ७, २) इति वर्तते । एते द्वे सूक्ते नित्ये भवतः । [5]यथा प्रकृतौ द्वे सूक्ते होत्रकाणामेवमेते नित्ये भवतः[5] । एताभ्यामनभिशस्ते अन्याभिरेवंविधाभिः 'अपरिमिताभिरुत्तरयोः[6] सवनयोः' (आश्रौ ७, १२, ५) इति वचनादतिशंसनं कर्तव्यम् । 'या विश्वासाम्' (ऋ ६, ६९, २) इति याज्या । होतुः शस्त्रं 'कर्मचोदनायां होतारम्' (आश्रौ १, १, १४) इति चतुराहावम् । अच्छावाकशस्त्रजपः ॥ ६ ॥

[तृतीयसवने सोमातिरेके इतिकर्तव्यताविधानम्]

तृतीयसवन उत्तरोत्तरां संस्थामुपेयुराऽतिरात्रात् ॥ ७ ॥

तृतीयसवने सोमातिरेके सति उत्तरोत्तराम् उत्तराम् उत्तरां संस्थामुपेयुः[7] आऽतिरात्राद्, यावदतिरात्रं प्राप्नोति, तावदुत्तरोत्तरा संस्था क्रियते ।

अग्निष्टोमे सोमातिरेके सति उत्तरा संस्था क्रियते, त्रीणि उक्थानि क्रियन्ते । कथं स्तोत्रिया इत्युक्तं छन्दोगानाम् । यद्युक्थ्ये सोमातिरेको[8] भवति[9] उत्तरा संस्था अतिरात्रः[10] क्रियते, पर्याया आश्विनं च । त्रिसंस्थो ज्योतिष्टोमो

१-१. नास्ति मै ब[1] । २. नास्ति ब[1] मै । ३. जगत्या मूको । ४-४. नास्ति मूको । ५-५. नास्ति मै । ६. °मितान्युत्त° मूको । ७. संस्थामुत्तरोत्तरामुपेयुः मूको । ८. °रेका ब[3] मै । ९. भवन्ति मूको । १०. अति ब[1]; °त्र ब[3]; °त्रं मै ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

भवतीति प्रकृतिः । 'अतिरात्राच्चेत्'[1] (आश्रौ ६, ७, ८) इति वक्ष्यति । [2]तस्मादतिरात्रादिति न वक्तव्यम्[2] । अस्मादारम्भात् तिसृष्वेव[3] संस्थासु उत्तरोत्तरा क्रियते, नान्यासु । अत्यग्निष्टोमे षोळशिनि वाजपेये अप्तोर्यामे चतुरुत्तरयोः अभावात् यत्तृतीयसवने[4] एकं स्तोत्रं वक्ष्यति, तद् भवति [5]अतिरात्रे वि[5] (?) समायां (?) दृष्टत्वात् ॥ ७ ॥

[अतिरात्रे सोमातिरेके विधिकथनम्]

अतिरात्राच्चेत् प्र तत्ते अद्य शिपिविष्ट नाम, प्र तद्विष्णुः स्तवते वीर्येणेति स्तोत्रियानुरूपौ । माध्यन्दिनेन शेषः ॥ ८ ॥

अतिरात्राच्चेत् सोमोऽतिरिच्यते तत्र उत्तरा संस्था न विद्यते । तस्मादिदं स्तोत्रं वक्ष्यते । अस्मादारम्भादन्यत्रापि यत्रोत्तरा संस्था न विद्यते तत्रैतदेव[6] क्रियते अत्यग्निष्टोमादिषु तद् वक्ष्यते । 'प्र तत्ते अद्य' (ऋ ७, १००, ५-७), 'प्र तद्विष्णुः स्तवते' (ऋ १, १५४, २-४) इत्येतौ स्तोत्रियानुरूपौ । पादग्रहणं[7] तृचप्राप्त्यर्थम् । स्तोत्रियानुरूपग्रहणम् आहावप्राप्त्यर्थं च । माध्यंदिनेन शेषः । माध्यंदिनेन शेषो व्याख्यातः । 'महाँ इन्द्रो नृवत्' (ऋ ६, १९), 'विष्णोर्नु कम्' (ऋ १, १५४) इति सूक्ते नित्ये तैरप्यनतिशस्ते[8] ऐन्द्रीभिर्वैष्णवीभिश्च स्तोममतिशंसेत्[9] ॥ ८ ॥

[अतिरात्रे सोमातिरेके याज्याकथनम्]

त्वेषमित्था समरणं शिमीवतोरिति याज्या ॥ ९ ॥

'या विश्वासाम्' (ऋ ६,६९,२) इति याज्या प्राप्ता, तत्स्थाने 'त्वेषम्' (ऋ १, १५५, २) इति जगती । जागतं हि तृतीयसवनम् । होतुःशस्त्रं चतुराहावम् । आश्विनाच्छस्त्रजपः । यस्माच्च उत्पद्यते, तेन वा शस्त्रजपः[10] । बृहस्पतिसवादिषु[11] तृचक्लृप्तौ ऊर्ध्वं स्तोत्रियानुरूपेभ्यः प्रथमोत्तमौ तृचौ माध्यन्दिने कृत्वा यदि स्तोमो नातिशस्यते अन्यावापः[12] कर्तव्यः । ऊर्ध्वमनुरूपादावापस्थानं यथा होत्रकाणां तथा अत्रानुरूपादावापो वचनात् ॥ ९ ॥

॥ इति षष्ठे सप्तमं खण्डम् ॥

---

१. °त्रो वा ब[1]; °त्रा वा ब[2] मै । २-२. तस्मादति ब[1] । ३. त्रिष्वेव मूको । ४. यच्छतीय° मूको । ५-५. रात्रे वि ब[1]; अतिरात्रेऽपि मै । ६. तत्रैव तदेव ब[2] मै । ७. °हणात् ब[1/2] । ८. ने (नै ब[1]) तरप्यतितशस्ते मूको । ९. तु. आश्रौ ६,७,२ । १०. °जप मूको । ११. तु. आश्रौ ९, ५, ४ प्रभ. । १२. अन्वावापः मै ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

अथ षष्ठेऽध्याये अष्टमः खण्डः

[क्रीते सोमे नष्टे दग्धे वा प्रायश्चित्तविधानम्]

क्रीते राजनि नष्टे दग्धे वा ॥ १ ॥

'दीक्षान्ते राजक्रयः' (आश्रौ ४, २, १८)। क्रयादूर्ध्वं राजनि नष्टे दग्धे [1]वा एनं[1] कश्चिदपहरति, गृहदाहे वा दह्यते तथा सति वृत्ते[2] अन्यो राजाऽऽहर्तव्यः। आहृत्य तेनैव विधानेन पुनः क्रियन्ते क्रियाः[3] 'अनावृता क्रियेरन्नावृता वा' (आश्रौ ६, ८, २-३) इति वचनात्। यदि तस्मिन् काले नाधिगच्छन्ति[4] ततः प्रायश्चित्तं हुत्वाऽनन्तरं कर्मारभेत (तु० आश्रौ ६, ८, ७) आ सुत्यायाः, यदि सुत्येऽपि नाधिगच्छेत्, पूतीकतृणान्यभिषुणुयात्[5]। सोमातिरेकसौत्यकर्माधिकृतम्, तस्मादिदमपि प्रायश्चित्तं सुत्ये एव स्यात्। तस्मादाह—क्रीते राजनीति। क्रयादि[6] एतद् भवति। नष्टे दग्धे वा इत्युक्तम्। अन्यथा विपन्नेष्वेव तदेव भवति ॥ १ ॥

[सदोहविधानेषु दग्धेषु प्रायश्चित्तविधानम्]

अपि दग्धानि सदोहविधानान्यनावृता क्रियेरन् ॥ २ ॥

अपि च दग्धानि सदश्च हविर्धाने च सदोहविर्धानानि। अनावृत्, समन्त्रं[7] कर्म आवृदित्युच्यते। तानि सदोहविर्धानानि अनावृता क्रियेरन् अमन्त्रवता कर्मणा क्रियेरन्। राजनि दग्धे इत्यधिकारात् सदोहविर्धानानामपि दग्धानां विधिरुच्यते। [8]समानाधिकार उक्तत्वात्[8] सोमस्याप्यनावृता पुनः क्रिया[9] ॥ २ ॥

[पूर्वोक्तनिमित्तेषु समन्त्रं वा कर्मविधानम्]

आवृता वा ॥ ३ ॥

सदोहविर्धानानि आवृता वा क्रियेरन् मन्त्रैर्वा क्रियन्ते ॥ ३ ॥

१-१. एव वा मूको। २. वृत्तेः ब[1] मै। ३. क्रीणन्ति मूको। ४. नाभिग° मूको। ५. तु. आश्रौ ७, ८, ५। ६. क्रियादि मूको। ७. समन्त्रकं ब[2]। ८-८. समान अधिकागुक्त° ब[1]; समान अधिकारत्वा उक्त° ब[1]; समान अधि° मै। ९. अक्रिया ब[2]।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

[नष्टे दग्धे वा सोमेऽन्यस्य सोमस्याभिषवणविधानम्]

अन्यं राजानमभिषुणुयुः ॥ ४ ॥

सुत्येऽहनि नष्टे दग्धे वा अन्यं राजानमाहृत्य अनावृता आवृता[1] वा संस्कृत्य अभिषुणुयुः ॥ ४ ॥

[पुनः सोमालाभे पूतीकस्य तदलाभे च फाल्गुनस्य तृणस्य विकल्पविधानम्]

अनधिगमे पूतीकान् फाल्गुनानि ॥ ५ ॥

अन्यस्य राज्ञः अनधिगमे अलाभे सति पूतीकान् फाल्गुनानि यानि कानि तृणानि फाल्गुनतृणानि वा अभिषुणुयात् । अनधिगमवचनात् तृणेष्वभिगते[2] सति यदि प्रत्यक्षं सोममधिगच्छेत् परोक्षं व्युदस्य प्रत्यक्षमेवाभिषुणुयात् । 'प्रत्यक्षस्यानधिगमे परोक्षं हविः' (क्षुसू २, १३ : ३) इति छन्दोगानाम् ॥ ५ ॥

[सोमालाभे पूतीकैः सह अन्यासां कासाञ्चिदोषधीनां विकल्पविधानम्]

अन्या वा ओषधयः पूतीकैः सह ॥ ६ ॥

यदि फाल्गुनौषधयो न विद्यन्ते, [3]अन्या वा ओषधयः काश्चन हरिततृणानि पूतीकैः सह अभिषुणुयात् । यदि पूतीकतृणानि† न विद्यन्ते[3], याः काश्च [4]हरिता ओषधीरभिषुणुयाद्[4] इत्यध्वर्यूणाम्[5] ॥ ६ ॥

[पूर्वोक्तनिमित्तेषु प्रायश्चित्तं वा कृत्वोत्तरकर्मविधानम्]

प्रायश्चित्तं वा हुत्वोत्तरमारभेत ॥ ७ ॥

प्रायश्चित्तं वा हुत्वाऽनन्तरं कर्मारभेत । एतदुपसत्सु भवति । कथं ज्ञायते । कथमुत्तरत्र [6]कर्म न कुर्यात् । यावदुत्तरत्र[6] सुत्यास्विति[7] वचनादुपसत्सु राजनि नष्टे दग्धे वा प्रायश्चित्तं हुत्वा वा उत्तरं कुर्यात् । अथवा तावदुत्तरं कर्म न[8] कुर्यात् यावदाहृतः सोमः इति । बहून्यपि अहानि आस्ते । प्रायश्चित्तं वा

---

१. नास्ति ब[2] । २. तृणेष्वभि(°पि ब[2]) ग° ब[1,2]; तृण्वभिगमे मै । ३-३. नास्ति मै । †. पूतीका(°की ब[2]) तृ° ब[1,2] । ४-४. हरति तानोषधयोभिषु° मै ; °धयोऽभिषु° ब[1,2] । ५. तु. आपश्रौ १४,२४,१२ । ६-६. नास्ति ब[2] मै । ७. तु. आश्रौ ६, ८, ८ । ८. च ब[1]; नास्ति मै ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

हुत्वोत्तरं कर्म कुर्यात्। कालो[1] हि परिमितः श्रूयते—पञ्चभ्यां प्रसुतः सप्तभ्यां प्रसुतः इति[2]। किं प्रायश्चित्तम्। 'अविज्ञाते वा भूर्भुवः स्वरित्याहवनीय एव' (आश्रौ १, १२, ३३) इति ॥ ७ ॥

[सुत्यासु पूर्वोक्तनिमित्तपाते पूर्वोक्तस्यैव प्रायश्चित्तस्य विधानम्]

सुत्यासूक्तमेव मन्येत ॥ ८ ॥

सुत्यासु सुत्येष्वहःसु उक्तमेव मन्येत, यदुक्तं प्राप्तम्, 'अन्यं राजानमभिषुणुयुः' (आश्रौ ६, ८, ४), 'अनधिगमे पूतीकान् फाल्गुनानि' (आश्रौ ६, ८, ५) इत्येतदेव भवति। अविशेषेणोक्तं च तथा प्रायश्चित्तं वा हुत्वाऽनन्तरमारभेत[3] अथवा तावदास्ते, यावत् सोम आहृत इत्येतदविशेषेणोक्तम्। अन्येष्वपि प्रायश्चित्तं[4] प्राप्तं तस्मादिदमाह—सुत्यासूक्तमेव मन्येतेति। तस्मात्[5] सुत्यासु राजनि मष्टे दग्धे वा राज्ञः अनधिगमे बहुकालमास्ते। तदानीमेव अनधिगमे पूतीकानभिषुणुयात्। परिशेषादुपसत्स्वितरदिति सिद्धम्। एवकारोऽवधारणार्थः। उक्तमेव मन्येत, न राज्ञोऽधिगमं काङ्क्षेत् ॥ ॥

[प्रातःसवने सद्योदुग्धस्य पयसः पूतीकसोमेन मिश्रणम्]

प्रतिधुक् प्रातःसवने ॥ ९ ॥

प्रतिधुक् दुग्धमेव पात्रस्थं पयः। प्रातःसवने पूतीकसोमस्य मिश्रणं भवति। उत्तरत्र माध्यंदिने ग्रहणादिदमपि माध्यंदिन एव स्यात्, तस्मात् प्रातःसवन इत्याह ॥ ९ ॥

[माध्यन्दिने सवनेऽग्नावधिश्रुतस्य पयसः पूतीकसोमेन मिश्रणम्]

शृतं माध्यन्दिने ॥ १० ॥

माध्यंदिने सवने अग्नावधिश्रृतं पयः पूतीकसोमस्य मिश्रणं भवति ॥ १० ॥

[तृतीयसवने दध्नः पूतीकसोमेन मिश्रणम्]

दधि तृतीयसवने ॥ ११ ॥

तृतीयसवने दधि पूतीकसोमस्य मिश्रणं[6] भवति ॥ ११ ॥

---

१. काला मूको। २. तु. आपश्रौ १०,१५,१। ३. तु. आश्रौ ६,८,७।
४. मास्ति ब[१२]। ५. तत् ब[२]। ६. नास्ति मूको।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

[पूतीकसोमे फाल्गुनानां मिश्रणे श्रायन्तीयवारवन्तीयसामनी ब्रह्मवारवन्तीयसाम्नोः स्थाने प्रयोज्ये]

श्रायन्तीयं ब्रह्मसाम यदि फाल्गुनानि वारवन्तीयं यज्ञायज्ञीयस्य स्थाने ॥ १२ ॥

पूतीकसोमे सति यदि फाल्गुनानि पूतीकानां मिश्रणं कृतानि भवन्ति। ततः वारवन्तीयं साम 'अश्वं न त्वा' (ऋ १, २७) इत्येतासु। एतद् यज्ञायज्ञीयस्य स्थाने भवति। यदि अन्या ओषधयः पूतीकैः सह अभिषुता भवन्ति तदा वारवन्तीयं न। कृते एतस्मिन् कल्पे यज्ञायज्ञीयस्य सानुरूप्या योनिः। परिमितशस्येऽपि[1] नहि [2]प्रायश्चित्तेन परिमाणस्य विघातो भवति ॥ १२ ॥

[पूतीकसोमे फाल्गुनानां मिश्रणे श्रायन्तीयं साम यज्ञायज्ञीयस्य स्थाने प्रयोज्यमिति मतान्तरम्]

श्रायन्तीयमेके ॥ १३ ॥

यदि फाल्गुनानि पूतीकानाँ मिश्रणं कृतानि भवन्ति, तत एके शाखिनः श्रायन्तीयं यज्ञायज्ञीयस्य[3] स्थाने मन्यन्ते ॥ १३ ॥

[एकगोदक्षिणाकयज्ञं कृत्वोदवसानीयामिष्टिं च कृत्वा पुनर्यजनं तत्र पूर्वस्य क्रतोर्दक्षिणादानं च]

एकदक्षिणं यज्ञं संस्थाप्योदवसाय पुनर्यजेत ॥ १४ ॥

तस्मिन् पूर्वस्य दक्षिणा दद्यात् ॥ १५ ॥

एकदक्षिणम् एका गौर्दक्षिणा यस्य, स एकदक्षिणो यज्ञः। पूतीकेष्वभिषुतेषु एका गौर्दक्षिणा दातव्या। अस्य या दक्षिणा आम्नाता तां दद्यात्। तमेकदक्षिणं यज्ञं संस्थाप्य उदवसाय उदवसानीयामिष्टिं कृत्वा तदानीमेव पुनर्यजेत। पुनरिति वचनात् तस्मिन् सोमे पूर्वस्य क्रतोर्या दक्षिणास्ता दद्यात्। प्रकृते ज्योतिष्टोमस्याधिकारात् [3]तस्यैवैतत् स्यात्, तस्माद्[3] यज्ञग्रहणात् सर्वयज्ञेषु भवति। संस्थाप्येत्युक्ते उदवसायेति न[4] वक्तव्यम्। उदवसायेति वचनादुदवसानादनन्तरमेव दीक्षा पुनरारभ्या, दीक्षाकालो नापेक्षितव्यः। पुनर्ग्रहणात् तेनैव यज्ञेन पुनर्यजेत।

---

१. °मितशस्योऽपि मूको। २-२. प्रायश्चित्तेन…न्तीयं यज्ञाय° ब[1]। ३-३. तस्यैतस्यात्तमात् ब[1]; तस्यैवै (वि ब[2]) तस्मात ब[2] मै। ४. नास्ति ब[1]।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

एकदक्षिणम् इत्यधिकारात् पुनर्यागेऽप्येकदक्षिणा प्राप्ता, तस्मात् पूर्वस्य या दक्षिणास्ता दद्याद् इत्युच्यते[1] ॥ १४-१५ ॥

[पूतीकैः प्रारब्धेऽपि कर्मणि पुनः सोमलाभे तदाद्येव सोमेन कर्मकरणम्]

सोमाधिगमे प्रकृत्या ॥ १६ ॥

यदि पूतीकैः प्रारब्धे पुनः [2]सोमाधिगमे तेन[2], यस्मिन् प्रदेशे सोममधिगच्छेत् तदाद्येव सर्वं प्रकृत्या। 'प्रतिधुक् प्रातःसवने' (आश्रौ ६,८,९) इत्येवमादि ये विकारास्ते न क्रियन्ते। पुनर्यागोऽपि न विद्यते। यद्येका दक्षिणा दत्ता भवति, ततः पुनर्यागो भवति[3] एकदक्षिणं यज्ञं संस्थाप्य पुनर्यजेत इति वचनात्।

अहर्गणे पुनः यस्मिन्[4] प्रदेशे एका दक्षिणा दत्ता, ततोऽनन्तरं सोमाधिगमे सति दक्षिणादि[5] [6]सर्वं प्रकृत्या[6], तथापि पुनरिज्या न विद्यते। 'एकदक्षिणं यज्ञं संस्थाप्य' (आश्रौ ६, ८, १४) इति वचनात् कृत्स्नं यज्ञमेकदक्षिणं संस्थाप्य पुनर्यजेत, नाकृत्स्नम् ॥ १६ ॥

॥ इति षष्ठेऽष्टमं खण्डम् ॥

---

१. नास्ति मूको। २-२. सोमाधिकारमे (°मं ब[1]) तेन मूको। ३. तुः आश्रौ ६, ८, १४। ४. अस्मिन् मूको। ५. °णा ब[1]। ६-६. सर्वप्रकृत्या मूको।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

अथ षष्ठेऽध्याये नवमः खण्डः

[दीक्षितानां रोगे जाते कर्तव्यताविधानम्]

दीक्षितानामुपतापे परिहिते प्रातरनुवाकेऽनुपाकृते वा पुष्टिपते पुष्टिश्चक्षुषे चक्षुः प्राणाय प्राणं त्मने त्मानं वाचे वाचमस्मै पुनर्धेहि स्वाहेति ब्रह्माऽऽहुति हुत्वा शीतोष्णा अपः समानीयैकविंशतिमासु यवान् कुशपिञ्जूलांश्चावधाय ताभिरद्भिरबर्थं कुर्वीत ताभिरेनमाप्लावयेज्जीवानामस्थता३ । इममसुं जीवयत जीविकानामस्थता३ इममसुं जीवयत संजीवानामस्थता३ । इममसुं संजीवयत संजीविकानामस्थता३ । इममसुं संजीवयतेत्योषधिसूक्तेन च ॥ १ ॥

दीक्षितानामुपतापे सत्रे दीक्षितानाम्, [1]यो रोगः उपतपति बाधते असुखमुत्पादयति[1] स उपतापः, तस्मिन् उपतापे उत्पन्ने यत् कर्मशान्त्यर्थं कृच्छ्रम्, तदुच्यते । तदधिकृतं वेदितव्यम् । परिहिते प्रातरनुवाके प्रातरनुवाकस्य परिधाने कृते अभूदुषायां[2] त्रिरुक्तायाम् अनन्तरमिदं कर्म क्रियते । अनुपाकृते वा । प्रातरनुवाके [3]अनुपाकृतेऽप्रारब्धे[3] वा[4] प्रातरनुवाकादनन्तरम् [5]अपोनप्त्रीयारम्भात् प्रागेव सर्वमिदं[5] कर्म क्रियते । पुष्टिपते[6] इत्येतेन मन्त्रेण यथासमाम्नातेनाहवनीये आहुतिं ब्रह्मा हुत्वा अनन्तरं शीताश्च उष्णाश्चापः कलशे समानीयाऽऽसु एकविंशतिं यवान् अपि एकविंशतिं कुशपिञ्जूलान्यवधाय निक्षिप्य दर्भतरुणानि कुशपिञ्जूलानीत्युच्यन्ते[7] अध्वर्यूणाम् । ताभिरद्भिः अस्योपतप्तस्य अबर्थं कुर्वीत । [8]अद्भिरर्थमाचमनीयादि सर्वं कुर्वीत[8], नान्याभिरद्भिः । तास्वित्यनुच्यमाने उपतप्तस्य हस्तेऽवधायेति प्राप्नोति । ताभिरद्भिरिति वचनात् शीतोष्णाभिरेवोदकार्थं कुर्यान्न शीतादिभिः । ताभिरेनमाप्लावयेत्[9] ताभिरद्भिः शीतोष्णाभिः

१-१. यदि रोगः उपतपन्ति ब[1]; या (य मै) रोगः उपतपन्ति, बाधन्ति असुखमुत्पादयन्ति ब[2] मै । २. तु. ऋ ५, ७५, ९ । ३-३. °कृते प्रा° मूको । ४. नास्ति मै । ५-५. भात् प्राग्वा(प्राणा ब[2]; प्राषा मै)मिदं मूको । ६. पुष्टिमंतपदे (°प ब[2]; °पते मै) मूको । ७. °च्यते ब[1] । ८-८. नास्ति मै । ९. ताभिरेवाप्ला (°रेवीत्पा ब[1]) वयेत् मूको ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

[1]एनमुपतप्तमाप्लावयेत् स्नापयेत्[1] जीवानामस्थता इत्येतैस्त्रिभिर्मन्त्रैः[2] सकृत्[3] प्रतिमन्त्रं न त्रिः स्नापयेत् । अमुमिति द्वितीयया विभक्त्या तस्य उपतप्तस्य यद् यज्ञकर्मणि प्रयुज्यते नाम, तदादिशेत्—इमं यज्ञदत्तं जीवयतेति । एवं त्रिषु[2] मन्त्रेषु[4] ओषधिसूक्तेन च । [5]चेति त्रिभिर्मन्त्रैः[5] ओषधिसूक्तेन च आप्लावयेत् । च–शब्दः समुच्चयार्थः । 'या ओषधीः' (ऋ १०, ९७) इत्येतद् ओषधिसूक्तम् । एतत् कर्माग्नीध्रीये कुर्याद् इत्यध्वर्यूणाम्[6] । तत्र तस्य शयनस्थानम्[6] ॥ १ ॥

[उपतप्तमाप्लाव्यानुमार्जनम्]

आप्लाव्यानुमृजेत् ॥ २ ॥

उपतप्तमनेन विधिना आप्लाव्य स्नापयित्वा अनन्तरं पाणिना अनुमृजेत् । एकैकं प्राणस्थानमेकैकेन मन्त्रेणानुमृजेत् स्पृशेत् ॥ २ ॥

[अनुमार्जनमन्त्रकथनम्]

उपांश्वन्तर्यामौ ते प्राणापानौ पातामसा उपांशुसवनस्ते व्यानं पात्वसावैन्द्रवायवस्ते वाचं पात्वसौ मैत्रावरुणस्ते चक्षुषी पात्वसावाश्विनस्ते श्रोत्रं पात्वसावाग्रयणस्ते दक्षक्रतू पात्वसा उक्थ्यस्तेऽङ्गानि पात्वसौ ध्रुवस्त आयुः पात्वसाविति ॥ ३ ॥

उपांश्वन्तर्यामौ ते इत्येतैर्मन्त्रैर्यथाम्नातैरेकैकं प्राणस्थानमेकैकेन मन्त्रेणानुमृजेत् यथालिङ्गम् । असाविति[7] सर्वेषु मन्त्रेष्वष्टम्या विभक्त्या अस्य नाम पूर्ववदादिशेत् । उपांश्वन्तर्यामौ ते प्राणापानौ पातां यज्ञदत्त । उपांशुसवनस्ते व्यानं पातु यज्ञदत्त । एवं सर्वेषु । अनुमृजेदिति वचनात् [8]स्थानं स्थानमनुमृजेत्, यथालिङ्गम् अनुमृजेदित्युक्तमध्वर्यूणाम्†[8] ॥ ३ ॥

[सर्वेषां स्वस्थानगमनम्]

यथासनमनुपरिक्रमणम् ॥ ४ ॥

[9]यथासनं †यद् यस्य आसनं† यत्र कर्म करोति, तत् स्थानमनुगमनम् अनुपरिक्रमणम्[9] । तदेव[10] स्थानम् आसीरन् । अस्मादारम्भाद् यत्रोपतप्तम्

---

१. एवमुपतप्तं प्लावयेत् स्थापयेत् मूको । २. तु. आपश्रौ १४, २०, ८ । ३. नास्ति मूको । ४. मन्त्रेण मूको । ५-५. वेतिस्विभिस्त्रिभिर्मन्त्रैः ब[1,2]; वेतिस्त्रिभिर्मन्त्रैः मै । ६. तु. आपश्रौ १४, २०, ४; ५ । ७. अधिति मूको । ८-८. स्थानं स्थानमनुगमम् ब[1] । †. तु. काश्रौ ५, ४, १० । ९-९. नुगमं मनुपरिक्रमणं ब[1] । †-†. नास्ति ब[2] । १०. तत्वमेव मूको ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

आप्लावयन्ति,[1] तत्र सर्वे गता [2]भवन्तीति ज्ञातं[2] भवति । तथाऽऽप्लाव्य यथायथं[3] गत्वा कर्म कुर्वन्त[4] आग्नीध्रीये तम्[5] आप्लावयन्ति[1] इत्यध्वर्यूणाम्[6] ॥ ४ ॥

[तार्क्ष्यसूक्तात् पूर्वं शंसनीयस्य मन्त्रस्य कथनम्]

त्रातारमिन्द्रमवितारमिन्द्रमिति तार्क्ष्यादिः ॥ ५ ॥

'त्रातारमिन्द्रम्' (ऋ ६, ४७, ११) इत्येषा ऋक् अस्मिन्नहनि निष्केवल्ये तार्क्ष्यस्य सूक्तस्यादिर्भवति । तामृचं शस्त्वा तार्क्ष्य[7] शंसेत्[8] । तार्क्ष्यस्यादिस्तार्क्ष्यादिरिति सूक्तस्याद्यायाः स्थाने प्राप्ते समीपे तु भवति, यथा, आगूर्याज्यादिः'[9] (आश्रौ १, ५, ४) इति सूत्रे[10] आगूर्याज्यायाः समीपे भवति न याज्यापदस्य[11] स्थाने, एवमिहापि ॥ ५ ॥

[ऐकाहिकादन्यद् वैश्वदेवसूक्तं शस्त्वा स्वस्त्यात्रेये निविद्धानम्]

यद्यप्यन्यदैकाहिकाद् वैश्वदेवं स्वस्त्यात्रेये निविदं दध्यात् ॥ ६ ॥

ऐकाहिकाद् आनोभद्रीयात्[12] यदन्यद् वैश्वदेवसूक्तं तस्मिन्नहनि भवति 'यज्ञस्य वो रथ्यम्' (ऋ १०, ९२; आश्रौ ७, ४, १२) इत्येवमादि । ततस्तत्सूक्तं शस्त्वा स्वस्त्यात्रेये तृचे 'स्वस्ति नो मिमीताम्' (ऋ ५, ५१, ११) इत्येतस्मिन् निविदं दध्यात् ।

अथ यदि आनोभद्रीयं तस्मिन्नहनि विद्यते, तस्मिन्नेव निविदं दध्यात्, न स्वस्त्यात्रेये । निविदं दध्यादिति वचनादधिकं शस्यते । [13]यदि द्विसूक्तस्य[13] स्थाने इष्टः स्यात् स्वस्त्यात्रेया वैश्वदेवमिति ब्रूयात् । स्वस्त्यात्रेयं (?यस्) तृचो भवति, न[14] [15]सूक्तम् । एतस्य[15] हि सूक्तसंज्ञा[16] । 'उद्धृत्य चोत्तमं सूक्तं त्रीणि' (आश्रौ ८,१,१९) इति वचनात् सूक्तसंज्ञा । तस्मात् सूक्ते आदिष्टे तृचो भवति, न सूक्तम् । विच्छन्दसां प्रायत्वाच्च सूक्तं न युज्यते । तद्विधानं 'ब्रह्मा० हुत्वा' (आश्रौ ६, ९, १) इत्येवमादि सर्वम् । 'एवमन्वहम्' (आश्रौ ७, ३, ४) इति वचनादेतस्मिन्नेवाहनि कर्त्तव्यं प्राप्तं, तस्मादिदमुच्यते ॥ ६ ॥

---

१. प्लावयन्ति मूको । २-२. भवन्ति ज्ञानं मूको । ३. यथापथं ब[2] मै । ४. कुर्वन् मूको । ५. नास्ति ब[2] । ६. अध्वर्युणा मूको । ७. तु. ऋ १०, १७८ । ८. शंसतो मै । ९. °ज्या ब[1,2]; °र्याचार्या मै । १०. सूक्ते मूको । ११. आज्यस्य पदस्य मूको । १२. तु. आश्रौ ५,१८,५ । १३-१३. य द्विसूक्तस्य मूको । १४. तत् ब[1] । १५-१५. सूक्तं संज्ञा मूको । १६. तस्य मूको ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

[दीक्षितेषु रोगरहितेषु प्रकृतिवत्कर्मकरणम्]

प्रकृत्याऽगदे ॥ ७ ॥

उपतप्तो यः सः अगदो भवति । गदो नाम व्याधिः, यस्य[1] गदो न विद्यते, सः[2] अगदः । निरुज इत्यर्थः । अगदे सति निरुजे सति प्रकृत्या भवति । ये [3]उक्ता विकारा[3] ब्रह्मा० हुत्वेत्येवमादयः, ते सर्वे अन्वहं कर्तव्याः, यावदगदो भवति । अगदे संवृत्ते प्रकृत्या कर्तव्यम् । अस्मादारम्भादन्वहं भवति, अध्वर्यूणां तु सकृत् (?) इत्युक्तम् ॥ ७ ॥

॥ इति षष्ठे नवमं खण्डम् ॥

---

१. तस्य मूको । २. नास्ति मूको । ३-३. उक्ताधिकारा मूको ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

अथ षष्ठेऽध्याये दशमः खण्डः

[वीक्षिते मृते कर्तव्यताविधानम्]

संस्थिते तीर्थेन निर्हृत्याऽवभृथे प्रेतालङ्कारान् कुर्वन्ति ॥ १ ॥

अहरहः शान्तिकर्मणि क्रियमाणे निरुजः आयुष्मानेव भवति । यस्तु क्षीणायुः, [1]स क्रियमाणे स्वस्त्ययने सन्तिष्ठते एव †क्षेमं नैव† प्राप्नोति । यदि संस्थामुपैति, तस्मात् संस्थिते यद् विधानं, तदुच्यते । संस्थिते स्वर्गते तं तीर्थेन निर्हृत्य तं प्रेतं तीर्थेन बहिर्निर्हृत्य‡[1] इति [? अतीर्थं] [2]दक्षिणा वेदिश्रोणिः । 'अतीर्थेन अनाहिताग्निम्' (लाश्रौ ३, ४, ५) इति च छन्दोगानाम् । अवभृथे अवभृथदेशे यस्मिन् अवभृथं† कल्पयन्ति, तस्मिन्नवभृथे देशे प्रेतालङ्कारान् कुर्वन्ति । प्रेतस्य ये अलङ्कारास्ते वक्ष्यन्ते[2] ॥ १ ॥

[केशादिवापनविधानम्]

केशश्मश्रुलोमनखानि वापयन्ति ॥ २ ॥

[3]केशाश्च श्मश्रूणि च रोमाणि च नखानि च छिद्यन्ते[1] ॥ २ ॥

[नलदेन सुगन्धिद्रव्येणानुलेपनविधानम्]

नलदेनानुलिम्पन्ति ॥ ३ ॥

[4]†तथा नलदेन† चानुलिम्पन्ति[4] ॥ ३ ॥

[प्रेताय नलदमालादानम्]

नलदमालां प्रतिमुञ्चन्ति ॥ ४ ॥

१-१. नास्ति मै । †-†. क्षेमेण व ब[1,2] । ‡. वाहनि° ब[1,2] ।
२-२. नास्ति मै । †. नास्ति ब[1,2] । ३-३. नास्ति मै । ४-४. नास्ति मै ।
†-†. तया ब[1,2] ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

[1]नलद एव माला कृता भवति। तां मालां शिरसि ग्रीवायां च प्रतिमुञ्चन्ति प्रतिबध्नन्ति। पुनर्नलदग्रहणे अक्रियमाणे पुष्पमाला प्राप्नोति। अन्ये लौकिका अलङ्काराः[1]स्तेऽपि कर्तव्याः[1] ॥ ४ ॥

[प्रेतशरीरस्य निष्पुरीषकरणे मतान्तरम्]

निष्पुरीषमेके कृत्वा पृषदाज्यं पूरयन्ति ॥ ५ ॥

[2]नाभेरधस्तात् पुरीषवस्तिर्भवति† । ‡तं वस्ति‡ विदार्य शौचयन्ति। अन्ये शाखिनः निष्पुरीषंϕ कृत्वा निर्लेपं कृत्वा प्रक्षाल्य ¶तत्र पृषदाज्यं¶ पूरयन्ति। 'दधन्यत्र सर्पिरानयन्त्येतत् पित्र्यं पृषदाज्यम्' (आगृ ४, १, १३) इति वक्ष्यति। तस्य पूरयन्त्येके $'क्षोधुका ह्यस्य$ प्रजा भवति' (माश १२,५,२,५) इति श्रुत्यन्तरे[2]। '[1]तस्मान्निष्पुरीषं न कुर्वन्ति। न च पृषदाज्यस्य पूरयन्त्यन्ये शाखिनः[1] ॥ ५ ॥

[अहतवाससः पादमात्रं खण्डमवच्छिद्य शेषेण प्रेतस्य पादवर्जं छादनम्]

अहतस्य वाससः पाशतः पादमात्रमवच्छिद्य प्रोर्णुवन्ति प्रत्यग्दशेनाऽऽविः पादम् ॥ ६ ॥

[3]नवं वस्त्रम्† अप्रक्षालितम् अहतम्† इत्युच्यते। तस्य अहतस्य वाससः पाशतः यतो दशा न[3] विद्यन्ते ततः पाशो[4] भवति। ततः पादमात्रं चतुर्थभागमात्रमवच्छिद्य[5] तेन चतुर्थभागहीनेन[6] वस्त्रेण ते प्रेतं प्रोर्णुवन्ति छादयन्ति प्रत्यग्दशेन वस्त्रेण,[7] प्रतीच्यां दिशि[8] दशा भवन्ति। आविःपादं[9] प्रकाशौ पादौ भवतः। पादौ न छादयन्ति। तस्य प्रेतस्य[10] प्राच्यां दिशि शिरः, प्रतीच्यां दिशि पादौ ॥ ६ ॥

[अवच्छिन्नवस्त्रखण्डस्य मृतदीक्षितपुत्रैरात्मीकरणम्]

अवच्छेदमस्य पुत्रा अमा कुर्वीरन् ॥ ७ ॥

१-१. नास्ति मै। २-२. नास्ति मै। †. °षमस्ति भवति ब[१२]। ‡-‡. तच्चास्ति ब[1]; न चास्ति ब[2]। ϕ. किं पुरीषं ब[१२]। ¶-¶. तं पृषदाज्यस्य (°ज्यं ब[2]) ब[१२]। $-$. ध्रुवस्य ब[१२]। ३-३. नास्ति मै। †-†. प्रक्षालितं अव ब[१२]। ४. पाशो ब[१२]। ५. चतुर्थं (र्थ ब[1]) भागं भाग° मूको। ६. °भागगृहीतेन ब[1]। ७. शस्त्रेण मूको। ८. नास्ति ब[1]; दश ब[1] मै। ९. अधिपादं मूको। १०. नास्ति ब[1]।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

चतुर्थभागो यः अवच्छेदः, तम् अवच्छेदम्। अस्य प्रेतस्य ये पुत्राः, ते अवच्छेदम् अमा कुर्वन्ति आत्मीकुर्वन्ति नान्यथात्वाय[1]। अस्य इति वचनादविद्यमानेषु पुत्रेषु योऽस्य आसन्नः भ्राता शिष्यो वाऽपि, स आत्मीकुर्यात्। एते प्रेतालङ्कारा व्याख्याताः ॥ ७ ॥

[अग्निमुत्पाद्य मृतदीक्षितस्य दाहकरणम्]

अग्नीनस्य समारोप्य दक्षिणतो बहिर्वेदि दहेयुः ॥ ८ ॥

अवभृथदेशादलङ्कृत्य हरन्ति, आहृत्य अनन्तरम् अग्नीनस्य अस्य प्रेतस्य अरण्योरग्नीन् समारोप्य अरणी गृहीत्वा[2] तीर्थेन निर्हृत्य दक्षिणतो विहारस्य बहिर्वेदि अग्निं मथित्वा विहृत्य तूष्णीमेव दहेयुः[3] अग्नीनस्य समारोप्य। अग्नीनिति बहुवचनात् सर्वेषु अग्निषु समारोपणं समारोपणन्यायेन। तं न्यायम् अध्वर्यवो विदुः। अस्येति पुनरुच्यते। अस्य ये अग्नयस्तेषु अङ्गारान् निर्हृत्य[4] समारोपयेदित्यर्थः। बहिर्वेदीति[5] वचनात् समीपे एव दहेयुः ॥ ८ ॥

[श्रोत्रियागारादग्निमाहृत्यानाहिताग्नेर्दाहकरणम्]

आहार्येणानाहिताग्निम् ॥ ९ ॥

अग्निं[6] श्रोत्रियागारादाहृत्य[7] अनाहिताग्निं दहेयुः। यस्यौपासनो विद्यते, तं तेन दहेयुः। अधिकृतेभ्योऽग्निभ्यो योऽन्यः, स सर्व आहार्यः। एवमग्नीन् समारोप्येत्यविशेषवचनादनाहिताग्नेरपि अग्निभिरेव दहने प्राप्ते आहार्येण इत्याह ॥ ९ ॥

[अनाहिताग्नेः पत्न्याः मरणे आहार्येणाग्निना तस्या दहनम्]

पत्नीं च ॥ १० ॥

पत्नीं च आहार्येण[8] दहेयुः। अग्निभिरेव[9] दहने प्राप्ते आरब्धम्। चशब्दार्थः[10] दीक्षिताः पत्नीं न दहन्ति शेषकार्यभावात्[11]। पुत्रा दहेयुः पैतृकेण[12] विधानेन ॥ १० ॥

---

१. नान्यथाय मूको। २. नास्ति मूको। ३. वृहेयुः ब[1]; वहेयुः ब[2] मै। ४. निवृत्य ब[1/2]; वृत्य मै। ५. बहुत्वादिति मै। ६. नास्ति मूको। ७. स्तोत्रि° मूको। ८. आहार्ये ब[1/2]; आहार्येणैव मै। ९. दग्धाग्नि° ब[1]। १०. चशब्दचार्थः ब[1]; चशब्दः चार्थः ब[2]। ११. °कार्याभावात् मूको। १२. पितुनेव ब[1/2]; पितृकेव मै।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

[दाहकर्म कृत्वा परावृत्याहःशेषकर्मसम्पादनम्]

प्रत्येत्याहः समापयेयुः ॥ ११ ॥

दग्ध्वा प्रत्येत्य हस्तपादं प्रक्षाल्य तीर्थेन प्रपद्य तद् अहः समापयेयुः अहःशेषं समापयेयुः। अस्मादारम्भाद् यस्मिन् प्रदेशे कर्म क्रियते, तदानीमेव तत्कर्म उत्सृज्य प्रेतं निर्हृत्य दहेयुरित्येव सिद्धम्। अन्यथा प्रारब्धमहः समाप्य दहेयुरिति प्राप्नोति, एकाहे तथा दृष्टत्वात् ॥ ११ ॥

[परेऽहनि प्रातरभिहिङ्काराभ्यासरहितानि शस्त्रानुवचनादीनि कर्तव्यानि]

प्रातरनभ्यासमनभिहिङ्कृतानि शस्त्रानुवचनाभिष्टवनसंस्तवनानि ॥ १२ ॥

प्रातश्च उत्तरे अहन्यग्निष्टोमः क्रियते। तस्मिन्नग्निष्टोमे अनभ्यासम् अभ्यासवर्जितानि[1], अभिहिङ्कारवर्जितानि[2] [3]शस्त्रादीनि भवन्ति[3]। शस्त्राणि च आज्यादीनि, अनुवचनानि च प्रातरनुवाकादीनि, अभिष्टवनं ग्रावस्तोत्रम्[4], संस्तवनम्, एतेष्वभिहिङ्काराभ्यासौ न स्तः। सर्वत्र प्रथमोत्तमयोरभ्यासो[5] न विद्यते। वैश्वदेवपरिधानीया सकृत् पच्छःशस्या[6] [7]सा प्रतिषेधात्[7] अप्रतिरेव तिष्ठति।

सामिधेनीषु "'पृथु पाजाः' (ऋ ३, २७, ५-१०) इति षड् धाय्याः" (आश्रौ ८, ६, ३) भवन्ति। पशौ सामिधेनीनां सप्तदशत्वात् परिव्ययणीया न सकृदुच्यते। अभिहिङ्कारश्च न क्रियते।

अहर्गणेषु यूपैकादशिनी विकल्पेन क्रियते। तत्र अन्वहमेकादशिनी मीयते[8]। सकृन्मितायां वा अन्वहं पशव आलभ्यन्ते। तत्र संस्तवनं[9] विद्यते। यूपे तत्र समवायाभावात्[10]। अयं तु ज्योतिष्टोमः अहर्गणमध्ये[11] प्राकृत एव चोदितः। प्रकृतौ आग्नेयादिकृतुपशव[12] एकादशिना वा इति विकल्पः स्यात्। एतस्मिन्नहनि एकादशिनीपक्षे यूपेषु च विद्यमानेषु [13]पशुषु यूपेषु[13] तत्र समवायनिमित्तत्वात् संस्तवनं भवति। तस्मिन् संस्तवे[14] अनभिहिङ्काराभ्यासौ, तत्र तस्मात् संस्तवनग्रहणाद्[15] अग्रहणे सवनीयानां पशूनां यः कल्पः प्रारब्धः, स एतस्मिन्

---

१. अर्जितानि ब[2]। २. नास्ति ब[2]। ३. शास्त्राणि दिति भ ब[1,2]; शस्त्राणीदिति मै। ४. यावत्स्तोत्रम् ब[2] मै। ५. °मोत्तरयो° मै। ६. तु. आश्रौ ५, १, १२। ७-७. सप्रति° ब[1] मै; प्रति° ब[2]। ८. मीयेते ब[1]; नीयते ब[2]; क्रियते मै। ९. संस्तवं ब[1]। १०. समावा° ब[1,2]। ११. अहर्ग्रहमध्ये ब[1] मै। १२. आग्नेयः क्रतुः (°तु ब[2]) पशवः मूको; तु. आश्रौ ५, ३, ३; काश्रौ १२, ६, १६। १३-१३. पशुयूपं मूको। १४. °वने मै। १५. संस्तवग्र° ब[1]।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

अहनि न[1] क्रियते । ज्योतिष्टोमे ये कल्पाः, त एव क्रियन्ते । अस्मिन्नहनि तायमानरूपाणि । स्तोत्रियस्तु क्रियते यदि सम्भवति ॥ १२ ॥

[ग्रहग्रहणात् पूर्वस्योपवेशनविधेः कथनम्]

पुरा ग्रहग्रहणात् तीर्थेन निष्क्रम्य त्रिः प्रसव्यमायतनं परीत्य पर्युपविशन्ति ॥ १३ ॥

पुरा ग्रहग्रहणाद् अपोनप्त्रीयाभ्योऽनन्तरमभिषवोऽधिक्रियते[2] यावद् ग्रहा न गृह्यन्ते । एतस्मिन् काले तीर्थेन निष्क्रम्य सव्येन[3] दीक्षिता गत्वा यस्मिन् स्थाने दग्धः[4] तद् आयतनं[5] त्रिः प्रसव्यं प्रयन्ति । प्राचीनावीतिनः दक्षिणान् केशपक्षानुद्ग्रथ्य इतरान् प्रवृत्य सव्यानूरून् आच्छानाः वस्त्रान्तैः व्यजनं कुर्वन्ति इत्युक्तम् अध्वर्यूणाम्[6] । तथैव त्रिः प्रतिनिवृत्य आयतनं परि समन्तत उपविशन्ति ॥ १३ ॥

[होतुरुपवेशनस्थानकथनम्]

पश्चाद्धोता ॥ १४ ॥

तस्यायतनस्य पश्चाद् अपरस्यां दिशि होता उपविशति । प्राग्दक्षिणा प्राची कृत्वा इदं कर्म क्रियते । तस्मात् प्रत्यगुदीच्यां दिशि होता उपविशति प्राग्दक्षिणामुखः ॥ १४ ॥

[अध्वर्युच्छन्दोगानामुपवेशनस्थाननिर्देशः]

उत्तरोऽध्वर्युः । तस्य पश्चाच्छन्दोगाः ॥ १५ ॥

तस्यायतनस्य उत्तरतः अध्वर्युः होतारमभिमुख उपविशति । तस्य अध्वर्योः पश्चाच्छन्दोगाः अपरस्यां दिशि ॥ १५ ॥

[छन्दोगानां स्तोत्रकथनम्]

आयं गौः पृश्निरक्रमीदित्युपांशु स्तुवते ॥ १६ ॥

'आयं गौः' (ऋ १०, १८९, १-३) इति एतासु तिसृषु ऋक्षु उपांशु स्तुवते छन्दोगाः । पादग्रहणादेका[7] प्राप्ता[8] । छन्दोगवशात् तिस्रो भवन्ति । छन्दोग-प्रत्ययो हि स्तोत्रियः ॥ १६ ॥

---

१. नास्ति मै । २. °याभ्योन्तरमभिष (°ष्व मै) धिक्रियते मूको । ३. सव्यो मूको । ४. दघ्नुः ब[1]; दग्धा ब[2] । ५. तमायतनः ब[1]; तमायतन ब[2]; तमायनं मै । ६. तु. आपश्रौ १४; २२, १-२ । ७. °देते मूको । ८. प्राप्ताः मूको ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

[अनन्तरं होतुः स्तोत्रियवचनम्]

स्तुते होता प्रसव्यमायतनं परिव्रजन् स्तोत्रियमनुद्रवेद-प्रणुवन् ॥ १७ ॥

छन्दोगैः स्तुते, अनन्तरं होता स्तोत्रियमनुद्रवेत् 'ब्रूयात् उपांशु अप्रणुवन् ऋगन्तेषु प्रणवं न[1] कुर्यात्। 'कर्मचोदनायां होतारम्' (आश्रौ १, १, १४) इति प्राप्ते होतृग्रहणाद् यावदुक्तं भवति। [2]परिभाषाप्राप्त आहावादिः सर्वत्र क्रियते। स्तोत्रियग्रहणाच्छस्त्रं† भवति[2]। शस्त्रधर्माः प्राप्ताः। आहावोऽनुप (?) इति। होतृ-ग्रहणाद् यावदुक्तमेव भवति। अनुद्रवेदिति चोदितं, शंसतीति न चोदितं, तस्मात् सामिधेन्यतिदिष्टम् ऐकश्रुत्यं संतननं[3] च न प्राप्नोति। ऐकश्रुत्यं भवति। अभिहिङ्काराभ्यासौ न प्राप्नुतः। उपांश्वधिकारात् सर्वमुपांशु भवति ॥ १७ ॥

[यमदैवत्यानामृचां वचनम्]

यामीश्च ॥ १८ ॥

[4]यमो देवता यासामृचां ता †यामीः णित्प्र (?) ऋचः† अनुद्रवेद‡ उपांशु अप्रणुवन्ϕ। चशब्दः समुच्चयार्थः। स्तोत्रियामीशेति ता या इमा यामीः वक्ष्यन्ते[4] ॥ १८ ॥

[अन्यासामनुवचनीयानामृचां कथनम्]

प्रेहि प्रेहि पथिभिः पूर्व्येभिरिति पञ्चानां तृतीयामुद्धरेत्। मैनमग्ने वि दहो माऽभि शोच इति षट्। पूषा त्वेतश्च्यावयतु प्र विद्वानिति चतस्र उप सर्प मातरं भूमिमेतामिति चतस्रः सोम एकेभ्यः ॥ १९ ॥

'प्रेहि प्रेहि' (ऋ १०, १४, ७-११) इति पञ्चानाम् ऋचां तृतीयामुद्धरेत्। 'अपेत वीत' (ऋ १०, १४, ९) इति एतस्या उद्धारे कृते चतस्रो भवन्ति। 'मैनमग्ने' (ऋ १०, १६, १-६) इति षड् ऋचः। '[5]पूषा त्वेतः' (ऋ १०, १७, ३-६) इति[5] चतस्रः। 'उप सर्प' (ऋ १०, १८, १०-१३) इति चतस्रः। 'सोम एकेभ्यः' (ऋ १०, १५४) इति सूक्तम् ॥ १९ ॥

१-१. ब्रूयादु-प्रवणदान्तिषु प्रणुवन्त ब[1]; °शु प्रणवऋ (द्र मै) गन्तेषु प्रणवन्त ब[1] मै। २-२ नास्ति मै। †. स्तोत्रग° ब[1]; स्तोतृप्र° ब[2]। ३. संसवनं मूको। ४-४. नास्ति मै। †-†. यामिमामिम्न ऋचः ब[2]। ‡. अनु ह (दधु ब[2]) तेन ब[1,2]। ϕ. प्रणवात् ब[1,2]। ५-५. प्राप्यन्ते च ब[1,2]; प्राप्यन्ते मै।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

[यामीनामृचां वचनमस्थिसंचयादि च]

उरूणसावसुतृपा उदुम्बलाविति च समाप्य संचित्य तीर्थेन प्रपाद्य यथासनमासादयेयुः ॥ २० ॥

'उरूणसौ' (ऋ १०, १४, १२) इति एका । 'यामीः'[1] (आश्वौ ६, १०, १८) इति वचनात् सूक्तशेषं सर्वमेवानुब्रूयात् । पञ्च ऋचो भवन्ति । अन्यथा यामीमिति[2] वक्तव्यम् । समाप्य अनुद्रवणं[3] समाप्य [4]संचित्यालक्षणे कुम्भे अस्थीनि संचित्य[4] अवदध्युः[5] । 'पादौ पूर्वं शिर उत्तरं सुसंचितं संचित्य पवनेन[6] संपूय'[7] (आगृ ४,५,५-५) संचित्येत्युक्ते संचयनविधान[8] तत्र गृह्यं[9] सर्वं प्राप्नोति । तेन विधानेन संचित्य तीर्थेन कुम्भं प्रपाद्य यथासनमासादयेयुः, पुरा मरणकालाद्[10] आहवनीयस्य दक्षिणतो यजमानानां[11] स्थानम्, तस्मिन्नासादयेयुः । समाप्येति तु क्रमार्थम् । एतत् कर्म कृत्वा स्नानं न विद्यते । प्रक्षाल्य पादौ पाणी च प्रपद्यन्ते ॥ २० ॥

[भक्षाणां प्राणभक्षणं सोमस्य निनयनं च]

भक्षेषु प्राणभक्षान् भक्षयित्वा दक्षिणे मार्जालीये निनयेयुः । दक्षिणस्यां वा वेदिश्रोण्याम् ॥ २१ ॥

[12]अस्मिन्नहनि भक्षेषु यावन्तो भक्षाः सोमाः, अन्यानि च हवींषि[12], तेषु सर्वेषु प्राणभक्षान् भक्षयित्वा दक्षिणे मार्जालीये निनयेयुः[13] । निनयेयुरिति वचनात् सोमानामेव प्राप्तम्, तस्माद् भक्षेष्वित्याह सर्वभक्षेषु प्राप्त्यर्थम् । [14]दक्षिणग्रहणादुत्तरोऽपि मार्जालीयः[14] आग्नीध्रीयो भवति । [15]सोमभक्षबहुत्वान्निनयेयुरित्याह । निक्षिपेयुरिति[15] पुरोळाशादीनाम् । दक्षिणस्यां वा वेदिश्रोण्याम् । दक्षिणा या वेदिश्रोणी तस्यां वा निनयेयुः । उत्तरा वेदिश्रोणिरस्ति, तस्माद् दक्षिणेत्युच्यते विकल्पः ॥ २१ ॥

---

१. यामिनीति ब[1] मै ; यमिनीति ब[2] । २. यामी(°मि मै)रिति मूको । ३. समाप्यानशन मूको । ४-४. संचित्या ब[1]; सवित्यलक्षणकभे अश्विनि संचित्या ब[2] मै । ५. नास्ति मूको ; तु. आगृ ४, ५, ४ । ६. पवमानेन ब[1,2] । ७. संयुज्य मूको । ८. संचयवि° मै । ९. वर्जं मूको । १०. ग्रहणकालो ब[1,2]; ग्रहग्रहणकालो मै । ११. यजमानां (°नो मै) मूको । १२-१२. नास्ति मूको । १३. निनयेयुः । अस्मिन्नहनि यावन्तो भक्षाः मूको । १४-१४. दक्षिणाग्र° ब[1,2]; दक्षिणादुत्त (°क्त) मार्जलि यः मै । १५-१५. °रित्यहनि च प्रयुरिति मूको ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

[अहःसमापनमग्निष्टोमविधानं च]

सप्तदशमहर्भवति त्रिवृतः पवमाना रथन्तरपृष्ठोऽग्निष्टोमः ॥ २२ ॥

सप्तदशमहर्भवति । सप्तदशः स्तोमो भवति, एकस्तोम एव । चतुष्टोमे प्राप्ते अहर्गणादेकस्तोमः । त्रिवृत्पवमानः त्रिवृत्स्तोमः पवमानेषु भवति । सप्तदशः प्राप्तः । रथन्तरपृष्ठः रथन्तरं पृष्ठं भवति । अस्मिन्नहनि त्रिवृदिति विकल्पेन प्राप्ते,[1] रथन्तरमेव भवति । अग्निष्टोमः । अनादेशे 'एतेनाह्ना सुत्यानि' (आश्रौ ७, १, ३) इति चतुःसंस्थो ज्योतिष्टोमः प्राप्तः । तस्मादग्निष्टोम एव भवति ॥ २२ ॥

[अस्थिकुम्भस्यावभृथदेशप्रापणविकल्पः]

संस्थितेऽवभृथमेके गमयन्त्येतस्यैतदहरभिशब्दयन्तः ॥ २३ ॥

चरितेषु[2] पत्नीसंयाजेषु अस्थिकुम्भम् एके आचार्या अवभृथं गमयन्ति[3] योऽयमग्निष्टोमः कृतः, एतस्य प्रेतस्य एतदहर् इत्येवम् अभिशब्दयन्तः एवम् अनुवदन्तः[4]। अपरे अवभृथं न गमयन्ति । समाप्ते वाऽवभृथ इति मन्यन्ते । अवभृथदेशं प्राप्य 'एतयाऽऽवृताऽभ्युक्षेरन्नेवाप्यदीक्षिताः' (आश्रौ ६, १३, १२) इति वचनादस्थिकुम्भं प्रोक्ष्य यत्रैनमापो नाभिष्यन्देरन्न(?न्ना)न्या वर्षाभ्यः, तत्र कुम्भं दध्युः[5] । आहिताग्नेरनाथस्य नेदिष्ठदीक्षिते तस्य एतदुक्तम् । अनाहिताग्नेरनाथस्य एतदेवम् । इदानीमाहिताग्नेरेव कल्पान्तरं वक्ष्यते ॥ २३ ॥

[अरणिमन्थनोद्गतेनाग्निना वा दग्ध्वास्थिकुम्भं निखाय संवत्सरेऽग्निष्टोमेन याजनम्]

निर्मन्थ्येन वा दग्ध्वा निखाय संवत्सरादेनमग्निष्टोमेन याजयेयुः ॥ २४ ॥

'अग्नीनस्य समारोप्य' (आश्रौ ६, १०, ८), 'मथित्वा' (आश्रौ २, २, १) एनानजुह्वत इन्धीरन् (द्र० ऐब्रा ७, २) इति छन्दोगानां वचनम् । तत् कृत्वा यज्ञियाद् वृक्षादरणीमाहृत्य मथित्वा तेनाग्निना प्रेतं दग्ध्वा संचित्यास्थिकुम्भं चात्वालदेशे खात्वा स्वगत्वे(?ते) निदध्याद् इत्यध्वर्यूणां वचनात् तत्र निधाय संवत्सरे पूर्णे एतमस्थिकुम्भम् अग्निष्टोमेन याजयेयुः इत्यर्थः । यस्मिन्नहनि मृतः, तस्मादह्नः संवत्सरे पूर्णे इत्यध्वर्यूणाम्[6] ॥ २४ ॥

---

१. प्राप्तं मूको । २. चरेषु मूको । ३. तु. आपश्रौ १४, २१, १२ । ४. आवन्तः मूको । ५. तु. आगृ ४, ५, ५ । ६. तु. आपश्रौ १४, २१, १२; २२, १२ ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

[मृतस्य नेदिष्ठिनं दीक्षित्वा सत्रसमापनम्]

नेदिष्ठिनं वा दीक्षयेयुः ॥ २५ ॥

नेदिष्ठिनं वा दीक्षयेयुः नायं तुल्यविकल्पः[1] विनिवेशः । अनाहिताग्नेरनाथस्य सत्रमध्येऽग्निष्टोमेन निरवदानम् । अनाथस्य नेदिष्ठी एव दीक्ष्यते[2] । आहिताग्नेरनाथस्य सत्रमध्ये सत्रान्ते वा [3]अग्निष्टोमेनाग्नीषोमीयान्ते न निरवदानम्[3] । सनाथस्य तु नेदिष्ठी एव दीक्ष्यते[2] । एवं विनिवेशः[4] । यदा नेदिष्ठी दीक्ष्यते[2] तदाग्नीनस्य न समारोपयन्ति । तेष्वग्निषु दीक्ष्यते[3] । सा एव पत्नी तस्यैव सूक्तवाकैश्च[5] ब्रह्मण्यायां[6] च नामग्रहणं, 'स एव पृष्ठशमनीयेन यजेत[7]' (शांश्रौ १८, २४, २९) इति ॥ २५ ॥

[नेदिष्ठिनि गृहपतौ वाऽसति उत्थानविकल्पः]

अपि वोत्थानं गृहपतौ ॥ २६ ॥

अपि वोत्थानं भवति । अपि वा नेदिष्ठिनं[8] दीक्षयेयुः । व्यवस्थितविभाषेयम् । नेदिष्ठिनि अविद्यमाने उत्थानं भवतीति । विद्यमाने उत्थानं न[9] भवति । यदा उत्थानं, तदा यस्मिन् कर्मणि क्रियमाणे म्रियते[10] तदानीमेवोत्थानम्, कर्मशेषं न[9] समापयन्ति[11] । असमाप्यैव तीर्थेन निष्क्रम्य अवभृथन्यायेनाग्नीन्[12] प्रपद्यन्ते । पृथगग्नीन्[13] समारोप्य उदग्देवयजनान्[14] सथित्वौदवसानीयया[15] इष्ट्या [16]यथायथगता[16] (तु० आश्रौ ६,१४,२३) विश्वजिताऽतिरात्रेण यजन्ते पृथक् पृथक्। अतोऽपि[17] यज्ञः[18] पवित्रेष्ट्या क्रियते एव क्रियमन्ता(?)[19] संचत्वात्,[20] कृत्स्नेन हि कर्मणा फलमवाप्यते । 'गृहपतौ तु संस्थितेऽपायतीष्ववभृथं गमयेयुरित्यालेखनः' (आश्रौ ६, १०, २९), 'पूर्वेण सदो दहेयुरित्याश्मरथ्यः' (आश्रौ ६, १०, ३०), 'एष एवावभृथः' (आश्रौ ६, १०, ३१) इत्येतेनैव न्यायेन पुत्राः पितृमेधविधानेन दग्ध्वा[21] श्राद्धातः[22] कर्म कुर्वन्ति । यदाऽस्य नेदिष्ठी दीक्ष्यते[23], तदाऽवभृथे

---

१. °त्यतु विकल्पः ब[1] ; तु विकल्पः ब[2] । २. दीक्षते मूको । ३-३. अग्निष्टोममग्नीषोमनिरव° ब[1,2]; अग्निष्टोमनवनिरव° मै । ४. °वेशाः मै । ५. °वाकेश्च ब[1,2]; °वाक्येश्च मै । ६. ब्रह्मण्यां ब[2] मै । ७. यजेते मूको । ८. निर्दिष्टं तं मूको । ९. नास्ति मै । १०. क्रियते मै । ११. °पयति ब[1,2] । १२. °येनग्निन मूको । १३. नास्ति मूको । १४. उदग्देष्वायजमानान् ब[1]; उपदष्ट्रेव (उदृष्टेव मै) यजमानान् ब[2] मै । १५. तु. आश्रौ ६, १४, २३ । १६-१६. यथायथ (°पथ मै) गता मूको । १७. °तेऽपि ब[1] । १८. यत्वे ब[1]; ये के ब[2]; यत्वे मै । १९. क्रियन्ता ब[1] । २०. संचस्वात् ब[1]; संचत्वाला ब[2]; सञ्चित्वान् मै । २१. दृक्ष्वा ब[1]; दृक् ब[2] मै । २२. श्राद्धाताः ब[1]; श्राद्ध(°द्धा मै)न्ताः ब[2] मै । २३. दीक्षते (°तौ ब[1]) ब[1,2]; दीक्षिते मै ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

प्रेतालङ्कारान् कृत्वा प्रत्येकमग्नीनस्य[1] [2]समारोप्य मथित्वा दक्षिणतो दहन्ति पितृमेधविधानेन पुत्राः श्रद्धातः कर्म कुर्वन्ति । तस्मिन्नग्नौ[3] तदानीमेव नेदिष्ठिनं दीक्षयेयुः ॥ २६ ॥

[स्तुतशस्त्रयोरुक्तवदभिहिंकाराभ्यासरहितत्वम्]

उक्तः स्तुतशस्त्रविकारः ॥ २७ ॥

'संवत्सरादेनमग्निष्टोमेन याजयेयुः'[3] (आश्रौ ६, १०, २४) इत्युक्तम् । तस्मिन्नग्निष्टोमे उक्तः व्याख्यातः स्तुतशस्त्राणां[4] विकारः 'प्रातरनभ्यासम्' (आश्रौ ६, १०, १२) इत्येवमादि यो विकारः संवत्सरादूर्ध्वमग्निष्टोमेऽपि भवति । अवचनान्न प्राप्नोति । तस्मादारभते स्तुतविकारः 'सप्तदशमहः' (आश्रौ ६, १०, २२) इत्येवमादि । शस्त्रविकार इति शस्त्रादीनां विकार इत्यर्थः । एवं वर्ण्यमाने अनुवचनादीनामपि विकार उपदिष्टो भवति । अग्निष्टोमचोदनाया अनन्तरं तत्रैव वक्तव्यः । इहागत्य वचनादेकाहार्थमपीदं द्रष्टव्यम् ॥ २७ ॥

[एकाहेषु मृतेऽपि यजमानेऽहःसमाप्तिपर्यन्तं तस्य पूर्वासने शयनम्]

एकाहेषु यजमानासनें शयीत ॥ २८ ॥

एकाहेष्वेव स्तुतशस्त्रविकार इष्यते । एकाहेषु शस्त्रेषु दीक्षितानामुपतप्तस्य संस्थितस्य च विधानमुक्तम् । तदेवैकाहाहीनाऽहर्गणेष्वपि[5] [6]दीक्षितानामुपतापवृत्तिः । अविशेषवचनादहीनेष्वपि[6] बहवो दीक्षिता भवन्ति । एकस्मिन्[7] दीक्षिते गृहपतिवद् विधानम् । अन्यस्त्वेकाहवद्[8] भवति । अन्यस्यैकाहधर्मत्वादप्येतदिदानीमेकाहेषु वक्ष्यते । दीक्षितानामिति[9] बहुवचनेन चोदितत्वादहर्गणेष्वेव स्यादेकाहेषु [2]पुनर्न स्यात्[2] । तस्मादेकाहेषु अपि प्राप्त्यर्थमिदमुच्यते । एकाहेषु संस्थिताधिकारात्[10] संस्थितस्यैव विधिरुच्यते नोपतप्तस्य । तस्माद् एकाहेषु ज्योतिष्टोमादिषु अतिरात्रपर्यन्तेषु वक्ष्यते प्रातरनुवाकप्रभृति । यस्मिन् प्रदेशे म्रियते, तत्प्रभृति प्रेतं यजमानायतने शाययते[11] प्राक्शिरसं प्रत्यक्पादम् आ पत्नीसंयाजेभ्यः । 'उक्तः स्तुतशस्त्रविकारः' (आश्रौ ६,१०,२७) इत्यधिकारः । यस्मिन् प्रदेशे स्थितः, तत्प्रभृत्यनभ्यासमनभिहिङ्कृतानि शस्त्रादीनि

---

१. प्रत्येत्यग्नीनस्य ब[1,2]; प्रत्येत्यग्रे मै । २-२. नास्ति मै । ३. याजयेत् मूको । ४. संस्तुत° ब[1,2]; संसृत° मै । ५. तदेवाकाही(°हि मै)णोह (°द ब[1]) र्गणे(°र्ग्रहणे मै)ष्वपि मूको । ६-६. °तापवृत्यविशे° ब[1]; °तापयत्य (°पत्य ब[2]) विशे° ब[2] मै । ७. एतस्मिन् मै । ८. अन्य (°न्ये ब[2]; °न्य मै) त्वे(त्ये मै)का° मूको । ९. तु. आश्रौ ६.९,१ । १०. संस्थिता अधिकाराः मै; °कारा ब[2] । ११. शीयते मूको ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

भवन्ति। प्रेते सति प्रेतन्याय एव भवति। ऋतुस्तुतमधिक्रियते। स्तोमश्च न प्रारब्धो[1] हि विक्रियते [2]प्राग्† 'बर्हिष्-पवमानात्' (आश्रौ १, ४, २)। 'उक्तः स्तुतशस्त्रविकारः' (आश्रौ ६, १०, २७) इति वचनात् 'भक्षेषु प्राणभक्षान् भक्षयित्वा दक्षिणेन मार्जालीये निनयेयुः' (आश्रौ ६, १०, २१) सर्वस्मिन् विक्रियमाणे[2] भक्षा अपि विक्रियन्ते ॥ २८ ॥

[यजमानमरणे आलेखनमतेन कर्तव्यताविधानम्]

संस्थितेऽपायतीष्ववभृथं गमयेयुरित्यालेखनः ॥ २९ ॥

संस्थितेऽहनि 'ऊर्ध्वं पत्नीसंयाजेभ्यः[3]' (आश्रौ ८, १२, २०) अपायतीषु यस्मिन् देशे एत्य आपः स्थिता भवन्ति, तटाकं सरो वा भवति, तासु अप्सु अवभृथं गमयेयुः प्रेतम् इत्यालेखनः आचार्यो मन्यते। अत्रावभृथं विवक्षितं, न आपो विवक्षिताः। अवभृथं गमयेयुरित्यालेखनः[4] दहेयुरेवेत्याश्मरथ्यः इति सूत्रार्थः। तत्र सत्यवभृथगमने[4] यदायतीयगमयेत (अपायतीषु गमयेत ?) अपायतीष्वन्यत्र[5], दृष्टं [6]यत्रोदकं महत् प्रवहतीति तदिह मा भूदिति[6] अपायतीष्वित्युच्यते[7]। तत्रावभृथे आप एव विवक्षिताः। तस्मात् स्थानमेव, नान्यत् कर्म क्रियते। इष्ट्यादि न क्रियते। तथा हि पूर्वमपि दृष्टि-संस्थितेऽवभृथमेके[8] गमयन्ति[9] इति। तत्रावभृथे अवभृथन्यायेन स्नापयित्वा एत्य तीर्थेन प्रपद्येत[10] सर्वैरग्निभिः ॥ २९ ॥

[यजमानमरणे आश्मरथ्यमतेन कर्तव्यताविधानम्]

पूर्वेण सदो दहेयुरित्याश्मरथ्यः ॥ ३० ॥

पूर्वेण सदः अस्मिन् देशे दहेयुः पितृमेधन्यायेन। [11]ऋत्विज एव[11] दहेयुरित्यधिकारात्। तत उदकक्रियादि[12] पुत्राः कुर्युः [13]श्राद्धान्तं कर्म[13]। पूर्वेण सदो दहेयुरेव, माऽवभृथं गमयेयुः इत्याश्मरथ्यः आचार्यो मन्यते। आलेखनोऽवभृथगमनं दहनं च मन्यते, आश्मरथ्यस्तु दहनमेव मन्यते, न

---

१. प्रारब्धत्वात् प्रारब्धो ब[1] मै। २-२. प्राग्बर्हिः पवमाणे ब[1]। †. प्रारप्त्ये ब[2]। ३. तु. आश्रौ ६, १३, १। ४. सत्यवभृथ° मूको। ५. अपायनी (°नीये मै) ष्व- (ष्वद- ब[2] मै) मूको। ६-६. यत्रोदकमहं भवतीति तदिह मादिति मूको। ७. अपायनीष्वि° मूको। ८. इष्टे इति संभाव्यते। ९. तु. आश्रौ ६, १०, २३। १०. प्रपद्ये स मूको। ११-११. ऋत्विजमेव मूको। १२. उदकं क्रि° मूको। १३-१३. °न्तकर्म मूको।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

अवभृथगमनं मन्यते । उभयोस्तु दहनस्थानं[1] समानं पूर्वेण सद इति । तस्मादाश्मरथ्योऽवभृथं[2] न मन्यत इति तदुच्यते ॥ ३० ॥

[अत्रास्यैवावभृथस्य नियमो नाऽन्यस्य]

एष एवावभृथः ॥ ३१ ॥

एष एवावभृथः । तस्मादवभृथगमनेन नार्थः । एवकारः अवभृथगमन-प्रतिषेधार्थः । समाप्तानि सोमप्रायश्चित्तानि । समाप्तश्च ज्योतिष्टोमः चतुःसंस्थः सप्रायश्चित्तिकः ॥ ३१ ॥

॥ इति षष्ठे दशमं खण्डम् ॥

---

१. दहनं स्थानं मूको । २. कस्मा° मूको ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

अथ षष्ठेऽध्याये एकादशः खण्डः

इदानीं यज्ञपुच्छं वक्ष्यते । तत् सर्वसंस्थासु विधीयते । अग्निष्टोमः ज्योतिष्टोमश्चतुःसंस्थ आम्नातः । विकृतावप्येता एव संस्थाः ततोऽधिका अपि क्वचित् । यथा 'अप्यग्निष्टोमे[1] राजन्यस्य गृह्णीयात्' (तैसं ६,६,११,४) इति । अग्निष्टोमे षोळशिनं गृह्णन्ति सोऽत्यग्निष्टोम इत्युच्यते । वाजपेये षोळशिसंस्थाया ऊर्ध्वमतिरिक्तमेकं भवति । अप्तोर्यमेऽतिरात्रादूर्ध्वं चत्वार्यतिरिक्तोक्थानि । अस्यापि ततः सप्त संस्था भवन्ति । ता इहाधिक्रियन्ते यज्ञपुच्छविवक्षार्थम् । अधिकारे अधिक्रियमाणे अतिरात्रादनन्तरमेव यज्ञपुच्छं प्राप्नोति । तस्मात् ता आम्नाता अपि पुनरधीयन्ते आम्नातविवक्षार्थम्—

[अग्निष्टोमादिसप्तसंस्थानां गणनम्]

अग्निष्टोमोऽत्यग्निष्टोम उक्थ्यः षोळशी वाजपेयोऽतिरात्रोऽप्तोर्याम इति संस्थाः ॥ १ ॥

अग्निष्टोमः अत्यग्निष्टोमः उक्थ्यः षोळशी वाजपेयः अतिरात्रः अप्तोर्याम इति एताः सप्त संस्थाः । 'वाजपेयः अत्युक्थ्यः' (तु० ऐब्रा ३, ४१) इत्युक्तं ब्राह्मणे । अप्तोर्यामः अतिरात्र इति ॥ १ ॥

[उक्तसंस्थानां प्रत्येकमन्ते यज्ञपुच्छसंज्ञककर्मकरणम्]

तासां यामुपयन्ति तस्या अन्ते यज्ञपुच्छम् ॥ २ ॥

तासां सप्तानां यामुपयन्ति यां संस्थां कुर्वन्ति, तस्या अन्ते वक्ष्यमाणं यज्ञपुच्छसंज्ञं कर्म क्रियते, तद् वक्ष्यते 'अनुयाजादि' (आश्रौ ६, ११, ३) । तासामिति पुनरुच्यते, तासामेवान्ते यज्ञपुच्छं, नान्यासाम् इति । कुण्डपायिनामयने अग्निहोत्रादिहविर्यज्ञसंस्थानामन्ते मा भूदिति । अतिरात्रान्तमुक्तम् । यज्ञपुच्छमतिरात्रान्ते । अस्मादारम्भाद्[2] सर्वासामन्ते भवति । अहर्गणे[3] अन्वहं संस्थान्ते यज्ञपुच्छम् । एकाहे तु ज्योतिष्टोमेन स्वर्गकामो यजेत । गौः[4] भ्रातृव्यवत उक्थ्यषोळशी (?) 'ज्योतिर्ऋद्धिकामस्य' (आश्रौ १०, १, १) इति ॥ २ ॥

---

१. अत्यग्नि° मूको । २. तस्मा° मै । ३. अहर्ग्रहणे ब[1] मै । ४. गां मै ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

यज्ञपुच्छं वक्ष्यते—

[अनुयाजादि शंयुवाकान्तं कर्मणः पशुबन्धवत् कर्तव्यत्वम्]

अनुयाजाद्युक्तं पशुनाऽऽशंयुवाकात् ॥ ३ ॥

अनुयाजान् आदिं कृत्वा उक्तं व्याख्यातं पशुना कर्म आ शंयुवाकात् यावच्छंयुवाकम् इति । पशुग्रहणादैष्टिकानुयाजा भवन्ति । कृत्स्ने प्राप्ते आ शंयुवाकादित्याह ॥ ३ ॥

[द्वयोः सूक्तवाकप्रैषयोरुत्तमस्यात्र कर्तव्यत्वम्]

उत्तमस्त्विह सूक्तवाकप्रैषः ॥ ४ ॥

खिलसमाम्नाये द्वौ सूक्तवाकप्रैषौ आम्नातौ । [तत्र] य उत्तमः सूक्तवाकप्रैष आम्नातः, स इह भवति । तु-शब्दः पाशुकव्यावृत्त्यर्थः । इह-वचनमुत्तरसूत्रार्थम् ॥

'इहैव अवीवृधत' (ऋखि ५, ७, ४, १५) इति पुरोळाशमभिवदति, न पाशुकम्, पशाविति अतिदेशात्तु पाशुकः प्राप्तः ॥ ४ ॥

[अवीवृधतेत्यत्र देवताध्याहारमीमांसा]

अवीवृधतेति पुरोळाशदेवतां पशुदेवतामेके ॥ ५ ॥

सूक्तवाकप्रैषः साधारणः पशुदेवतायाः पुरोळाशदेवतायाश्च । तत्र अवीवृधतेति सन्दिह्यते, कां देवतामभिवदति । तस्मादाह—अवीवृधतेति पुरोळाशदेवताम् अभिवदतीति । पुरोळाशैरिति[1] बहुवचनदर्शनात् पशुपुरोळाशस्य अक्रियापक्षे इदमुच्यते । उत्तरत्र यदि कुर्युरिति[2] वचनात् पशुदेवतामेके शाखिनः अवीवृधतेति पशुदेवतामभिवदतीत्याहुः । तथा हि तेषां श्रुतिः । 'छिद्रापिधानार्थं सवनीया' (?) इति । अत एव पुरोळाशो न क्रियते । [3]उक्तो हेतुः[3] 'अन्यत्र तदर्थवादवदनात्' (आश्रौ ५, १३, ९) इति । अस्मिन् पक्षे पशुदेवताऽनेकत्वे सति अवीवृधतेति ऊह्यम् । पशुपुरोळाशे अक्रियमाणे विकल्पः ॥ ५ ॥

पशुपुरोळाशस्य अक्रियापक्षे उक्तम्, इदानीं क्रियापक्षे वक्ष्यते—

[सवनीयस्य पशोः पशुपुरोडाशकरणे वचनम्]

यदि सवनीयस्य पशोः पशुपुरोळाशं कुर्युरवीवृधेतां पुरोळाशैरित्येव ब्रूयात् ॥ ६ ॥

---

१. तु. ऋखि ५,७,४,१५ । २. तु. आश्रौ ६,११,६ । ३-३. उक्तहेतुः मूको ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

यदि सवनीयस्य पशोः पशुपुरोळाशं[1] कुर्युः अध्वर्यवः, तथा सति अवीवृधेतां पुरोळाशैः इत्येवं ब्रूयान्न विकल्पः । पशुपुरोळाशे क्रियमाणेऽपि विकल्पः प्राप्तः पूर्वसूत्रवचनात् । यदीत्यनित्यभावे । सवनीयस्य पशोरिति वचनादन्येषां पशूनां पुरोळाशा भवन्ति । साद्यस्कश्चेत्[2] । पुनः पशुग्रहणेन[3] सवनीयानां पुरोळाशानामधिकारादप्राप्त आम्नातो विधीयते । उभयदेवताभिवादित्वं कल्पते । एव-शब्दोऽवधारणार्थः । पशुपुरोळाशे क्रियमाणे उभयदेवतार्थमभिधानं भवति, न[4] विकल्पते । पशुपुरोळाशे क्रियमाणे अवीवृधेतां पशुपुरोळाशैरित्येव ब्रूयान्न विकल्प इत्युक्तम् । तस्य हेतुरुत्तरसूत्रे ॥ ६ ॥

[देवतापुरोडाशयोः सम्बन्धः]

सवनीयैरेवेन्द्रो वर्धते, पशुपुरोळाशेन पशुदेवता ॥ ७ ॥

सवनीयैरेव पशुपुरोळाशैः इन्द्रो वर्धते[5], न पशुपुरोळाशेन श्रुत्यभावात् । यथा[6] सवनीयैरन्यदेवत्यैरपि [7]पशुपुरोळाशैरिन्द्रो[7] वर्धते[8], न पशुपुरोळाशेन श्रुत्यभावात् । [7]सवनीयैरन्यदेवत्यैरपि पशुपुरोळाशैरिन्द्रो[7] वर्धते इति श्रुतिरस्ति, एवं पशुपुरोळाशेनापि इन्द्रो वर्धत इति श्रुतिर्न विद्यते । तस्मादाह— सवनीयैरेवेन्द्रो वर्धते, न[9] पशुपुरोळाशेनेति । पशुपुरोळाशेन इन्द्रो न[10] वर्धते । तस्माद् विकल्पो न भवति । तस्मात् पशुपुरोळाशे क्रियमाणे अवीवृधेतां पुरोळाशैरित्येवं ब्रूयादवीवृधत[11] पुरोळाशैरिति न ब्रूयात् । पशुपुरोळाशे[12] क्रियमाणे पशुपुरोळाशेन पशुदेवता[13] वर्धते, न[14] सवनीयैः पुरोळाशैः ।

किमुक्तं[15] भवति । अन्यदेवत्यैरपि पशुदेवता वर्धते इति या श्रुतिः सा[16] पुरोळाशे अक्रियमाणे एव[17], क्रियमाणे तु सा न भवति । तस्मात् पशुपुरोळाशे[18] क्रियमाणे द्विदेवत्येऽपि[19] पशौ सति अवीवृधत पुरोळाशैरित्येवं ब्रूयात् । अवीवृधेतां पुरोळाशैरिति [20]न ब्रूयात् । ऐन्द्रे तु पशौ सति समानदेवतेति एकवन्निगमः प्राप्तः, अवीवृधत पुरोळाशैः इति[20], द्विदेवत्येऽयं निगमः कर्तव्यः । भवति [21]समाना देवता[21] । सामर्थ्यात् तु भवति पशुपुरोळाशः[22] पशुसंस्कारार्थः [23]पशुपूरणार्थः । 'तेनैवास्य तदापूर्यते' (ऐब्रा २, ११) इति श्रुतिः । समेधश्च क्रियते । 'समेधेन हास्य पशुनेष्टं भवति' (ऐब्रा २, ८) इति श्रुतिः । सवनीयस्तु[24]

---

१. पुरो° ब[2] । २. साद्यसुश्चेत् ब[1,2]; साद्यश्चेत् मै । ३. °ग्रहणं मूको । ४. नास्ति मै । ५. वर्तते मूको । ६. नास्ति ब[2] । ७-७. °देवत्यैरपिरिन्द्रो मूको । ८. वत्ताते ब[1]; वर्तते ब[2] मै । ९. नास्ति मै । १०. नास्ति मूको । ११. ब्रूवनवी° ब[1]; ब्रूवन्नवी° ब[2] । १२. पुरो° मै । १३. देवता ब[2] । १४. नास्ति ब[2] मै । १५. किं युक्तं ब[1] । १६. स ब[1,2] । १७. एवं मूको । १८. पुरो° ब[2] । १९. °वत्ये ब[2] मै । २०-२०. नास्ति ब[2] । २१-२१. °नदे° ब[2] मै । २२. पुरो° मै । २३-२३. नास्ति ब[1] ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

सोमसंस्कारार्थः[1] [2]सोमस्य मिश्रणार्थः[2] । तदुक्तम् 'धानावन्तं करम्भिणम्' (ऋ ३, ५२, १) इत्येतयर्चा । तस्मादसमानार्थः । द्विदेववन्निगमः कर्तव्यः 'अवीवृधेतां पुरोळाशैः' (आश्रौ ६, ११. ६) इति । हविस्तु भिद्यते । अन्येन हविषा अन्या देवता वर्द्धत इत्युक्तम् । तस्मात् पृथङ्नियमः । यत्रैककपालः पशुपुरोळाशो[3] भवति, यत्र यत्राज्येन स्विष्टकृदिळा च भवति । तदा 'पुरोळाशवद्धवींष्याज्यवर्जम्' (आश्रौ ३, ४, १३) इति वचनात् माध्यन्दिने स्विष्टकृत्प्रैषेषु पुरोळाशाज्यानाम् (?) इति प्रधानत्वाद् आज्यमनन्तरं भवति । सूक्तवाके आज्यस्य निगमो[4] न[5] क्रियते, पुरोळाशस्यैव च[6] क्रियते ॥ ७ ॥

[शंयुवाकादूर्ध्वं हारियोजनग्रहकर्म]

ऊर्ध्वं शंयुवाकाद्धारियोजनः ॥ ८ ॥

ऊर्ध्वं[7] शंयुवाकात् 'अनुयाजाद्युक्तं पशुनाऽऽशंयुवाकात्' (आश्रौ ६, ११, ३) इत्युक्तम् । इदानीं शंयुवाकादनन्तरं यद् वक्ष्यते । ऊर्ध्वं शंयुवाकाद् हारियोजनो नाम ग्रहः । तस्यानुवाक्या प्रैषो याज्या च एतानि वक्ष्यन्ते ॥ ८ ॥

[तस्यानुवाक्याप्रैषयाज्यानिर्देशः]

अपाः सोममिन्द्र प्रयाहि, धानासोमानामिन्द्राद्धि च पिब च, युनज्मि ते ब्रह्मणा केशिना हरी इति ॥ ९ ॥

'अपाः सोमम्' (ऋ ३,५३,६), 'धानासोमानाम्' (ऋखि ५,७,४,१६), 'युनज्मि ते' (ऋ १,८२,६) इति अनुवाक्या प्रैषो याज्येति ॥ ९ ॥

[अन्त्येष्वहःसु इज्यानुवाक्ययोर्विधानम्]

इज्यानुवाक्ये अन्त्येष्वहःसु ॥ १० ॥

इज्यानुवाक्ये अहर्गणानाम् अन्त्येष्वहःसु भवतः ॥ १० ॥

[अनन्त्येष्वहःसु इज्यानुवाक्ययोर्निर्देशः]

तिष्ठा सु कं मघवन्मा परा गा अयं यज्ञो देवया अयं मियेध इतीतरेषु ॥ ११ ॥

---

१. नास्ति ब[1] । २-२. नास्ति ब[2] । ३. पुरो° ब[1] । ४. नियमो ब[1] । ५. नास्ति ब[2] । ६. नास्ति मै । ७. ऊर्ध्वं च ब[1] ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

स(?) एवान्यो(?) यस्मात् (?)। 'तिष्ठा सु कम्' (ऋ ३,५३,२), 'अयं यज्ञः' (ऋ १, १७७, ४) इतीज्यानुवाक्ये[1] इतरेषु अनन्त्येष्वहस्सु[2]। उभयत्र प्रैषः समानः ॥ ११ ॥

[अनन्त्येष्वहःसु अनुवाक्याविकल्पः]

परा याहि मघवन्ना च याहीति वाऽनुवाक्योत्तरवत्स्वहःसु ॥ १२ ॥

'परा याहि' (ऋ ३, ५३, ५) इति अनुवाक्या अनन्त्येष्वहःसु[3] भवति। तत्र[4] अन्त्येष्वनन्त्येषु[5] च लिङ्गाद्विनियुक्ताः[6]। तस्माल् लिङ्गादुपदेशानुवाक्ययोः[7] विनिवेशः कल्पते। कथम्। 'तिष्ठा सु कम्' (ऋ ३,५३,२) इति प्रायणीयातिरात्रेषु[8] [9]भवत्यनुवाक्या मन्त्रलिङ्गात्[9], परा याहि इत्यत्र मन्त्रलिङ्गादेव। उत्तरवत्सु उत्तरमर्हयेषां विद्यते, तान्युत्तरवन्त्यहानि, तेषूत्तरवत्स्वहःसु ॥ १२ ॥

[हारियोजनस्यानुवषट्कारेऽकृते मैत्रावरुणकर्तृकातिप्रैषस्य विधानम्]

अननुवषट्कृतेऽतिप्रैषं मैत्रावरुण आहेह मद एव मघवन्निन्द्र ते श्व इति ॥ १३ ॥

अननुवषट्कृते—हारियोजनस्यानुवषट्कारे अकृते [10]अतिप्रैषः नाम प्रैषविशेषः[10]। तम् अतिप्रैषं मैत्रावरुण आह 'इह मद' (ऋखि ५,७,४,१७) इति खिलेष्वाम्नातस्याविग्रहणम्। "अन्त्येष्वनन्त्येषु चेत्युभयेषामधिकारादुभयत्राप्यननुवषट्कृते" प्रैषे प्राप्ते 'उत्तरवत्स्वहःसु' (आश्रौ ६, ११, १२) इत्युच्यते। प्रैषः प्रैषस्थानं प्राप्तः यथा याज्यानुवाक्ये। तस्मादाह—अननुवषट्कृत[12] इति। अतिप्रैष इति संज्ञा 'अभ्यासातिप्रैषौ' (आश्रौ ७, १, ११) इत्युक्ते एतस्य ग्रहणम्। अननुवषट्कृत[13] इति वचनाद् होतुरपि प्राप्तः, तस्मादाह मैत्रावरुण आहेति ॥ १३ ॥

[अतिरात्रेऽतिप्रैषे श्व.स्थानेऽद्येत्यूहः]

अद्येत्यतिरात्रे ॥ १४ ॥

अद्येति ऊह्यते[14] अतिरात्रे क्रतौ [15]श्वः-शब्दः गुणकर्मणि[15] गुणभावेन वर्तते आद्येऽहनि [16]न तु[16] मुख्यभावेन। तस्मादूह्यते ॥ १४ ॥

---

१. इत्यनुवाक्ये मूको। २. °नन्तेष्व° मूको। ३. अन्येष्व° मूको। ४. अत्र ब[2]। ५. अन्तेष्व° मूको। ६. लिङ्गानि द्विनियुक्ताः ब[1] मै; °युक्ताः ब[2]। ७. °लिङ्गानुवा° मै। ८. °णीयादितिरा° ब[1] मै; °णीयादतिरा° ब[2]। ९-९. °क्यान्मन्त्र° मूको। १०-१०. अतिप्रैषो न मूको। ११-११. °ष्वनन्त्येत्युभ° ब[2] मै। १२. अनुव° मै। १३. अनुव° मूको। १४. उच्यते मूको। १५-१५. च शब्दः गुणकर्म मूको। १६-१६. तु तु ब[1]; तु ब[1] मै।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

[तत्र अद्यसुत्यामित्यूहः]

अद्य सुत्यामिति च ॥ १५ ॥

अद्य सुत्याम् इति ऊह्यते । च-शब्दोऽतिरात्राधिकारसमुच्चयार्थः । सर्वेषु यजुर्निगदेषु अद्य[1] प्राप्ते आरम्भः । शास्त्रान्तरे विकल्पदर्शनात् छन्दोगानां विकल्पः सुब्रह्मण्यायाम् ॥ १५ ॥

[अतिप्रैषान्तं श्रुत्वाऽग्नीध्रकर्तृकं श्वःसुत्यामिति वचनम्]

तस्यान्तं श्रुत्वाऽऽग्नीध्रः श्वःसुत्यां प्राह श्वःसुत्यां वा एषां ब्राह्मणानां तामिन्द्रायेन्द्राग्निभ्यां प्रब्रवीमि मित्रावरुणाभ्यां वसुभ्यो रुद्रेभ्य आदित्येभ्यो विश्वेभ्यो देवेभ्यो ब्राह्मणेभ्यः सौम्येभ्यः सोमपेभ्यो ब्रह्मन् वाचं यच्छेति ॥ १६ ॥

तस्यान्तं तस्यातिप्रैषस्य अन्तं श्रुत्वा तदानीमेवाननुवषट्कृते आग्नीध्रः श्वःसुत्यां वा एषाम् इति यथासमाम्नातं प्राह[2]। तस्यान्तं श्रुत्वेति वचनात् समानः कालः अनुवषट्कृते । एवं श्रुत्वा इति वचनात् समानस्वरो भवति । ऊहश्च समानः । 'अद्य सुत्या एषाम्' इति अतिरात्रे । तस्यान्तं[3] श्रुत्वा इति वचनात् तायमानरूपसंज्ञाश्च[4] । अत्र श्वःसुत्या विवक्षिता, न ब्राह्मणा विवक्षिताः । तस्माद् [5]विद्यमानबहुत्वं नोच्यते[5] ॥ १६ ॥

॥ इति षष्ठे एकादशं खण्डम् ॥

---

१. अत्यप्रा° मूको । २. नास्ति मूको । ३. नास्ति ब[2]; तस्यां मै । ४. ता यजमा° मै । ५-५. °हुत्वेनोच्यते मूको ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

अथ षष्ठेऽध्याये द्वादशः खण्डः

[द्रोणकलशावेक्षणाद्याग्नीध्रीये होमान्तं कर्म]

आहृतमुन्नेत्रा द्रोणकलशमिळामिव प्रतिगृह्योपहवमिष्ट्वाऽवेक्षेत ॥ १ ॥

हरिवतस्ते हारियोजनस्य स्तुतसोमस्य शस्त्वोक्थस्येष्टयजुषो यो भक्षो गोसनिरश्वसनिस्तस्य त उपहूतस्योपहूतो भक्षयामीति प्राणभक्षं भक्षयित्वा प्रति प्रदाय द्रोणकलशमात्मानमाप्याय्य यथाप्रसृप्तं विनिःसृप्याऽऽग्नीध्रीये विनिःसृप्ताहुती जुह्वत्ययं पीत इन्दुरिन्द्रं मदे धादयं विप्रो वाचमर्चं नियच्छन् । अयं कस्यचिद् दुहतादभीके सोमो राजा न सखायं रिषे धात् स्वाहा । इदं राधो अग्निना दत्तमागाद् यशो भगः सह ओजो बलं च । दीर्घायुत्वाय शतशारदाय प्रतिगृभ्णामि महते वीर्याय स्वाहेति ॥ २ ॥

उन्नेता अध्वर्युपुरुषः । स हुत्वा द्रोणकलशमाहरति । तम् आहृतम् उन्नेत्रा द्रोणकलशम् इळामिवाञ्जलिना प्रतिगृह्णीते[1] । तत उन्नेतरुपह्वयस्वेति उपहवमिष्ट्वा तूष्णीमेव अवेक्षेत । अवेक्ष्य हरिवतस्ते इति एतेन यथासमाम्नातेन मन्त्रेण, 'वाग्देवी' (आश्वौ ५, ६, २) इत्येतेन च प्राणभक्षं द्विर्भक्षयित्वा द्विरवघ्राय तत उन्नेत्रे द्रोणकलशं प्रतिप्रदाय आत्मानमाप्याययति । गत्वाऽवेक्षणं प्राप्तं यथा 'द्रोणकलशाद् धाना गृहीत्वाऽवेक्षेरन्' (आश्वौ ६,१२,४) इति, तस्मादाह—आहृतमिति । उन्नेतृग्रहणम् [2]उन्नेतर्युपहवार्थं दीक्षितानाम्[2] । सर्वेषां यजमानानां भक्ष उन्नेतृग्रहणात् । सर्व उन्नेतर्युपहवमिच्छन्ति[3] । इळामिव प्रतिगृह्य इति वचनात् प्रतिग्रह[4] एव इळायाः तुल्यं[5] नोद्यमनम् । उपहवमिष्ट्वा इति अवेक्षणविधानार्थम् । लिङ्गान्मन्त्रो भक्षणार्थे भवति । तूष्णीमेवावेक्षणम् । [6]नित्यादधिको मन्त्रो भवति[6] । [7]सर्वत्र ग्रहणात्[7] । प्रतिप्रदाय इति वचनात्

---

१. प्रतिगृह्यते मूको; तु. आश्वौ १, ७, ३ । २-२. उन्नेताध्वर्यवो हवार्थं दीक्षिताः मूको । ३. उन्नेतार्युप (°तार्थवोप ब[2]; °तायवोप मै) हव° मूको । ४. ग्रहण ब[1/2] । ५. तुल्य ब[1/2] । ६-६. नित्यत्वादधि (°भि ब[1]) को मन्त्रो जपति (को जपति ब[2]) मूको; तु. आश्वौ ५, ६, २ । ७-७. सर्वग्र° मूको ।

CC-0. Shri Vipin Kumar Col. Deoband. In,Public Domain.

Digitized by Madhuban Trust, Delhi

सर्वेषां प्रतिग्रहणं प्रतिपादनं च भवति । 'सर्वत्रात्मानमन्यत्रैकपात्रेभ्यः' (आश्रौ ५,६,२९) इति प्रतिषेधादात्मानम् आप्याय्य इत्युच्यते । यथाप्रसृप्तं यो येन द्वारेण प्रसृप्तः स तेन विनिष्क्रम्य आग्नीध्रीये [1]विनिःसृप्ताहुती जुह्वति[1] सर्वे । तत्र होता उपस्थानमग्रे कृत्वा निष्क्रम्य पत्नीसंयाजकाले वेदं गृह्णीयात् । तदग्नीषोमीये उक्तमिहापि[2] भवति अग्नीषोमीयेण सवनीयातिदेशात् । विनिःसृप्ताऽऽहुतीति संज्ञा आग्नीध्रीयग्रहणम् (णात्?) ॥ १-२ ॥

[सर्वेषामाहवनीये षण्णां षण्णां शकलानामभ्याधानम्]

आहवनीये षट् षट् शकलान्यभ्यादधति—देवकृतस्यैनसोऽवयजनमसि स्वाहा । पितृकृतस्यैनसोऽवयजनमसि स्वाहा । मनुष्यकृतस्यैनसोऽवयजनमसि स्वाहा । आत्मकृतस्यैनसोऽवयजनमसि स्वाहा । एनस एनसोऽवयजनमसि स्वाहा (तु० मासं ८, १३) । यद्वो देवाश्चकृम जिह्वया गुर्विति च ॥ ३ ॥

आहवनीये षट् षट् शकलान्यभ्यादधति प्रतिक्षिपन्ति देवकृतस्येति यथासमाम्नातैः षड्भिर्मन्त्रैः । आहवनीयग्रहणमाग्नीध्रीयाधिकारात् । षडेते मन्त्रा भवन्ति । अन्यथा एक एव मन्त्रः स्यात् । मन्त्रमध्येऽपि स्वाहाकारा भवन्ति । वीप्सावचनं सर्वेषां प्राप्त्यर्थम् ।

यद् वो देवाश्चकृम जिह्वया गुर्विति च । चकारः समुच्चयार्थः । च-शब्दे अक्रियमाणे ऋगुत्तरार्धे स्यात्—धानावेक्षणार्थे । धानावेक्षणार्थश्च मन्त्रो निवपनार्थे स्यात् ॥ ३ ॥

[सर्वेषां द्रोणकलशाद्धाना गृहीत्वा समन्त्रमवेक्षणं निवपनं च]

द्रोणकलशाद्धाना गृहीत्वाऽवेक्षेरन्नापूर्या स्थाऽऽमा पूरयत प्रजया च धनेन च । इन्द्रस्य कामदुघा स्थ कामान्मे धुङ्ध्वं प्रजां च पशूंश्चेति ॥ ४ ॥

अवघ्रायान्तःपरिधिदेशे निवपेयुः ॥ ५ ॥

आहवनीयसमीपे एव द्रोणकलशो भवति । तस्माद् द्रोणकलशाद् धाना गृहीत्वाऽवेक्षेरन् सर्वे ऋत्विजः । आपूर्या स्थाऽऽमा इति एतेन मन्त्रेण ॥

१-१. °हुतिर्जु° ब[१/२]; °हुतीर्जु° मै । २. तु. आश्रौ ४,१२,६ ; °हार्य ब[२] मै ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

ततस्तूष्णीम् अवघ्राय अन्तःपरिधिदेशे निवपेयुः[1] निक्षिपेयुः[2]। तत्रस्थानामेवेक्षणे प्राप्ते गृहीत्वेत्युच्यते। अवेक्षणे मन्त्रश्चोदितस्तस्मात् तूष्णीमवघ्राणम्। देशग्रहणादविद्यमानेष्वपि परिधिषु स देशो भवति ॥ ४-५ ॥

[सर्वेषां प्रत्येत्य जलपूर्णचमसानां प्रदक्षिणीकरणम्]

प्रत्येत्य तीर्थदेशेऽपां पूर्णाश्चमसास्तान् सव्यावृतो व्रजन्ति ॥ ६ ॥

आहवनीयदेशाद् दक्षिणावृतः[3] प्रत्येत्य अध्वर्युपथेनैत्य तीर्थदेशे अपां पूर्णाश्चमसाः स्थापिता भवन्ति, तान् सव्यावृतो व्रजन्ति। प्रत्येत्येति वचनादाहवनीयदेशाद् दक्षिणावृतः प्रत्यागच्छन्ति। ततः अध्वर्युपथात् सव्यावृतो व्रजन्ति। 'विहारादव्यावृत्तिश्च' (आश्रौ १, १, ११) इति प्राप्ते सव्यावृत इत्युच्यते ॥ ६ ॥

[सर्वेषामात्मनः पर्युक्षणविधानम्]

हरिततृणानि विमृज्य प्रतिस्वं चमसेभ्यस्त्रिः प्रसव्यमुदकैरात्मनः पर्युक्षन्ते दक्षिणैः पाणिभिः ॥ ७ ॥

तीर्थदेशे अपां पूर्णाश्चमसाः स्थापिता भवन्ति। तेषु हरिततृणानि विमृज्य[4] यथा तृणरसा आपो भवन्ति, स्वं स्वं चमसं प्रति प्रतिस्वं चमसेभ्यश्च[5] उदकपूर्णेभ्यः[6] उदकं गृहीत्वा त्रिः प्रसव्यमुदकैरात्मनः पर्युक्षन्ते दक्षिणैः पाणिभिः। प्रतिस्वं चमसेभ्य इत्यनुच्यमाने एकैकस्मिन् सर्वेषां प्राप्नोति। चमसिनां यो यस्मिन् भक्षयति[7], स तस्मिन्ननुक्रमेणानन्तरं करोति। आत्मसंस्कारत्वादप्राप्तं प्रसव्यमारभते[8]। दक्षिणैः पाणिभिरिति प्राप्तमपि[9] पुनरुच्यते। 'इतरैर्वा' (आश्रौ ६, १२, ८) इति विकल्पविवक्षार्थम्। अत्र प्राचीनावीतं न क्रियते वचनाभावात्। नित्यवचनं तु यज्ञोपवीतमेव ॥ ७ ॥

[वामपाणिना पर्युक्षणविकल्पः]

इतरैर्वा प्रदक्षिणम् ॥ ८ ॥

इतरैर्वा पाणिभिः सव्यैर्वा प्रदक्षिणं पर्युक्षन्ते (? वा इति) विकल्पः ॥ ८ ॥

[पर्युक्षणमन्त्रकथनम्]

स्वधा पित्रे स्वधा पितामहाय स्वधा प्रपितामहायेति ॥ ९ ॥

स्वधा पित्रे इति एतैस्त्रिभिर्मन्त्रैस्त्रिः पर्युक्षन्ते ॥ ९ ॥

---

१. निववपेयुः ब[1]; निवापयेयुः ब[2] मै। २. नास्ति ब[1]। ३.° मृतः मूको। ४. निमृज्य ब[2]; मृज्य मै। ५. °सेभ्य ब[1] मै। ६. उदकभ्यः (°केभ्यः मै) मूको। ७. भक्षति ब[2]। ८. °रभ्यते ब[2] मै। ९. तु. आश्रौ १,१,१२।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

[पिण्डपितृयज्ञवज्जीवमृतेभ्यः पर्युक्षणव्यवस्थाकथनम्]

उक्तं जीवमृतेभ्यः ॥ १० ॥

उक्तं पिण्डपितृयज्ञे[1] जीवेभ्यश्च प्रेतेभ्यश्च[2] निपृणीयात् । सर्वेभ्य [3]एव वा निपरणं[3] होमो वा होमान्तं वा[1] । येन[4] कल्पेन स्वेभ्यः पितृभ्यः क्रिया वृत्ता, तेनैव कल्पेन इह पर्युक्षणं कर्तव्यम् । यदि [5]प्रेतेभ्य एव क्रिया प्रवृत्ता इत्यत्रापि[5] प्रेतेभ्य एव पर्युक्षणम् । यदि जीवेभ्योऽपि प्रवृत्ता तथैवेह । जीवपितृकस्तु पर्युक्षणं न कुर्यात् । कुर्याद् वा श्रुत्यन्तरवचनाद् यदि प्रारब्धा । अस्मात् सूत्रारम्भात् स्वेभ्यः पितृभ्य उपास्येयुः, न यजमान-पितृभ्यः ॥ १० ॥

[पाणींश्चमसेष्ववधाय प्राणभक्षं भक्षयित्वाऽभिमर्शनम्]

पाणींश्चमसेष्ववधायाप्सु धूतस्य देव सोम ते मतिविदो नृभिः सुतस्य स्तुतस्तोमस्य शस्त्वोक्थस्येष्टयजुषो यो भक्षो गोसनिरश्वसनिस्तस्य त उपहूतस्योपहूतो भक्षयामीति प्राणभक्षान् भक्षयित्वा माऽहं प्रजां परा सिचमित्येतेनाभ्यात्मं निनीयाच्छायं वो मरुतः श्लोक एत्वित्येतयाऽभिमृशन्ति ॥ ११ ॥

अथात्मदक्षिणान् पाणींश्चमसेषु तूष्णीम् अवधाय अप्सु धूतस्य इति यथासमाम्नातेन मन्त्रेण प्राणभक्षान् भक्षयित्वा अप्सु सोमानाम् अवघ्राणभक्षं कृत्वा । एकाङ्गाधिकाराद् दक्षिणस्यैव पाणेरवधानम् । सव्यस्य चाधिकारात् सव्यस्यैव[6] भवति अवधानस्य तन्मात्रत्वात् । यथा वेदस्तरणे सव्योऽधिकृतः प्रायश्चित्तहोमे नानुवर्तते । लिङ्गाद् भक्षार्थो मन्त्रः । तस्मादवधानं तूष्णीकं भवति । अप्सु सोमानां प्राणभक्षान् भक्षयित्वा माऽहं प्रजाम् इत्येतेन मन्त्रेण आत्मानमभि चमसं निनीय । होतुः पूर्णपात्रनिनयने उक्तो[7] मन्त्रः । इहापि होतुरेव स्यात् । तस्मात् सर्वेषामत्र प्राप्त्यर्थम् एतेनेत्युच्यते 'अच्छायं वो मरुतः' (ऋ ७,३६,९) इत्येतया ऋचा भूमिगता [8]अपः अभिमृशन्ति[8]। मन्त्रान्तेनाभिमर्शने प्राप्ते कृत्स्नयर्चाऽभिमर्शनप्राप्त्यर्थमेतया इत्युच्यते ॥ ११ ॥

---

१. तु. आश्रौ २,६,१९–२२ । २. प्रेतेभ्य एव मूको । ३-३. एवानिप° मै । ४. यज्ञेन मूको । ५-५. नास्ति मै । ६. दक्षिणस्यैव मूको । ७. तु. आश्रौ १, ११, ८ । ८-८. अपि भिमृशन्ति ब[1]; अभिमृशन्ति ब[2]; आपोभि-मृशन्ति मै ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

[आग्नीध्रीये दधिद्रप्सान् प्राश्य सख्यविसर्जनम्]

दधिक्राव्णो अकारिषमित्याग्नीध्रीये दधिद्रप्सान् प्राश्य सख्यानि विसृजन्ते—उभा कवी समाना सत्यादा धर्मणस्पती। परि सत्यस्य धर्मणा वि सख्यानि सृजामह इति ॥ १२ ॥

'दधिक्राव्णः' (ऋ ४, ३९, ६) इति एतयर्चा आग्नीध्रीये दधिद्रप्सान् दध्यवयवान् प्राश्य अनन्तरं [1]तत्रैव ते स्वसख्यानि[1] विसृजन्ते उभा कवी इति एतं मन्त्रं यथासमाम्नातं जपन्तः[2]। अप्सु सोमभक्षं परिसमाप्य दक्षिणावृत आग्नीध्रीयं गच्छन्ति। तत्रैव [3]सदस्यः कर्मो (°स्यः कर्मोपद्रष्टा तानभिसृप्या°-) परतानभिसृप्याभिमृशति[3]। नहि स कर्माणि करोति, सर्वकर्मणामुपद्रष्टा भवति ॥ १२ ॥

॥ इति षष्ठे द्वादशं खण्डम् ॥

१-१. तत्रैके व्यसख्या(°सव्या मै)नि मूको। २. जपति ब[1,2]; जपन्ति मै।
३-३. सदस्यकर्मापदस्यानतसृ (°नतिसृ ब[1]; °न तस्य मै) भिमृशति मूको।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

अथ षष्ठेऽध्याये त्रयोदशः खण्डः

[देवपत्नीसंयाजाचरणमवभृथं प्रति गमनं च]

पत्नीसंयाजैश्चरित्वाऽवभृथं व्रजन्ति ॥ १ ॥

सख्यविसर्जनादनन्तरं पाशुकाः पत्नीसंयाजा भवन्ति । तैः[1] पत्नीसंयाजैश्चरित्वा अवभृथं व्रजन्ति गच्छन्ति । अवभृथमिति कर्मणो नामधेयम् । पत्नीसंयाजैश्चरित्वा इळां प्राश्य पूर्णपात्रे अवभृथरूपम् 'एष एवाऽवभृथः' (आश्रौ ६, १०, ३१) इति वक्ष्यते । तस्मात् [2]साऽवभृथे[2] कर्मणि पूर्णपात्रं न क्रियते । इह तु वेदस्तरणं नित्यम् । स्तीर्णेन वेदेन समिष्टयजूंषि जुहोति इत्यध्वर्यूणां[3] शास्त्रे[4] लिङ्गदर्शनात् । प्रायश्चित्तानि हुत्वा संस्थाजपमकृत्वा तीर्थेन निष्क्रम्याग्निपशुकेतनान्यव्यवयन्तोऽवभृथं[5] व्रजन्ति ऋत्विजः ॥ १ ॥

[व्रजनकाले निधनसाम्नः प्रयोगः]

व्रजन्तः साम्नो निधनमुपयन्ति ॥ २ ॥

व्रजन्तः[6] साम्नो निधनमुपयन्ति च 'विश्वं समत्रिणं दह' (ऋ १,३६,१४७) इति सर्वे ब्रूयुः । [7]अस्मादारम्भादवस्थितैर्न वक्तव्यम्[7] । व्रजन्त इति वचनात् सहैव गन्तव्यम् ॥ २ ॥

[तिष्ठद्भिः सर्वैरवभृथेष्टिचरणम्]

अवभृथेष्टचा तिष्ठन्तश्चरन्ति ॥ ३ ॥

अवभृथं कर्म, तत्र क्रियमाणा इष्टिः अवभृथेष्टिः, तया अवभृथेष्टचा तिष्ठन्तश्चरन्ति । तिष्ठन्त इति वचनाद् होतृब्रह्मयजमानानामासनं प्रतिषिद्धम् ॥३॥

[अवभृथेष्टचां प्रयाजादिकर्तव्याकर्तव्यताविधानम्]

प्रयाजाद्यनुयाजान्ता नास्यामिळा न बर्हिष्मन्तौ प्रयाजानुयाजौ अप्सुमन्तौ ॥ ४ ॥

---

१. ते ब[2] । २-२. सा अवभृथे ब[1] मै ; सात्यवभृथे ब[2] । ३. तु. आश्रौ १३, ८, ४ । ४. शस्त्रे मूको । ५. तु. आश्रौ ३,६,२३ । ६. नास्ति मूको । ७-७. °रम्भात् (°त ब[2] मै) न स्थितेन मूको ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

सा इष्टिः प्रयाजादिरारभ्यते[1], अनुयाजान्ता संतिष्ठते। तत्र [2]स्रुगादापनं न। ततोऽर्थलुप्तत्वात् स्रुचि स्रुगादापनं[2] न विद्यते। ये न[3] पुनरुदकान्ते सादयन्ति, तैः [4]संप्रयोगे स्रुगादापनं[4] वक्तव्यम्। नास्यामिळा। अस्यामिष्टौ इळा न विद्यते। अस्यामिति[5] वचनाद् अस्यामिळा न विद्यते, स्विष्टकृदस्ति। एककपालस्य सर्वहुतत्वात् स्विष्टकृन्न प्राप्नोति। तस्मादाह—अस्यामिळा न विद्यते, स्विष्टकृदेव विद्यते इति। न बर्हिः-शब्दवन्तौ प्रयाजानुयाजौ भवतः। चतुर्थः प्रयाजः प्रथमोऽनुयाजः। अप्सुमन्तौ अप्सुशब्दवन्तौ आज्यभागौ भवतः। तौ कारीर्या[6] व्याख्यातौ[7] ॥ ४ ॥

[तत्र च्छन्दोविधानम्]

गायत्रौ ॥ ५ ॥

गायत्रौ भवतः, नानुष्टुभौ। श्रुत्यन्तरे अवभृथेष्टयाम् अनुष्टुभावाम्नातौ। तत्प्रतिषेधार्थं गायत्रावित्याह ॥ ५ ॥

[तत्र देवताभिधानम्]

वारुणं हविः ॥ ६ ॥

वरुणोऽस्य हविषो देवता, वारुणं हविः। हविर्ग्रहणं तन्त्राधिकारात्[8]। हविर्ग्रहणे अक्रियमाणे उत्तरत्र[9] स्विष्टकृद्ग्रहणाद् [10]वारुणं स्विष्टकृत[10] एवैतौ विकल्पौ स्याताम् ॥ ६ ॥

[याज्यानुवाक्ययोः स्विष्टकृद्देवतायाश्च विधानम्]

अव ते हेळो वरुण नमोभिरिति द्वे। अग्नीवरुणौ स्विष्टकृदर्थे ॥ ७ ॥

'अव ते हेळः' (ऋ १, २४, १४-१५) इति एते द्वे याज्यानुवाक्ये। पादग्रहणादेका प्राप्ता। अग्निश्च वरुणश्च अग्नीवरुणौ देवते स्विष्टकृदर्थे[11] वेदितव्ये। स्विष्टकृतो देवतानिगमे कर्तव्ये एतयोर्देवतयोर्निगमनं कर्तव्यम्। स्विष्टकृत इत्येतावता[12] सिद्धे अर्थग्रहणाद् याज्यादेशादन्यत्र निगमनं दर्शयति। तस्मात् पञ्चमे प्रयाजे निगमनं भवति। प्रकृतौ निगमनं न[13] विद्यते। विकृतौ तु

---

१. °जादि आर° मूको। २-२. स्रुगादापनं तत्रार्थलुप्तनानाश्चुचि (°र्थं वर्तमाना ना स्रुवि ब²; °र्थं लुप्तं मानाच्छुचि मै) स्रुगादा° (श्रुगादा° मै) मूको; तु. आश्रौ १,४,९;१०। ३. नास्ति ब¹ मै। ४-४. संप्रयोगेस्तुगायनं ब¹; प्रसंप्रयोगेस्तुगा° ब²; प्रसंयोगे श्रुगा° मै। ५. अस्यामिळेति (°मिवाति ब⁷) ब² मै। ६. °र्यां मै। ७. तु. आश्रौ २,१३,४। ८. तत्राधि° मूको। ९. आश्रौ ६,१३,७। १०-१०. वरुणः स्विष्ट° ब¹; वरुणस्विष्ट° मै। ११. °कृतः अर्थे ब¹; °कृतम् अर्थे मै। १२. एता° ब¹। १३. नास्ति ब²।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

देवतान्यत्वान्निगमनं दृष्टं पित्र्यायाम् । इहापि देवतान्यत्वात् पञ्चमे प्रयाजे अर्थग्रहणान्निगमनं न[1] विधीयते । ये यजामहेऽग्नीवरुणौ स्विष्टकृतावित्यादेशः । अत्र प्रकृतिवदादेशो भवति ।। ७ ।।

[अग्नीवरुणयोर्याज्यानुवाक्याकथनमिष्टिसमाप्तौ च पादानां समन्त्रमुदकान्तावधानम्]

[2]त्वं नो अग्ने वरुणस्य विद्वानिति द्वे[2] । संस्थितायां पादानुदकान्तेऽवदध्युर्नमो वरुणायाभिष्ठितो वरुणस्य पाश इति ।। ८ ।।

अथ संस्थितायाम् इष्ट्यां पादानुदकान्तेऽवदध्युः सर्वे ऋत्विजो दक्षिणान् पादान् उदकान्तेऽवदध्युः स्थापयेयुः । यद्युभयोः पादयोरवधानमिष्टं स्यादुदकान्ते तिष्ठेयुरिति ब्रूयात् । पादानिति कर्तृबहुत्वाद् बहुवचनम् । उदकान्त इति उदकेन सम्पन्नान् पादान् अवदध्युः 'नमो वरुणाय' (मासं ८, २३) इति एतेन मन्त्रान्तेन ।। ८ ।।

[तत आचमनमन्त्रकथनम्]

तत आचामन्ति भक्षस्यावभृथोऽसि, भक्षितस्यावभृथोऽसि, भक्षं कृतस्यावभृथोऽसीति ।। ९ ।।

ततः तस्मात् पादावधानादनन्तरम् उपविश्य आचामन्ति 'भक्षस्यावभृथोऽसि' (जैब्रा २, ६६ (६७)) इति एतैस्त्रिभिर्मन्त्रैर्यथासमाम्नातैः ।। ९ ।।

[पूर्वोक्तमन्त्रत्रयस्य इतिकर्तव्यताविधानम्]

प्रोथ्य प्रथमेन प्रष्ठीवन्ति प्रगिरन्त्युत्तराभ्याम् ।। १० ।।

प्रोथ्य [3]अपः प्रोथीकृत्य[3] प्रथमेन मन्त्रेणापः प्रष्ठीवन्ति निष्ठीवन्ति । प्रगिरन्त्युत्तराभ्यां मन्त्राभ्याम् प्रतिगिरन्ति । अनाचम्यैव उत्तरौ मन्त्रौ ब्रूयुः [4]आचाम्येति वचनाभावात्[4] । तत आचामन्ति इत्युक्तम्[5] । ततो भक्षयन्तीति यदुक्तं स्याद् आचम्य भक्षं स्यान्मन्त्रेणानन्तरम् ।। १० ।।

[तत आचम्य समन्त्रं स्नानविधानम्]

तत आचम्याऽऽप्लवन्त आपो अस्मान्मातरः शुन्धयन्त्विदमापः प्रवहत, सुमित्र्या न आप ओषधयः सन्त्विति ।। ११ ।।

---

१ नास्ति ब[2] मै । २-२. त्वं नो इत्यादि द्वे इति पर्यन्तः सूत्रभागः पूर्वेणान्वयी । ३-३. ऋचः (स च ब[2]) क्राची (ऋची ब[2] मै) कृत्य मूको । ४-४. आचामेदिति वचनात् मूको । ५. तु. आश्रौ ६,१३,९ ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

ततः[1] तूष्णीमेव शौचार्थम् आचम्य आप्लवन्ते स्नायन्ते 'आपो अस्मान्' (ऋ १०,१७,१०), [2]'इदमापः' (ऋ १,२३,२२) इत्येताभ्यामृग्भ्याम्[2], 'सुमित्र्या नः' (मासं ६ २२) इति एतेन यजुषा[3]। सर्वानेतान् मन्त्रान् जपन्तः अद्भिरात्मानमभिषिञ्चन्ति। पूर्वस्य मन्त्राचमनस्याधिकृतत्वात् पुनराचमनं विधीयते शौचार्थम्। अस्मादाचमनारम्भात् पूर्वस्मिन् शौचार्थमाचमनं न[4] विद्यते ॥ ११ ॥

[उक्तमन्त्रैर्दीक्षितादीक्षितानामभिषेकमात्रकरणम्]

एतयाऽऽवृताऽभ्युक्षेरन्नेवाप्यदीक्षिताः ॥ १२ ॥

एतैर्मन्त्रैः अभ्युक्षेरन्नेव, न प्लवेरन् अप्यदीक्षिताः[5] अपि दीक्षिताः। स्नानेन उक्ता मन्त्राः प्रोक्षणे न प्राप्नुवन्ति, तस्माद् एतयाऽऽवृता इति मन्त्रप्राप्त्यर्थम्। एवशब्दः स्नानप्रतिषेधार्थः[6]। अपिशब्दः समुच्चयार्थः। अदीक्षिता दीक्षिताश्चेति। दीक्षितस्य उपतप्तस्य स्नानमपार्थं [?], तदर्थं प्रोक्षणमस्त्वित्युक्तम्। कस्य स्नानं ? सर्वेषां प्रोक्षणम् इष्यते ॥ १२ ॥

[एषामभिषिक्तानामुन्नेतृकृतमुन्नयनम्]

उन्नेतैनानुन्नयति ॥ १३ ॥

उन्नेता अध्वर्युपुरुष एतान्स्नातान् उन्नयति उत्तारयति ॥ १३ ॥

[उन्नीयमानानां मन्त्रजपः]

उन्नेतरुन्नयोन्नयोन्नेतर्वस्वो अभ्युन्नया न इत्युन्नीयमाना जपन्ति ॥१४॥

उन्नेतरुन्नयोन्नयोन्नेतः इति एतं [7]यथासमाम्नातं मन्त्रमुन्न[? नी]यमाना ऋत्विजो जपन्ति[7] ॥ १४ ॥

[उदकादुद्गमनमन्त्रकथनम्]

उद् वयं तमसस्परीत्युदेत्य ॥ १५ ॥

'उद्वयं तमसस्परि' (ऋ १, ५०, १०) इति एतामृचम् उदेत्य जपन्तीत्यधिकारः ॥ १५ ॥

[अत ऊर्ध्वं समाप्तिपर्यन्तं हृदयशूलवत्कर्मकरणम्]

समानमत ऊर्ध्वं हृदयशूलेनाऽऽ संस्थाजपात् ॥ १६ ॥

---

१. नास्ति ब[2]। २-२. इत्येतयर्चा मूको। ३. यजुषान् मूको। ४. नास्ति ब[2]। ५. प्रवे° ब[2]। ६. स्नानान्तप्र° ब[2]। ७-७. नास्ति ब[1,2]।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

अतः अस्माज्जपाद् ऊर्ध्वं हृदयशूलेन समानं कर्म तुल्यम् आ संस्थाजपात् ॥ १६ ॥

[समाप्तकर्मणां संस्थाजपेनोपस्थानम्]

संस्थाजपेनोपतिष्ठन्ते ये येऽपवृत्तकर्माणः ॥ १७ ॥

सह संस्थाजपेन उक्तम् 'नेदमादिषु हृदयशूलमर्वागनूबन्ध्यायाः' (आश्रौ ४, १२, ६-७) इति । तस्मादिह सावभृथे हृदयशूलोद्वासनं न विद्यते । अभावात् तदङ्गं यत् कर्म 'अनवेक्षमाणा[1] असंस्पृशन्तः प्रत्यायन्तः समिधः कुर्वते' (आश्रौ ३, ६, २५) इत्येवमादि यत्, तदवभृथात् प्रत्येत्य न विधीयते । सर्वकर्मणां पाशुकत्वात् सर्वकर्तॄणां न[2] भवति । यत्पाशुकं तदधिकृतानामेव भवति । आ संस्थाजपादिति वचनादनवेक्षमाणाः[1] असंस्पृशन्तः प्रत्यायन्तः । समिधो ग्रहणादि कृत्स्नं कर्म उपस्थानान्तमुपदिष्टम् । तदेतदपाशुकं कर्म वचनात् सर्वकर्तॄणामुपदिष्टम् । तस्माद्धोत्रादीनामपि संस्थाजपः प्राप्तः, तस्मादिदमुच्यते—संस्थाजपेनोपतिष्ठन्ते ये येऽपवृत्तकर्माण इति—समाप्तकर्माण इति । येषामिष्ट्यां श्रौतकर्म[4] न विद्यते ते[5] अपवृत्तकर्माणो भवन्ति ब्राह्मणाच्छंस्यादयः, तेषां संस्थाजपेनोपस्थाय तीर्थेन निष्क्रम्य नियमो भवति । ये[6] अपवृत्तकर्माण इति सिद्धे ये ये इति वीप्सावचनात् पशुकर्मण्यनधिकृतानामपि ब्राह्मणाच्छंस्यादीनां [7]संस्थाजपः प्राप्तः[7]। यद्यत् समवायि कर्म तत्तदेव सर्वेषां वचनात् प्राप्नोति । संस्थाजपस्तु पशुकर्म । तस्मान्न तदधिकृतानामेव संस्थाजपः स्यात् ॥ १७ ॥

॥ इति षष्ठे त्रयोदशं खण्डम् ॥

---

१. अनपेक्ष्य° मूको । २. नास्ति मूको । ३. अनपेक्ष° (क्ष्य° मै) मूको । ४. शौचकर्म मूको । ५. नास्ति मूको । ६. त्रुटितम् मै । ७-७. °जपः (°प?) प्राप्तिः ब[1] मै ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

अथ षष्ठेऽध्याये चतुर्दशः खण्डः

[गार्हपत्येऽग्नावुदयनीयेष्टिप्रयोगविधानम्]

गार्हपत्य उदयनीयया चरन्ति ॥ १ ॥

गार्हपत्ये शालामुखीये। उदयनीया नाम इष्टिः, तया गार्हपत्ये चरन्ति। तस्मिन्नेव हविः साधयन्ति[1]। तस्मिन्नेव यजन्ति ॥ १ ॥

[प्रायणीयेष्टिवदुदयनीयेष्टिविधानम्]

सा प्रायणीययोक्ता ॥ २ ॥

सा प्रायणीययेष्ट्या उक्ता[2]। सा इति वचनात् सा[3] स्वप्रधाना भवति। यावदतिदिष्टं प्रायणीयया क्रियते। देवता याज्यानुवाक्या संयाज्या ऋत्विज इत्यतिदिष्टम्। स्वर आज्यभागप्रतिषेधश्च अतिदेशाभावात् प्रकृत्या। इष्टिन्यायेन तीर्थं च। सौमिके च यथा पत्नीसंयाजानाम् ॥ २ ॥

[प्रायणीयायां प्रथमा पथ्या स्वस्तिर्देवता इहोत्तमा भवतीति कथनम्]

पथ्या स्वस्तिरिहोत्तमाऽऽज्यहविषाम् ॥ ३ ॥

गार्हपत्ये चोदितत्वात् पथ्या स्वस्तिः इह उदयनीयायाम् आज्यहविषां देवतानाम् उत्तमा भवति। कथं भवति। चतुर्थी भवति। प्रायणीयाधिकारा-दिहेत्युच्यते। आज्यहविषामुत्तमा भवति, न सर्वहविषाम् ॥ ३ ॥

[याज्यानुवाक्ययोर्मिथो वैपरीत्यविधानम्]

विपरीताश्च याज्यानुवाक्याः ॥ ४ ॥

या अनुवाक्यास्ता[4] याज्याः, या याज्यास्ता अनुवाक्या इति। चशब्द इहेत्यधिकारसमुच्चयार्थः। इहैव विपर्यासो न प्रायणीयायामिति ॥ ४ ॥

[प्रायणीयोदयनीययोः कर्तृसाधारण्यविधानम्]

ते चैव कुर्युर्ये प्रायणीयाम् ॥ ५ ॥

---

१. साध्यन्ति (°ति मै) मूको। २. नास्ति मूको। ३. नास्ति मै। ४. °क्या सा मूको।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

ते चैव इह कुर्युः, ये प्रायणीयाम् ऋत्विजः, ते अत्र कुयुः । च-शब्दोऽवधारणार्थः । त एव ऋत्विजो नान्ये । अस्मादारम्भाद् अन्योऽन्यस्य कर्माणि करोतीति ज्ञातं भवति । सवनान्यधिकृतानि । 'य एव' सवनेषु ऋत्विजस्ते अधिकृताःते एव प्राप्ताः । तस्मादाह—ये प्रायणीयामिति ॥ ५ ॥

[संयाज्ययोः प्रायणीयेष्टिवत्कर्तव्यत्वम्]

प्रकृत्या संयाज्ये ॥ ६ ॥

प्रकृत्या संयाज्ये, विपर्यासो न भवति । पूर्वेण प्राप्तो विपर्यासः ॥ ६ ॥

[उदयनीयेष्टिसमाप्तावनूबन्ध्येष्टिविधानम्]

संस्थितायां मैत्रावरुण्यनूबन्ध्या ॥ ७ ॥

संस्थितायाम् इष्टचाम् अनन्तरं [२]मैत्रावरुणी अनूबन्ध्या[२] । मित्रावरुणौ [३]देवता यस्याः सेत्यनुक्रमार्थम्[३] ॥ ७ ॥

[सदस्यनूबन्ध्येष्टिप्रयोगविधानमिति मतप्रदर्शनम्]

सदस्येके ॥ ८ ॥

सदसि आसीनो होता यजतीति एके मन्यन्ते । [४]अग्नीषोमीयस्य न्यायेन[४] दण्डप्रदानम्[५] ॥ ८ ॥

[उत्तरवेद्यामनूबन्ध्येष्टिप्रयोग इति मतान्तरम्]

उत्तरवेद्यामेके ॥ ९ ॥

उत्तरवेद्यां दण्डं प्रवाय मैत्रावरुणमग्रतः कृत्वोत्तरेण हविर्धाने प्रतिव्रज्य सदसि कर्म कुर्यादिति एके । उत्तरवेद्यामेव[६] दण्डप्रदानान्तं कृत्वा तत्रैव यत्र स्रुच आज्यानि च आसन्नानि, तत्समीपे उपविश्य [७]पाशुकं कर्म[७] कुर्यादित्येवं मन्यन्ते । एके इति द्विर्वचनात् तृतीयोऽपि विकल्पो भवति हविर्धानयोर्वा । यदा तत्र स्रुच आज्यानि च सादयन्ति, तदा तत्समीपे उपविश्य कर्तव्यम् । तस्मात् सदसः विनिःसृप्ता[८] ऋत्विजः । पुनर्वचनमन्तरेण[९] प्रपदनमन्याय्यम् । तस्माद् यत्राध्वर्युः आज्यादीन्यासादयति, तत्समीपे उपविश्य कर्तव्यमित्येके मन्यन्ते ॥ ९ ॥

१-१. नास्ति ब[1]; स एव ब[2] मै । २-२. नास्ति मूको । ३-३. देवतायामित्यनु° मूको । ४-४. °मीयसन्यायेन ब[1] । ५. दण्डदानम् ब[1]; छन्दप्रदानम् ब[2] मै । ६. उत्तरमेव मूको । ७-७. प्राशुकर्म मूको । ८. तु. आश्रौ ६,१२,२ । ९. पूर्वव° ब[2] ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

[हुतायां वपायां त्वाष्ट्रेण पशुना चरणम्]

हुतायां वपायां यद्येकादशिन्यग्रतः कृताऽग्नीषोमीयेण संचरेण व्रजित्वा गार्हपत्ये त्वाष्ट्रेण पशुना चरन्ति ॥ १० ॥

[1]अनूबन्ध्याया हुतायां वपायां[1], चात्वाले मार्जयित्वा तीर्थेन निष्क्रम्येति प्राप्तम्,[2] अनिष्क्रम्यैव यद्येकादशिनी अग्रतः सवनेषु कृता भवति। अग्नीषोमप्रणयने भवः सञ्चरः अग्नीषोमीयः सञ्चरः, तेन अग्नीषोमीयेण सञ्चरेण[3] व्रजित्वा गार्हपत्ये शालामुखीये, त्वष्टा देवता यस्य सः[4] त्वाष्ट्रः, तेन त्वाष्ट्रेण पशुना चरन्ति। तन्त्रमध्ये चोदितत्वात् तदेव तन्त्रं प्राप्तं, पशुपुरोळाशवचनात् पृथक् तन्त्रं विधीयते। एकादशिनी वैकल्पिकी। तस्माद् यदीत्याह। अग्रत इत्यनुच्यमाने एकादशानूबन्ध्या यत्र भवन्ति तत्र त्वाष्ट्रः स्यात्। यूपैकादशिन्यामेव कृतायां त्वाष्ट्रो भवतीत्येके आहुः। सञ्चिते तत्र 'त्रयोदश यूपान्' (आपश्रौ १४,५,६) इति वचनात् पश्वेकादशिन्यामपि भवतीत्यपरे। यद्येकादशिनी एकपशुना पशवो विकल्पन्ते (तु० आपश्रौ १७, २२, ६; ८) [5]इत्यध्वर्यूणाम्। एकयूपेन यूपा एव विकल्पन्ते[5] तेन पशवः। तस्मात् [5]पशुषु कृतेषु[5] त्वाष्ट्रोऽपि कर्तव्यो भवति। अग्नीषोमीयेण सञ्चरेणेति वचनाद् एतदेव तीर्थं दर्शयति, यथाऽग्नीषोमप्रणयने अयमेव चात्वालः। अस्य कर्मणः अत्रैव मार्जनम्। आहवनीये प्राप्ते गार्हपत्यो विधीयते। पशुग्रहणादाज्येन समापने आज्यं[6] पशुधर्म[7] भवति। वक्ष्यति च 'पशुवन्निपातान्' (आश्रौ ६,१४,१४) इति। अध्वर्यूणामप्युक्तम् 'पशुधर्माज्यं भवति' (आपश्रौ १४, ७, १५) इति ॥ १० ॥

[यूपस्याञ्जनाद्युत्सर्गकर्मविधानम्]

अञ्जनादि पर्यग्नि कृत्वोत्सृजन्त्यपुनरायनाय ॥ ११ ॥

अञ्जनादि यूपाञ्जनमसी[8] यूपं प्रविशति। कृतार्थः [9]स पुनः[9] संस्कारं प्राप्नोति। अन्यस्मिन् पशावालभ्यमाने 'सगर्म्योऽनु सखा सयूथ्यः' (आश्रौ ३,३,१) इति। तत्र अञ्जनमुच्छ्रयणं परिव्ययणमग्निमन्थनं सामिधेन्यादि पर्यग्निकरणान्तं कर्म। वेदिश्रोण्यां सर्वं कर्म क्रियते याज्योदयनीयायाम्।

यद्युत्सृज्य न[10] समापयन्ति, तदा दण्डं गार्हपत्ये प्रक्षिप्य, 'अग्नौ दण्डमनुप्रहरेदनवभृथे' (आश्रौ ३, ६, २२) इति वचनात्। ततः पूर्वया द्वारा निष्क्रम्य उत्तरेणाग्नीध्रीयं गत्वाऽनूबन्ध्यायाः पशुपुरोळाशेन चरन्ति ॥ ११ ॥

१-१. नास्ति ब[2]। २. तु. आश्रौ ३,५,१; ४। ३. नास्ति मूको। ४-४. नास्ति मै। ५-५. पशुष्वकृ° मूको। ६. आद्यं ब[2] मै। ७. पशुकर्म मूको। ८. °नमा (°म ब[2]) सो मूको। ९-९. नास्ति ब[2]। १०. नास्ति ब[1]।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

[अध्वर्युवद्धोतुरपि पशुकर्मसमापनम्]

यदि त्वध्वर्यव आज्येन समाप्नुयुस्तथैव होता कुर्यात् ॥ १२ ॥

यदि तु अध्वर्यव आज्येन पशुं समाप्नुयुः, पशुन्यायेनेष्टिन्यायेन वा तथैव होता कुर्यात् । यदीत्यनित्यभावे । पर्यग्निकृतमुत्सृजन्ति । सैव तस्य संस्था । यदि तु आज्येन समाप्नुयुः, तस्य विधानं वक्ष्यते । तु-शब्दस्तदन्तं व्यावर्तयति । अध्वर्यव इति वचनाद् अध्वर्युप्रत्ययं समापनं पशुविधानमिष्टिविधानं वा, न स्वप्रत्ययार्थम्[1] । सर्वार्थत्वादाज्यस्य आज्येन समापयन्ति । पाशुके कर्मणि कृते[2] यदि इष्टिन्यायेन समापयन्ति, तथैव कुर्यात्, प्रैषान्न ब्रूयादित्यर्थः । यदिदं नारभ्यते प्रैषप्रतिषेधो न प्राप्नोति, 'अन्वादेशे [3]व्यक्तचोदनाम्' (आश्रौ ३, ४, १०) इति वचनात्[3] । होतृग्रहणमध्वर्योरधिकारात् । तत्र येषां पशुधर्माज्यं[4] भवति, तथा सति अध्रिगुः[5] भवति । स्तोकीया मनोता इत्येतानि क्रियन्ते । येषां पशुधर्माज्यं[6] न भवति, तेषां पशुकारा अध्रिग्वादयो न क्रियन्ते । इष्टिन्यायेन शेषं समापयन्ति । पशुपुरोळाशस्य प्रैषो न विद्यते । स्विष्टकृतस्य च इळाया ऊर्ध्वं मनोता न विद्यते । यदि वनस्पतेः प्रैषो भवति, तस्मिन्निष्टिवद् देवता[7] निगमाः क्रियन्ते[8], नाज्यस्य, न च पशोः । यत्राग्नेः प्रिया धामानि, यत्र सोमस्य प्रिया धामानि, यत्र त्वष्टुः प्रिया धामानि इति । यदि प्रेष्येति न ब्रूयुः [9]तदा याज्यायां[9] देवतानिगमाः कर्तव्याः[10], वनस्पतेः स्विष्टकृद्विकारत्वात्, यथा स्विष्टकृति याज्यायाम् । ये यजामहे वनस्पतिमग्नेः प्रिया धामानि अग्नेर्होतुः । 'वनस्पते-रशनया नि०' (ऋखि ५, ७, २, ९) इति याज्यास्विष्टकृति प्रैषो न विद्यते अनुवाक्या याज्या[11] च । याज्यायामिष्टौ[12] च निगमो भवति । ऊर्ध्वमिळाया एकादशानुयाजाः । सप्रैषाः पृषदाज्येन इज्यन्ते[13] । [14]वनस्पतौ च सूक्तवाकप्रैषो[14] न विद्यते । सूक्तवाकादि समानम् । पत्नीसंयाजान्तं कृत्वा तेनैव सञ्चरेण निष्क्रम्यानूबन्ध्यायाः पशुपुरोळाशेन चरन्ति[15] । पशुन्याये क्रियमाणे सति[16] पाशुकं कर्म कृत्स्नं सप्रैषं[17] भवति । तत्र यदि आज्यं प्रतिनिधिर्भवति तदा आज्यस्य छागशब्दो भवति । 'प्राकृतास्त्वेव मन्त्राणां शब्दाः । प्रतिनिधिष्वपि' (आश्रौ ३, २, १८-१९) इति वचनात् तद्धर्मवत् स्यादिति । अध्वर्यूणां वपाशब्दो वपायां पुरोळाशशब्दः पुरोळाशे । येषां तु पशुन्याय एव आज्यं प्रतिनिधिर्भवति,

---

१. °त्ययमर्थः मूको । २. प्रकृते मै । ३-३. °चोदनात् ब[1]; °चोदनादिति° ब[2] मै । ४. पशुकर्माज्यं (°र्माद्यं ब[2] मै) मूको । ५. मन्त्रविशेषः । ६. पशुकर्माज्यं मूको । ७. °निगम ब[1] मै । ८. क्रियते मूको । ९-९. तदयोज्यां (°य्यां ब[2]) मूको । १०. कर्तव्यः ब[2] । ११. याज्यां मूको । १२. याज्यामिष्टि ब[1/2]; याज्यायामिष्टि मै । १३. यजन्ति ब[1/2]; यन्ति मै । १४-१४. वनस्पति च (°ति ब[2]) सूक्तप्रैषो मूको । १५. न चरन्ति मै । १६. सर्वं मूको । १७. संप्रैषं ब[1] मै; साप्रैषं ब[2] ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

तदा आज्यस्य छागशब्दो न क्रियते, न च वपाशब्दः, न च पुरोळाशशब्दः। त्वष्ट्रे आज्यस्यानुब्रूहीति संप्रैषः। यथाऽऽज्यभागस्य प्रैषस्तथा भवति। कस्मादाज्यं सर्वार्थहविषः[1] स्थाने भवति। छागशब्दोऽर्थाल्लुप्यते। छागस्थाने भवत्यादेशश्च होता यक्षत्त्वष्टारमाज्यस्य जुषतामिति। होता यक्षत्त्वष्टारमाज्यस्य हविषः प्रैषः[2]। सूक्तवाकप्रैषे पुरोळाशशब्दस्य स्थाने आज्यशब्दं कुर्यात्। छागस्थाने 'संप्रैषवदादेशान्' (आश्रौ ६, १४, १३) इति वचनाद् वनस्पतेः प्रैषः स्विष्टकृत्प्रैषश्च[3]। अस्मिन् पक्षे पशुसंस्कारार्थाः[4] न विद्यन्ते। अध्रिगुं न कुर्यात्। [5]सर्वे पशुधर्मास्ते[5], एवमेके। अपरे पुनः प्रतिनिधिर्भवतीति। एतस्मिन्नेव पक्षे 'पशुधर्माज्यम्' (आपश्रौ १४, ७, १५) इत्येतस्मादेव वचनात् पशुधर्माः अध्रिग्वादयः सर्वे क्रियन्ते। आज्यशब्देनैव प्रयोगो न छागशब्देन। त्वष्ट्रे आज्यस्य वपाया मेदसः इति संप्रैषः। तथा सति सर्वत्र छागस्थाने आज्यशब्दः प्रयोक्तव्यः पुरोळाशस्थाने च ॥ १२ ॥

[संप्रैषवत्पश्वङ्गदेवतानामादेशकरणम्]

संप्रैषवदादेशान् ॥ १३ ॥

वपापुरोळाशहविष्षु यथाऽध्वर्युः संप्रैषानाह, तथा प्रैषे पश्वङ्गदेवतानाम् आदेशान् कुर्यात्। अव्यक्तचोदनायां व्यक्तचोदना[6] कर्तव्या प्राप्ता[7], तन्निवृत्त्यर्थं संप्रैषवदादेशा विधीयन्ते। तत्र पशुन्याये प्रतिनिधिपक्षे त्वष्ट्रे छागस्य वपाया मेदसः इति संप्रैषः। अप्रतिनिधिपक्षे त्वष्ट्रे आज्यस्यानुब्रूहि इति। त्वष्टुः आज्यस्य वपाया मेदस इति वा। इष्टिन्याये त्वष्ट्रे अनुब्रूहि त्वष्टारम्।

एतेषु चतुर्षु कल्पेषु प्रैषा वक्ष्यन्ते। होता यक्षत्त्वष्टारं छागस्य वपाया मेदसः। होता यक्षत् त्वष्टारमाज्यस्य जुषताम्। होता यक्षत्त्वष्टारमाज्यस्य वपाया मेदसः इति। एवं त्रिषु कल्पेषु भवति। इष्टिन्याये तु प्रैषो न विद्यते। अनुवाक्या याज्या एव भवन्ति ॥ १३ ॥

[पाशुककर्मवद्वपाशुकेऽपि कर्मणि प्रैषनिपातानां वचनम्]

पशुवन्निपातान् ॥ १४ ॥

पश्वङ्गदेवतादेशे योऽन्यः प्रैषशेषः स निपात इत्युच्यते। कथम्। सर्वपशुषु प्रैषा निपतन्ति, तस्मान्निपाताः। आदेशास्तु पशौ पशावन्ये भवन्ति। तस्मात् ते निपाता न भवन्ति। पशुना तुल्यं पशुवत् पशाविव निपातान्ते प्रैषान् ब्रूयात्। संप्रैषवदादेशाः। अपशव आज्यशब्देन कृतास्तस्मात् प्रैषे पश्वङ्गानामुद्धारः

---

१. सर्वार्थहविः हविः ब[1]। २. नास्ति ब[2]। ३. °प्रैषे च मूको। ४. संस्कारार्था ब[1]। ५-५. सर्वपाशुकर्मस्ते मूको। ६. व्यक्तचोदनायां व्यक्तचोदनात् मै; व्यक्तचोदनात् ब[1/2]। ७. तु. आश्रौ ३, ४, १०।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

प्राप्तः 'पार्श्वतः श्रोणितः शितामत उत्सादतो अङ्गादङ्गादवत्तानाम्' (ऋखि ५, ७,२,६) इत्येवमादीनाम् । अस्मादाज्ये प्रयुज्यमाने पश्वङ्गानामुद्धारार्थं पशुवन्निपातानित्युच्यते । तस्माद् वचनाद् वा पशुधर्माज्यं भवति । समाप्य 'या यजेयुः' अध्वर्यवस्ता देवता वक्ष्यन्ते । 'धाताऽनुमती राका सिनीवाली कुहूः' (आश्रौ ६,१४,१५) इत्येताः पञ्च देवताः । तासां याज्यानुवाक्या वक्ष्यन्ते ॥ १४ ॥

[अनूबन्ध्ये पशुपुरोडाशमनु देविकाहविषां निर्वपणे देवतानां निर्देशः]

यद्यनूबन्ध्ये पशुपुरोळाशमनु देविकाहवींषि निर्वपेयुर्धाताऽनुमती राका सिनीवाली कुहूः ॥ १५ ॥

यदि इत्यनित्यभावे । त्वाष्ट्रस्याधिकाराद् अनूबन्ध्ये इत्याह । देविकाहवींषि इति ब्राह्मणसंज्ञा 'देविकाश्च देवीश्चोभयीर्यज्ञे सममादयम्' (ऐब्रा ३, ४८) इति । संव्यवहारज्ञाने धर्मः ॥ १५ ॥

[देवतानां याज्यानुवाक्याप्रदर्शनम्]

धाता ददातु दाशुषे प्राचीं जीवातुमक्षितम् । वयं देवस्य धीमहि सुमतिं वाजिनीवतः । धाता प्रजानामुत राय ईशे धातेदं विश्वं भुवनं जजान । धाता कृष्टीरनिमिषाऽभिचष्टे धात्र इद्धव्यं घृतवज्जुहोतेति ॥ १६ ॥

धाता ददातु दाशुषे इति यथासमाम्नाते धातुर्याज्यानुवाक्ये । अनुमत्याः सर्वपृष्ठेषु[2] राकादीनां तिसृणां देवतानां पत्नीसंयाजेषु[3] याज्यानुवाक्या । तत्र द्विर्धातारं यजन्ति । तथा सति ते एव याज्यानुवाक्ये 'अदृष्टादेशे' (आश्रौ २,१,८) इति वचनात् । 'तद्धैक आहुर्धातारमेव सर्वासां पुरस्तात् पुरस्ताद् आज्येन परि यजेत् तदाऽऽसु सर्वासु मिथुनं दधाति' (ऐब्रा ३, ४७) इति ब्राह्मणम् । अस्मिन् पक्षे च [4]ते एव[4] याज्यानुवाक्ये भवतः । तथाऽऽचार्याणां विकल्पितम्—'महिम्ना पुरस्तादुपरिष्टाच्च वपानां चरन्ति' (आश्रौ १०, ९, ४) इति । अध्वर्योरपि दृश्यते । 'अग्नये भ्राजस्वते [5]पुरोळाशमष्टाकपालं सौर्य[5] चरुमग्नये भ्राजस्वते' (तैसं २, ३, ८, १) इति । अत्रापि ते एव याज्यानुवाक्ये । यदुक्तं ब्राह्मणे—'तदु वा आहुर्जामि वा एतद् यज्ञे क्रियते यत्र समानीभ्यामृग्भ्यां समानेऽहन्यजतीति' (ऐब्रा ३, ४७) इति[6] । अनेन वाक्येन समानेऽहनि समानी-

---

१-१. याजयेयुः ब[1]; त्वापेयुः ब[2] मै । २. सर्वपृष्ठे मूको । तु. आश्रौ ४, १२, १ । ३. पत्नीसंयाज्ये मूको । तु. आश्रौ १,१०,७-८ । ४-४. नास्ति मूको । ५-५. °कपालं निर्वपेत् सौ° मूको । ६. नास्ति मूको ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

भ्यामिज्या प्रतिषिद्धा, असमानीभ्यामपि प्रतिषिद्धा [1]एव, तस्मात् पूर्व एव कल्पः अग्रतः। 'तद् यदासां धातारं पुरस्तात् पुरस्ताद् यजति तदासु सर्वासु मिथुनं दधाति' (ऐब्रा ३, ४७) इति ब्राह्मणे समानेऽहनि† समानीभ्यामिज्या प्रतिषिद्धा असमानीभ्यामपि‡ प्रतिषिद्धा[1]। तत्र समानीभ्यामिज्या प्राप्ता 'अदृष्टादेशे नित्ये' (आश्रौ २, १, ८) इति वचनात्। 'समानीभ्यां[2] यजति' (ऐब्रा ३, ४७) इति वचनाच्च ब्राह्मणसूत्रे धातारम्। तस्मात् समानीभ्यामेवेज्याऽनुरूपतरा[3] ॥ १६ ॥

[पशुपुरोडाशमनु देवीनां हविषां निर्वपणे देवतानां निर्देशः]

देवीनां चेत् सूर्यो द्यौरुषा गौः पृथिवी ॥ १७ ॥

देवीनां चेद्वर्वीषि पशुपुरोळाशमनु निर्वपेयुरध्वर्यवः। तासां देवतानां याज्यानुवाक्याश्च वक्ष्यन्ते। चेदित्यनित्यभावे। देविका भवन्ति देवीर्वा। 'अन्यतराभिर्वा तं काममाप्नोति य एतासूभयीषु' (ऐब्रा ३, ४८) इति ब्राह्मणे। उभयैर्वा भवन्ति। 'ता उभयीर्गतश्रियः प्रजातिकामस्य सन्निर्वपेद्' (ऐब्रा ३, ४८) इति ब्राह्मणम्। तासां सूर्यो द्यौः उषा गौः पृथिवी इति पञ्च ॥ १७ ॥

[उक्तदेवतानां याज्यानुवाक्याकथनम्]

स्मत्पुरन्धिर्न आ गहीति द्वे आद्यां तनोषि रश्मिभिराहवन्ती पोष्या वार्याणि न ता अर्वा रेणुककाटो अश्नुते न ता नशन्ति न दभाति तस्करो बळित्था पर्वतानां दृळ्हा चिद् या वनस्पतीनाम् ॥१८॥

सूर्यस्य शुनासीर्ययामुक्ते[4] याज्यानुवाक्ये। 'स्मत् पुरन्धिर्न आ गहि' (ऋ ८, ३४, ६-७) इति द्वे ऋचौ दिवः। 'आद्यां तनोषि' (ऋ ४, ५२, ७), 'आवहन्ती' (ऋ १, ११३, १५) इति उषसः। 'न ता अर्वा' (ऋ ६, २८, ४), 'न ता नशन्ति' (ऋ ६,२८,३) इति गोः। 'बळित्था पर्वतानाम्' (ऋ ५, ८४, १) 'दृळ्हा चिद्' (ऋ ५, ८४, ३) इति पृथिव्याः।

अत्र वशाशब्देन यद्यध्वर्युः संप्रैषमाह तथैव अन्वादेशे प्रयोक्तव्यं संप्रैषस्याध्वर्युप्रत्ययत्वात्। यदुक्तं 'छागस्थान [5]उस्रो गौः मेषोऽविको हयोऽश्वः' (आश्रौ ३, ४, १०) इति, तद्व्यक्तत्रोदनार्थम्‡। अध्वर्युप्रत्ययत्वात् छागस्थाने[4] अजशब्दोऽपि भवति। गौर्वशा श्रूयते (?) इति च। अनूबन्ध्यायां कृत्स्नं पशुतन्त्रं तु हृदयशूलान्तम् हृदयशूलबहुत्वान्मन्त्र ऊह्यते ॥ १८ ॥

१-१. नास्ति ब[1]। †. समाने समानेऽहनि ब[2]। ‡. समानीभ्यां ब[2] मै। २. यजेत् मूको। ३. °ज्यानुक्षतरा ब[1,2]; °ज्या···तरा मै। ४. तु. आश्रौ २, २०, ४। ५-५. नास्ति ब[2]। ‡. तदव्यक्त° ब[1] मै।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

[पश्वलाभे पयस्यया कर्मकरणम्]

पश्वलाभे पयस्या मैत्रावरुण्यनूबन्ध्यास्थाने ॥ १९ ॥

पश्वलाभे पशोर्गोरलाभे[1] पश्वलाभे। पशुकामे यज्ञे[2] यत्र पशोरलाभो[3] भवति, तत्र पयस्या मैत्रावरुणदेवत्या अनूबन्ध्यास्थाने भवति। पयसो विकारः पयस्या। मित्रावरुणौ देवता अस्याः सा मैत्रावरुणी। अनूबन्ध्याया गोवशायाः भवति। पशुग्रहणाच्छागादीनामपि प्रतिनिधीनामलाभे पयस्या भवति। अन्यथा गोरलाभ इति ब्रूयात्। अलाभ इति वचनात् पशुलाभे पयस्या न कर्तव्या। अनूबन्ध्यास्थाने इत्युक्ते तद्देवत्या भविष्यतीति[4], न[5] वक्तव्यम् मैत्रावरुणी इति। इदं प्रयोजनम्। मैत्रावरुणी एव पयस्या भवति, अन्यदेवत्या न भवति बार्हस्पत्याऽनूबन्ध्या। अत्र पयस्या न क्रियते, पशुरेव क्रियते। अनूबन्ध्यास्थान इति वचनात्, तद्धर्मप्राप्तिः। तद्धर्मत्वादाज्यभागाविष्ट्वा[6] गार्हपत्ये त्वाष्ट्रेण पशुना चरन्ति[7]। इष्ट्यधिकारात् पशुग्रहणादनूबन्ध्यायां च पशुग्रहणाभावात् पशुरिष्ट्वा भवति। त्वाष्ट्रं संस्थाप्य प्रत्येत्य [8]पयसो विकारैः[8] हविर्भिश्चरन्ति देवीभिर्वा, उभयीभिर्वा ॥ १९ ॥

[अस्याभिष्टौ आज्यभागादिवाजिनान्तं कर्मकरणम्]

आज्यभागप्रभृतिवाजिनान्ता ॥ २० ॥

अस्या इष्टेः आज्यभागावादिर्भवति। वाजिनमन्तो यस्याः सा वाजिनान्ता। सदसि उत्तरवेद्यां हविर्धानयोर्वा निरसनोपवेशनयोः[9] प्रधानार्थत्वान्निरसनोपवेशने कृत्वा उपविश्य आज्यभागाभ्यां यजति[10]। तत्र स्रुगादापनं न[11] विद्यते प्रयाजानामङ्गत्वात्[12]। अत्राज्यभागौ वृधन्वन्तौ प्राप्तौ सान्नाय्यविकारत्वात्। [13]'असमाम्नातासु† अर्थात् तन्त्रविकारः'[13] (आश्रौ २,१४,१४)। समाम्नातासु† पौर्णमासेनातिदेशाद् वार्त्रघ्नौ एव यथा पशौ। सान्नाय्यमितरे पशुस्थाने चोदितत्वात्। मित्रावरुणयोर्याज्यानुवाक्ये दाक्षायणयज्ञे अमावास्यायां व्याख्याते[14]। अत्र देविकाहविषां देवतादेशं कुर्यात्। [15]अन्वायात्या संज्ञा न भवति[15]। अप्रधानानुवर्तित्वात् अप्रधानं

---

१. पशुगौरलाभः ब[1]; पशुगौरलाभ ब[2] मै। २. पले ब[1]; काले ब[2] मै। ३. °रभावो ब[1]। ४. भविष्यति ब[1] मै। ५. नास्ति ब[2]। ६. °गाविष्टचा मूको। ७. भवन्ति ब[1] मै; भवति ब[2]। तु. आश्रौ ६,१४,१०। ८-८. पयस्यया विकारा मूको। ९. निरसनायो ब[2] मै। १०. यजन्ति मै। ११. नास्ति मै। १२. °जानाङ्गत्वात् मूको। १३-१३. नास्ति ब[2]। †. °तासु अर्था (°र्धा मै) सु ब[1] मै। १४. तु. आश्रौ २,१४,११। १५-१५. अन्वायात्यपशुसंज्ञा भ° ब[2]; अन्वायात्यसंज्ञा भ° मै।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

पशुपुरोळाशमनुवर्तते । इष्ट्यामप्रधानमनुवर्तते[1] । तस्माद् [2]अन्वायात्या संज्ञा[2] न विद्यते । [3]पशुपुरोळाशवत् । यथा[3] पशुपुरोळाशस्य प्रधानानुवर्तित्वादादेशः क्रियते । †[4]अन्वायात्या संज्ञा† च न विद्यते । एवं देविकाहविषामपि इष्टिगतानां देवतादेशः[5] क्रियते[5] । अनिगदे संयाज्ये [6]इळावर्जिते इति[6] । यदा तु सामिधेन्यादिः[7] क्रियते इष्टिस्तदा देविकानामपि आवाहनादिषु निगमनं कर्तव्यम् । यथा पौर्णमास्ये वैमृधस्य ॥ २० ॥

[सर्वेषां कर्मिणां वाजिनभक्षणम्]

कर्मिणो वाजिनं भक्षयेयुः ॥ २१ ॥

कर्म विद्यते अस्यामिष्टौ येषां, ते कर्मिणः चाकर्मिणश्च[8] वाजिनं भक्षयेयुः । सिद्धमपीदं पुनरुच्यते दीक्षितानां भक्षविवक्षार्थम्[9] । दीक्षिता भक्षयेयुः इत्युक्ते अदीक्षितानां भक्षप्रतिषेधादिति ॥ २१ ॥

[सर्वेषां दीक्षितानां वाजिनभक्षणम्]

सर्वे तु दीक्षिताः ॥ २२ ॥

कर्मिणश्चाकर्मिणश्च सर्वे तु दीक्षिताः भक्षयेयुः । दीक्षितेषु कर्मिणामेव भक्षः प्राप्नोति, यथा पुरोळाशादीनां हविषाम् । तस्मादाह –सर्वे दीक्षिता इति । वाजिनान्ते प्रायश्चित्तानि न हूयन्ते इष्ट्यन्ते चोदितत्वात्[10] । संस्थाजप एव क्रियते पूर्वमकृतत्वात् ॥ २२ ॥

[सर्वेषां दीक्षितानामुदवसानीयेष्टिचरणम्]

सर्वे तु दीक्षितोत्थिताः पृथगग्नीन् समारोप्योदग्देवयजनान्मथित्वोदवसानीयया यजन्ते ॥ २३ ॥

सर्वे तु दीक्षिताः [11]कर्मिणोऽकर्मिणश्च[11] सर्वे तु दीक्षिताः सन्तः उत्थिताः अपवृत्तकर्माणः पृथगग्नीन्[12] पृथगरणीष्वग्नीन् विभजन्ति । विभक्तान्[13] समारोप्य ते देवयजनाद् उदीच्यां मथित्वा उदवसानीया नाम इष्टिः, तया उदवसानीयया यजन्ते । [14]सर्वे तु[14] दीक्षिताः' (आश्रौ ६, १४, २२) इति [15]पुनर्न वक्तव्यम्[15] ।

---

